1941

Pandit

Devi Prasad Jha

R. P. M. E.

School

Pakra

P.O. Naugachia

Bhagalpur

श्री: 3.3 M.P.2

पूज्य पादारविन्देषु —

लेखने दत्तमिदम् ।

अहं विद्यापुर विद्यालये मध्यमा परीक्षां समुत्तीर्य . मया गतोऽस्मि स्तुतिगीते पुस्त- अतोऽहं प्रेमपाशेन बद्धं नेताहं वृत्तिं संगृह्य स्थास्यामि ।

वैयाकरणसिद्धान्त

॥ श्रीः ॥

श्रीमत्कौण्डभट्टविरचितो

वैयाकरणभूषणसारः ।

काशीस्थसुप्रसिद्ध
श्रीधर्माधिकारिपाठशालायां प्रधानाध्यापकेन
नेने इत्युपाह्व गोपालशास्त्रिणा
अभिनव'सरला'व्याख्यया परिष्कृतः।
संशोधितश्च ।

स च
काशीस्थ-गुप्तबुकडीपो-स्वामिना
श्रीहरिकृष्णदासेन
निजव्ययतो मुद्रयित्वा
प्रकाशितः ।

सन् १९१९

॥ श्रीः ॥

श्रीमत्कौण्डभट्टविरचितो


वैयाकरणभूषणसारः ।

काशीस्थसुप्रसिद्ध श्रीधर्माधिकारिपाठशालायां प्रधानाध्यापकेन
नेने इत्युपाह्व गोपालशास्त्रिणा
अभिनव'सरला'व्याख्यया परिष्कृतः ।
संशोधितश्च ।

स च

काशीस्थ-गुप्तबुकडीपो-स्वामिना
श्रीहरिकृष्णदासेन
निजव्ययतो मुद्रयित्वा प्रकाशितः ।

सन् १९१९ ।



Published by Hari Krishna Das, Proprietor—
"Gupta Book Depot" Kachauri Gali, Benares City:
And
Printed by G. K. Gurjar, Manager Sri Lakshmi Narayan
Press, Jatanbar, Benares City.

श्रीगुरुः शरणम् ।

भूमिका ।

इह खलु संसारे सर्वे प्राणिनः परमसुखावाप्तिपूर्वकात्यन्तदुःखनिवृत्तये स्वभावत एव सततं प्रयतन्ते । परं केनोपायेनैतादृशसुखावाप्तिर्भवति इति निश्चयमनासादयन्तो यत्र कुत्रचिदेवोपाये सुखसाधनत्वभ्रमेण प्रवर्तन्ते, निपतन्ति चानेकजन्ममरणपरम्परारूपे दुःखमहासागरे । तदेतदालोच्य पूर्वमेव दुःखसागरपतिष्यमाणानामेतेषामुत्तारयिषया मातापितृसहस्रेभ्योऽप्यधिकतरवात्सल्यशालिनी भगवती श्रुतिः प्रादुरभूत् । सा च कर्मकाण्ड-उपासनाकाण्ड-ज्ञानकाण्डेति यथाधिकारि व्यभाजि भगवता बादरायणेन । निखिलपुरुषार्थमूर्धन्य आत्यन्तिकत्रिविधबन्धविलयश्च अर्थज्ञानपूर्वकाध्ययनपरिगृहीतस्वाध्यायमात्रायत्त इति निर्विवादम् ।

सकलशब्दानां युगपदर्थज्ञानं च परमविदुषः सकलविद्यागरिष्ठस्य बृहस्पतेः सकाशादधीयानस्येन्द्रस्यापि न समभूदेकैकशः शब्दानामर्थग्रहणेनेति का कथा तत्र पामराणां मर्त्यानाम् ? तदुक्तं पातञ्जलमहाभाष्ये—"इन्द्रश्चाध्येता, बृहस्पतिश्च प्रवक्ता, दिव्यं वर्षसहस्रमध्ययनकालः, नान्तं जगाम, किं पुनरद्यत्वे" इति । एवमालोच्य परमकारुणिको महेश्वरः प्रयागधाम्नि अक्षयवटाधःस्थले उग्रं तपस्तेपुषा पाणिनिना ढक्कानादेन चतुर्दशसूत्रीरूपमाक्षरसमाम्नायं प्रसादीकृत्य तन्मूलकान्यसुसूत्रयत "वृद्धिरादैच्" इत्यादीनि "अ अ" इत्येतदन्तान्यष्टाध्यायीसूत्राणि सर्वेषामल्पायासेन तदर्थावगमायेति ।

प्रसिद्धमेव किल श्रीपाणिनिमहर्षिः पाणिननाम्नो महर्षेः दाक्ष्यामुदपद्यत, अगच्छत् च प्राप्य विद्याग्रहणयोग्यमायुर्नन्दराज्ये निवसतः पण्डितवरिष्ठस्य श्रीमदुपवर्षमहर्षेः समीपं विद्यामधिगन्तुम् । स कदाचित् स्वसतीर्थ्याभ्यां व्याडिवररुचिभ्यां वादे पराजितो निर्विण्णः सन् व्याकरणविद्यासाम्राज्याधिगमाय सर्वविद्याधिपमीशानमुग्रेण तपसाऽऽराधयामास, आससाद च श्रीमन्महेश्वरप्रसादमिति ।

अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥

इत्येतल्लक्षणलक्षितानां सूत्राणां पाणिन्यादिशिष्यवर्ग्यव्याघ्रभूतिश्वोभूत्यादिमहर्षिभिर्व्याख्यातानामपि यथावदर्थग्रहणं न सर्वसुशकमिति अपारीत् तानि वार्तिककरणेन कात्यायनः, अबीभषच्च भगवान् शेषावतारः पतञ्जलिरिति सूत्रवार्तिकभाष्यत्रिगुणात्मको व्याकरणमहोदधिः सम्पन्न इति सुविशदं तज्ज्ञानाम् ।

तत्र च महता यत्नेन महासागरं मथित्वा कौस्तुभमणिमिव यथा कृतार्थाः शब्दकौस्तुभमुद्धृत्य श्रीमद्भट्टोजिदीक्षिता न तथाऽन्ये कृतपरिश्रमा अपि भर्तृहरिसदृशा वैयाकरणधुरन्धरा विद्वांस इति । तत्रत्यकारिकामवलम्ब्यान्वग्रहीषुरिमे श्रीकौण्डभट्टाः सर्वतन्त्रस्वतन्त्राः स्फोटवाद-वैयाकरणसिद्धान्तदीपिका-बृहद्वैयाकरणसिद्धान्तभूषण-वैयाकरणभूषणसारैश्च स्वकृतैर्महानिबन्धैर्वैयाकरणसिद्धान्तानवगन्तुमिति सुविशदमिदं सर्वेषाम् ।

तदत्र नायकमणिमिव देहलीदीपकमिव च प्रकाशमानमिमं वैयाकरणभूषणसारमधिकृत्य किञ्चिदिवात्र प्रस्तावयामः । योऽयं शास्त्रीयमावरणं समूलघातमुपघ्नन् यथार्थनामेति विश्वसिमः । यस्य च प्रणेतारः सारस्वतब्राह्मणजातीया सुगृहीतनामानः श्रीकौण्डभट्टाः महाराष्ट्रदेशान्तर्गतदेवालये देवपूजनोपजीविनो दीक्षितोपाधिकस्य सारस्वतब्राह्मणस्य लक्ष्मीधरशर्मणस्तनूजाद् श्रीमद्रङ्गोजिभट्टात् जन्म लेभिरे । श्रीरङ्गोजिभट्टस्य च सहोदरो भ्राता श्रीभट्टोजिदीक्षितनामधेयः सुप्रसिद्धो बभूव । अत्र च "पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टाभिधम्" "भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये" इति तदीये एव वाक्ये प्रमाणम् ।

श्रीमद्भट्टोजिदीक्षितस्य समयः किल १६४६ षट्चत्वारिंशदधिकषोडशशतको वैक्रमः संवत्सर आसीदिति श्रूयते । तदनुसारेण श्रीकौण्डभट्टस्य सप्तदशशतकार्धाधिकसमयः स्यादित्यनुमीयते ।

यद्यपि व्याकरणशास्त्रसिद्धान्तपरिदर्शका बहवो निबन्धाः विराजन्ते, तथाऽपि वैयाकरणभूषणसारस्तान् सर्वानपि निबन्धानतिशेते, यतः किलायं पदवाक्यघटकप्रकृतिप्रत्ययभागान् तत्तदर्थान् ते कथं परस्परं सम्बद्धा इति च सुस्पष्टं प्रतिपादयति न तथैतदे

प्रक्रियामात्रप्रदर्शयितारो निबन्धा इति । किञ्चास्य ग्रन्थस्य रचनापद्धतिरप्येतादृशी सुलभा मनोल्लासिनी च यत्पाठमात्रेणैवाल्पधियोऽपि तद्रहस्यं शक्नुवन्त्यधिगन्तुम् । प्रकृतिप्रत्ययादिपदभागार्थसम्बन्धप्रदर्शयितॄणामन्येषां सत्त्वेऽपि तेषु केचिन्न्यायसिद्धान्तदर्शकाः केचिन्मीमांसासिद्धान्तप्रदर्शयितार इति न तैः सर्वथा व्याकरणसिद्धान्तावबोधो भवतीति कारुण्याद्दीक्षितेन्द्रैरधिगतसकलग्रन्थतत्त्वैर्महता श्रमेण नानाग्रन्थानालोड्य सुविचार्य च नवनीतमिव सारभूतं 'वैयाकरणभूषणसार' इति यथार्थनामेदं ग्रन्थरत्नं विनिर्मितमिति पण्डितानां छात्राणां च सर्वेषामपि समुपादेयमेव । अत एव बहुषु स्थलेषु इदानीमस्य ग्रन्थस्य बाहुल्येन प्रचारः संलक्ष्यते इत्यत्र न किमपि चित्रम् ।

किं चायं तमेवार्थमभिधत्ते यः किल सूत्राक्षरात्सहसैव प्रतीयते इति ग्रन्थपरिशीलनेनैव ज्ञातुं शक्यते, निरूपयिष्यामि च सुविशदं यथावकाशं वैयाकरणभूषणतत्सारयोः समालोचनायामिति तद्व्यापारेणालम् ।

वैयाकरणभूषणसारस्य तिस्रष्टीकाः सन्ति 'दर्पण काशिका-वैयाकरणमतोन्मज्जिनी' इति नामधेयाः । तत्र तृतीया न समुपलभ्यते इदानीम्, द्वितीया चातिविस्तृता, प्रथमाऽपि न्यायघटितपदार्थबहुलेत्यतिकठिना वर्तते इति मया भूषणसारस्य तदीयाक्षरयोजनामात्रप्रदर्शयित्री 'सरला' इत्यन्वर्थाभिधेया टीका विरचिता। तां च 'गुप्त बुक डीपो' इति प्रसिद्धपुस्तकालयाधिपतिश्रीहरिकृष्णदासमहाशयाः सर्वतन्त्रस्वतन्त्रविद्यावाचस्पति श्री १०८ गुरुवर पं० नित्यानन्दपर्वतीयानामाज्ञया मुद्रणार्थमिदानीमेव मत्तो लब्धाधिकारा मुद्रापयित्वा प्रचारयन्तीति बहूपकृतोऽस्मि तदीयव्यापारेण ।

एतदालोचनकाले यत्र स्खलितमपरिपूर्णता वा प्रतिभायात्तत्रैतन्निबन्धनिवेशनोचितविषय-स्खलितसूचनेन विद्वांसोऽनुग्रहीष्यन्ति येन कृतज्ञताप्रदर्शनपूर्वकं द्वितीयसंस्करणे विद्वन्नाम निर्दिश्य तेऽपि विषया विनिवेश्येरन् ।

प्रार्थये च गुणैकदृशो महाशयानत्र दृष्टिपातानुग्रहेण सफलयन्तु मे श्रममनुभवन्तु च श्रीमद्व्याकरणसिद्धान्तभूषणधारणसुखम् ।

विदुषामनुचरो
नेने इत्युपाह्वो गोपालशास्त्री ।

अथ कौण्डभट्टप्रणीतवैयाकरणसिद्धान्तभूषणसार-विषयानुक्रमः।

इति श्रीकौण्डभट्टप्रणीतवैयाकरणसिद्धान्तभूषणसार-विषयानुक्रमः समाप्तः॥

हरिकृष्णदास
मालिक—"गुप्तबुकडीपो"
कचौड़ीगली, बनारस सिटी।

श्रीसरलाटीकावैयाकरणसिद्धान्तभूषणसारयोः शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
०	प्रतिज्ञातमाह—	४	१
चिङ्क्त्यिादि	किङ्क्त्यिादि	"	४
नागेशस्तु	नागेशास्तु	"	१८
इतिकेन तत्रगुणोविधीयते	केन तत्रगुणो विधीयते इति ।	१०	२३
प्रत्यायार्थात्	प्रत्ययार्थात्	११	५
अनुगव	अननुगत	१७	१४
प्रत्यार्थस्य	प्रत्ययार्थस्य	२०	१३
प्रधान्यबोधके	प्राधान्यबोधके	२२	१२
पमिष्यामः	पयिष्यामः	३७	१६
प्रयोज्वत्वं	प्रयोज्यत्वं	४१	१३
लडायष्टितः	लडादयष्टितः	४६	१३
मत्वान्तररीत्या	मतान्तररीत्या	५७	१२
मीमांसकैर्लैङ्	मीमांसकैर्लेङ्	"	१४
सम्बद्धु	सम्बन्धु	५३	१८
एवागन्तव्यम्	एवावगन्तव्यम्	५६	२०
सूत्रण	सूत्रेण	६८	१५
बाधकूकत्वेन	बाधकत्वेन	७२	१३
स्थितेर्हतुत्व	स्थितेर्हेतुत्व	"	१७
विषयत्यावगतेः	विषयत्वावगतेः	७४	२२
शब्दबोधापत्तिः	शाब्दबोधापत्तिः	१०१	१८
जनकतावच्छदेकत्वेन	जनकतावच्छेदकत्वेन	१०२	२
बोधनास्य	बोधेनास्य	"	४
स्थितित्वनैव	स्थितित्वेनैव	१०७	५

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
सामानधिकरण्या	सामानाधिकरण्या	११४	२१
सकर्मता	सकर्मकता	११६	२२
पचतीत्यदौ	पचतीत्यादौ	१२१	८
वाच्ययाचक	वाच्यवाचक	१२७	२३
अर्थवच्छ्शब्दोऽपि	अर्थवच्छब्दोऽपि	१२८	३
शब्दादादावश्यकी	शब्दादावश्यकी	१३२	६
रूपत्वेनेव	रूपत्वेनैव	„	१२
भात्यप्रतीक	भाष्यप्रतीक	१३९	२२
कत्तृत्वशक्त	कर्तृत्वशक्तें	„	२३
भुषणे	भूषणे	१५१	१०
केश्चिद्व्यक्तय	कैश्चिद्व्यक्तय	१६०	५



॥ श्रीगणेशाय नमः ॥

वैयाकरणभूषणसारः ।

*श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्वं जगदेतद्विवर्तते ॥ १ ॥

गणेशगुरुपादाब्जसेवनाल्लब्धबुद्धिना ।
भूषणार्थावबोधाय क्रियते सरला मया ॥ १ ॥

प्रारिप्सितग्रन्थप्रतिबन्धकसकलदुरितोपशमनाय सकलप्रपञ्चाधारभूतश्रीमद्भगवत्स्तुत्यात्मकं कृतं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति—श्रीलक्ष्मीति । श्रिया लोकोत्तरशोभया सहिता या लक्ष्मीर्मा या । शाकपार्थिवादेराकृतिगणत्वान्मध्यमपदस्य सहितेत्यस्य लोपः । तस्या रमणं दयितं विष्णुमित्यर्थः । हरिहरयोरभेदप्रतिपादनायाह—गौरीरमणेति । गौर्याः पार्वत्या रमणो महादेवस्तेन रूपयति तदभेदेन ग्राहयति तादृशम् । "तुल्यजातौ" इति णिनिः । एतेन गौर्या रमणस्य रूपमस्यास्तीत्यर्थस्य गौर्या रमणो रूपं यस्येति बहुव्रीहिणैव लाभात् लाघवमूलकेन 'न कर्मधारयान्मत्वर्थीय' इति न्यायेन मत्वर्थीयेनिप्रत्ययानुपपत्तिरित्यपास्तम् । नौमीति । णुधातोः कर्तरि लट् । तदर्थश्चोत्कृष्टगुणवत्त्वप्रकारकबोधानुकूलो व्यापारः । तत्र बोधे विष्णोर्निष्ठत्वेनाऽन्वयः । तथा च गौरीरमणाभिन्नश्रीसहितलक्ष्मीरमणनिष्ठोत्कृष्टगुणवत्त्वप्रकारकबोधानुकूलो मदभिन्नाश्रयवृत्तिर्व्यापार इति बोधः । "भावप्रधानमाख्यातम्" इति निरुक्तोक्तेः । स्फोटरूपमिति । स्फुटत्यर्थोऽस्मादिति स्फोटः शब्दः । रूप्यते बोध्यते इति रूपमर्थः । स्फोटश्च रूपं चानयोः समाहारः स्फोटरूपं तादृशं, जगत् । यतो—यस्माद् । विवर्तते—अतात्त्विकान्यथाभावाश्रयो भवति इत्यर्थः । अपरित्यक्तपूर्वरूपस्य रूपान्तरप्रकारकप्रतीतिविषय इति यावत् ॥ १ ॥

*अशेषफलदातारं भवाब्धितरणे तरिम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥ २ ॥
*पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टाभिधं
द्वैतध्वान्तनिवारणादिफलिकां पुम्भाववाग्देवताम् ।
ढुण्ढि गौतम-जैमिनीय-वचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये (१) ॥३॥

अशेषेति । अशेषाणां सम्पूर्णानां फलानां दाता तादृशम् । शेषषष्ठ्या समासः । तेन दातेत्यस्य तृजन्तत्वस्वीकारे "न लोक" इति, तृजन्तपक्षे "तृजकाभ्याम्" इति षष्ठीसमासनिषेधो नेति बोध्यम् ।

भवाब्धीति । भवः संसारो ऽब्धिरिव तस्य तरणं नाशस्तस्मिन् । तरिं—नौकाम्, साधनमिति यावत् । "तरति शोकमात्मवित्" इति श्रुतेः । शेषस्य पतञ्जलेरशेषा अर्था वाच्या, ध्वनिताश्च, तेषां लाभस्तस्मै, शेषो भूषणमलङ्कारत्वेन, पर्यङ्कत्वेन वा यस्य तादृशं-शिवं, विष्णुं वा प्रार्थये । अन्यदीयार्थस्य लोके ऽन्यतो लाभादर्शनेऽपि भगवतोऽशेषार्थदत्वात्तन्मङ्गलम् । एतेन पतञ्जलीयार्थलाभाय तस्यैव प्रार्थनोचितेति शङ्काया अनवकाशः । किञ्च ततोऽपि तत्सेव्यत्वेन प्रधानत्वात् तस्मिन् परब्रह्मणि भगवति संतुष्टे सति तत्सेवकीयार्थप्राप्तिः सुतरां भवितुमर्हति, संतुष्टे राजनि तदीयभृत्यवर्गेभ्य इव, इति तस्यैव प्रार्थनोचितेति बोध्यम् ॥ २ ॥

व्याकरणशास्त्रप्रवर्तकाचार्यपाणिन्यादिमुनित्रयादिनमस्कारात्मकं मङ्गलमाचरन् प्रेक्षावत्प्रवृत्तिप्रयोजकानुबन्धचतुष्टयमध्ये ऽन्येषामुन्नेयतां बोधयन् विषयं दर्शयति— पाणिन्यादीति ।

---

(१) वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा ।
भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये ॥ ३ ॥
नत्वा गणेशपादाब्जं गुरूनथ सरस्वतीम् ।
श्री कोण्डभट्टः कुर्वेऽहं वैयाकरणभूषणम् ॥ ५ ॥

इमौ श्लोकौ मुम्बापुरीस्थराजकीयग्रन्थमालायां मुद्रितपुस्तके तृतीयपञ्चमावधिकावुपलभ्येते । परं च बृहद्वैयाकरणभूषणस्थत्वादस्माभिरुपेक्षितौ ।

प्रारिप्सितप्रतिबन्धकव्यूहोपशमनाय कृतं श्रीपतञ्जलिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नंश्चिकीर्षितं प्रतिजानीते—

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते॥ १ ॥

उद्धृत इति। अत्र अस्माभिरिति शेषः। भाष्याब्धेः शब्दकौस्तुभ उद्धृत इत्युक्तिस्तु शब्दकौस्तुभोक्तानामर्थानामाधुनिकोत्प्रेक्षितत्वनिरासाय। अन्यथा* तन्मूलकस्यास्य ग्रन्थस्याप्याधुनिकोत्प्रेक्षितासारत्वापत्तौ पाणिनीयानामनुपादेयतापत्तेः*। तत्र निर्णीत इत्युक्तिरितोऽप्यधिकं जिज्ञासुभिः शब्दकौस्तुभे द्रष्टव्यमिति ध्वनयितुम्॥ १ ॥

द्वैतेति। द्वयोरनेकस्य भावो द्विता, नानात्वमित्यर्थः। तत्सम्बन्धि द्वैतम्। तदेव ध्वान्तं—तमः। तस्य निवारणमेवाऽऽदि मुख्यं फलं यस्या स्तादृशीम्। पुमान् भावो यस्याः सा, पुरुषाकृतिकेत्यर्थः। पुम्भावा चासौ वागेव देवता ताम्, सरस्वतीरूपामिति यावत्। व्याख्यात्रिति। अनेन गौतमादीनां पाणिन्यादिभिः सह विरोधाभावो ध्वनित इति बोध्यम्। अस्मिन् ग्रन्थे प्रकाश्यत्वेन निर्दिष्टो वैयाकरणसिद्धान्तो विषयः। तदुक्त्यैव तज्जिज्ञासूनामधिकारित्वम्, तज्ज्ञानस्य प्रयोजनत्वम् प्रतिपाद्यप्रतिपादकभावः सम्बन्ध इति सर्वैः सुज्ञेयम्॥ २॥

* कथ्यते इति। इयादिनिबद्धकारिकाभिरिति शेषः। अन्यथा—शब्दकौस्तुभोक्तानामर्थानामाधुनिकोत्प्रेक्षितत्वानिरासे। अनुपादेयतापत्तेरिति। अयं ग्रन्थ आधुनिकोत्प्रेक्षितशब्दकौस्तुभसारतया वैयाकरणैरुपादेयो न स्यादिति तन्निराकरणेन सर्वैरपि वैयाकरणैरवश्यमयमुपादेय इति ध्वनितम्॥ १॥

विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्यया अविवक्षायां विशेष्यविशेषणवाचकपदयोः समानवचनत्वनियमेन

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥२॥

धातुरिति । अत्र स्मृत इति *वचनविपरिणामेनान्वयः । फलं—विक्लित्यादि । व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया । उक्तञ्च वाक्यपदीये—

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते ॥ इति ।

न च साध्यत्वेनाभिधाने मानाभावः । पचति, पाकः, करोति, कृतिः इत्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तराऽऽकाङ्क्षाऽनाकाङ्क्षयोर्दर्शनस्यैव मानत्वात् । तथा च क्रियान्तराऽऽकाङ्क्षानुत्थापकतावच्छेदकरूपं साध्यत्वम् । तद्रूपवत्त्वमसत्त्वभूतत्वम् । एतदेवादाय—

धातुरित्यत्र बहुवचनान्तस्यान्वयासम्भव इत्याह— वचनविपरिणामेति । तद्विवक्षायां तु वेदाः प्रमाणमित्यादि भवत्येवेति निरूपितं व्युत्पत्तिवादे विस्तरेणेति ततोऽवगन्तव्यम् । वाचकत्वेनेति शेषः । फलव्यापारयोरिति द्विवचनेनोभयोः पृथक् धातुशक्तिरिति सूचितम् ।

नागेशस्तु—पृथक्शक्तिस्वीकारे फलव्यापारयोरुद्देश्यविधेयभावेनान्वयापत्तिः । पृथगुपस्थितयोरर्थयोस्तथाऽन्वयस्यौत्सर्गिकत्वात् । किञ्च तत्पदे फलविशेषणकव्यापारबोधे कर्तृ-भाव-प्रत्ययसमभिव्याहृतधातुजन्योपस्थितेः व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितेः कारणत्वमिति कार्यकारणभावद्वयकल्पनम्, धातोरर्थद्वये शक्तिद्वयकल्पनं, धातोर्बोधजनकत्वसम्बन्धद्वयकल्पनं चेत्यतिगौरवम् । तस्मात् फलावच्छिन्ने व्यापारे, व्यापारावच्छिन्ने फले च शक्तिः । कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामकः । न च फलावच्छिन्नव्यापारत्वस्य, व्यापारावच्छिन्नफलत्वस्य च शक्यतावच्छेदकद्वयकल्पनप्रयुक्तं गौरवमेतेषामिति वाच्यम् । भिन्नशक्तिवादिनां फलविशेषणकव्यापारविशेष्यक अवान्त-

असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते ।

इति वाक्यपदीयमिति द्रष्टव्यम् । अयञ्च व्यापारः फूत्कारत्वा-ऽधःसन्तापनत्व-यत्नत्वादितत्तद्रूपेण वाच्यः । पचतीत्यादौ तत्तत्प्रकारकबोधस्यानुभवसिद्धत्वात् । न च नानार्थताऽऽपत्तिः । तदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानामनुगमकस्य सत्त्वात् । आख्याते क्रियैकत्वव्यवस्थाऽपि अवच्छेदकबुद्धिविशेषैक्यमादायैव । उक्तञ्च वाक्यपदीये—

गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥ इति ।

धात्वर्थं निरूप्य तिङर्थमाह—आश्रये त्विति । फलाश्रये, व्यापाराश्रये चेत्यर्थः । फलाश्रयः—कर्म्म । व्यापाराश्रयः—कर्त्ता । तत्र रवाक्यार्थबोधे,कर्तृप्रत्ययसमभिव्याहृतधातुजन्यसमूहालम्बनात्मकोपस्थितिः कारणम् . व्यापारविशेषणकफलविशेष्यकबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्यसमूहालम्बनात्मकोपस्थितिः कारणमिति कार्यकारणभावद्वयकल्पनेऽति गौरवात् । विशिष्टशक्तिवादिनां तु तत्तत्समभिव्याहारवशादवान्तरवाक्यार्थबोधस्थानीयविशिष्टोपस्थितिरेकैवेति न तेषामुक्तकार्यकारणभावद्वयम् । एवं धातोः फलव्यापारसमूहार्थे उपस्थितिशक्तिकल्पनं, विशिष्टार्थे शाब्दबोधशक्तिकल्पनं, शक्तेर्बोधजनकतायाश्चासंबद्धे धातावनुपपत्त्या विशिष्टार्थनिरूपितसंबन्धद्वयकल्पनं च विशिष्टधातावित्यतिगौरवमित्याहुः ॥

वस्तुतस्तु एवं विशिष्टशक्तिस्वीकारे "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति न्यायाद् द्वितीयादिपदार्थान्तरस्य व्यापारविशेषणीभूतफलेन सहाऽन्वयानुपपत्तिः । पदार्थैकदेशत्वात् । अतः खण्डशः शक्तिः स्वीकार्येति मूलाशयः । तत्र च एकवृन्तावलम्बिफलद्वयवत् उभयोरपि पर्यायेण कर्तृकर्मादिसमभिव्याहारे विशेष्यत्वं विशेषणत्वं च सूपपादम् । अस्मिंश्च पक्षे नोद्देश्यविधेयभावेनान्वयापत्तिः । तयोरेकशक्त्योपस्थितेः । नापि कार्यकारणभावद्वयकल्पनादिगौरवमित्यन्यत्र विस्तरः ॥

फलव्यापारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिः। अन्यलभ्यत्वात्। शक्यतावच्छेदकं चाऽऽश्रयत्वं तत्तच्छक्तिविशेषरूपमिति सुबर्थनिर्णये वक्ष्यते।

नन्वनयोराख्यातार्थत्वे किं मानम्, *प्रतीतेः—लक्षणया*, आक्षेपात्, प्रथमान्तपदाद् वा सम्भवादिति चेत्।

अत्रोच्यते "लः कर्म्मणि च भावे चाकर्म्मकेभ्यः" इति सूत्रमेव मानम्। अत्र हि चकारात् "कर्त्तरि कृत्" इति सूत्रोक्तं कर्त्तरीत्यनुकृष्यते। बोधकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्म्मणि, कर्त्तरि चानेन विधीयन्ते। नकारविसर्गादिनिष्ठां कर्म्मकरणादिबोधकशक्तिमादाय शसादिविधानवत्। न च सूत्रे कर्तृकर्म्मपदे कर्तृत्वकर्म्मत्वपरे। तथा च—कर्तृत्वं कृतिः, कर्म्मत्वञ्च फलमेवार्थोऽस्तु, इति शङ्क्यम्। फलव्यापारयोर्धातुलभ्यत्वेन लकारस्य

प्रतीतेरिति। अस्य संभवादित्यनेनाऽन्वयः। फलाश्रयव्यापाराश्रयप्रतीतेरित्यर्थः। लक्षणयेति। ननु आख्यातस्याऽऽश्रयलक्षकत्वे भावनाप्रतीतिर्न स्यात्, अतः तत्प्रतीतिः शक्त्या वाच्या। तस्यां चावस्थायां लक्षणाया असंभवो युगपद्वृत्तिद्वयविरोधात्। भावनाश्रयत्वेन भावनाश्रये लक्षणायां भावनाप्रतीतावपि भावनायाः प्राधान्यं न स्यात्; तस्या विशेषणतयोपस्थितेः, इत्यरुचेराह—आक्षेपादिति। मीमांसकमते अर्थापत्तेर्न्यायमते च अनुमानादित्यर्थः। तत्राद्ये दिवाभोजनाभाववद्देवदत्तनिष्ठेन भोजनं विनाऽनुपपन्नेन पीनत्वेन रात्रिभोजनकल्पनवत् कर्तारं विनाऽनुपपन्नेन व्यापारेण कर्तृरूपाश्रयः कल्प्यते। अन्त्ये भावना आख्यातपदबोध्या कचिदाश्रिता विशेषणत्वेन गृहीतशक्तिकत्वात् घटत्ववत् इति।

ननु मीमांसकमते आक्षिप्तस्य शाब्दबोधे भानेऽपि तस्य विशेषणत्वेनैवोपस्थितेः प्रकृते भावनायाः प्राधान्यानुपपत्तिः, न्यायमते च व्याप्त्यादिप्रतिसंधानं विनाप्याश्रयबोधस्याऽनुभवसिद्धत्वान्नादेपादाश्रयभानोपपत्तिः। इत्यरुचेराह—प्रथमान्तपदाद्वेति। चैत्रः पचतीत्यादौ चैत्रादिपदादेव तदाश्रयप्रतीतेरित्यर्थः॥

पुनस्तत्र शक्तिकल्पनाऽयोगात्।

अथ दर्शनान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात्तत्र लङ्कारविधिः स्यादिति चेत्, तर्हि कृतामपि कर्तृकर्म्मादिवाचित्वं न सिध्येत्। "कर्त्तरि कृत्" इति च "लः कर्म्मणि" इत्यनेन तुल्ययोगक्षेमम्। अपि च मीमांसकानां कृतामिवाख्यातानामपि कर्तृवाचित्वमस्तु, भावनाया एवाऽऽक्षेपेण कृदादिवत्प्रतीतिसम्भवे वाच्यत्वं माऽस्तु। तथा सति प्राधान्यं तस्या न स्यादिति चेत्, न। घटमानयेत्यादावाक्षिप्तव्यक्तेरपि प्राधान्यवदुपपत्तेः। पचतीत्यादौ पाकं करोतीति भावनायां विवरणदर्शनाद् वाच्यत्वमिति चेत् पाकानुकूलव्यापारवतः कर्तुरपि विवरणविषयत्वाविशेषात्। न च कर्तुर्विवरणं तात्पर्यार्थविवरणं—पाकं करोतीत्यशब्दार्थकर्म्मत्वविवरणवत्, इतरेतरद्वन्द्वे समुच्चयांशविवरणवद्वा न तदर्थनिर्णायकमिति वाच्यम्। भावनायामपि तुल्यत्वात्।

किञ्च 'पचति देवदत्तः' इत्यत्राभेदान्वयदर्शनात् तदनुरोधेन कर्तुर्वाच्यत्वमावश्यकम्, पक्ता देवदत्त इतिवत्। न चाभेदबोधे समानविभक्तिकत्वं नियामकम्, तच्च तत्र नास्तीति वाच्यम्। सोमेन यजेत, स्तोकं पचति, राजपुरुषः, इत्यादावप्यभेदबोधानापत्तेः। न च लक्षणया कर्तुरुक्तत्वात् सामानाधिकरण्यम्। पिङ्गाक्ष्यादियौगिकानामपि द्रव्यवाचित्वानापत्तेः। एवं वैश्वदेवीत्यादितद्धितानामपि। "अनेकमन्यपदार्थे" "साऽस्य देवता" इत्यनुशासनेन पिङ्गे अक्षिणी यस्याः, विश्वे देवा देवता अस्या इति विग्रहदर्शनात्प्रधानषष्ठ्यर्थे एव अनुशासनलाभात्। तथा च "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति वाक्ये द्रव्यानुक्तेरारुण्यस्य स्ववाक्योपात्तद्रव्ये एवान्वयप्रतिपादकारुणाधिकरणोच्छेदापत्तिः। द्रव्यवाचकत्वसाधकमूलयुक्तेः सामानाधिकरण्यस्योक्तरीत्यो-

पपत्तेरिति प्रपञ्चितं विस्तरेण बृहद्वैयाकरणभूषणे* ।

तिङ इति । बोधकतारूपा शक्तिस्तिङ्क्ष्वेवेत्यभिप्रेत्येदम् । पदार्थं निरूप्य वाक्यार्थं निरूपयति—फले इत्यादि । व्रिङ्क्षित्यादि फलं प्रति । तिङर्थः-कर्तृ-कर्म्म-संख्या-कालाः । तत्र कर्तृकर्म्मणी फल-व्यापारयोर्विशेषणे, संख्या—कर्तृप्रत्यये कर्त्तरि, कर्म्मप्रत्यये कर्म्मणि । समानप्रत्ययोपात्तत्वात् । तथा चाऽऽख्यातार्थसंख्याप्रकारकबोधं प्रत्याऽऽख्यातजन्यकर्तृकर्म्मोपस्थितिर्हेतुरिति कार्यकारणभावः फलितः। नैयायिकादीनामाख्यातार्थसंख्यायाः प्रथमान्तार्थ एवान्वयादाख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्य्य-

बृहद्वैयाकरणभूषणे इति । तत्र हि—'देवदत्तः पचति' 'पच्यते तण्डुलः' इत्यादिसामानाधिकरण्यादाख्यातस्य कर्तृकर्मवाचकत्वम् । न चेदमसिद्धम् । अन्यस्मिन् पचति सति 'देवदत्तः पचति' इत्यप्रयोगेण तस्यानुभवसिद्धस्य विना हेतुं कर्तृवाच्यत्वमीत्यैवापलापायोगात् । त्वं पचसीत्यादौ युष्मच्छब्दसामानाधिकरण्यस्यानुभवमनुसरता सूत्रकृताऽनूद्य तदनुसारेण पुरुषव्यवस्थाया "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः" इत्यादिना कृतत्वाच्च । अन्यथा नीलो घटः, देवदत्तः पक्ता, चित्रगुर्देवदत्तः, पिङ्गाक्षी गौः, स्तोकं पचति, ज्योतिष्टोमेन यजेत, इत्यादावपि तदपलापापत्तेः । न च पदार्थानामभेदबोधे समानविभक्तिमत्पदोपस्थाप्यत्वं तन्त्रं, तच्चात्र नास्तीति कारणबाधान्न सामानाधिकरण्यमिति वाच्यम् । 'राज्ञः सुतस्य धनम्' इत्यादावतिप्रसक्तत्वेन राजपुरुषः, धान्येन धनी, स्तोकं पचति, ज्योतिष्टोमेन यजेत इत्यादावतिप्रसक्तेश्चाप्रयोजकत्वात् ।

अथ विरुद्धार्थकविभक्तिराहित्यं तन्त्रम् । सुप्तिङोश्च न विरोधः। एवञ्च विशेष्यतासम्बन्धेनाभेदसम्बन्धकतन्नामार्थप्रकारकशाब्दबोधं प्रति तन्नामोत्तरसार्थकविभक्त्युपस्थित्यकालिकतन्नामोत्तरविभिन्नविजातीयसुबसमभिव्याहृतपदजन्योपस्थितिः कारणमिति कार्यकारणभावः फलितः । स्तोकमित्यादौ द्वितीया त्वभेदार्था, साधुत्वमात्रार्था वा । यद्वा विरुद्धरूपेणानुपस्थितिस्तत्र तन्त्रमिति

चेत्, तर्हि 'देवदत्तः पचति' इत्यत्राप्यभेदबोधो दुर्वार इति सिद्धं नः समीहितम् । आख्यातस्य शक्तिकल्पना च कृतां कर्तृशक्त्या-तुल्या, परं तु आख्यातार्थभावनाप्रकारकबोधे प्रथमान्तपदजन्यो-पस्थितिः कारणमिति नैयायिकोक्तकार्यकारणभावान्तरस्य, भाव-नाविशेष्यककर्तृविशेषणकबोधाय मीमांसकीयस्य च तस्याकल्पना-लाघवमस्माकमतिरिच्यते ।

अथास्तु सामानाधिकरण्यं परंतु तद् भावनाक्षिप्तकर्त्रा भविष्यती-त्यसकृद्वार्तिक एवोद्घोषितमिति चेत्, न । आक्षेपो हि यद्याख्यातार्थ-भावनयाऽनुमानं तर्हि 'धूमोऽयं ज्वलति' इत्यादाविव तदसम्भवात् । मैत्रादिपदयोगे तदसम्भवाच्च । लक्षणा चेत् पिङ्गाक्ष्यादियौगिके-ष्वपि द्रव्यवाचित्वं न स्यात् । मूलयुक्तेः सामानाधिकरण्यस्यो-करीत्यैवोपपत्तेः । द्रव्यवाचकत्वसाधकान्तरस्याभावाच्च इति कर्तु-राख्यातवाच्यत्वं प्रपञ्चितम् । किञ्च "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति श्रूयते । तत्रारुणाशब्दो गुणविषयतया प्रयुज्य-मानोऽपि अरुणं गुणमाचष्टे । 'नागृहीतविशेषणा विशिष्टबुद्धिः' इति न्यायाद्, अन्वयव्यतिरेकाभ्यां तत्रैव व्युत्पत्तेश्च । तस्य च तृतीया-श्रुत्या क्रयसाधनत्वं प्रतीयते । तच्चानुपपन्नम् । अमूर्त्तस्य तस्य वासोहिरण्यादिवत् क्रयसाधनत्वासम्भवात् । उक्तं च—

अमूर्त्तत्वाद् गुणो नैव क्रियां साधयितुं क्षमः ।
तस्मात् क्रीणातिना नास्य सम्भवत्येकवाक्यता ॥ इति ।

अतश्च तृतीयाश्रुतेरविनियोजकतया तया ज्योतिष्टोमप्रकरण-गतग्रहचमसादीनां करणतयोपदिष्टाननूद्याऽऽरुण्यरूपो गुणो विधी-यताम् । तथा च अरुणया इति भिन्नं वाक्यं, पिङ्गाक्ष्येति च । तत्राऽऽ-ग्रस्य ग्रेन द्रव्येण किञ्चित् क्रियते, तेनारुणेन इत्यर्थः । एवं च प्राकर-णिकद्रव्यमात्रे आरुण्यनिवेश इति पूर्वपक्षे सिद्धान्तसूत्रम्—"अर्थै-कत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्" इति (अ० ३-पा० १—अधि० ६-सू० १२) अयमर्थः—द्रव्यगुणयोरेकक्रियान्वयित्वरूपार्थै-कत्वे सम्भवति तयोः परिच्छेद्यपरिच्छेदकभावनियमः । ऐककर्म्याद्-एकार्थप्रतिपादकत्वरूपैकवाक्यत्वात् । अयम्भावः—उदाहृतवाक्येन (अ० २-पा० १-अधि० ५-सू० १ द्वितीय-भावार्थाधिकरणन्यायेन (अ० २-पा० १-अधि० ५-सू० १ द्वितीय-वर्णकम्) क्रयो विधीयते । तस्मिंश्च तृतीयाश्रुत्या पिङ्गाक्ष्यादेर्यथा

करणत्वं, तथा आरुण्यगुणस्यापि। तच्च स्वसाध्यक्रियापेक्षिततया पिङ्गाक्ष्यादिद्रव्यमनपेक्ष्यैव वाक्येन साक्षात् क्रयेऽन्वेति। खलेकपोतन्यायेन सर्वकारकाणां साक्षात् क्रियान्वयनियमात्। उक्तं च वार्तिके—

कारकं ह्युच्यते कुर्वत्क्रियां तत्करोति च।
तस्मान्न द्रव्यसम्बन्धः कारकस्यास्ति कस्य चित्॥ इति।

यदि तस्यामूर्त्तत्वात् साक्षात् क्रियासाधनत्वं न सम्भवति इति विभाव्यते, तर्हि क्रयसाधनद्रव्यपरिच्छेदमुखेनान्वीयताम्। तदुक्तं वार्तिके—

तृतीयया गुणस्यैव करणत्वं क्रयं प्रति।
विस्पष्टं गम्यते तत्र द्रव्यद्वारेण युज्यते॥ इति।
द्रव्येण साधनीयेयमिति ज्ञाता यदा क्रिया।
कीदृशेनेत्यपेक्षाऽस्य गुणेऽप्युत्पद्यते तदा॥ इति च।

द्रव्यमप्यपरिच्छिन्नं न क्रियां साधयितुमलमिति परिच्छेदकमपेक्षते। गुणश्च साधनत्वेनोच्यमानः, तां च स्वतः साधयितुमक्षमस्तदर्थं परिच्छेद्यं द्रव्यमपेक्षते इति द्रव्यगुणयोः परस्परमपेक्षितत्वात् सुनिरूपितः पार्ष्णिकः परिच्छेद्यपरिच्छेदकभावेनान्वयः। युक्तं च गुणस्य तत्परिच्छेदकत्वात् क्रियासाधनत्वाभिधानम्। एवं च साधनत्वेन गुणं विदधती श्रुतिः यथैतेन शक्यते क्रियां साधयितुं तथा कुर्यादित्याह। स च द्रव्यपरिच्छेदेनैव शक्नोति साधयितुं, नान्यथा। तथा च अरुणपरिच्छिन्नेन पिङ्गाक्षीद्रव्येण क्रयं कुर्यादित्यर्थस्य पर्यवसानेन वाक्यभेदाभावेन च न चमसादिषु गुणो निविशते। किञ्च प्रकरणेन चमसादिषु गुणनिवेशं वदता वक्तव्यमिदं, इति केन तत्र गुणो विधीयते। न च श्रूयमाणविधिना क्रीणातिना त्वया सम्बन्धस्य नेष्यमाणत्वात्। नाप्यरुणपदस्य विधिशक्तिरस्ति। प्रयोगवचनं त्वक्रियात्मकं दूरादुपेक्षते। मम तु क्रीणातिना सम्बन्धस्येष्टत्वात् सुलभं विधानम्। न चैवं वासोहिरण्यादिषु क्रयसाधनत्वात्तन्निवेशः स्यादिति वाच्यम् तेषां क्रयान्तरसाधनत्वात्। न हि स्ववाक्यगतं पिङ्गाक्षीद्रव्यमुपेक्ष्य वाक्यान्तरोपात्तवस्त्राद्यवच्छेदो युक्तः। तस्मादारुण्यगुणः क्रयहेतुपिङ्गाक्षीमेव भजते। विस्तरस्त्वस्मत्कृतलघुपूर्वमीमांसाऽधिकरणकौमुदीपरिशिष्टाधिकरणे द्रष्टव्यः। तथा च प्रकृते पिङ्गाक्ष्यादि-

कारणभावो वाच्यः*। सोऽपि—चन्द्र इव मुखं दृश्यते, देवदत्तो भुक्त्वा व्रजति इत्यादौ चन्द्रक्त्वाऽर्थयोराख्यातार्थानन्वयाद् इतरा-विशेषणत्वघटित इत्यतिगौरवम्*।

यौगिकपदानां—मतुबर्थे समासस्य विधानात् मतुपश्च "तदस्यास्त्यस्मिन्" इति षष्ठ्यर्थेऽनुशासनेन प्रत्ययार्थत्वात् पिङ्गे अक्षिणी यस्य, विश्वे देवा देवता अस्य, इत्यादौ प्रत्ययार्थसम्बन्धप्राधान्येन विवरणदर्शनाच्च संसर्गवाचित्वात्। उक्तं चारुणाधिकरणवार्तिके—

बहुव्रीहिः समासो ऽयं मतुबर्थे विधीयते।
अस्यात्रेति च सम्बन्धे मत्वर्थीयः प्रवर्तते॥
यस्मिन्नन्यपदार्थे च बहुव्रीहिर्विधीयते।
तत्रापि प्रत्ययार्थत्वात् सम्बन्धस्य प्रधानता॥ इति।

सम्बन्धिप्रतीतेस्तु लक्षणयैव सिद्धेः तदर्थं तच्छक्तेरनावश्यकतया तैः पदैर्द्रव्यस्यानुपादानात् स्ववाक्योपात्तपिङ्गाक्ष्यादिद्रव्यपरिच्छेदकत्वमेवाऽऽरुण्यस्य, न वस्त्रहिरण्यादिपरिच्छेदकत्वं वाक्यान्तरोपात्तत्वात् इति सिद्धान्तानुपपत्तिः। किञ्च पूर्वपक्षोऽपि नोपपद्यते। पिङ्गाक्ष्येकहायनीशब्दार्थसम्बन्धस्याप्यमूर्तत्वात् क्रयकरणत्वासम्भवेन क्रयकरणत्वस्यैतद्वाक्यादलाभादरुणस्यैव वाक्यभेदशङ्कायां हेतोः शैथिल्यात्। एवं च तदधिकरणं सर्वथाऽनुपपन्नं स्यादिति। अधिक विस्तरस्तु बृहद्भूषणतोऽवगन्तव्यः।

*कार्यकारणभावो वाच्य इति—आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति प्रथमान्तपदजन्यकर्तृविषयिण्युपस्थितिः कारणमित्यर्थः।

*अतिगौरवमिति—अयम्भावः। आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति प्रथमान्तपदजन्योपस्थितेः कारणत्वे चन्द्र इव मुखं दृश्यते, देवदत्तो भुक्त्वा व्रजति इत्यादौ चन्द्रादेरपि प्रथमान्तार्थतया तत्राप्याख्यातार्थसंख्याया अन्वयापत्तिः। न चेष्टापत्तिः। चन्द्र इव मुखे दृश्येते इत्यत्र चन्द्रस्यैकत्वेन द्वित्वान्वयासम्भवात्। अतोऽन्यार्थनिष्ठप्रधानतानिरूपित-

*इदमपि कर्तृकर्म्मणोराख्यातार्थत्वे मानमिति स्पष्टं भूषणे।

कालस्तु व्यापारे विशेषणम्। तथा हि—"वर्तमाने लट्" इत्यत्राऽधिकाराद्धातोरिति लब्धम्, तच्च धात्वर्थं वदत्प्राधान्याद् व्यापारमेव ग्राहयतीति तत्रैव तदन्वयः। न च संख्यावत्कर्तृकर्म्मणोरेवान्वयः शङ्क्यः। अतीतभावनाके कर्तरि पचतीत्यापत्तेः, अपाक्षीदित्यनापत्तेश्च। पाकानारम्भदशायां कर्तृसत्त्वे पक्ष्यतीत्यनापत्तेश्च। नापि फले तदन्वयः। फलानुत्पत्तिदशायां व्यापारसत्त्वे पचतीत्यनापत्तेः, पक्ष्यतीत्यापत्तेश्चेत्यवधेयम्। न चाऽऽमवातजडीकृतकलेवरस्योत्थानानुकूलयत्नसत्त्वाद् 'उत्तिष्ठति' इति प्रयोगापत्तिः। परयत्नस्याज्ञानादप्रयोगात्। किञ्चिच्चेष्टादिनाऽवगतौ च अयमुत्तिष्ठति, शक्त्यभावात् फलं तु न जायते इति लोकप्रतीतेरिष्टत्वात्। एवञ्च तिङर्थौ विशेषणमेव, भावनैव प्रधानम्।

यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टं, तथापि "भावप्रधानमाख्यातं, सत्त्वप्रधानानि नामानि" इति निरुक्ताद् भूवादिसूत्रादिस्थक्रियाप्राधान्यबोधकभाष्याच्च धात्वर्थभावनाप्राधान्यमध्यवसीयते। अपि च आख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः सममभेदान्वयात्प्रथमान्तस्य प्राधान्यापत्तिः। तथा च 'पश्य मृगो धावति' इत्यत्र भाष्यसिद्धैकवाक्यता* न स्यात्। प्रथमान्तमृगस्य धावन-

---

प्रकारतानाश्रयत्वेन प्रथमान्तपदजन्योपस्थितेः कारणत्वं वाच्यम्। अत्र तु चन्द्रस्य इवार्थसादृश्यप्रतियोगितयोपस्थितेर्नैतादृशोपस्थितिरिति। अस्माकं तु चन्द्रकत्वार्थयोस्तत्राख्यातार्थत्वविरहेणैवोक्तापत्त्यभावेन नोक्तनिवेशापेक्षेति लाघवम्।

*इदमपि—उक्तनिवेशगौरवमपि। लाघवमपीत्यर्थौ वा 'एकवाक्यतेति'। तल्लक्षणं तु गुरुचरणैर्हलन्तप्रकरणे शब्देन्दुशेखरटिप्पण्यामुक्तं, तत एवावगन्तव्यम्॥ २॥

क्रियाविशेष्यस्य दृशिक्रियायां कर्म्मत्वापत्तौ द्वितीयापत्तेः । न चैवमप्रथमासामानाधिकरण्यात् शतृप्रसङ्गः । एवमपि द्वितीयाया दुर्वारत्वेन 'पश्य मृग'इत्यादिवाक्यस्यैवासम्भवापत्तेः । न च पश्येत्यत्र 'तम्'इति कर्म्माध्याहार्य्यम् । वाक्यभेदप्रसङ्गात् , उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्म्मतयाऽन्वयस्य प्रतिपिपादयिषितत्वाद्, अध्याहारे अनन्वयापत्तेश्च । एवञ्च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयम् । किन्तु आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणमिति कार्य्यकारणभावो द्रष्टव्यः । भावनाप्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवद् धात्वर्थभावनोपस्थितिरपि हेतुः, 'पश्य मृगो धावति' 'पचति भवति' इत्याद्यनुरोधादिति दिक् ।

इत्थञ्च 'पचति'इत्यत्र एकाश्रयिका पाकानुकूला भावना, पच्यते इत्यत्र एकाश्रयिका या विक्लित्तिस्तदनुकूला भावनेति बोधः । देवदत्तादिपदप्रयोगे त्वाख्यातार्थकर्त्रादिभिस्तदर्थस्याभेदान्वयः । 'घटो नश्यति'इत्यत्रापि घटाभिन्नाश्रयको नाशानुकूलो व्यापार इति बोधः । स च व्यापारः प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानम् । अत एव तस्यां सत्यां नश्यति, तदत्यये नष्टः, तद्भावित्वे नङ्क्ष्यतीति प्रयोगः । देवदत्तो जानाति, इच्छतीत्यादौ च देवदत्ताभिन्नाश्रयको ज्ञानेच्छाद्यनुकूलो वर्त्तमानो व्यापार इति बोधः । स चान्तत आश्रयतैवेति रीत्योह्यम् ॥ २ ॥

नन्वाख्यातस्य कर्तृकर्मशक्तत्वे पचतीत्यत्रोभयबोधापत्तिः,*कर्तृ-

---

"सकृदुच्चरितः शब्दः सकृदर्थं गमयति" इत्येतन्मूलकेन 'एकशक्तिनिरूपकार्थविषयकशाब्दबुद्धित्वावच्छिन्नं प्रत्यपरशक्तिनिरूपकार्थविषयकतात्पर्यज्ञानं प्रतिबन्धकम्' इति प्रतिबध्यप्रतिबन्धकभावेन हरिपद इव प्रकृतेऽपि एकस्मात्प्रत्ययादेकस्यैवार्थस्य बोधसम्भव इति नोक्तापत्तिरित्यरुचेराह— * कर्तृमात्रेति । 'पचति' इत्यत्र कर्तृ-

मात्रबोधवत् कर्ममात्रस्याऽपि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह—

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः ।
व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयाऽन्वयम् ॥३॥

तङादयः फले आश्रयाऽन्वयं द्योतयन्ति । फलान्वय्याश्रयस्य कर्मत्वाद्, तद्द्योतकाः—कर्मद्योतकाः । व्यापारान्वय्याश्रयस्य कर्तृत्वात्, तद्द्योतकाः कर्तृद्योतका इति समुदायार्थः । द्योतयन्ति—तात्पर्य्यं ग्राहयन्ति ॥ ३ ॥

नन्वेवं 'कमादमुं नारद इत्यबोधि सः' इत्यादौ 'पच्यते ओदनः स्वयमेव' इत्यादौ च व्यभिचारः । कर्मणः कर्तृत्वविवक्षायां कर्त्तरि लकारे सति "कर्मवत् कर्म्मणा तुल्यक्रियः" इत्यतिदेशेन यगात्मनेपदचिण्चिण्वदिटामतिदेशाद्यगादिसत्त्वेऽपि कर्तुरेव बोधाद्, व्यापार एवाऽऽश्रयान्वयाच्च । अबोधीत्यत्रापि बुध्यतेः कर्त्तरि लुङ् । तस्य "दीपजन"इति चिण्, "चिणो लुक्" इति तस्य लुक् इति साधनात्, इत्याशङ्कायामाह—

उत्सर्गोऽयं कर्म्मकर्त्तृविषयादौ विपर्य्ययात् ।
तस्माद्यथोचितं ज्ञेयं द्योतकत्वं यथागमम् ॥ ४ ॥

कर्म्मकर्त्तृविषयादौ—पच्यते ओदनः स्वयमेवेत्यादौ । अत्रह्योदनाभिन्नाश्रयकः पाकानुकूलो व्यापार इति बोधः । कमादितिआदिपदग्राह्यम् । अत्र सामान्यविशेषज्ञानपूर्वक एकनारदविषयकज्ञानानुकूलः कृष्णाभिन्नाश्रयकोऽतीतो व्यापार इति बोधः । यथोचितमिति । * सकर्म्मकधातुसमभिव्याहृतभावसाधारणविधिविधेयचिण्यगादि कर्म्मद्योतकमिति भावः ॥ ४ ॥

बोधवत् कर्मबोधस्यापि विनिगमनाविरहादापत्तिरिति भावः ॥३॥

* सकर्मकधातुसमभिव्याहृतेति । तेन 'पच्यते तण्डुलः स्व-

(१)एवं*सूचीकटाहन्यायेन सोपपत्तिकं वाक्यार्थमुपवर्ण्य, 'फलव्यापारयोः' इति प्रतिज्ञातं धातोर्व्यापारवाचित्वं लडाद्यन्ते भावनाया अवाच्यत्वं वदतः प्राभाकरादीन् प्रति व्यवस्थापयति—

व्यापारो भावना सैवोत्पादना सैव च क्रिया ।
कृञोऽकर्म्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते ॥ ५ ॥

पचति पाकमुत्पादयति पाकानुकूला भावना तादृश्युत्पादनेत्यादि विवरणाद्विवियमाणस्यापि तद्वाचकतेति भावः। व्यापारपदं फूत्का-

यमेव' इत्यादौ "कर्मवत्कर्मणा तुल्यक्रियः" इत्यत्र शास्त्रातिदेशपक्षे 'भावकर्मणोः' इति शास्त्रेणैव तङो विधानात्तत्र भावसाधारणविधिविधेयत्वस्य यकि सत्त्वेऽपि सौकर्यातिशयद्योतनाय तण्डुलादिकर्मगताऽग्निसंयोगादिरूपव्यापारस्य फलजनकतया धात्वर्थत्वेन, तत्रत्यविक्लित्तिरूपफलस्यैव वा व्यापारत्वेन विवक्षायां कर्मण एव कर्तृत्वनिर्वृत्तेः पच्धातोः सकर्मकत्वाभावेन नातिप्रसङ्गः । भावसाधारणा—भावकर्मोभयार्थकप्रत्ययनिमित्तका ये विधयः "सार्वधातुके यक्" "चिण् भावकर्मणोः" इत्यादयस्तैर्विधेयं यद् यक्चिणादि तत् कर्मद्योतकमिति 'क्रमादमुं नारद इत्यबोधि सः' इत्यत्र कर्तरि लुङि "दीप" इति चिणो विधानात् तादृशचिणोऽभावेन न दोष इति बोध्यम् ॥४॥

*सूचीकटाहेति । फलव्यापारयोर्धात्वर्थत्वे आश्रयस्य तिङर्थत्वे च ज्ञाते, वाक्यार्थे निरसनीयवादिविप्रतिपत्तीनामल्पतया धात्वर्थत्वे च निरसनीयवादिविप्रतिपत्तीनां बहुत्वेन प्रथमं वाक्यार्थ एव शिष्यजिज्ञासोदयात् स एवाऽऽदौ वर्णितः। एतेन 'फलव्यापारवाचकत्वप्रतिज्ञातस्योत्तरक्षण एवोपपत्तिभिस्तद्व्यवस्थापनं कर्तुमुचितं, न तु वाक्यार्थनिरूपणानन्तरं तेन जिज्ञासाविच्छेदादित्यपास्तम् ॥

(१) एवं लडाद्यन्ते भावनाया अवाच्यत्वं वदतः प्रभाकरादीन् प्रति सूचीकटाहन्यायेन सोपपत्तिकं वाक्यार्थमुपवर्ण्य 'फलव्यापारयोः' इति प्रतिज्ञातं धातोर्व्यापारवाचित्वं व्यवस्थापयति इति व्यत्ययेन क्वचित् पुस्तके पाठो दृश्यते ।

रादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम्। अत एव पचतीत्यत्राधःसन्तापनत्व-फूत्कारत्व-चुल्ल्युपरिधारणत्व-यत्नत्वादिभिर्बोधः सर्वसिद्धः। नचैवमेषां शक्यतावच्छेदकत्वे गौरवापत्त्या कृतित्वमेव तदवच्छेदकं वाच्यम्। रथो गच्छति, जानाति, इत्यादौ च व्यापारत्वादिप्रकारकबोधो लक्षणयेति नैयायिकरीतिः साध्वी। शक्यतावच्छेदकत्वस्यापि लक्ष्यतावच्छेदकत्ववद् गुरुणि सम्भवात्। तयोर्वैषम्ये बीजाभावात्। नच पचति, पाकं करोतीति यत्नार्थककरोतिना विवरणाद्यत्नएवाऽऽख्यातार्थ इति वाच्यम्। रथो गमनं करोति, बीजादिना अङ्कुरः कृतः, इति दर्शनात् कृञो यत्नार्थकताया असिद्धेः।

किञ्च भावनाया अवाच्यत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात्। न चात्र घटस्य कर्तृत्वेन तत्संज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम्। अनुगतकर्तृत्वस्य त्वन्मते दुर्वचत्वेन घटस्याकर्तृत्वात्। कृत्याश्रयत्वस्य कारकचक्रप्रयोक्तृत्वस्य वा घटादावभावात्। धात्वर्थानुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात्।

अपि च भावनाया अवाच्यत्वे धातूनां सकर्मकत्वाकर्मकत्वविभाग उच्छिन्नः स्यात्। स्वार्थफलव्यधिकरणव्यापारवाचित्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वं भावनाया वाच्यत्वमन्तेरणासम्भवि। अन्यतमत्वं तत्त्वमिति चेत्, न। एकस्यैवार्थभेदेनाकर्मकत्वसकर्मकत्वदर्शनात्। तदेतदभिसन्धायाह—कृञ इति। अयं भावः। व्यापारावाच्यत्वपक्षे फलमात्रमर्थ इति फलितम्। तथा च करोतीत्यादौ यत्नप्रतीतेस्तन्मात्रं वाच्यमभ्युपेयम्। तथा च 'यती प्रयत्ने' इतिवत् फलस्थानीययत्नवाचकत्वाविशेषादकर्मकतापत्तिरुक्तरीत्या दुर्वारेति। तथा च "न हि यत्नः" इत्यत्र

फलस्थानीयत्वेनेति शेषः। कृञ इति धातुमात्रोपलक्षणम्। सर्वेषामप्यकर्म्मकता सकर्म्मकता वा स्यादिति भावः* ।

अथ वा 'व्यापारो भावना' इत्यर्थेन व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत् साधयन् नैयायिकाभ्युपगतं जानाति करोत्यादेः केवलज्ञान-यत्नादिक्रियामात्रवाचित्वं दूषयति—कृञ इति। अयं भावः। फलांशस्यावाच्यत्वे व्यापार एव धात्वर्थः स्यात्। तथा च

---

*इति भाव इति। इदमत्रावधेयम्। पचत्यादौ फूत्कारत्व-अधःसन्तापनत्व-चुल्ल्युपरिधारणत्वादितत्तद्विशेषरूपेण बोधे तेषां नानात्वात् शक्यतावच्छेदकनानात्वे शक्तिनानात्वस्य हर्यादिपदे सर्वसिद्धतया नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वरूपनानार्थत्वस्य प्रकृतेऽपि सत्त्वेनैकशक्तेर्वक्तुमशक्यत्वान्नानार्थत्वापत्तिस्तु न शङ्क्या। बुद्धिविशेषविषयतावच्छेदकत्वोपलक्षिततत्तद्धर्मावच्छिन्ने पचत्यादीनां शक्तेः स्वीकारेणोपलक्षकबुद्धिविशेषविषयतावच्छेदकत्वधर्मस्यैकस्यैवानुगमकतया अनुगत-नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वस्यैव नानार्थत्वमिति तच्छब्दशक्तिनिरूपणे निर्णेष्यमाणत्वात्तस्यात्राभावात्। नापि क्षणनश्वरक्रमिकानेकव्यापाराणां युगपदवस्थानासम्भवेन "प्रशंसायाम्" (पा. सू. ५-३-६६) इतिसूत्रस्थ'एका च क्रिया'इतिभाष्यासङ्गतिः। बौद्धसमूहगतैकत्वमादाय तदुपपत्तेः। तदुक्तं वाक्यपदीये—

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥ इति॥

न चैषां शक्यतावच्छेदकत्वे उक्तदोषाभावेऽपि अनेकेषां तत्त्वकल्पने गौरवेण लाघवात्कृतित्वस्यैव तत्त्वं, कृतौ च धातोः शक्तिरस्तु; यत्र चाचेतने रथादौ कृतिर्नास्ति, तत्र व्यापारे लक्षणा इति वाच्यम्। गङ्गायां घोष इत्यादौ गङ्गातीरत्वादिगुरुधर्मे लक्ष्यतावच्छेदकत्वस्वीकार इव गुरुधर्मे शक्यतावच्छेदकत्वस्वीकारे बाधकाभावात्।

भूप्रभृतेरपि पच्यादिधात्वर्थफलव्यधिकरणव्यापारवाचित्वादतिप्रसङ्गवारणाय फले स्वार्थत्वं निवेशितम्। फलव्यधिकरणत्वं च फलतावच्छेदकसम्बन्धेन फलाश्रयभिन्नवृत्तित्वं, तेन गम्यादेर्ना-

स्वार्थफलव्यधिकरणव्यापारवाचित्वादिरूपसकर्मकत्वोच्छेदापत्तिः*। न च कृञादौ सकर्मकत्वव्यवहारो भाक्त इति नैयायिकोक्तं युक्तम्। व्यवहारस्य भाक्तत्वेऽपि कर्मणि लकारासम्भवात्। 'न हि तीरे गङ्गापदस्य भाक्तत्वेऽपि तेन स्नानादिकार्यं कर्तुं शक्यम्। एवञ्च 'न हि यत्न' इत्यत्र यत्नमात्रमित्यर्थः ॥ ५ ॥

संग्रहः। गम्यादिधातुस्थले अनुयोगित्वादयः फलतावच्छेदकानियता एवेति कारकशेखरटिप्पण्यां गुरुचरणैर्निरूपितम्। तथा च अनुयोगित्वसम्बन्धेन संयोगाश्रयो ग्राम इति, तद्भिन्नो देवदत्तस्तद्वृत्तिव्यापारवाचकत्वं गम्धातोरक्षतम्।

*सकर्मकत्वोच्छेदापत्तिरिति। इदमुपलक्षणम् त्यजिगम्योः पर्यायतापत्तिश्च। द्वयोरपि व्यापारवाचकत्वाविशेषात्। किं च पचादिषु सकर्मकत्वव्यवहारानुरोधेन द्वितीयादिकर्मप्रत्ययानां फलांशे शक्तिकल्पनमावश्यकम्। तथा च प्रयागात् काशीं गच्छति चैत्रे 'प्रयागं गच्छति, काशीं त्यजति चैत्रः' इति प्रयोगापत्तिः। एकस्यैव व्यापारस्य गम्यादिवाच्यस्य पूर्वापरदेशनिष्ठविभागसंयोगजनकत्वात्। तत्तत्फलविशेषान्वयबोधे तद्धातुजन्योपस्थितेर्हेतुत्वकल्पनयोक्तप्रयोगापत्तिवारणं तु न युक्तम्। गौरवात्, त्यजिगम्योः पर्यायताभ्रमदशायां 'गच्छति ग्रामं' 'त्यजति ग्रामम्' इति वाक्यद्वयादविलक्षणबोधोत्पत्त्या तथाविधहेतुहेतुमद्भावस्य व्यभिचाराच्च। तत्पुरुषीयतथाविधभ्रमशून्यकालिकतत्पुरुषीयतत्तत्फलान्वयबुद्धित्वस्य कार्यतावच्छेदकत्वं स्वीकृत्य व्यभिचारवारणे त्वतिगौरवम्। तथाविधभ्रमदशायामपि तादृगन्वयबोधो नाभ्युपेत इति तु न युक्तम्। अनुभवसिद्धस्यापलापानर्हत्वात्।

न च तत्र फलविशेषावच्छिन्नव्यापारे लक्षणास्वीकारान्नोक्तापत्तिरिति वाच्यम्। अनेककर्मप्रत्ययानां तत्तत्फलविशेषे शक्तिकल्पनं, कर्मप्रत्ययासमभिव्याहृतगम्यादेस्तत्तत्फलावच्छिन्ने लक्षणाकल्पनां चापेक्ष्य गम्यादेरेव विशिष्टवाचकत्वस्योचितत्वादिति दिक् ॥५॥

अत एवाह—

किन्तूत्पादनमेवातः कर्म्मवत् स्याद् यगाद्यपि।
कर्म्मकर्त्तर्यन्यथा तु न भवेत् तद् दृशेरिव ॥६॥

उत्पादनम्—उत्पत्तिरूपफलसहितं यत्नादि कृञर्थ इत्यर्थः। फलस्य वाच्यत्वे युक्त्यन्तरमाह—अत इत्यादि। यतः कृञो यत्नमात्रमर्थो नेष्यते, अतः। कर्म्मवत्स्यादिति पदेन "कर्म्मवत्कर्म्मणा तुल्यक्रियः" [प.सू.-३-१-८७] इति सूत्रं लक्ष्यते। अयमर्थः—यत एवास्योत्पादनार्थकता, अतः 'पच्यते ओदनःस्वयमेव' इतिवत् 'क्रियते घटः स्वयमेव' इति यगादयोऽप्युपपद्यन्ते। अन्यथा यत्नस्य कर्म्मनिष्ठत्वाभावात्तन्न स्यात्, दृशिवत्। यथा दृश्यते घटः स्वयमेव इति न, दर्शनस्य *घटावृत्तित्वात्, तथा यत्नस्यापि इति तथा प्रयोगानापत्तेरिति ॥६॥

नन्वेवं कृञादेरिव जानातीत्यादेरपि विषयावच्छिन्नावरणभङ्गादिफलवाचित्वमावश्यकम्। अन्यथा सकर्म्मकतानापत्तेः। तथा च ज्ञायते घटः स्वयमेवेति किन्न स्यात्। एवं ग्रामो गम्यते स्वयमेवेत्यापीत्याशङ्कां मनसिकृत्याह—

निर्वर्त्त्ये च विकार्ये च कर्म्मवद्भाव इष्यते।
न तु प्राप्ये कर्म्मणीति सिद्धान्तो हि व्यवस्थितः॥७॥

ईप्सितं कर्म्म त्रिविधम्—निर्वर्त्त्यं, विकार्यं, प्राप्यश्च। तत्राऽऽद्ययोः कर्म्मवद्भावो, नान्त्ये। प्राप्यत्वञ्च क्रियाकृतविशे-

---

*घटावृत्तित्वादिति। घटमात्रवृत्तित्वाभावेन कर्मस्थक्रियकत्वाभावादित्यर्थः। ज्ञानस्य समवायेन विषयतया च कर्तृकर्मोभयनिष्ठत्वेऽपि कर्तृस्थभावकत्वेन "कर्मवत्कर्मणा" (पा. सू. ३-१-८७) इति सूत्रे कर्मणेत्युपादानात् कर्मस्थक्रियकाणां कर्मस्थभावकानामेव धातूनां ग्रहणेन तस्यात्राप्रवृत्तेरिति यावत् ॥ ६ ॥

षानुपलभ्यमानत्वमिति सुबर्थनिर्णये वक्ष्यते*। न हि-अयं घटः केनचिद् दृष्टो, अमोऽयं केनाचिद्गत इति शक्यं कर्म्मदर्शनेनावगन्तुम्। घटं करोतीति निर्वर्त्ये, सोमं सुनोतीति विकार्ये च तज्ज्ञातुं शक्यमिति न तत्प्राप्यम्। तथा च घटादेर्दृश्यादौ प्राप्यकर्म्मत्वान्नोक्तातिप्रसङ्ग इति भावः। धातूनां फलावाचकत्वे त्यजिगम्योः पर्यायतापत्तिः। क्रियावाचकत्वाविशेषात्। फलस्योपलक्षणत्वेऽप्येकक्रियाया एव पूर्वदेशविभागोत्तरदेशसंयोगजनकत्वादुक्तदोषतादवस्थ्यमित्यपि वदन्ति। तस्मादावश्यकं सकर्म्मकाणां फलवाचकत्वम्। अकर्म्मकाणान्तु तन्निर्विवादमेव*। "भू सत्तायाम्"[भ्वा०ग०] इत्याद्यनुशासनाच्च। अत एव 'द्व्यर्थः पचिः' इति भाष्यं संगच्छते इति दिक्॥ ७॥

एवं सिध्यतु फलव्यापारयोर्वाच्यत्वम्। किन्तु आख्यातवाच्यैव सा भावना, न धातोः। प्राधान्येन प्रतीयमानव्यापारस्य धात्वर्थतायाः 'प्रकृतिप्रत्ययार्थयोः प्रत्यार्थस्य प्राधान्यम्" इतिन्यायविरुद्धत्वात्। 'तदागमे हि दृश्यते'* इति न्यायविरुद्धत्वाच्च।

---

*वक्ष्यते' इति।

क्रियाकृतविशेषाणां सिद्धिर्यत्र न दृश्यते।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते॥

इत्यादिनेति शेषः॥ * निर्विवादमेवेति। भवतीत्यादितः सत्तादिबोधस्य सर्वमतसिद्धत्वादित्यर्थः। पचतीत्यादित एव फलबोधे विवादः। तत्र फलबोधो द्वितीयादित एवेति पराभ्युपगतत्वात्॥७॥

* इति न्यायेति। शब्दवत्तूपलभ्यते तदागमे हि तद् दृश्यते तस्य ज्ञानं यथाऽन्येषाम् (अ०४-पा०१-सू०१५ जै०) इति सूत्रम् "पशुना यजेत" इत्यत्र पशुनेत्येकवचनोपात्तैकत्वस्य करणत्वेन न क्रियायामन्वयः। तस्या यजेतेतिपदान्तरोपात्तत्वात्। किन्तु समानपदोपात्तत्वेन श्रुत्या पश्वर्थे, "प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम्" इति व्युत्पत्तेश्च; इति यागाङ्गत्वाभावेन तदविवक्षितमेव स्यादिति पूर्वपक्षे इदमुक्त-

एवञ्च * "स्वयुक्ताऽऽख्यातार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्म्मकत्वम्। आख्यातार्थव्यापाराश्रयत्वञ्च कर्तृत्वं वाच्यम्" इत्यादि वदन्तं मीमांसकंमन्यं प्रत्याह--

तस्मात्करोतिर्धातोः स्याद्व्याख्यानं, न त्वसौ तिङाम्।
पक्ववान्, कृतवान् पाकं, किं कृतं पक्वमित्यपि ॥८॥

तस्मात्--अभिप्रायस्थहेतोः। स चेत्थम्। फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवानिति प्रतीत्यापत्तिः। संयोगाऽऽश्रयत्वात्। फलानुत्पाददशायां व्यापारसत्त्वे पाको भवतीत्यनापत्तिः। व्यापारविगमे फलसत्त्वे पाको विद्यते इत्यापत्तिश्च। यत्तु भावप्रत्ययस्य घञादेरनुकूलव्यापारवाचकत्वान्नानुपपत्तिरिति, तन्न। कर्त्राख्यातवत् "कर्तरि कृत्" [पा॰सू॰ ३-४-६७]इत्यत एव तद्विधानलाभे * भावे विधायकानुशासनवैयर्थ्यापत्तेः, तद्विरोधापत्तेश्च।

अथ व्यापारोऽपि धात्वर्थ इत्यभ्युपेयमिति चेत्, तर्हि धातुत

रसूत्रम्। तदर्थस्तु शब्दवत्-शब्दवाच्यं यथा भवति तथाऽवलभ्यते। एकत्वं हि-यतः तदागमे-एकवचनश्रवणे दृश्यते। अतस्तस्याङ्गत्वज्ञानं यथाऽन्येषां पशुत्वलौहित्यादीनामिति। तथा च विशिष्टस्य श्रुत्याऽङ्गत्वबोधनेन पशुत्ववच्छब्दबोध्यस्यास्य विशेषणस्याङ्गत्वोपपत्तिरिति भावः। एवं च तत्र यथा एकवचनागमे एकत्वं दृश्यते अतस्तदर्थत्वम्। एवं पचतीत्यादावाख्यातश्रवणे सत्येव व्यापारबोधात् तस्य तदर्थत्वमङ्गीकरणीयम्। अन्यथोक्तन्यायविरोधापत्तेरित्यर्थः।

भवत्यादेः पचधात्वुत्तराख्यातार्थव्यापारव्यधिकरणफलवाचकत्वात् सकर्मकत्वापत्तिवारणाय *स्वयुक्तेति।

*तद्विधानलाभे इति। "लः कर्मणि" (पा. सू. ३-४-६९) इति सूत्रेऽनुवृत्त 'कर्तरि'इत्यस्य भावप्रधाननिर्देशमभ्युपगम्य, तत्सूत्रेण व्यापारे लकारविधानवत् घञादीनामपि "कर्तरि कृत्" (पा. सू. ३-४-६७) इति सूत्राद् व्यापारार्थत्वं सिध्यतीत्यर्थः।

एव सकलव्यापारलाभसम्भवेनाऽऽख्यातस्य पृथक्शक्तिकल्पने गौरवमिति। पचतीत्यस्य पाकं करोतीति विवरणात्मा करोतिः धातोरेव व्याख्यानं—विवरणम्। अतस्तदपि नाख्यातार्थत्वसाधकमिति भावः।

मीमांसकोक्तं बाधकमुद्धरन् तन्मतं दूषयति—न त्वित्यादिना। नासौ तिङां व्याख्यानम्। पक्ववानित्यादावनन्वयापत्तेः। अयं भावः—'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्यम्' इत्यत्र हि 'विशेष्यतया प्रकृत्यर्थप्रकारकबोधं प्रति तदुत्तरप्रत्ययजन्योपस्थितिर्हेतुः' इति कार्यकारणभावः फलितः। तथा च पक्ववानित्यत्र पाकः कर्मकारकं, क्तवतुप्रत्ययार्थः कर्तृकारकम्। तयोश्चारुणाधिकरणरीत्या* वक्ष्यमाणास्मद्रीत्या* चान्वयासम्भव इति प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यैवाभावे क्व प्रधान्यबोधक उक्तकार्यकारणभावः। न च

*सम्बन्धमात्रमुक्तञ्च श्रुत्या धात्वर्थभावयोः।
तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते॥

---

*अरुणाधिकरणरीत्येति। तत्र खलेकपोतन्यायेन सर्वेषां कारकाणां क्रियायामेवान्वयस्योक्तत्वेन तया रीत्या प्रकृतेऽपि द्वयोः कारकयोस्तत्रैवान्वये परस्परमन्वयासम्भव इति भावः।

*वक्ष्यमाणेति। कारकत्वस्य क्रियाजनकत्वरूपत्वेन क्रियाजनकमिति ज्ञाते 'का सा क्रिया'इत्याकाङ्क्षोदयेन, क्रियाया अपि साध्यरूपायाः साधनाकाङ्क्षया परस्परान्वयौचित्यमिति क्रियात्वमेव कारकान्वयितावच्छेदकमिति सुबर्थनिर्णये वक्ष्यमाणया रीत्येत्यर्थः।

*सम्बन्धमात्रमिति। "ज्योतिष्टोमेन यजेत" इत्यत्र यजेतेति श्रुत्या धात्वाख्यातार्थयागभावनयोः सम्बन्धसामान्यं प्रतिपाद्यते। तयोः क्रियाकारकभावरूपसम्बन्धविशेषबोधने तु नास्याः श्रुतेः कश्चिदभिधादिरूपो व्यापारः तद्वाचकपदाभावादिति तदर्थः। तथा च यजेतेत्यत्र यागसम्बन्धिभावनेति बोधो, न यागकरणकभावनेति; तद्वत् प्रकृते पाकसम्बन्धी कर्तेति बोध इति तयोरन्वयः सुशक इति भावः।

इति भट्टपादोक्तरीत्या सम्बन्धसामान्येन कारकाणामन्वयः शङ्क्यः । योग्यताविरहात् । अन्वयप्रयोजकरूपवत्त्वस्य तत्त्वात् । क्रियान्वयित्वमेव हि कारकान्वयितावच्छेदकमिति वक्ष्यते । तदेतदाविष्कर्तुं विवरणेन धात्वर्थक्तत्वर्थयोः कर्म्मत्वकर्तृत्वे दर्शयति—कृतवान् पाकमिति ।

१ वस्तुतः "प्रत्ययार्थः प्रधानम्" इत्यस्य यः प्रधानं स प्रत्ययार्थ एवेति वा, यः प्रत्ययार्थः स प्रधानमेवेति वा नार्थः । अजा अश्वा छागी इत्यत्र स्त्रीप्रत्ययार्थे स्त्रीत्वस्यैव प्राधान्यापत्तेः, *छाग्यादेरनापत्तेश्च । किन्तूत्सर्गोऽयम् । विशेष्यत्वादिना बोधस्तु तथा व्युत्पत्त्यनुरोधात् । अत एव नैयायिकानां प्रथमान्तविशेष्यक एव बोधः । लक्षणायामालंकारिकाणां शक्यतावच्छेदकप्रकारक * एव बोधो, न नैयायिकादीनाम् । घटः कर्म्मत्वमानयनं कृतिरित्यादौ विपर्ययेणाऽपि व्युत्पन्नानां नैयायिकनव्यादीनां बोधो, न तद्व्युत्पत्तिरहितानाम् । अन्येषां तन्निराकाङ्क्षमेवेत्यादिकं संगच्छते । अत एव "प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्" [पा० सू० १-२-५६] इत्याह भगवान् पाणिनिः । प्रधानं प्रत्ययार्थ इति वचनं 'न' इत्यनुवर्त्य न कार्य्यम्, अर्थस्य—अर्थावबोधस्यान्यप्रमाणत्वाद्—व्युत्पत्त्यनुसारित्वादिति हि तदर्थः । एवं सत्यपि नियामकापेक्षणे च "भावप्रधानमाख्यातम्" इति वचनमेव गृह्यतामिति सुधीभिरूह्यम् ।

---

*छाग्यादेरिति । प्रकृत्यर्थेऽनुभूयमानस्य प्राधान्यस्यानुपपत्तेरिति भावः ।

*शक्यतावच्छेदकप्रकारक एवेति । गङ्गात्वप्रकारकतीरविशेष्यकबोधादेव विलक्षणशैत्यपावनत्वादिप्रतीतिः । अन्यथा गङ्गायां घोष इत्यस्य गङ्गातीरे घोष इत्यतो विशिष्टता न स्यात् । नैयायिकास्तु लक्षणायां लक्ष्यतावच्छेदकतीरत्वप्रकारक एव बोधः । शैत्यपावनत्वप्रतीतिस्तु गङ्गापदेन स्वबुद्ध्या प्रतिपादनादेव भवतीत्याहुः ॥ ८ ॥

"तदागमे हि" इति न्यायो विवरणञ्चातिव्याप्तमित्याह—किं कृतं पक्वमिति। कृता विवरणं, प्रतीतिश्च पक्वमित्यत्रापि, इति तत्रापि भावना वाच्या स्यादिति भावः। नन्वस्तु तिङ इव कृतामपि भावना वाच्येत्यत आह—अपीति। तथा चोभयसाधारण्येन तत्प्रतीतेरुभयसाधारणो धातुरेव वाचक इति भावः। भवद्रीत्या प्रत्ययार्थत्वात् प्राधान्यापत्तिश्चेति द्रष्टव्यम् ॥ ८ ॥

व्यापारस्य धात्वर्थत्वे साधकान्तरमाह—

किं कार्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि।
किञ्च क्रियावाचकतां विना धातुत्वमेव न ॥ ९ ॥

कार्यमित्यत्र "ऋहलोर्ण्यत्" [पा० सू० ३-१-१२४] इति कर्मणि ण्यत्। पचनीयमित्यादौ चानीयर्। आदिना 'ज्योतिष्टोमयाजी' इत्यादौ करणे उपपदे कर्तरि णिनिः। एते च क्रियायोगमन्तरेणासन्तस्तद्वाच्यतां बोधयन्ति। विना क्रियां कारकत्वासम्भवेन तद्वाचकप्रत्ययस्याप्यसम्भवात्। न च *गम्यमानक्रियामादाय कारकयोग इति भाट्टरीतिर्युक्ता। आख्यातेऽपि तथात्वापत्तौ तत्रापि भावनाया वाच्यत्वासिद्ध्यापत्तेः। अथ लिङ्गसंख्यान्वयानुरोधात् कर्तुर्वाच्यत्वमावश्यकमिति तेनाऽऽक्षेपाद्भावनाऽन्वयः स्यादिति मतम्, तर्हि संख्यान्वयोपपत्तये आख्यातेऽपि कर्ता वाच्यः स्यात्। पक्ववानित्यादौ कालकारकान्वयानुरोधाद्भावनाया अपि वाच्यत्वस्याऽऽवश्यकत्वाच्चेति भावः।

---

*गम्यमानेति। पाचक इत्यादौ तन्मये धातोः फलमात्रार्थकतया भावनाया आक्षेपेण कर्तरि प्रत्ययस्य यथा साधुत्वमुच्यते तैः, तथैव कर्मणि ण्यदादीनामुपपत्तिः स्यादिति भावः।

अपिना हेत्वन्तरसमुच्चयः। तथा हि—नखैर्भिन्नो नखभिन्नः, हरिणा त्रातो हरित्रातः इत्यादौ "कर्तृकरणे कृता बहुलम्" [पा० सू० २-१-३२] इति समासो न स्यात्। पुरुषो राज्ञो, भार्य्या देवदत्तस्य इतिवदसामर्थ्यात्। न चाध्याहृतक्रियाद्वारा सामर्थ्यं वाच्यम्, दध्योदनो गुडधाना इत्यादिवत्। अन्यथाऽत्रापि "अन्नेन व्यञ्जनम्" [पा० सू० २-१-३४] "भक्ष्येण मिश्रीकरणम्" [पा० सू० २-१-३५] इति समासो न स्यादिति वाच्यम्। तत्र विध्यानर्थक्यादगत्या तथा स्वीकारेऽपि हरिकृतमित्यादौ *साक्षाद्धात्वर्थान्वयेनोपपद्यमानस्य "कर्तृकरणे" इत्यस्य आक्षेपेण परम्परासंबन्धे प्रवृत्त्ययोगात्।

न चैकस्यां क्रियायामन्वयित्वमेव सामर्थ्यमिति शङ्क्यम्। असूर्यम्पश्या इत्यादेरसमर्थसमासत्वानापत्तेः। इष्टापत्तौ कृतः सर्वो मृत्तिकयेत्यत्र कृतसर्वमृत्तिक इत्यापत्तेः। न चात्र समासविधायकाभावः। "सह सुपा" [पा० सू० २-१-४] इत्यस्य सत्त्वात्। अन्यथाऽसमर्थसमासोऽपि विधायकाभावान्न स्यादिति।

किं च भावनायास्तिङर्थत्वे 'भावयति घटम्' इतिवद् 'भवति घटम्' इत्यपि स्यात्। धात्वर्थफलाश्रयत्वरूपकर्मत्वसत्त्वात्। न चाऽऽख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वात्तत्संज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम्। आख्यातार्थव्यापाराश्रयत्वस्य कर्तृत्वे पाचयति देवदत्तो विष्णुमित्रेणेत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ * तृतीयानापत्तेः। ग्रामं गमयति देवदत्तो विष्णुमित्रमित्यत्र विष्णुमित्रस्याकर्तृतापत्तौ

---

*साक्षाद्धात्वर्थान्वयेनेति। तन्मते कृधातोः कृतिरूपभावनार्थकत्वादिति भावः।

*अकर्तृत्वापत्ताविति—सर्वस्यैव यत्किञ्चिदाख्यातार्थव्यापाराश्रयत्वात् स्वसमभिव्याहृतेत्यावश्यकम्। प्रकृते च प्रयोज्यव्यापारो नाख्यातस्यार्थो भवितुमर्हति। किं तु णिजर्थव्यापार एव तेनानूद्यते।

ग्रामस्य गमिकर्मतानापत्तेश्च* । तथा च ग्रामाय गमयति देवदत्तो विष्णुमित्रमित्यपि न स्यात् । "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" [पा० सू० २-३-१२] इति गत्यर्थकर्मण्येव चतुर्थीविधानात् । एतेन णिजन्ते आख्यातार्थे उभयं, तदाश्रयत्वाद्देवदत्तयज्ञदत्तयोः कर्तृतेत्यपास्तम्* ।

किं च तस्मिन्प्रयोगे य आख्यातार्थे इत्यस्याऽऽवश्यकत्वेनाऽऽख्यातशून्ये देवदत्तः पक्तेत्यादौ देवदत्तस्याकर्तृतापत्तेरिति दिक् ।

सूत्रानुपपत्तिमपि मानत्वेन प्रदर्शयन्नुक्तार्थस्य स्वोत्प्रेक्षितत्वं निरस्यति—किं चेति । धातुसंज्ञाविधायकं "भूवादयो धातवः" [पा० सू० १-३-१] इति सूत्रं, तत्र भूश्च वाश्चेति द्वन्द्वः । आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः । ततो भूवौ आदी येषा-

---

अत एव प्रयोजकस्य कर्तृत्वनिर्वाहः । अत एवाख्यातार्थव्यापारान्वयिन्येव तदर्थसंख्यान्वयनियमाद् "गुरुः शिष्याभ्यां पाचयति" इत्यत्र गुरुपदात्प्रथमोत्पत्तिः पाचयतीत्येकवचनोपपत्तिश्च । एवं चाख्यातार्थव्यापारानाश्रयत्वात् प्रयोज्यस्य कर्तृत्वानापत्तौ ततस्तृतीयानुपपत्तिरिति भावः । करणतृतीयैवेयमिति तु न शङ्क्यम् । कर्तुः प्रयोजकस्यैव हेतुतया देवदत्तस्य हेतुतानापत्तौ णिजुत्पत्त्यसम्भवापत्तेः ।

*गमिकर्मतानापत्तेश्चेति । कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयस्यैव कर्मतया विष्णुमित्रनिष्ठव्यापारप्रयोज्यसंयोगाश्रयत्वेऽपि तस्याकर्तृत्वात् कर्मसंज्ञा न स्यात् । अत एव "माषेष्वश्वं बध्नाति" इत्यत्राश्ववृत्तिव्यापारप्रयोज्यगलबिलाधःसंयोगाश्रयत्वप्रकारकेच्छाविशेष्यस्य माषस्य न कर्मत्वमश्वस्य कर्तृत्वाभावादित्यन्यत्र विस्तरः ।

*अपास्तमिति । उक्ताख्यातस्य णिजन्तधातुयुक्तत्वेऽपि गत्यर्थकधातुयुक्तत्वाभावेन प्रयोज्यस्य स्वयुक्ताख्यातार्थव्यापाराश्रयत्वरूपगत्यर्थकर्तृत्वाभावात् गत्यर्थकधातुकर्मत्वानापत्तौ चतुर्थ्यनापत्तेस्तादवस्थ्यादिति भावः ।

मिति बहुव्रीहिः। तथा च भूप्रभृतयो वासदृशा* धातव इत्यर्थः। तच्च क्रियावाचकत्वेन*। तथा च क्रियावाचकत्वे सति गणपठितत्वं धातुत्वं पर्यवसन्नम्। अत्र हि क्रियावाचित्वमात्रोक्तौ वर्जनादिरूपक्रियावाचके हिरुङ् नानेत्यादावतिव्याप्तिरिति भ्वादिगणपठितत्वमुक्तम्॥ ९॥

तावन्मात्रोक्तौ चाऽऽह—

सर्वनामाऽव्ययादीनां यावादीनां प्रसङ्गतः।
न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम्॥१०॥

गणपठितत्वमात्रोक्तौ सर्वनामा यो या तस्यापि धातुत्वं

---

*वासदृशा इति। भूशब्दस्य निष्ठत्वसम्बन्धेन व्यवस्थावाचकाऽऽदिशब्देऽन्वयो, वाशब्दस्य च प्रतियोगित्वसम्बन्धेन प्रकारवाचकादिशब्दे ऽन्वयः, आदिशब्दयोश्च परस्परमभेदेनेति भूनिष्ठाद्यावयवतानिरूपकाभिन्ना वाप्रतियोगिकसादृश्यविशिष्टा धातुसंज्ञका इत्यर्थ इति भावः। ननु भूवाशब्दयोर्भिन्नसम्बन्धेनान्यत्रान्यत्रान्वये सहयिवक्षाऽभावेन द्वन्द्वानुपपत्तिः, "सकृदुच्चरितः शब्दः सकृदर्थं गमयति" इति नियमात्सकृदुच्चरितादिशब्देनैकस्यैवोपस्थितिनियमादर्थद्वयोपस्थित्यनुपपत्तिः, "एकपदोपस्थाप्यार्थद्वयस्य परस्परमभेदसम्बन्धेनान्वयो ऽव्युत्पन्नः" इति व्युत्पत्तेरभेदान्वयानुपपत्तिश्चेति चेत्। न, भूवादयश्च भूवादयश्च भ्वादय इति तन्त्रावृत्त्यन्यतरनिर्देशस्वीकारेणादोषात्।

*क्रियावाचकत्वेनेति। भूसाहचर्याद्व वाशब्दो ऽनव्ययमेव गृह्यते। अनव्ययवाशब्दश्च गतिगन्धनार्थको ऽसत्त्ववाची, तत्साहचर्याद्भूशब्दोऽप्यसत्त्ववाच्येव गृह्यते इति परस्परसाहचर्यात्तादृशः क्रियावाच्येव सम्भवतीति भावः। क्रियावाचकत्वं च "भूवादयो धातवः" (पा. सू. १-३-१) इति सूत्रे शेखरटिप्पण्यां गुरुचरणैः स्पष्टीकृतं, तत एवावगन्तव्यम्॥ ६॥

स्यात्। तथा च याः पश्यसीत्यादौ "आतो धातोः" [पा० सू० ६-४-१४०] इत्यालोपापत्तिः। ननु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न सर्वनाम्नो ग्रहणं तस्य लाक्षणिकत्वात्, इत्यत आह—वेत्यादि। अव्यये वेत्यादावतिप्रसङ्गस्तादृशस्यैव गणेऽपि पाठेन निर्णयासंभवात्। तथा च विकल्पार्थको वातीति प्रयोगः * स्यादिति भावः। न च गतिगन्धनाद्यर्थनिर्देशो नियामकः। तस्यार्थानादेशना*दितिभाष्यपर्यालोचनयाऽऽधुनिकत्वलाभात्॥ १०॥

नन्वस्तु क्रियावाचकत्वे सति गणपठितत्वं धातुत्वं, क्रिया च धात्वर्थ एव न व्यपार इति शङ्कां समाधत्ते—

धात्वर्थत्वं क्रियात्वं चेद्धातुत्वं च क्रियार्थता।
अन्योन्यसंश्रयः स्पष्टस्तस्मादस्तु यथाकरम्॥११॥

यदि क्रियात्वं धात्वर्थत्वमेव तर्हि धातुत्वग्रहे तदर्थत्वरूपक्रियात्वग्रहः, क्रियात्वग्रहे तदवच्छिन्नवाचकत्वघटितधातुत्वग्रह इत्यन्योन्याश्रय इति ग्रहपदं पूरयित्वा व्याख्येयम्। यथाश्रुते चान्योन्याश्रयस्योत्पत्तौ ग्रहे वा प्रतिबन्धकत्वाभ्युपगमेना-

---

*वातीति प्रयोग इति। कालकारकाद्यन्वयासम्भवेन तत्र तिबादीनां कथञ्चिद्वारणे तु वाशब्दस्य धातुत्वे "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (पा. सू. १-२-४५) इति सूत्रेऽधातुरिति पर्युदासेन प्रातिपदिकत्वाभावेन ततः सुबनुत्पत्त्या पदत्वानापत्तौ 'वा गच्छति' इत्यत्र "तिङ्ङतिङः" (पा. सू. ८-१-२८) इति निघातानापत्तिर्बोध्या॥

*अर्थानादेशनादिति। अर्थस्य-सत्त्वादेः अनादेशनात्-अनाम्नानादित्यर्थः। सर्वत्र पाणिनिनाऽर्थनिर्देशो न कृत इति यावत्। तेन 'चुद्र' इत्यादिसूत्रस्थभाष्येण न विरोधः॥ १०॥

सङ्गत्यापत्तेः * । न चान्यतमत्वं धातुत्वम् । "भूवादयः" इत्यस्य वैयर्थ्यापत्तेरित्यभिप्रेत्याह—अस्त्विति । व्यापारसन्तानः क्रिया, तद्वाचकत्वे सति गणपठितत्वमित्यर्थः । ननु सत्तादीन्फलांशानन्यतमत्वेनाऽऽदाय तद्वाचकत्वे सति गणपठितत्वं लक्षणमुच्यताम् । धात्वर्थत्वाचेषां क्रियाशब्देन व्यवहारो भाष्यादौ कृतोऽप्युपपत्स्यते इति चेत् । न, अन्यतममध्ये विकल्पस्यापि 'विकल्पयति'इतिप्रयोगानुसारात्प्रवेशावश्यकत्वेन तदर्थके 'वा' इत्यव्यये उक्तरीत्या गणपठितत्वसत्त्वेनातिव्याप्तेरिति ॥ ११ ॥

नन्वस्यैव धातुत्वेऽस्तीत्यादौ क्रियाप्रतीत्यभावादस्त्यादीनां तदवाचकानामधातुत्वप्रसङ्ग इत्यत आह—

अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना ।
अन्यत्राशेषभावात्तु सा तथा न प्रकाशते ॥१२॥

अस्त्यादौ—"अस् भुवि" इत्यादौ । धर्म्यंशे—धर्मिभागे । भाव्ये—भाव्यत्वेन विवक्षिते । अस्त्येव—प्रतीयत एव । अयमर्थः—'स ततो गतो न वा' इति प्रश्ने महता यत्नेन तिष्ठतीति प्रयोगे सत्तारूपफलानुकूला भावना प्रतीयत एव । उत्पत्त्यादिबोधने तु सुतराम् ।

"रोहितो लोहितादासीद् धुन्धुस्तस्य सुतोऽभवत्"

इत्यादिदर्शनात् । किं चात्र भावनाविरहे लडादिव्यवस्था न स्यात् । तस्या एव वर्तमानत्वादिविवक्षायां तद्विधानात् ।

"क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका"

---

*असंगत्यापत्तेरिति । पृथिवीजलयोराधाराधेयभावस्य परस्परं सर्वैरभ्युपगमात्, 'जले नौः शकटं वहति, स्थले च नावम्' इत्यादिभाष्याच्च प्रकृते वस्तुतो धात्वर्थस्य क्रियात्वे क्रियात्वस्य च धात्वर्थत्वे बाधकाभावेन तत्र दूषणदानस्यानुचितत्वापत्तेरित्यर्थः ॥११॥

इति वाक्यपदीयादिति। नन्वेवमस्तीत्यत्र स्पष्टं कुतो न बुध्यत इत्याह—अन्यत्रेति। * अशेषभावात्—भावनायाः फलसमानाधिकरणत्वात्। तथा च भावनायाः फलसामानाधिकरण्यं तत्स्पष्टत्वे दोष इति भावः। नन्वेवं किं करोतीति प्रश्ने पचतीत्युत्तरस्येवास्तीत्युत्तरमपि स्यादिति चेदिष्टापत्तिः। आसन्नविनाशं कंचिदुद्दिश्य किं करोतीति प्रश्नेऽस्तीत्युत्तरस्य सर्वसंमतत्वात्। इतरत्र तु सुस्थतया निश्चिते किं करोतीति प्रश्नः पच्यादिविशेषगोचर एवेत्यवधारणादस्तीति नोत्तरमिति ॥ १२ ॥

ननु भावनायाः फलनियतत्वात्फलाश्रयस्य कर्मत्वात्सर्वेषां क्रियावाचकत्वे सकर्मकतापत्तिरित्यत आह—

फलव्यापारयोरेकनिष्ठतायामकर्मकः।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥१३॥

एकनिष्ठतायाम्—एकमात्रनिष्ठतायां* भिन्नाधिकरणावृत्तितायामिति यावत्। तेन गम्यादौ फलस्य कर्तृनिष्ठत्वेऽपि नातिव्याप्तिः। अकर्मको यथा भ्वादिः। तयोः फलव्यापारयोराश्रयभेदे

---

*अशेषभावादिति। नास्ति शेषः फलव्याप्त्यतिरिक्तो भावो (भवत्यस्मिन्निति व्युत्पत्त्या) अधिकरणं यस्य तस्मात् फलव्यधिकरणत्वाभावादित्यर्थः॥ १२ ॥

नन्तु फलव्यापारयोरेकाधिकरणवृत्तित्वस्याकर्मकताप्रयोजकत्वे गम्यादीनामपि संयोगरूपफलस्य व्यापारस्य च कर्तृवृत्तित्वेनाकर्मकत्वापत्तिरत आह—*एकमात्रनिष्ठतायामिति। तत्त्वं च तद्व्यक्तिभिन्नानिष्ठत्वे सति तद्व्यक्तिनिष्ठत्वम्। भिन्नाधिकरणवृत्तित्वाभाववत्त्वमिति यावत्। तथा च संयोगस्य व्यापाराधिकरणवृत्तित्वेऽपि व्यापारानधिकरणग्रामवृत्तित्वेनोक्तलक्षणाभावान्न दोष इति भावः।

सकर्मक इत्यर्थः।

उक्तं च वाक्यपदीये—

*आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते।
अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः॥ इति।

बिभ्रदिति। स्वधारणानुकूलो व्यापारोऽपि गम्यत*इति भावः। तेन कर्मणा सकर्मकत्वं तु न। अन्तर्भावात्। फलांशेन सामानाधिकरण्यसत्त्वादित्यर्थः। *आत्मानं जानाति इच्छति इत्यादौ च द्वावात्मानौ—शरीरात्मा ऽन्तरात्मा च। तत्रान्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवतीति "कर्मवत्कर्मणा" [पा० सू० ३-१-८७] इतिसूत्रीयभाष्योक्तरीत्या भिन्नाधिकरणनिष्ठतामादाय सकर्मकत्वमित्यवधेयम्॥१३॥

नन्वसत्त्वभूतक्रियाया धात्वर्थत्वे पाक इत्यत्रापि तत्प्रत्ययापत्तिः। न चेष्टापत्तिः, "कृदभिहितो भावो द्रव्यवत्प्रकाशते" इतिभाष्यविरोधादित्यत आह—

**आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः॥१४॥**

*आख्यातशब्दे—पश्य मृगो धावतीत्यादौ। भागाभ्यां—तिङन्ताभ्याम्। प्रकृतिप्रत्ययभागाभ्यामिति विवरणकारोक्तमपव्या-

---

*आत्मानमिति। आत्मानं—सत्ताम्। आत्मना—स्वेन। बिभ्रत्—धारयन्। *गम्यते इति। सत्तात्यागानुकूलव्यापाराभावस्यैव सत्तानुकूलव्यापारत्वेन प्रतीतेरिति भावः। नन्वेवमात्मानं जानातीत्यादौ ज्ञानस्य कर्तृमात्रनिष्ठतया ऽकर्मकत्वापत्तिरित्यत औपाधिकभेदपरिकल्पनेन तस्य व्यापारवैयधिकरण्यमुपपाद्य व्याचष्टे—* आत्मानमिति॥१३॥

* आख्यातशब्दे—तिङन्तसमुदाये इत्यर्थः।

"मृगो धावति पश्येति साध्यसाधनवर्तिता"।

ख्यानं पचतीत्यत्रापि भागद्वयसत्त्वात्। साध्यसाधनरूपता—यथाक्रमं ग्राह्या। साध्यत्वं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वम्। साधनत्वं कारकत्वेनान्वयित्वम्। स घञादिष्वपीति। प्रकृत्या साध्यावस्था, प्रत्ययेन साधनावस्था। इयान्विशेषः घञाद्युपस्थाप्या लिङ्गसंख्यान्वयिनी कारकान्वयिनी च। आख्यातान्तोपात्ता तु नैवम् *। तथाऽपि कारकत्वेनान्वयित्वमात्रेण दृष्टान्तदार्ष्टान्तिकतेत्यवधेयम्। न च घञन्ते धातुना तथाभिधाने मानाभावः। ओदनस्य पाक इति कर्मणि षष्ठ्या मानत्वात्। न च भवतीत्यध्याहृतक्रियान्वयात्षष्ठी "कर्तृकर्मणोः कृति" [पा० सू०२-३-६५] इति * कृदन्तेन योगे एव तद्विधानात्। "न लोका-

---

इति वाक्यपदीयात्। यत्तु हेलाराजीये आख्यातशब्दे–तिङन्ते यथा प्रकृत्या साध्यत्वेन प्रत्ययेन तिङा साधनत्वेनार्थः प्रत्याय्यते, तथा घञादिष्वपि। साध्यत्वसाधनत्वाभ्यां प्रतीतिमात्रेऽयं दृष्टान्त इति, तदत्र सन्दर्भविरुद्धम्। साधनत्वं कारकत्वेनान्वयित्वम् इत्यनुपदमेव वक्ष्यमाणतया तिङुपस्थितस्यार्थस्य प्रकृत्यर्थे कारकत्वेनान्वयाभावात्तदसङ्गतेः। पश्य मृग इत्यत्र तु तिङन्तभावतिपदार्थस्य कर्मत्वेनान्वयः स्पष्ट एव, पचति भवति इत्यत्र पचतेः कर्तृत्वेन च। कर्तृत्वकर्मत्वरूपेणान्वयित्वेऽपि नासत्त्वभङ्ग इत्युक्तं प्राक्।

*नैवमिति। लिङ्गान्वयिनी कर्तृत्वकर्मत्वेतरकारकत्वव्याप्यसम्बन्धान्वयिनी च नेत्यर्थः।

*कृदन्तेन योगे एवेति। अत एव 'ओदनपाकः' इति समाससिद्धिः। अन्यथा तत्रासामर्थ्यात् समासो न स्यात्। "कृद्योगा षष्ठी समस्यते" इति वार्तिकं तु 'वस्त्रकृतिः' इत्यादौ चरितार्थम्। शेषषष्ठ्या समासे तु कर्मत्वप्रकारकबोधस्याऽऽनुभविकस्यानापत्तेः। 'आश्चर्यो गवां दोहो ऽगोपेन' इत्यत्र "उभयप्राप्तौ कर्मणि" (पा० सू० २-३-६६) इत्यस्य अनन्तरन्यायेन "कर्तृकर्मणोः" (पा० सू० २-३-६५) इत्यस्यैव नियामकतया शेषषष्ठ्या दुर्वारत्वात्तत्प्रयोगासिद्ध्यापत्तेश्चेति दिक्।

व्ययनिष्ठाखलर्थतृनाम्" (पा० सू० २-३-६९) इति लादेशयोगे षष्ठ्या निषेधाच्च । एवं रीत्या काष्ठैः पाक इत्याद्यपीष्टमेव । फलांशोऽपि धातुनाऽसत्त्वावस्थापन्न एवोच्यते । अत एव स्तोकं पचतीतिवत् स्तोकं पाक इत्युपपद्यत * इति ॥१४॥

एतदेव स्पष्टयति—

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ॥१५॥

न च घञादिभिः सिद्धत्वेनाभिधाने मानाभावः । पाक इत्युक्ते भवति जायते नष्ट इत्याकाङ्क्षोत्थानस्यैव मानत्वात् । धातूपस्थाप्यायां तदसंभवस्योक्तत्वात् । स्तोकः पाक इत्यनापत्तेश्च । तस्माद्धात्वर्थान्वये* स्तोकादिशब्देभ्यो द्वितीया । घञर्थान्वये प्रथमा पुंलिङ्गता चेति तत्सिद्धये घञादेः शक्तिरुपेया । एतेन घञादीनां प्रयोगसाधुतामात्रमिति *नैयायिकनव्योक्तमपास्तम् । *न च घञन्तश-

---

*इत्युपपद्यते इति । पच्धात्वर्थफलेनाभेदान्वयात् फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात्कर्मत्वेन तदभिन्नस्यापि कर्मत्वम् । अन्यथा (फलस्य साध्यत्वेनानुपस्थितौ) साध्यत्वेनोपस्थिते एव कारकान्वयनियमात्तत्र तन्न स्यात् । अनुपस्थितव्यापारेऽन्वयविवक्षायां तु स्तोकः पाकः इत्येव भवति व्यापारस्याकर्मत्वादिति बोध्यम् । न चैवं "कर्तृकर्मणोः कृति" (पा० सू० २-३-६५) इति षष्ठ्यापत्तिरिति वाच्यम् । कर्तृसाहचर्यात्कर्मणोऽपि धात्वर्थे भेदेनान्वयिन एव ग्रहणेनादोषादिति शब्देन्दुशेखरे स्पष्टम् ॥ १४ ॥

*धात्वर्थान्वये—धात्वर्थफलान्वये इत्यर्थः । *नैयायिकनव्येति । विशिष्टशक्तिवादिनां घञि शक्तिकल्पनेऽपि समुदाये प्रातिपदिकसंज्ञाद्यनुरोधेन शक्तिस्वीकारावश्यकतया समुदायशक्त्यैव निर्वाहे तदवयवे तत्कल्पनमनर्थकमिति घञादीनामनर्थकत्वे प्रयोगसाधुतामात्रार्थं प्रयोग इति वदन्ति । तदेतदाह—*न चेत्यादिना ॥ १५ ॥

क्त्युपस्थाप्यान्वये स्तोकः पाक इति भवतीति वाच्यम् । घञन्तानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवादनुशासनाच्च घञादेरेव तथाशक्तिकल्पनादिति दिक् । एवं च घञ्शक्त्यभिप्रायेण कृदभिहित इति भाष्यमतो न तद्विरोध इति भावः ॥ १५ ॥

ननु कारकाणां भावनान्वयनियम एव पाक इत्यत्रापि कर्मषष्ठ्यनुसारेण भावनाया वाच्यत्वं सिध्येत् । तदेव कुत इत्याशङ्क्यं समाधत्ते—

संबोधनान्तं कृत्वोर्थाः कारकं प्रथमो वतिः ।
धातुसंबन्धाधिकारनिष्पन्नमसमस्तनञ् ॥१६॥
तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम् ।
साधुत्वमष्टकस्यास्यं क्रिययैवावधार्यताम् ॥१७॥

संबोधनान्तस्य क्रियायामन्वयः । 'त्वं ब्रूहि देवदत्त' इत्यादौ निघातानुरोधात् । "समानवाक्ये निघातयुष्मदस्मदादेशाः" इत्यनेन समानवाक्ये एव तन्नियमात् ।

उक्तं हि वाक्यपदीये—

संबोधनपदं यच्च तत्क्रियाया विशेषणम् * ।
* व्रजानि देवदत्तेति निघातोऽत्र तथा सति ॥ इति ।

पचति भवति देवदत्तेत्यादौ तु सूत्रभाष्यादिरीत्यैकवाक्यतासत्त्वात्स्यादेव निघातः । "तिङ्ङतिङः" [पा० सू० ८-१-

---

*क्रियाया विशेषणमिति । संबोधनविभक्तेरनुवाद्यविषयतया विधेयक्रियायामेवान्वयस्यौचित्यमिति न्यायसिद्ध एवायमर्थः ।

*व्रजानि देवदत्तेतीति । अत्र जानीहि इत्यध्याहारः । ज्ञानक्रियायां देवदत्तस्योद्देश्यतया व्रजनस्य कर्मतयाऽन्वयेन समानवाक्यत्वं बोध्यम् ।

२८] इति सूत्रयता तिङन्तानामप्येकवाक्यतास्वीकारात् । "एकतिङ् वाक्यम्" इति वदतां वार्तिककाराणां मते परं न । वस्तुत एकतिङ्विशेष्यकं वाक्यमिति तदभिप्रायस्य हेलाराजीयादौ वैयाकरणभूषणेऽस्माभिश्च प्रतिपादितत्वात्तन्मतेऽपि * भवत्येवेत्यवधेयम् ।

---

*तन्मतेऽपीति । अयं भावः–तिङन्तविशिष्टत्वमेकवाक्यत्वम् । वैशिष्ट्यञ्च स्वघटितत्वं–स्वार्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकपदघटितत्वं–स्वविशिष्टाघटितत्वमेतत्त्रितयसम्बन्धेन । स्ववैशिष्ट्यञ्च स्वेतरत्व–स्वार्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकेतरत्वैतदुभयसम्बन्धेन । त्वं ब्रूहि देवदत्त इत्यत्र ब्रूतौ युष्मच्छब्दार्थस्य कर्तृत्वेन देवदत्तस्योद्देश्यत्वेनान्वयः । एवञ्च—ब्रूहिइतितिङन्तघटितत्वमुक्तपदसमुच्चये. त्वं ब्रूहि इति तदर्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकपदे त्वं देवदत्तेति तद्घटितत्वं च, त्वं ब्रूहिइति तदितरत्वं ब्रूह्यर्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकेतरत्वञ्च घटपटादिपदेषु तदघटितत्वमपीत्युक्तपदसमुच्चयस्यैकवाक्यत्वसिद्धिः। अत्र विशेष्यतानिरूपितत्वं प्रकारतायां साक्षात्परम्परासाधारणमिति नद्यास्तिष्ठति कूले इत्यर्थके नद्यास्तिष्ठति इति समर्थसूत्रभाष्योक्ते निघातसिद्धिः। स्ववैशिष्ट्यघटकद्वितीयसम्बन्धानुपादाने तिष्ठति देवदत्तः, पचति मैत्रः इत्येतद्घटकस्य देवदत्तः पचति मैत्र इत्यस्यैकवाक्यत्वापत्तिः । तदुक्तौ तु पचत्यर्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकेतरदेवदत्तपदघटितत्वान्न दोषः। तादृशप्रथमसम्बन्धश्च देवदत्तः पचतीत्यत्र स्वार्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकं देवदत्तेति तदितरत्व् पचतीति तद्घटितत्वेन तत्राव्याप्तिवारणाय । तिङन्तवैशिष्ट्यघटकद्वितीयसम्बन्धोपादानं तु समुदायस्यैकवाक्यत्वसिद्धये। यत्तु पचतीत्यस्य तत्त्ववारणायेति, तन्न। तत्रैकवाक्यत्वस्य व्यपदेशिवद्भावेन स्वीकारात् । अत एव "अनन्त्यस्यापि प्रश्नाख्यानयोः" इति प्लुतसिद्धिः । प्रथमसम्बन्धोपादानेन तिङन्तरहितसमुदायस्य न तत्त्वम् । न चैवं त्वया शयितव्यमिति पदसमुदायस्य तत्त्वं न स्यात् तिङन्तघटितत्वाभावात् इति वाच्यम् । क्रियाप्रतिपादकत्वप्रकारकतात्पर्यविषयपदविशिष्टत्वस्य तत्त्वस्वीकारेण शयितव्यमित्यस्य तिङन्तत्वाभावेऽपि

*कृत्वोर्थाः । “ क्रियाभ्यावृत्तिगणने कृत्वसुच् ” [पा० सू० ५-४-१७] इति क्रियायोगे तत्साधुत्वोक्तेः । क्रियाया अभ्यावृत्तिः—पुनःपुनर्जन्म तस्मिन्द्योत्ये इति तदर्थात् ।

कारकम् । “कारके” इत्यधिकृत्य तेषां व्युत्पादनात् । कारकशब्दो हि क्रियापरः । करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्तेः । तथा चाग्रिमेष्वपादानादिसंज्ञाविधिषु क्रियार्थककारकशब्दानुवृत्त्या क्रियान्वयिनामेव संज्ञेति भाष्ये स्पष्टम् ।

*प्रथमो वतिः । “ तेन तुल्यं क्रिया चेद्वतिः ” [पा० सू० ५-१-११५] इति विहितः । तत्र यत्तुल्यं, सा क्रिया चेदित्युक्तत्वात् ।

धातुसंबन्धाधिकारे । “धातुसबन्धे प्रत्ययाः” [पा० सू० ३-४-१] इत्यधिकृत्य * तेषां विधानात् ।

असमस्तनञ् । समासायोग्यः प्रसज्यप्रतिषेधीयो नञित्यर्थः । उत्तरपदार्थान्वयेऽपि समासविकल्पेन पक्षेऽसमस्तत्वाद् यथाश्रुतग्रहणायोगात् । न चासमस्तनञः क्रियाऽन्वये मानाभावः । न त्वं पचसि, न युवां पचथः, चैत्रो न पचति, घटो न जायते इत्यादौ क्रियाया एव निषेधप्रतीतेः । अत एव विद्यमानेऽपि घटे तथा-

---

निरुक्तपदत्वसत्त्वेन तद्विशिष्टस्य तत्त्वाक्षतेः । अधिकमस्मद्गुरुचरणकृतशब्देन्दुशेखरटिप्पण्यां द्रष्टव्यम् । इदमेवैकवाक्यत्वं भाष्यकारेण ‘ आख्यातं सविशेषणं वाक्यम् ’ इत्युक्त्या ध्वनितम् ।

*कृत्वोर्था इति । पञ्चकृत्वो भुङ्क्ते इत्यादौ । *प्रथम इति । तेन मथुरायामिव मथुरावत् स्रुघ्ने प्राकार इत्यत्र वत्यर्थस्य प्राकारेऽन्वयेऽपि तस्यात्राग्रहणेन न क्षतिः । *इत्यधिकृत्येति । याहि याहि इति याति इत्यादाविति शेषः । अत्र लोडन्तार्थस्य यातीत्युपस्थितक्रियायां सामान्यविशेषभावेनान्वय इति भावः ।

प्रयोगः। तथा च घटो नास्तीत्यत्राप्यस्तित्वाभाव एव बोध्यते। न हि—घटो न ज्ञायते, नास्तीत्यनयोर्धात्वर्थभेदमन्तरेणास्ति विशेषः। तथा च भूतले न घट इत्यत्राप्यस्तीत्यध्याहार्यम्। प्रकारतासंबन्धेन नञर्थविशेष्यकबोधे धातुजन्यभावनोपस्थितेर्हेतुत्वस्य क्लृप्तत्वात् *। शेषं नञर्थनिर्णये वक्ष्यते ॥१६॥

°"यस्य च भावेन भावलक्षणम्" [पा० सू० २-३-३७] इत्यत्र भावनार्थकभावशब्देन तद्योगे साधुत्वाख्यानलाभात्। "षष्ठी चानादरे" [पा० सू० २-३-३८] इति तदग्रिमसूत्रेऽपि चकाराद्यस्य च भावेनेत्यायातीत्यर्थः। साधुत्वमिति। तत्स्वरूपं च वक्ष्यते*।

क्रिययैवेति। *अयं भावः—भूवादिसूत्रादिषु प्रायः क्रियाशब्देन भावनाव्यपदेशात्तत्र तस्य सांकेतिकी शक्तिः, फलांशे क्वाचित्कः क्रियते इति यौगिकः प्रयोगः। तथा च संज्ञाशब्दस्यानपेक्षप्रवृत्तत्वेन बलवत्त्वाद्भावनाऽन्वय एव साधुता लभ्यते। अत एव संज्ञाशब्दप्राबल्याद् रथन्तरमुत्तराग्रन्थपठितऋक्ष्वेव गेयं, न तु वेदे तदु-

---

*क्लृप्तत्वादिति। नञर्थनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधं प्रति भावनात्वावच्छिन्नविषयिणी धातुजन्योपस्थितिः कारणम् इति कार्यकारणभावस्य क्लृप्तत्वादित्यर्थः। अधिकमग्रे निरूपयिष्यामः ॥ १६ ॥

*वक्ष्यते इति। पुण्यजननयोग्यत्वं साधुत्वमिति वक्ष्यते "असाधुरनुमानेन" इति शक्तिनिर्णयप्रकरणस्थकारिकाव्याख्यायामित्यर्थः।

ननु क्रियाशब्दस्य धात्वर्थमात्रे प्रसिद्धेः फलान्वयेऽप्युक्ताष्टकस्य साधुत्वलाभे भावनान्वयनियमाभावात्तदनुरोधेन पाक इत्यादौ भावनाया वाच्यत्वावश्यकत्वं न स्यादित्याशङ्कां निराकुरुते—*अयं भाव इति।

त्तरपठ्यमानऋक्ष्विति नवमे निर्णीतम्* ।

* किं च फलांशोऽपि भावनायां विशेषणं, कारकाण्यपि क्वचित्तथाभूतानीति "गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यात्" (जै० सू० ३-१-२२) इति न्यायेन सर्वे सेवका राजानमिव भावनायामेव परस्परनिरपेक्षाण्यन्वियन्ति । 'न हि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके' इति न्यायेनापि फलं त्यक्त्वा भावनायामेवान्वियन्तीति मीमांसका अपि मन्वते । एवं च विशेष्यतया कारकादिप्रकारकबोधं प्रति धातुजन्यभावनोपस्थितिर्हेतुरिति

---

*नवमे निर्णीतमिति । "यद्योन्यां तदुत्तरयोर्गायति" "रथन्तरमुत्तरयोर्गायति" इत्यत्र द्विविधे उत्तरे संभवतः । तथा हि छन्दोगानामृक्पाठाय द्वौ ग्रन्थौ—छन्दः, उत्तरा च । तत्राद्यग्रन्थे रथन्तरस्य योनिभूता "अभित्वा शूर नो नुमः" इति ऋक् पठिता। ततः "त्वामिद्धि हवामहे" इत्यादयोऽभिहिताः । उत्तराग्रन्थे तु रथन्तरयोनिसूक्ते "अभित्वा" इति ऋच ऊर्ध्वम् "न त्वा वाँ अन्यो दिव्यो न पार्थिवः" इत्यादि ऋग्द्वयं पठितमिति। एवञ्चोत्तराशब्दस्य सम्बन्धिशब्दत्वेनोभयोर्योन्युत्तरत्वाविशेषाद्विकल्प इति पूर्वपक्षे "रूढमुत्तरयोरिति" इति लघुवार्तिकम्। अयं भावः—लोके तथा उत्तरशब्दस्य प्रवृत्तावपि वेदे उत्तराशब्दस्य ग्रन्थविशेषे रूढत्वेन निरपेक्षप्रवृत्तिकतया योगाद्बलीयस्त्वादुत्तराग्रन्थपठ्यमानर्चयोरेव गानं प्रकरणान्तरत्वात्त्वाच्चेति निर्णीतम् । तथा च तत्र यथा सम्बन्धिशब्दस्य तत्तत्सम्बन्धिप्रतीतिसापेक्षप्रवृत्तिकत्वं दुर्बलत्वं, संज्ञाशब्दस्य निरपेक्षप्रवृत्तिकत्वं प्रबलत्वं, तथा प्रकृते योगार्थसापेक्षप्रवृत्तिकयौगिकापेक्षयां संज्ञाशब्दस्य तदनपेक्षप्रवृत्तिकतया प्रबलत्वम् । विलम्बोपस्थापकत्वशीघ्रोपस्थापकत्वयोर्दौर्बल्यप्राबल्यप्रयोजकत्वम् इति पर्यवसानादिति भावः ।

नन्तु भूवादिसूत्रे क्रियाशब्देन भावनाव्यपदेश इव "कर्मवत् कर्मणा" इति सूत्रे क्रियाशब्देन फलस्य व्यपदेशात्तत्रापि तस्य सांकेतिकत्वं विनिगमनाविरहादित्यत आह—*किञ्चेति ।

कार्यकारणभावस्य क्लृप्तत्वाद् यत्रापि पक्त्वा पाचक इत्यादौ भावना गुणभूता तत्रापि क्लृप्तकार्यकारणभावानुरोधात्तस्यामेवान्वय इत्यवसीयत इत्यादि भूषणे प्रपञ्चितम् ।

केचित्तु भूतले घटो, देवदत्तो घटमित्यादाव*न्वयबोधाकाङ्क्षानिवृत्त्योरदर्शनान्न * तव्द्यतिरेकेण साधुत्वलाभ इत्याहुः ॥१७॥

स्वयमुपपत्तिमाह—

यदि पक्षेऽपि वत्यर्थः कारकं च नञादिषु ।
अन्वेति त्यज्यतां तर्हि चतुर्थ्याः स्पृहिकल्पना ॥१८॥

पर्वतो वन्हिमान् धूमात् महानसवत् । भूतले न घटः । भूतले घट इति आदिपदात् । एवमादिष्वनुशासनविरोधेऽपि यदि साधुत्वमन्वयश्चाभ्युपेयते, तर्हि चतुर्थ्याः स्पृहिकल्पनाऽपि *त्यज्यतामित्यर्थः । अनुशासनानुरोधतौल्ये* ऽर्धजरतीयमयुक्तमिति भावः ॥१८॥

एवं कर्त्रादौ विहितानामिन्यादीनां क्रिययैवान्वय इत्याह—

अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।
क्रिया संबध्यते तद्वत्कृतपूर्व्यादिषु स्थिता ॥१९॥

---

*अन्वयबोधाकाङ्क्षानिवृत्त्योरिति । शाब्दबोधस्य आकाङ्क्षानिवृत्तेश्चेत्यर्थः । *तव्द्यतिरेकेणेति । क्रियान्वयं विनेत्यर्थः । न च क्रियारूपार्थाध्याहारेणापि शाब्दबोधाकाङ्क्षानिवृत्त्योः सम्भवान्न तद्वाचकपदप्रयोगावश्यकतेति वाच्यम् । पदजन्यपदार्थोपस्थितेरेव शाब्दबोधोपयोगित्वात् । पदानां संभूयान्वयबोधकत्वव्युत्पत्तेश्चेति बृहद्भूषणे विस्तरः ॥ १७ ॥

*त्यज्यतामिति । पुष्पेभ्य इति चतुर्थ्यां श्रुतायां स्पृहयतीत्येवाध्याह्रियते, न पदान्तरम् अर्थमात्रं वा; इदं त्यज्यतामित्यर्थः । *अर्धजरतीयमिति । अस्या अर्धमिव अर्धजरती तत्सदृशमर्धजरतीयम् ।

न *विविच्य ग्रहो *ग्रहणं यस्याः साऽविग्रहा गुणीभूतेति यावत्। तथा च ग्रामं गत इत्यत्र यथा क्तप्रकृत्यर्था गुणीभूताऽपि क्रिया ग्रामादिकर्मभिः संबध्यते, तथा कृतपूर्वी कटमित्यत्रापि गुणभूता इन्यादिभिरित्यर्थः। न च वृत्तिमात्रे समुदायशक्तेर्वक्ष्यमाणत्वात्तत्रान्तर्गता भावना पदार्थैकदेश इति *कथं तत्रान्वय इति वाच्यम्। नित्यसापेक्षेष्वेकदेशेऽपि देवदत्तस्य गुरुकुलं, चैत्रस्य नप्तेत्यादाविवान्वयाभ्युपगमात्*। एवं भोक्तुं पाको भुक्त्वा पाक इत्यत्रापि द्रष्टव्यम्॥ १९॥

"समासाच्च तद्विषयात्"(पा० सू० ५-३-१०६) इति छः। यथा जरत्याऽर्धं काम्यते ऽर्धं न, तथा ऽत्रायुक्तमित्यर्थः॥ १८॥

*विविच्य—पृथग्भूय, इतराविशेषणत्वेनेति यावत्। *ग्रहणं ज्ञानम्। *कथं तत्रान्वय इति। पदार्थान्तरनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति मुख्यविशेष्यतया पदजन्यपदार्थोपस्थितिः कारणम्। अत एव नीलो घट इत्यत्र घटत्वेनोपस्थितघटपदार्थ एव नीलपदार्थोऽन्वेति न तु घटत्वे, तस्य विशेषणत्वेनोपस्थित्या ऽन्वयितावच्छेदकरूपेणानुपस्थितेः। अत एव नित्यो घट इति न प्रयोगः। अन्यथा घटत्वे नित्यपदार्थस्यान्वयसम्भवेन तादृशप्रयोगस्य प्रामाण्यं स्यात्। एवं च प्रकृतेऽपि क्रियाया मुख्यविशेष्यतयोपस्थित्यभावेन तत्र ग्रामादिकारकाणामन्वयासम्भवः। एतत्कार्यकारणभावमूलक एव 'पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशेन" इति व्युत्पत्तिरिति भावः।

*अन्वयाभ्युपगमादिति। देवदत्तस्य गुरुकुलमित्यादौ कुलपदार्थविशेषणतयोपस्थितगुरुपदार्थे देवदत्तस्यान्वयदर्शनेनोक्तकार्यतावच्छेदककोटौ नित्यसाकाङ्क्षपदार्थावृत्तीति विशेषणदानेन पदार्थान्तरनिष्ठप्रकारतानिरूपितनित्यसाकाङ्क्षपदार्थावृत्तिविशेष्यतासम्बन्धेन शाब्दबोधं प्रति मुख्यविशेष्यतया पदजन्यपदार्थोपस्थितेः कारणत्वमिति कार्यकारणभावाभ्युपगमेन गुरुपदार्थनिष्ठविशेष्य-

अतिप्रसङ्गमाशङ्क्य समाधत्ते—

क्त्वोर्थाः क्त्वातुमुन्वत्स्युरिति चेत्सन्ति हि क्वचित् ।
अतिप्रसङ्गो नोद्भाव्योऽभिधानस्य समाश्रयात् ॥२०॥

भोक्तुं पाको, भुक्त्वा पाक इत्यादौ "तुमुण्वुलौ क्रियायां

तथा नित्यसाकाङ्क्षपदार्थवृत्तित्वेनोक्तनियमस्याप्रवृत्तिवत् प्रकृतेऽपि क्रियाया जनकत्वांशे नित्यसाकाङ्क्षत्वेनोक्तनियमाप्रवृत्तेरित्यर्थः।

ननु प्राचीनतार्किकमते समासे विशिष्टशक्त्यस्वीकारेण गुरुपदार्थस्य विशेष्यतयैवोपस्थितेः सत्त्वेनोक्तस्थलीयान्वयदर्शनेन तादृशव्युत्पत्तिसंकोचोऽसम्भवीत्यत आह—चैत्रस्य नप्तेति । स्वप्रयोज्यं (जन्यशरीरजन्यं) शरीरं नप्तृपदार्थः । तदेकदेशजन्यत्वे चैत्रस्याऽन्वयः । विशेष्येऽन्वये तु चैत्रस्य पुत्रेऽपि तथाविधप्रयोगापत्तिः । तस्यापि पितामहजन्यजन्यत्वात् । चैत्रनिरूपितप्रयोज्यत्वाश्रयत्वाच्च । न च प्रयोज्यत्वं परम्पराजन्यत्वमेवेति न दोष इति वाच्यम् । चतुर्थादिपुरुषेऽपि तथाप्रयोगापत्तेः । भोक्तुं पाक इत्यत्रापि पच्धात्वर्थस्य निष्पाद्यमानक्रियावाचकत्वेन निष्पाद्यमानत्वस्य च पुत्रत्वस्येव निष्पादकत्वांशे नित्यसाकङ्क्षत्वेन उक्तन्यायाप्रवृत्त्या पाकपदार्थैकदेशपचधात्वर्थे साध्यावस्थापन्नव्यापारेऽन्वय इति न काप्यनुपपत्तिरिति ॥

साध्यत्वं च निष्पाद्यमानत्वमेव । तद्रूपेणैव च बोधः । यद्यपि 'घटं करोति' इत्यादौ घटस्यापि साध्यमानत्वं प्रतीयते, तथापि पदान्तरसमभिव्याहारात् तथा, स्वतस्तु घटादिपदाद् द्रव्यं सिद्धत्वेनैव प्रतीयते । सिद्धत्वं च सूक्ष्मरूपेण तस्य बोध्यम् । यद्यपि क्रियापि सूक्ष्मरूपेण सिद्धत्वेनैव प्रतीयते, तथापि शक्तिस्वाभाव्यात् स्थूलरूपेण साध्यत्वेनैव तस्याः प्रतीतिः, द्रव्यस्य तु सूक्ष्मरूपेण सिद्धत्वेनैवेति न दोषः । क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपस्य साध्यत्वे तु पचति भवति, भुक्त्वेत्यादौ पचतिभुक्त्वेत्यादीनां क्रियाकाङ्क्षादर्शनेन तादृशरूपेणाभानात् कारकान्वयानापत्तिर्धातुत्वानापत्तिश्चेत्यादिदूषणपात इति लघुमञ्जूषायां धात्वर्थनिर्णये स्पष्टम् ॥ १९ ॥

क्रियार्थायाम्" [पा० सू० ३-३-१०] "समानकर्तृकयोः पूर्वकाले" [पा० सू० ३-४-२१] इति क्रियावाचकोपपदे क्रिययोः पूर्वोत्तरकाले विधीयमाना अपि तुमुनादयो गुणभूतां तामादाय यथा जायन्ते, तथा कृत्वोर्था अपि स्युः। एकः पाक इत्यत्र "एकस्य सकृच्च" [पा० सू० ५-४-१९] द्वौ पाकौ, त्रयः, चत्वार इत्यत्र "द्वित्रिचतुर्भ्यः सुच्" [पा० सू० ५-४-१८] पञ्चेत्यत्र कृत्वसुच् स्यात्। तथा च सकृत्पाकः, द्विस्त्रिश्चतुः पाका इत्याद्यापत्तिरिति चेदिष्टापत्तिः। "द्विर्वचनम्" इत्यादिदर्शनात्। अतिप्रसङ्गस्त्वनभिधानात् * नेत्याह—अतीति। "न हि वचिरन्तिपरःप्रयुज्यते" इत्याद्यभियुक्तरीत्या समाधेयमिति भावः।

केचित्तु "क्रियाभ्यावृत्तिगणने" इत्यत्र क्रियाग्रहणं व्यर्थम्। तस्या एवाभ्यावृत्तिसंभवेन सामर्थ्यात्तल्लाभात्। तथा च साध्यमात्रस्वभावक्रियालाभाय तदिति वाच्यम्। न च पाक इत्यादौ तादृशीति नातिप्रसङ्गः। द्विर्वचनमिति च द्विःप्रयोगो द्विर्वचनमिति व्युत्पत्त्या "द्विर्वचनेऽचि" [पा० सू० १-१-५९] इति ज्ञापकं वाऽऽश्रित्योपपादनीयमित्याहुः * ॥ २०॥

ननु सिद्धान्ते बोधकतारूपा शक्तिराख्यातशक्तिग्रहवतां * बोधा-

---

*अनभिधानादिति। 'सकृत् पाकः' इत्यादिप्रयोगैः पचिक्रियाजन्मगणनाप्रतीत्यभावादित्यर्थः। "द्वौ पाकावित्यत्र कस्मान्न भवति। नैतत्क्रियागणनम्" इत्यादिना "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" (पा० सू० ५-४-१७) इति सूत्रे भाष्ये स्पष्टमेतत्।

* इत्याहुरिति। "द्विर्वचने" (पा० १-१-५८) इति निर्देशेन तस्य साधुत्वबोधनेऽपि भावार्थकद्विरावृत्तिर्द्विष्प्रयोग इत्यादीनाम् निर्वाहोऽत्रारुचिरिति बोध्यम्॥ २०॥

* आख्यातशक्तिग्रहवतामिति। आख्याते—तिबादिप्रत्यये

दावद्यियकीति धातोरेव भावना वाच्या नाऽऽख्यातस्येति कथं निर्णय इत्याशङ्कां समाधत्ते—

भेद्यभेदकसंबन्धोपाधिभेदनिबन्धनम् ।
साधुत्वं तदभावेऽपि बोधो नेह निवार्यते ॥२१॥

भेद्यं—विशेष्यं, भेदकं—विशेषणं, तयोर्यः सम्बन्धस्तस्य यो भेदस्तन्निबन्धनं* साधुत्वम् । *अयमर्थः—व्याकरणस्मृतिः शब्दसाधुत्वपरा, तत्रैवावच्छेदकतया कल्प्यमानधर्मस्य शक्तित्वं वदतां मीमांसकानां पुनः शक्तत्वं साधुत्वमित्येकमेवेति तद्रीत्या विचारे साधुत्वनिर्णये शक्तिनिर्णय उच्यते । *अतिरिक्तशक्तिवादेऽपि आख्याता-

---

शक्तिः—भावनारूपार्थनिरूपिता शक्तिः तस्या ग्रहो-ज्ञानं तद्वतां मीमांसकानामित्यर्थः । *तन्निबन्धनमिति । जातिप्रवृत्तिनिमित्तको अश्वशब्दस्तुरगेऽसाधुर्धनराहित्यप्रवृत्तिनिमित्तकस्तु साधुः, एवमश्वत्वजातिप्रवृत्तिनिमित्तको अश्वशब्दस्तुरगे साधुर्धनराहित्यप्रवृत्तिनिमित्तकोऽसाधुरिति भावः । एवञ्च व्याकरणशास्त्रेण यस्य यस्मिन्नर्थे साधुत्वमभिहितं तत्रैव तस्य साधुत्वमिति फलितम् ।

ननु व्याकरणस्मृतेः "अथ शब्दानुशासनम्" इति भाष्यस्य 'शब्दशास्त्रम्' इत्यभियुक्तव्यवहाराच्च साधुत्वमात्राख्यायकत्वेन तेन शक्तिनिर्णयो दुर्वच इत्यत आह—*अयमर्थ इति । वक्ष्यमाणोऽर्थ इत्यर्थः । साधुशब्देभ्य एव बोधाङ्गीकारेण शक्तेः साधुशब्दमात्रवृत्तितया जात्यखण्डोपाध्यतिरिक्तानां सावच्छिन्नत्वनियमाद् बोधजनकताशक्तेरपि तत्त्वेन तदवच्छेदकत्वं साधुत्वमेव इति तदेव शक्तित्वमिति व्याकरणस्य साधुत्वमात्राख्यायकत्वेऽपि शक्तिनिर्णायकत्वमपि सिद्धम् । एवञ्च "लः कर्मणि च भावे चाकर्मकेभ्यः" (पा०-३-४-६९.) इति सूत्रस्य कर्तरि कर्मणि वा लकारविधायकस्य विरोधेन भावनाभिप्रायेण तिङ्प्रयोगस्यासाधुत्वात्तत्र न तस्य शक्तिरिति तात्पर्यम् ।

*अतिरिक्तशक्तिवादेऽपीति । साधुत्वातिरिक्ता शक्तिः—इच्छा-

नामसाधुता भावनायां स्यादेव* । तथा च चतुर्थ्यर्थे तृतीयाप्रयोगवद्धात्वर्थभावनायामाख्यातप्रयोगे याज्ञे कर्मण्यसाधुशब्दप्रयोगात् "नानृतं वदेत्" इति निषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तं दर्शनान्तरीयव्युत्पत्तिमतां स्यादिति ।

ननु त्वन्मते नानृतमिति निषेधः क्रत्वर्थ एव न सिध्येत् । आख्यातेन कर्तुरुक्तत्वाच्छ्रुत्या पुरुषार्थतैव स्यात् । प्रकरणाद्धि क्रत्वर्थता, तच्च श्रुतिविरोधे बाध्यते* इति चेन्न । "तिङर्थस्तु

विशेषः, पदार्थान्तरं वा इति शक्तिवादेऽपीत्यर्थः। *स्यादेवेति । तन्मते व्याकरणस्य साधुत्वमात्रनिर्णायकत्वेऽपि अर्थविशेषनिबन्धनमेव तेषां शब्दानां पूर्वोक्तरीत्या साधुत्वमिति भावनाभिप्रायेणाऽऽख्यातानां साधुत्वस्यालाभात् ।

नन्वेवंविधः शब्दो यद्यसाधुस्तर्हि तो बोधो न स्यात् । शाब्दबोधं प्रति साधुत्वज्ञानस्य कारणत्वात् तदभावनिश्चयस्य च प्रतिबन्धकत्वात् इति चेन्न । वस्तुतोऽसाधुत्वेऽपि कारणीभूतसाधुत्वज्ञानसम्भवादित्यभिप्रेत्याह कारिकायां—*बोधो नेहेति । बोधोऽस्तु नाम, असाधुत्वं तु स्यादेवेत्यर्थः । अत एव "समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः" इति भाष्यं सङ्गच्छते । वस्तुतः साधुत्वज्ञानस्य शाब्दबोधकारणत्वाभावात् तदभावनिश्चयस्य तत्प्रतिबन्धकत्वाभावाच्चेति 'असाधुरनुमानेन' इत्यत्र स्पष्टम् ।

* बाध्यते इति । "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" (जै० ३-३-१४) इति न्यायेन प्रकरणात् श्रुतेर्बलवत्त्वबोधनात् । किञ्च सर्वत्रैव यो यदर्थं प्रवृत्तः स तन्निवार्यते, स तदर्थमेव प्रतिषेधो भवति । आख्यातस्य कर्त्रर्थत्वे च पदश्रुत्याऽनृतवदननिषेधः पुरुषार्थ एव स्यात् । ततश्चानृतवदनप्रयुक्तक्रतुवैगुण्यवारणार्थं प्रायश्चित्तानुष्ठानादिसकलयाज्ञिकमीमांसकादिशिष्टाचारविरोधः स्यादिति भावः ।

ननु तिङर्थस्य विशेषणत्वेऽपि तस्य श्रुत्यर्थत्वादपायात् कथं

विशेषणम्" इत्यनेन परिहृतत्वात्। *न हि गुणभूतः कर्ता निषेधं स्वाङ्गत्वेन ग्रहीतुमलम्।* भावना तु प्रधानं तं ग्रहीतुं समर्थैति प्रकरणात् क्रत्वर्थतैव। *अस्तु वा क्रतुयुक्तपुरुषधर्मः। अनुष्ठाने विशेषाभावात्। *"जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू" इतिवाक्योक्तमन्त्रविधिवदित्यादि भूषणे प्रपञ्चितम्।

निषेधस्य न पुरुषार्थत्वमतस्तदुपपादयति *न हि गुण इति। गुणप्रधानसन्निधौ प्रधाननिरूपिताङ्गत्वस्यैव न्याय्यत्वात्। विशेषणेऽङ्गसम्बन्धे तु तदपेक्षं प्राधान्यं, विशेष्यापेक्षमप्राधान्यञ्च विशेषणे स्यादिति विरुद्धद्वयापत्तेश्च। अत एव "सोमेन यजेत" इति वाक्ये सोमस्य यागे करणत्वेनान्वयो निराकृतो मीमांसकैः। * भावना त्विति। विशेषणत्वेनेतरान्वितस्यान्यत्र विशेषणतयाऽन्वयासम्भवेऽपि तिङर्थं प्रति विशेष्यायास्तस्या नञर्थे विशेषणतयाऽन्वयो नानुपपन्न इति सा ग्रहीतुं समर्थैवेति भावः। एवं च भावनायाः कैमर्थ्याकाङ्क्षाप्रकरणात् सिद्धं क्रत्वर्थत्वमिति। श्रुतेः प्रकरणापेक्षया प्राबल्यं तु यत्र श्रुतिप्रकरणयोरुभयोरङ्गत्वसंग्राहकत्वासम्भवस्तत्रैवेति तात्पर्यम्।

नन्वेवं "मा हिंस्यात् सर्वा भूतानि" "न कलञ्जं भक्षयेत्" इत्यादावपि तिङर्थस्य कर्तुः प्राधान्येनोक्तरीत्या निषेधस्य पुरुषार्थत्वं न स्यात्। अत आह—*अस्तु वेति। क्रतुयुक्तपुरुषधर्म इत्यस्य श्रुतिप्रकरणाभ्यामिति शेषः।

ननु प्रकरणाच्छ्रुतिं कल्पयित्वा ततो विनियोगः कार्य इति प्रथमत एव श्रुत्या पुरुषार्थत्वनिर्णये न क्रत्वर्थत्वसम्भव आकाङ्क्षाविरहेण प्रकरणस्याप्रसरादित्यत आह—*जञ्जभ्यमान इति। तृतीयाध्याये हि—"प्राणो वै दक्षः। अपानः क्रतुः। तस्माज्जञ्जभ्यमानोऽनुब्रूयात्—मयि दक्षक्रतू इति, प्राणापानावेवात्मन्धत्त" इत्यत्र शानचा कर्तुरभिधानात् समभिव्याहारात्मकवाक्येन प्रकरणं भङ्क्त्वा विपरिणतवाक्यशेषावगतप्राणापानधारणादिरूपफलविशिष्टपुरुषार्थतया मन्त्रविधिरिति पूर्वपक्षे क्रतावपि जञ्जभ्यमानपुरुषसम्भवेन वाक्यप्रकरणयोर्विरोधाभावे सत्युभाभ्यामपि प्रमाणाभ्यां क्रतुयुक्तपुरुषा-

नन्वाख्यातस्य भावनायामसाधुत्वे ततस्तद्बोधो न स्यात्साधुत्वज्ञानस्य शाब्दबोधे हेतुत्वादित्यत आह—बोध इति। असाधुत्वेऽपि साधुत्वभ्रमाद्बोधोऽस्तु नाम, अपभ्रंशवत् । असाधुत्वं तु स्यादेवेति भावः । वस्तुतः साधुत्वज्ञानं न हेतुस्तव्द्यतिरेकानिर्णयोऽपि न प्रतिबन्धक इति "असाधुरनुमानेन" इत्यत्र वक्ष्यामः ॥ २१ ॥

रङ्गोजिभट्टपुत्रेण कौण्डभट्टेन निर्मिते ।
पूर्णो भूषणसारेऽस्मिन् धात्वाख्यातार्थनिर्णयः ॥ १ ॥

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे धात्वर्थाख्यातसामान्यार्थनिर्णयः समाप्तः ॥

अथ प्रत्येकं दशलकाराणामर्थं निरूपयति—

वर्तमाने परोक्षे श्वोभाविन्यर्थे भविष्यति ।
विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः॥१॥
(२२)

लडाद्यष्टितः षट् क्रमेणार्थेषु द्रष्टव्याः। तथा हि—वर्तमानेऽर्थे लट्। "वर्तमाने लट्" [पा० सू० ३-२-१२३] इति सूत्रात्।

र्थत्वमुक्तमन्त्रस्येति सिद्धान्तितं जैमिनिना (जै०३-४-२०)। एवं च यत्र प्रमाणानां विरोधस्तत्रैव प्रबलदुर्बलचिन्ता नान्यत्रेति प्रकृतेऽपि अनृतवदननिषेधस्याविरुद्धाभ्यां श्रुतिप्रकरणाभ्यां क्रतुयुक्तपुरुषार्थत्वमेवेति तिङः कर्तृकर्मार्थकत्वेऽपि न दोष इति दिक् ॥ २१ ॥

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां धात्वाख्यातार्थसामान्यनिर्णयः।

*प्रारब्धापरिसमाप्तत्वं,*भूतभविष्याद्भिन्नत्वं वा वर्तमानत्वम्। पचतीत्यादावधिश्रयणाद्यधःश्रयणान्ते मध्ये तद् अस्तीति भवति लट्प्रयोगः।

---

*प्रारब्धापरिसमाप्तत्वमिति। प्रारब्धा चासावपरिसमाप्ता च या क्रिया तदधिकरणत्वोपलक्षितकालत्वमित्यर्थः। वर्तमानत्वस्य कालगतत्वेन सर्वानुभवसिद्धत्वात्। अत एव 'आख्यातार्थः कालः' इति प्रवादः सङ्गच्छते। काष्ठप्रज्वालनादिकतिपयव्यापारोत्तरमधःश्रयणप्राक्कालिकव्यापारबोधनाभिप्रायेण पचतीति प्रयोगो न तु ततः प्राक् तदनन्तरं वेति बोध्यम्। नन्वेवं ह्यो दशवादनमारभ्य द्विवादनपर्यन्तं जातपाकगतद्वादशवादनकालिकपचिक्रियाबोधनतात्पर्येणाद्यापि 'पचति' इति प्रयोगापत्तिः, इत्यत आह—*भूतभविष्यद्भिन्नत्वमिति। वस्तुतस्तु वर्तमानभविष्यद्भिन्नत्वं भूतत्वमित्याद्यपि वक्तुं शक्यम्। विनिगमनाविरहात्। तथा च भूतादिभेदघटितं वर्तमानत्वं न वक्तव्यं, किन्तु भूतत्वघटू तदघटितमेवेति। किञ्च वर्तमानध्वंसप्रतियोगित्वं भूतत्वमिति भूतत्वशरीरे वर्तमानत्वप्रवेशेन तच्छरीरे च भूतत्वप्रवेशेनान्योन्याश्रय इति प्रारब्धापरिसमाप्तत्वमेव लक्षणं साधु। न च प्रागुक्तदोषापत्तिरस्मिन् लक्षणे इति वाच्यम्। प्रारब्धापरिसमाप्तत्वस्य काले विशेषणत्वाभ्युपगमेन प्रयोगकालिकैतादृशक्रियाधिकरणत्वाभावेनादोषात्। एवं च प्रयोगविशिष्टत्वं वर्तमानत्वम्। वैशिष्ट्यञ्च स्वाधिकरणत्वं—स्वजन्यबोधविषयत्वप्रकारकतात्पर्यविषयीभूतक्रियाप्रतियोगिकप्रागभावानधिकरणत्वं—स्वजन्यबोधविषयत्वप्रकारकतात्पर्यविषयीभूतक्रियाप्रतियोगिकध्वंसानधिकरणत्वमेतत्त्रितयसम्बन्धेनेति फलितम्। तथा चातीतक्रियाप्रतियोगिकप्रागभावध्वंसानधिकरणतादृशद्वादशवादनकाले प्रयोगाधिकरणत्वाभावात् प्रयोगाधिकरणकाले च क्रियाप्रतियोगिकध्वंसाधिकरणत्वान्नातिव्याप्तिः।

नन्वेवमपि अनेकव्यापाररूपत्वेन पचिक्रियायास्तन्मध्यवर्तिक्रियाधिकरणकाले तत्प्राग्वर्तिक्रियाध्वंसवत्त्वेन तदुत्तरवर्तिक्रियाप्रागभाववत्त्वेन चाव्याप्तिः। यदि तद्वारणाय क्रियायां यावत्त्वं विशेष्यते तथापि 'देवदत्तो भोक्तुं पचति' इतिप्रयोगाधिकरणकाले भुजधात्वर्थभोजनक्रियाया अपि प्रकृतप्रयोगजन्यबोधविषयत्वेन तत्प्रागभावस्यैव सत्त्वादव्याप्तिस्तदवस्थैवेति चेन्न।

प्रागभावे ध्वंससमानाधिकरणेति, ध्वंसे च प्रागभावासमानाधिकरणेतिविशेषणदानेनादोषात्। तथा हि—तत्प्राग्वर्तिनष्टकतिपयक्रियाध्वंससामानाधिकरण्यमेव तदुत्तरवर्तिक्रियाप्रागभावे, एवं तदुत्तरक्रियाप्रागभावसामानाधिकरण्यमेव तत्प्राग्वर्त्तिक्रियाध्वंसे इति स्वजन्यबोधविषयत्वप्रकारकतात्पर्यविषयीभूतक्रियाप्रतियोगिकः प्रागभावस्तदुत्तरवर्त्तिक्रियाप्रतियोगिको ग्रहीतुमशक्यः, एवं तादृशध्वंसोऽपि तत्प्राग्वर्तिक्रियाप्रतियोगिको ग्रहीतुमशक्य इति अन्त्यक्रियाध्वंस एव, आद्यक्रियाप्रागभाव एव तादृश इति तदनधिकरणत्वमेव तत्र, न तु तदधिकरणत्वमिति न दोषः।

नन्वेवमपि देवदत्तोऽपाक्षीत् यज्ञदत्तश्च पचति इति देवदत्तसमवेतक्रियासमाप्ति-यज्ञदत्तक्रियारम्भान्तरालिकसमये 'विष्णुमित्रो गच्छति' इति प्रयोगानापत्तिस्तत्र काले प्रयोगो 'विष्णुमित्रो गच्छति' इति तदधिकरणत्वस्य सत्त्वेपि प्रयोगजन्यबोधविषयत्वप्रकारकतात्पर्यविषयीभूता क्रिया देवदत्तनिष्ठा पचिक्रिया तत्प्रतियोगिकप्रागभावसमानाधिकरणध्वंसाधिकरणत्वम्। एवं स्वजन्यबोधविषयत्वप्रकारकतात्पर्यविषयीभूता क्रिया यज्ञदत्तनिष्ठा तत्प्रतियोगिकध्वंससमानाधिकरणप्रागभावाधिकरणत्वमपि तत्रेति निरुक्तवर्तमानलक्षणासत्त्वादिति चेन्न।

धातुविशिष्टत्वं तत्त्वमिति स्वीकारेणादोषात्। वैशिष्ट्यं च स्वप्रयोगाधिकरणत्वं—स्ववाच्ययावद्व्यापारप्रतियोगिकप्रागभावकूटानधिकरणत्वं—स्ववाच्ययावद्व्यापारप्रतियोगिकध्वंसकूटानधिकरणत्वमेतत्त्रितयसम्बन्धेन। तथा च प्रकृते गम्धातोर्लटो विवक्षितत्वे धातुपदेन तस्यैव ग्रहणे तद्वाच्ययावद्व्यापारप्रागभावानधिकरणत्वं धात्वन्तरवाच्यव्यापारप्रागभावसत्त्वेऽप्यक्षतमेव। एवं तद्वाच्ययावद्व्यापारध्वंसकूटानधिकरणत्वमप्यक्षतमेवेति न दोषः। पचिक्रियारम्भप्राक्क्षणेऽतिव्याप्तिनिरासाय द्वितीयसम्बन्धः। पचिक्रियासमाप्त्यन्तरक्षणे तद्वारणाय तृतीयसम्बन्धः। विस्तरस्तु व्युत्पत्तिवादटिप्पणे द्रष्टव्यः।

ननूक्तलक्षणे आत्मादिवृत्तिक्रियाणां नित्यत्वेन तदीयध्वंसप्रागभावानामप्रसिद्धतया तदधिकरणत्वाभावस्याप्यप्रसिद्धतया तत्र

*आत्माऽस्ति पर्वताः सन्तीत्यादौ तत्तत्कालिकानां राज्ञां क्रियाया अनित्यत्वात्तद्विशिष्टस्योत्पत्त्यादिकमादाय वर्तमानत्वमूह्यम्। उक्तं च भाष्ये—"इह भूतभविष्यद्वर्तमानानां राज्ञां क्रिया*स्तिष्ठतेरधिकरणम्" इति।

*परतो भिद्यते सर्वमात्मा तु न विकम्पते।
पर्वतादिस्थितिस्तस्मात्पररूपेण भिद्यते॥

इति वाक्यपदीये च।

एवं "*तम आसीत्" "तुच्छ्येनाभ्वपिहितं यदासीत्" "अहमेकः प्रथममासं, वर्तामि च, भविष्यामि च" इत्यादिश्रुतयोऽपि योज्याः। तच्च वर्तमानत्वादि लडादिभिर्द्योत्यते। क्रियासामान्यवाचकस्य तद्विशिष्टे लक्षणायां लडादेस्तात्पर्यग्राहकत्वेनोपयोगात्।

सन्तीत्यादिप्रयोगानापत्तिरित्यत आह—*आत्माऽस्ति पर्वताः सन्ति इत्यादाविति। तदीयसत्ताया नित्यत्वेन तद्ध्वंसप्रागभावयोरप्रसिद्धत्वेऽपि तदानीन्तनराजादिनिष्ठक्रियाध्वंसप्रागभावयोः प्रसिद्धत्वेन तादृशध्वंसप्रागभावाधिकरणत्वाभावस्य ग्रहीतुं शक्यत्वान्न दोष इति भावः।

* तिष्ठतेरधिकरणमिति। अत्र कैयटः 'तत्र राज्ञां स्थितिर्भूतादिभेदेन भिन्ना पर्वतादिस्थित्यादेर्भेदिकेति क्रियारूपत्वं, कालत्रययोगश्चोपपद्यते' इति। अन्यथा पर्वतादिस्थितीनां सदृशावयवत्वात् पूर्वापरीभूतावयवसमूहत्वरूपक्रियात्वानुपपत्तिः। एवं तासां दुरवधारभेदतया कालभेदानुपपत्तिश्च स्यादिति भावः।

*परतो भिद्यते इति। सर्वं-स्वात्मसत्तादिकं सर्वम्। परतो भिद्यते-परत एव भिद्यते। भेदे स्वावधिकं स्वातिरिक्तमेव। आत्मा तु—स्वस्वरूपं तु। न विकम्पते—स्वतोऽभेदवान् भवतीत्यर्थः।

*तम आसीदिति। तमः—अज्ञानम्। एवं च तस्यापि नित्यत्वेन तदीयक्रियाधारकालस्य भूतत्वमुक्तरीत्यैव निर्वाह्यम्।

अन्वयव्यतिरेकाभ्यां तद्रूपं लडादिवाच्यमेव । अन्यथा प्रत्ययानां वाचकत्वविलोपापत्तिरित्यपि पक्षान्तरम् ।

लिडर्थमाह—परोक्ष इति । "परोक्षे लिट्" [पा० सू० ३-२-११५] इति सूत्रात् । कालस्तावद्*अद्यतनानद्यतनभेदेन द्विविधः। द्विविधोऽपि भूतभविष्यद्रूपः। तत्रानद्यतने भूते परोक्षे लिडित्यर्थः। तेनाद्यतने भूते,ऽनद्यतने भविष्यति, भूतेऽप्यपरोक्षे च न लिट्प्रयोगः। परोक्षत्वं च साक्षात्करोमीत्येतादृशविषयताशालिज्ञानाविषयत्वम् । न च "क्रिया नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुम्" इति भाष्यात्तस्या अतीन्द्रियत्वेन परोक्षे इत्यव्यावर्तकमिति शङ्क्यम् । पिण्डीभूताया निदर्शयितुमशक्यत्वेऽप्यवयवशः साक्षात्करोमीतिप्रतीतिविषयत्वसंभवात् । अन्यथा 'पश्य मृगो धावति' इत्यत्र तस्या दर्शनकर्मता न स्यादिति प्रतिभाति* । *व्यापाराविष्टानां क्रियानुकूलसाधनानामेवात्र पारोक्ष्यं विवक्षितमतो नोक्तदोषः। 'अयं पपाच'इत्याद्यनुरोधाद्व्यापाराविष्टानामितीत्यपि वदन्ति । कथं तर्हि "व्यातेने किरणावलीमुदयनः" इति, स्वक्रियायाः स्वप्रत्यक्षत्वा-

---

* अद्यतनानद्यतनेति । तद्विभागश्च त्रेधा । अतीताया रात्रेः पश्चार्धेऽनागामिन्याः पूर्वार्धेन च सहितोऽद्यतनस्तद्भिन्नोऽनद्यतन इत्येकः । अतीताया रात्रेरन्त्यतृतीयभागेन आगामिन्या आद्यभागतृतीयभागद्वयेन च सहितो दिवसोऽद्यतनः, तद्भिन्नोऽनद्यतन इति द्वितीयः । उदयादुदयं यावदद्यतनः, तद्भिन्नोऽनद्यतन इति तृतीयः। अत्र च तत्तद्देशाचारतो व्यवस्था ।

* प्रतिभातीति । वस्तुतस्तु "पश्य मृगो धावति" इत्यत्र दृशेर्ज्ञानसामान्यार्थकत्वेन तत्र धावनक्रियायां अतीन्द्रियत्वमेव। शीघ्रं शीघ्रं देशान्तरसंयोगदर्शनेन च धावनस्यानुमितिविषयत्वात् एवञ्चावयवशः साक्षात्कारविषयत्वमादाय परोक्ष इत्यस्य व्यावर्तकत्वोपपादनमप्रामाणिकमित्यरुचेराह—* व्यापाराविष्टानामिति।

दिति चेत् । असंगतमेव । व्यासङ्गादिना स्वव्यापारस्य *परोक्षत्वोपपादनेऽपि बहुतरमनःप्रणिधानसाध्यशास्त्रार्थनिर्णयजनकशब्दरचनात्मके ग्रन्थेऽनद्यतनातीतत्वयोरभावेन तदर्थकलिडसंभवात् ।

लुडर्थमाह—श्वोभाविनीति । अनद्यतने भाविनीत्यर्थः । "अनद्यतने लुट्" (पा० सू० ३-३-१५) इति सूत्रात् । यथा श्वो भवितेत्यादौ ।

लृडर्थमाह—भविष्यतीति । भविष्यत्सामान्य इत्यर्थः । "लृट् शेषे च" (पा० सू० ३-३-१३) इति सूत्रात् । यथा घटो भविष्यतीत्यादौ । तत्त्वं च वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम् ।

लेटोऽर्थमाह—विध्यादाविति । "लिङर्थे लेट्" (पा० सू० ३-४-७) इति सूत्रात् । लिङर्थश्च विध्यादिरिति वक्ष्यते ।

लोडर्थमाह—प्रार्थनादाविति । आदिना विध्याशिषो गृह्यन्ते । "आशिषि लिङ्लोटौ" (पा० सू० ३-३-१७३) "लोट् च" (पा० सू० ३-३-१६२) इति सूत्राभ्यां तथाऽवगमात् । यथा 'भवतु ते शिवप्रसाद' इत्यादौ । एतयोरर्थौ लिङर्थ एव त्रयाणां समानार्थत्वादिति तन्निर्णयेनैव निर्णयः ॥ १ ॥

लङादिक्रमेण ङितामर्थमाह—

भाष्येऽपि "एवं तर्हि साधनेषु परोक्षेषु" इत्येवोक्तम् । *परोक्षत्वोपपादनेऽपीति । 'साक्षात्कृतम्' इत्येतादृशविषयताशालिज्ञानाविषयत्वमित्यङ्गीकारेण प्रकृते स्वकृतविस्तारस्य तदानीं 'साक्षात्करोमि' इत्येवं साक्षिभास्यत्वेऽपि व्यासङ्गादिदोषात् तदंशे संस्कारानुदयेन साक्षात्कृतत्वावच्छिन्नविषयताशालिज्ञानाविषयत्वस्य सुवचत्वादिति भावः ॥ १ ॥

ह्योभूते प्रेरणादौ च भूतमात्रे लङादयः ।
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः॥२॥
(२३)

लङर्थमाह—ह्योभूत इति । अनद्यतने भूत इत्यर्थः । "अनद्यतने लङ्" (पा० सू० ३-२-१११) इति सूत्रात् । यथा 'अस्य पुत्रोऽभवत्' इत्यादि ।

लिङर्थमाह—प्रेरणादाविति । "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्" (पा० सू० ३-३-१६१) इति सूत्रात् । विधिः—प्रेरणं, भृत्यादेर्निकृष्टस्य प्रवर्तनम् । निमन्त्रणं—नियोगकरणम् । आवश्यकप्रेरणेत्यर्थः । आमन्त्रणं-कामचारानुज्ञा । *अधीष्टः—सत्कारपूर्वको व्यापारः । एतच्चतुष्टयानुगतप्रवर्तनात्वेन* वाच्यता लाघवात् ।

उक्तं च—

अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि ।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ॥
न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा ।
विध्यादीनामुपादानं चतुर्णामादितः कृतम् ॥ इति ।

प्रवर्तनात्वं च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम् । तच्चेष्टसाधनत्वस्यास्तीति तदेव विध्यर्थः । यद्यप्येतत्कृतिसाध्यत्वस्यापि

---

*अधीष्ट इति । भावक्तान्तादर्शआद्यच् तत्र भावक्तान्तस्य सत्कारोऽर्थः । तत्पूर्वको व्यापारश्च अच्प्रत्ययान्तार्थ इति बोध्यम् ।
*अनुगतप्रवर्तनात्वेनेति । प्रवर्तनात्वेनैव ज्ञानस्य प्रवृत्तिं प्रति कारणत्वात् लोके पुरुषनिष्ठ आज्ञादिरूपोऽभिप्रायविशेष इव लिङ्भासे 'अयं मां प्रवर्तयति' इतिप्रतीतिसाक्षिकं प्रवर्तनात्वं वेदे पुरुषाभावेऽपि शब्दव्यापारेऽक्षतमिति न लोकवेदयोरननुगम इति बोध्यम् ।

तज्ज्ञानस्यापि प्रवर्तकत्वात्*, तथाऽपि यागादौ सर्वत्र तल्लोकत *एवावगम्यत इत्यन्यलभ्यत्वान्न तच्छक्यम्। बलवदनिष्टाननुबन्धित्वज्ञानं च न हेतुः। द्वेषाभावेनान्यथासिद्धत्वात्। आस्तिककामुकस्य नरकसाधनताज्ञानदशायामप्युत्कटेच्छया द्वेषाभावदशायां प्रवृत्तेर्व्यभिचाराच्च। तस्मादिष्टसाधनत्वमेव प्रवर्तना।

---

* प्रवर्तकत्वा दिति। यद्यपि कृतिसाध्यत्वाभावनिश्चयस्य प्रवृत्तिं प्रति प्रतिबन्धकत्वाभ्युपगमे कृतिसाध्यताज्ञानस्य न तत्कारणत्वमिति, तथापि तत्र तादृशनिश्चयाभावस्य कारणत्वं प्रसज्यते एव, तथा च तस्य कारणत्वकल्पनापेक्षया कृतिसाध्यताज्ञानत्वेन कारणत्वे लाघवमिति भावः।

* लोकत एवावगम्यते इति। यागः कृतिसाध्यः मत्कृतिसाध्यत्वविरोधिधर्माभाववत्त्वादित्यनुमानेनेति भावः।

इष्टसाधनत्वमपि प्रेरणात्वेनैव शक्यं, न स्वरूपतः। गुरुत्वात्। न च इष्टस्यान्यलभ्यत्वेन साधनत्वमात्रस्य शक्यत्वमस्तु इति वाच्यम्। तथा सति आख्यातत्वांशोपस्थितप्रवृत्त्या सह समानाभिधानश्रुत्या साधनत्वान्वयसम्भवे पदान्तरोपस्थापितस्वर्गादीष्टेन सह समभिव्याहाररूपवाक्येन तदन्वयासम्भवात् प्रवृत्तिसाधनत्वात्मके प्रेरणात्वे एव पर्यवसानेन प्रेरणात्वस्यैव तदर्थत्वात्। इष्टसाधनत्वं तु वाक्यार्थो न पदार्थः। तथा हि प्रवर्तनाविषयीभूतार्थभावना किं भावयेदु इति भाव्याकाङ्क्षायां समानपदोपात्तमपि धात्वर्थमपुरुषार्थत्वाद्गाङ्गतयाऽन्वयायोग्यं विहाय भिन्नपदोपात्तमन्यविशेषणमपि स्वर्गं कामपदसम्बन्धात् पुरुषार्थतयाऽवगतं साध्यत्वान्वययोग्यं भाव्यत्वेनाश्रयति। अपुरुषार्थकर्मिकायास्तस्याः प्रवर्तनासाध्यत्वानुपपत्तेः। एवञ्च स्वर्गभावनासाधनत्वात्स्वर्गरूपेष्टसाधनत्वमपि प्रवर्तनायाः सिद्ध्यति पुरुषप्रवृत्तिरूपार्थभावना च यागव्यापारं विना स्वर्गं साधयितुं नालमिति यागस्य साधनत्वमाक्षिप्यते। न तु यागस्य स्वर्गसाधनत्वं वाक्यप्रमाणगम्यम्। यजधातोरकर्मकत्वेन तत्र द्वितीयान्तस्वर्गपदार्थस्य कर्मत्वेनान्वयायोगात्। तस्मात् फलसाधनत्वस्य

*उक्तं च मण्डनमिश्रैः—

*पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्तकः ।
*प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् ॥ इति ।

*प्रपञ्चितं चैतद्वैयाकरणभूषणे । आदिना "हेतुहेतुमतोर्लिङ्"

प्रवर्तनात्वेनैव वाच्यतेति परे । तत्र मण्डनमिश्रसम्मतिमाह—*उक्तमिति ।

*पुंसामिति । पुरुषाणां क्रियासु प्रवर्तक इष्टसाधनत्वादन्यो नास्ति । किन्तु इष्टसाधनत्वमेवेत्यर्थः । तस्य प्रवर्तनापदेन व्यवहारे साधकमाह—*प्रवृत्तिहेतुमिति । प्रपूर्वकवृतुधातोर्हेतुमण्णिजन्ताद् भावे युचि निष्पन्नं प्रवर्तनापदं प्रवृत्तिप्रयोजकव्यापारपरमिति प्रवृत्तिप्रयोजकमिष्टसाधनत्वरूपं धर्मं प्रवर्तनां प्रवदन्ति इति कारिकार्थः ।

* प्रपञ्चितमिति । कृतिसाध्यताज्ञानं न प्रवर्तकम् । कृत्यसाध्ये प्रवृत्त्यभावश्च तत इष्टाभावेन वृथाश्रमजनकत्वेन द्वेषात् । नाव-स्तच्छक्यम् । न च चिकीर्षानुरोधेन तच्छक्यमस्तु । लोकतस्तदवगमा-च्चिकीर्षासम्भवात् । न चेष्टसाधनताज्ञानस्यापि प्रवर्तकत्वं न स्यात् अनिष्टसाधने उदासीने च 'कष्टं कर्म' इति न्यायेन वृथाश्रमजनकत्वे-द्वेषात् न प्रवृत्तिरिति वाच्यम् । इष्टाजनके आन्तरालिकश्रमे द्वेषा-भावदशायामप्रवृत्तेः सर्वसिद्धाया अनुरोधेन तस्य प्रवर्तकत्वावश्य-कत्वात् । किञ्चेष्टसाधनत्वम्—इच्छाविषयसाधनत्वं तत्र शक्यत्वे स्वर्गादिसाधनत्वादिना तेन रूपेण ज्ञानस्यैव प्रवर्तकत्वात्, न तद्विष-त्वेन इच्छाज्ञानानपेक्षणात तस्याः स्वरूपत एव हेतुत्वात् ।

यद्यपि लोके बलाद् गुरुप्रवर्तनया प्रवृत्तिस्थले किञ्चिदिष्टं ज्ञात्वा गुरुर्मां प्रवर्तयति इति ज्ञात्वैव प्रवर्तते, तथापि बहुवित्त-व्ययायाससाध्य आमुष्मिके च विशिष्य तज्ज्ञानं विना न प्रवृत्ति-रिति विशिष्यैव विधिना बोधनीयमिति विशिष्यैव तस्य शक्ति-रुपेया । अत एव लोके फलसन्देहात् प्रवृत्तावप्येतादृशस्थले तन्निश्च-योऽपेक्ष्यते । तत्र चेच्छा तदादाविव शक्यतावच्छेदकानामनुगमि-केति न नानार्थत्वम् । एवञ्च स्वर्गादिसाधनत्वमनन्यलभ्यत्वाच्छ

क्यमेव। न चेदमपि स्वर्गकामादिपदसमभिव्याहाराल्लभ्यते इत्यन्यलभ्यमेवेति न तच्छक्यमिति वाच्यम्। कामान्तपदात् स्वर्गाद्युपस्थितावपि साधनत्वबोधाभावाद्, विश्वजिदादौ स्वर्गकामादिपदसमभिव्याहारस्याभावाच्च।

नन्विष्टसाधनत्वस्य चन्द्रमण्डलादिसाधारणत्वात् तत्रापि प्रवृत्तिरिति चेन्न। अतीतकार्ये कार्यतासत्त्वेऽपि इदानीं कार्यताज्ञानाभावेन तव मतेऽप्रवृत्तिवद् ममेष्टसाधनताज्ञानाभावादप्रवृत्तेः।

किञ्च नेष्टसाधनत्वादन्यत् कार्यम्। तथा हि—

कार्यता न च का चित् स्यादिष्टसाधनतां विना।
कार्यं न हि क्रियाव्याप्यं निषिद्धस्य समत्वतः॥
न भविष्यत्क्रियाकार्यं स्रक्ष्यतीश इति ह्यपि।
कार्यं स्यान्नैव चाकर्तुमशक्यं कार्यमिष्यते॥
साम्यादेव निषिद्धस्य तदिष्टं साधनं तथा।

अस्यार्थः। कार्यत्वविशिष्टबोधकत्वेनैव वाक्यपर्यवसानाद् वृद्धव्यवहारात्कार्यान्विते एव व्युत्पत्तेश्च सिद्धार्थानामबोधकत्वात् कथं वेदान्तैः शुद्धं ब्रह्म प्रतिपाद्यते इत्याशङ्कां निराकर्तुं तामेव निर्धारयति—कार्यता चेति। इष्टसाधनतामित्यत्र इष्टत्वं च विनेति शेषः। उपसंहारे तथाभिधानात्।

कार्यमिति। व्याप्यं-जन्यम्। निषिद्धस्य-ब्रह्महननादेः क्रियाजन्यत्वेन समत्वान्नैतत् कार्यमित्यर्थः। नेदं मया कृतं न वा क्रियते किं तु कार्यमिति व्यवहाराद् भविष्यत्क्रियाकार्यं क्रियानिष्ठं भविष्यत्त्वं वा कार्यमिति निराचष्टे—न भविष्यदिति।

स्रक्ष्यतीति। हिशब्दो हेतौ। यतः स्रक्ष्यतीत्यत्र सर्जनानुकूलक्रियाया भविष्यत्त्वेऽपि कार्यत्वाभाव इत्यर्थः। न चैतत्कार्यमेव। लिङ्वाच्यताङ्गीकारात्। "कृत्याश्च" (पा० सू० ३-३-१६३) इत्यवश्यकार्ये कृत्या भवन्ति। तच्चाकर्तुमशक्यमिति तदेव कार्यमिति निराचष्टे—कार्यमिति। परनारीगमनादेरकर्तुमशक्यत्वात्कार्यत्वापत्तिरत आह—साम्यादेवेति। तदिति। तस्मादित्यर्थः। इष्टं तत्साधनं च कार्यत्वमित्याह—इष्टमित्यादि। तथा चेष्टत्वस्येष्टसाधनत्वस्य च ब्रह्मण्यबाधात् कार्यत्वविशिष्टप्रतिपादकत्वेऽपि वेदान्तवाक्यानां न क्षतिरिति। स्पष्टश्चेदं न्यायसुधायाम्। एवञ्चेष्टसा-

(पा० सू० ३-३-१५६) "आशिषि लिङ्लोटौ" (पा० सू० ३-३-१७३) इतिसूत्रोक्ता हेतुहेतुमद्भावादयो गृह्यन्ते। "यो * ब्राह्मणायावगुरेत्, तं शतेन यातयात्" इति यथा।

लुङर्थमाह—भूतमात्र इति। भूतसामान्य इत्यर्थः। भूते इत्याधिकृत्य "लुङ्" (पा० सू० ३-२-११०) इति सूत्रात्। अत्र विद्यमानध्वंसप्रतियोगित्वं भूतत्वम्। तच्च क्रियायां निर्बाधमिति विद्यमानेऽपि घटे घटोऽभूदिति प्रयोगः*। विद्यमानध्वंसप्रतियोगी घटाभिन्नाश्रयक उत्पत्त्याद्यनुकूलो व्यापार इति बोधः।

अयमत्र संग्रहः—कालो द्विविधः। अद्यतनोऽनद्यतनश्च। आद्यस्त्रिविधः। भूतभविष्यद्वर्तमानभेदात्। अन्त्यो द्विविधः। भूतो भविष्यंश्च। तत्र वर्तमानत्वे लट्। भूतत्वमात्रे लुङ्। भविष्यन्मात्रे

धनत्वान्यकार्यत्वस्य निर्वक्तुमशक्यत्वाद् वाच्यत्वे मानाभावाच्च कृतिसाध्यत्वं न विध्यर्थ इति।

अथ मधुविषसंपृक्तान्नभोजनादौ प्रवृत्तिवारणाय बलवदनिष्टाननुबन्धित्वज्ञानस्य प्रवृत्त्यौपयिकतया शक्यत्वं स्यादिति चेन्न। बह्वायाससाध्ये प्रवृत्त्यनापत्तेः। तत्र बहुतरदुःखानामपि जायमानत्वात्। अल्पदुःखस्यापि कुतश्चिद्बलवत्त्वात्। अनुगतबलवत्त्वस्य दुर्वचत्वाच्च। तस्मात् तद्विषयको बलवान् द्वेषः स्वातन्त्र्येण प्रतिबन्धक इति न तत्कल्पनं युक्तम्। अत एवान्तरालिकश्रमे बलवद्द्वेषवान् न ज्योतिष्टोमादौ प्रवर्ततेऽन्यस्तु प्रवर्तत एवेति बृहद्वैयाकरणे स्पष्टमिति दिक्॥

*ब्राह्मणायावगुरेदिति। हननार्थं दण्डमुद्यच्छेदित्यर्थः। पत्ये शेते इतिवद् ब्राह्मणपदाच्चतुर्थी। प्रत्ययानां द्योतकतापक्षे कारकविशिष्टावगोरणक्रियाया हेतुहेतुमद्भावसम्बन्धेनान्वयो यातनक्रियायां बोध्यः। तत्पक्षे तादृशसम्बन्धान्वयबोधे तेषां तात्पर्यग्राहकत्वात्।

*प्रयोग इति। उपपद्यते इति शेषः।

लृट्। हेतुहेतुमद्भावाद्यधिकार्थविवक्षायामनयोर्लृङ्। अनद्यतने भूते *तत्त्वेन विवक्षिते लङ्। तत्रैव परोक्षत्वविवक्षायां लिट्। तादृशे भविष्यति लुडिति द्रष्टव्यम्।

लृङर्थमाह—सत्यामिति। क्रियाया अतिपत्तिरनिष्पत्तिस्तस्यां गम्यमानायाम्। *भूते भाविनि हेतुहेतुमद्भावे सति लृङित्यर्थः। "लिङ्निमित्ते लृङ् क्रियातिपत्तौ" (पा० सू० ३-३-१३९) इति सूत्रात्। लिङो निमित्तं हेतुहेतुमद्भावादि। यथा 'सुवृष्टिश्चेदभविष्यत्, सुभिक्षमभविष्यत्' 'वन्हिश्चेत्प्राज्वलिष्यद्, ओदनमपक्ष्यत्'इत्यादौ। अत्र वन्ह्यभिन्नाश्रयकप्रज्वलनानुकूलव्यापाराभावप्रयुक्त ओदनाभिन्नाश्रयकविक्लित्त्यनुकूलव्यापाराभाव इति शाब्दबोध इति रीत्या द्रष्टव्यम्। अयं चार्थनिर्देश उपलक्षणम्। अर्थान्तरेऽपि बहुशो विधानदर्शनात्। प्रसिद्धत्वादेष्वेवार्थेषु शक्तिरन्यत्र लक्षणेति मतान्तररीत्या वोक्तम्। एतेषां क्रमनियामकश्चानुबन्धक्रम एव। अत एव पञ्चमो लकार इत्यनेन मीमांसकैर्लेङ् व्यवह्रियत इति दिक्॥ २॥ (२३)

इति श्रीकौण्डभट्टविरचिते वैयाकरणभूषणसारे लकारविशेषार्थ-निरूपणं समाप्तम्।

---

*तत्त्वेनेति। अनद्यतनभूतत्वेनेत्यर्थः।

*भूते भाविनीति। ननु सुवृष्टिभवनसुभिक्षभवनयोः साधनवैकल्यान्नियतानुत्पत्तिं स्वयमवगत्यैवोक्तप्रयोगः प्रयुज्यते तत्र कथं भविष्यत्त्वं भूतत्वं वा?। सामग्रीसमवधाने एव हि सम्भावितोत्पत्तिकस्य भविष्यत्त्वम्। उत्पन्नस्यैव च सत्त्वादिक्रमस्ते भूतत्वमिति चेन्न। निषेधप्रतियोगित्वाय भविष्यत्त्वं भूतत्वं वाऽऽरोप्य तथा प्रयोगेण दोषाभावात्। एवञ्च लङ्स्थले भूतत्वाद्यभावनिश्चयसत्त्वेन तत्प्रकारकबोध आहार्यारोपात्मक एवेति बोध्यम्।

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां लकारविशेषार्थनिर्णयः।

(अथ सुबर्थनिर्णयः)

* सुबर्थमाह—

आश्रयोऽवधिरुद्देश्यः संबन्धः शक्तिरेव वा ॥
यथायथं विभक्त्यर्थः सुपां कर्मेति भाष्यतः॥१॥(२४)

द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः । तथा हि—"कर्मणि द्वितीया" [पा० सू० २-३-२] । तच्च कर्तुरीप्सिततमं [पा० सू० १-४-४९] *क्रियाजन्यफलाश्रय इत्यर्थः । *क्रियाजन्यफलव-

---

*सुबर्थमाहेति । पदत्वप्रयोजकतिङर्थनिरूपणानन्तरं तत्प्रयोजकसुबर्थनिर्णयस्याऽऽवश्यकत्वमिति भावः ।

नन्वभिप्रेतवाचकेप्सितशब्दात्तमप्यतिशयिताभिप्रेत इत्येवार्थ इत्यभिप्रेत्याह—*क्रियाजन्यफलाश्रय इति । तथा च ईप्सितशब्दः क्रियावाची न तु रूढ इति भावः । तेन पयसौदनं भुङ्क्ते इत्यादौ पयआदेरीप्सितत्वेऽपि प्रकृतधात्वर्थव्यापारजन्यगलबिलाधः-संयोगफलाश्रयत्वाभावेन न कर्मत्वम् ।

ननु सम्बन्धार्थकाद् आप्धातोः सन्नन्तात् "मतिबुद्धिपूजार्थेभ्यश्च" (पा० सू० ३-२-१८८) इति सूत्रेण कर्मणि क्ते ईप्सितशब्दः सिद्ध्यति । कर्तुरिति "क्तस्य च वर्त्तमाने" (पा० सू० २-३-६-७) इति कर्तरि षष्ठी । तथा च कर्तुः समभिव्याहृतधात्वर्थव्यापाराश्रयस्याप्तुं सम्बद्धुमिष्टतमं कारकं कर्मसंज्ञमिति सूत्रार्थः । कर्तुः सम्बन्धश्च कर्तृपदार्थविशेषणीभूतक्रियाद्वारक एव ग्रहीतुमुचित उपस्थितत्वादिति । सम्बन्धश्चात्र क्रियाजन्यफलाश्रयत्वमिति । सन्नर्थ इच्छा, क्तप्रत्ययार्थो विषयता 'सविषयकधातुसमभिव्याहारे कर्मप्रत्ययार्थो विषयता" इति न्यायात् । तथा च फलाश्रयत्वप्रकारकेच्छाविषय इत्यर्थस्य लाभात् कथं क्रियाजन्यफलाश्रयमात्रमर्थ इत्यत आह—*क्रियाजन्येति । *कर्मण एव—तादृशफलाश्रयस्यैव । तथा च तादृशफलवत्त्वेन कर्तुरुद्देश्यत्वं तादृशसंज्ञायामेवोपयोगि,

त्वेन कर्मण एव कर्तुरीप्सिततमत्वात् । "तथा युक्तं चानीप्सितम्" [पा० सू० १-४-५०] इत्यादिसंग्रहाच्चैवमेव युक्तम् । ईप्सितानीप्सितत्वयोः शाब्दबोधे भानाभावेन संज्ञायामेव तदुपयोगो न तु वाच्यकोटौ तत्प्रवेशः । तथा च क्रियायाः फलस्य धातुनैव लाभादनन्यलभ्य आश्रय एवार्थः । तत्त्वं चाखण्डशक्तिरूप*मवच्छेदकम् । ओदनं पचतीत्यत्र विक्लित्त्याश्रयत्वात्कर्मता । घटं करोतीत्यत्रोत्पत्त्याश्रयत्वात् । *उत्पत्तेर्धात्वर्थत्वात् । जानातीत्यत्राऽऽवरणभङ्गरूपज्ञाधात्वर्थफलाश्रयत्वात् । अतीतानागतादिपरोक्षस्थलेऽपि ज्ञानजन्यस्य *तस्याऽऽवश्यकत्वात् । अन्यथा * यथापूर्वं न जानामीत्यापत्तेः । *अतीतादेराश्रयता च विषयतया ज्ञानाश्रयताया नैया-

---

न तु वाच्यकोटौ तत्प्रवेश इति भावः । सम्बन्धस्वरूपे प्रयोज्यत्वनिवेशेन विभागाद्यनुकूलव्यापारानुकूलव्यापारार्थकत्वे ण्यन्तादेरप्यनेनैव कर्मत्वसिद्धिरिति "अकथितं च" (पा० सू० १-४-५१) इति सूत्रं न कर्तव्यं भवतीति शब्देन्दुशेखरे विस्तरः ।

*अखण्डशक्तिरूपमिति । तेन निरूपकादिभेदेनाश्रयभेदेऽपि न शक्तिभेद इति शक्यतावच्छेदकाश्रयत्वस्यैकस्यैव सत्त्वादिति भावः । शक्तेर्भेद एवेति सिद्धान्तपक्षे तु आश्रयतात्वेनाश्रयतानामनुगम इति बोध्यम् ।

*उत्पत्तेर्धात्वर्थत्वादिति । यथा चैतत् तथोक्तं धात्वर्थनिर्णये इति तत एवावगन्तव्यम् । *तस्येति । आवरणभङ्गस्येत्यर्थः । *यथापूर्वं न जानामीत्यापत्तेरिति । यथापूर्वं जानामीति प्रयोगस्यानापत्तेरित्यर्थः । ज्ञानसमये घटादेरसत्त्वेन तत्र ज्ञानाश्रयत्वाभावादित्यर्थः । नन्वयं दोषो भवतामपि सम एवातीतघटे आवरणभङ्गाश्रयताया असत्त्वादित्यत आह—*अतीतादेरिति । नैयायिकमतेऽतीतानागतयोर्विषयतया ज्ञानाश्रयताङ्गीकारवदस्माभिरपि व्यापारेणाव्यवहितोत्तरकाले एवोत्पादितावरणभङ्गात्मकफलाश्रयताङ्गीक्रियते इति भावः ।

यिकानामिव *सत्कार्यवादसिद्धान्ताद्वोपपद्यत इति ।

उक्तं च—

तिरोभावाभ्युपगमे भावानां सैव नास्तिता ।
लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते ॥ इति

ननु चैत्रो ग्रामं गच्छतीत्यत्र ग्रामस्येव चैत्रस्यापि क्रियाजन्यग्रामसंयोगरूपफलाश्रयत्वात्कर्मतापत्तौ चैत्रश्चैत्रं गच्छतीत्यापत्तिः । प्रयागतः काशीं गच्छति चैत्रे 'प्रयागं गच्छति' इत्यापत्तिश्च । क्रियाजन्यसंयोगस्य काश्यामिव *विभागस्य प्रयागेऽपि सत्त्वादिति चेन्न । ग्रामस्येव चैत्रस्यापि फलाश्रयत्वेऽपि तदीयकर्तृसंज्ञया कर्मसंज्ञाया *बाधेन चैत्रश्चैत्रमिति प्रयोगासंभवात् । द्वितीयोत्पत्तौ संज्ञाया एव नियामकत्वात् । *अन्यथा गमयति कृष्णं गोकुलमित्यत्रेव पाचयति कृष्णे नेत्यत्रापि*कृष्णपदाद् द्वितीयापत्तेः।*शाब्दबोधश्चैत्रश्चैत्रमित्यत्र

ननु विषयतासत्त्वेऽपि अतीतादिघटे विषयतया ज्ञानाश्रयतासत्त्वे न मानमित्यरुचेराह—*सत्कार्येति ।

*विभागस्येति । तस्यापि प्रकृतधात्वर्थक्रियाजन्यत्वादिति भावः । *बाधेनेति । आकडारीयत्वादिति बोध्यम् । *अन्यथा—फलाश्रयत्वस्य द्वितीयोत्पत्तिप्रयोजकत्वे । *कृष्णपदादिति । कृष्णस्य प्रयोजकवृत्तिप्रेरणजन्यविक्लित्त्यनुकूलव्यापाररूपफलाश्रयत्वादिति शेषः । णिजन्तधात्वर्थातिरिक्तव्यापारप्रयोज्यफलाश्रयत्वस्य तन्नियामकत्वाङ्गीकारे नायं दोष इति शङ्कानिवारणाय गमयति कृष्णमिति दृष्टान्ताभिधानम् । तथा चोक्तनियमाङ्गीकारेऽत्रापि द्वितीया न स्यादिति न तथा वक्तुं शक्यमिति बोध्यम् ।

ननु नोक्तस्थले द्वितीयान्तस्य साधुत्वमापादयामि किन्तु तादृशप्रयोगाच्छाब्दबोधमिति परिहरति—*शाब्दबोध इति । चैत्रकर्तृकं चैत्रकर्मकं गमनमिति भावः । ननु तादृशवाक्यादुक्तः शाब्द

स्यादिति चेन्न । तथा व्युत्पन्नानामिष्टापत्तेः । *उच्यतां वा प्रकारतासंबन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिर्हेतुरिति कार्यकारणभावान्तरम् । प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः । प्रयागस्य कर्मत्वं तु संभावितमपि न । समभिव्याहृतधात्वर्थफलशालित्वस्यैव क्रियाजन्येत्यनेन विवक्षणस्योक्तप्रायत्वात् * ।

नैयायिकास्त्वाद्यदोषवारणाय परसमवेतत्वं, द्वितीयदोषवारणाय धात्वर्थतावच्छेदकत्वं फले विशेषणं द्वितीयावाच्यमित्युपाददते । परसमवेतत्वं धात्वर्थक्रियायामन्वेति । तथैव कार्यकारणभावान्तरकल्पनात् । परत्वमपि द्वितीयया स्वप्रकृत्यर्थापेक्षया बोध्यते । तथा च चैत्रस्तण्डुलं पचतीत्यादौ तण्डुलान्यसमवेतव्यापारजन्यधात्वर्थतावच्छेदकविक्लित्तिशालित्वात्तण्डुलानां कर्मता।शाब्दबोधस्तु तण्डु-

---

बोधोऽनुभवविरुद्ध इत्यत आह—*उच्यतां वेति ।

*उक्तप्रायत्वादिति । सूत्रे तमप्प्रत्ययोपादानादिति शेषः । ईप्सितशब्दस्य फलाश्रयत्वेनेच्छोद्देश्यकतया ततो विहिततमप्प्रत्ययार्थातिशयस्य प्रकृत्यर्थेऽन्वये फलातिशयितत्वं प्रकृतधात्वर्थमेवेति स्पष्टं "कर्तुरीप्सिततमं कर्म" (पा० सू० १-४-४९) इति सूत्रे कैयटे । तथा च प्रकृतधात्वर्थव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वं कर्मत्वमिति फलति । एवञ्च विभागस्य प्रकृतधात्वर्थगमिक्रियाजन्यत्वेऽपि गम्धात्वर्थत्वाभावेन न दोषः ।

वस्तुतस्तु 'प्रयागात् काशीं गच्छति' इत्यत्र नवीनमते प्रयागपदात् पञ्चम्युपपत्तये गम्धात्वादिसमभिव्याहारेऽपि "ध्रुवमपायेऽपादानम्" (पा० सू० १-४-२४) इति सूत्रे शब्देन्दुशेखरे विभागस्य धात्वर्थत्वास्नानात्तस्य गम्धात्वर्थत्वेन प्रयागपदोत्तरं द्वितीयावारणं फले धात्वर्थत्वविशेषणदानेनायुक्तम् । किन्तु फलतावच्छेदकसम्बन्धेन फलाश्रयस्यैव कर्मत्वविवक्षणेन वारणीयमिति ।

ळसमवेतधात्वर्थतावच्छेदकविक्लित्यनुकूलतण्डूलान्यसमवेतक्रियाजनकक्रातिमांश्चैत्र इत्याहुः ।

तन्न रोचयामहे । परसमवेतत्वादेर्गौरवेणावाच्यत्वात् । अतिप्रसङ्गः किं—द्वितीयायाः, शाब्दबोधस्य वा । नाऽऽद्यस्तावत् । वाच्यकथनेऽपि तत्तादवस्थ्यात् । गमयति कृष्णं गोकुलमितिवत्पाचयति कृष्णं गोप इत्यापत्तेः । तण्डुलं पचति चैत्र इतिवत्तण्डुलं पच्यते स्वयमेवेत्यापत्तेश्च । विक्लित्त्यनुकूलतण्डुलान्यसमवेताग्निसंयोगरूपधात्वर्थाश्रयत्वात् । शाब्दबोधातिप्रसङ्गोऽप्युक्तरीत्यैव निरस्तः । परसमवेतत्वस्य शक्यत्वेऽपि परत्वस्य परसमवेतत्वस्य चेष्टान्वयलाभायानेकशः कार्यकारणभावाभ्युपगमे गौरवतरत्वादिति स्पष्टं भूषणे ।

एतच्च सप्तविधम्—

"निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम् ।
तच्चेप्सिततमं कर्म चतुर्धाऽन्यच्च काल्पितम् ॥
औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ॥

इति वाक्यपदीयात् ॥

---

१ अयंभावः । फलस्य व्यापारे स्वानुकूलत्वं—स्वेच्छाधीनेच्छाविषयत्वमेतदुभयसम्बन्धेनान्वयः । तादृशसम्बन्धघटकेच्छीयविषयतावच्छेदकश्च सम्बन्धः फलतावच्छेदकः । तथा च तण्डुलं पचती त्यादौ 'समवायेन विक्लित्त्याश्रयस्तण्डुलो भवतु' इत्याकारकेच्छायाः कर्तृनिष्ठत्वेन तादृशेच्छीयफलनिष्ठविषयतावच्छेदकत्वस्य समवाय एव सत्त्वेन तत्सम्बन्धेन फलाश्रयस्यैव कर्मत्वं न तु कालिकादिना फलाश्रयस्य । तत्सम्बन्धस्य निरुक्तेच्छीयविषयतावच्छेदकत्वाभावात् । एवं 'ग्रामाद्विभजते' इत्यादौ विभागसमानाधिकरणव्यापारार्थकविपूर्वकभजधातुयोगे ग्रामादेर्न कर्मत्वम् । तस्य प्रकृतधात्वर्थव्यापारप्रयोज्यविभागरूपफलाश्रयत्वेऽपि 'अनुयोगित्वेन विभागाश्र

यदसञ्जायते सद्वा जन्मना यत्प्रकाशते ।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम् ॥
प्रकृत्युच्छेदसंभूतं किंचित्काष्ठादि भस्मवत् ।
किंचिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥

योऽहं भवानि" इत्याकारकेच्छायां एव 'तत्र कर्तृनिष्ठायाः प्रतीयमानत्वेनानुयोगित्वस्यैवेच्छीयविषयतावच्छेदकत्वेन तेन सम्बन्धेन विभागरूपफलाश्रयत्वाभावात् । "ग्रामं त्यजति" इत्यादौ 'त्यज्'-धातुयोगे तु ग्रामादेः कर्मत्वं भवत्येव । तत्र 'त्यज्'धातुना कर्तृव्यापारव्यधिकरणविभागस्यैव प्रतीत्या 'प्रतियोगित्वेन विभागविशिष्टो ग्रामो भवतु' इत्याकारकेच्छाया एव तत्समभिव्याहारे प्रतीत्या च प्रतियोगित्वस्यैवेच्छीयविषयतावच्छेदकत्वेन तत्सम्बन्धेन फलाश्रयत्वस्य सत्त्वात् 'गम्'धातुस्थले चं 'अनुयोगित्वेन ग्रामसंयोगाश्रयोऽहं भवानि' इतीच्छासत्त्वेनानुयोगित्वस्यैव फलतावच्छेदकत्वात्तेन सम्बन्धेन फलाश्रयत्वेन प्रयागस्यानुद्देश्यत्वान्न कर्मता । जन्यतावच्छेदकस्य प्रकारतावच्छेदकस्य वा फलतावच्छेदकस्सम्बन्धत्वमिति तु न युक्तम्, तथा सति 'ग्रामं त्यजति' 'ग्रामाद् विभजते' इत्यादौ समवायस्यैवाविशेषेण फलतावच्छेदकत्वादुभयत्रापि ग्रामादेः कर्मत्वापत्तेरिति दिक् ।

* गौरवेणेति । परसमवेतक्रियाजन्यफलाश्रयत्वमित्युक्तावपि चैत्रमैत्रोभयनिष्ठक्रियाजन्यसंयोगस्य द्वितीयाप्रकृत्यर्थमैत्रान्यचैत्रवृत्तिक्रियाजन्यत्वेन तादृशसंयोगाश्रयत्वात् "मैत्रो मैत्रं गच्छति" इतिप्रयोगापत्तेस्तद्वारणाय द्वितीयाप्रकृत्यर्थविशिष्टफलाश्रयत्वं कर्मत्वमिति परिष्करणीयम् । वैशिष्ट्यं च स्वसमवेतक्रियाजन्यत्वाभाववत्त्वं-स्वेतरसमवेतक्रियाजन्यत्वमित्युभयसम्बन्धेन । तथा च प्रकृते संयोगरूपफलस्योभयनिष्ठक्रियाजन्यत्वेन चैत्रवृत्तिसंयोगे स्वं-द्वितीयाप्रकृत्यर्थो मैत्रः तत्समवेता क्रिया गमनरूपा तज्जन्यत्वमेवेति स्वेतरचैत्रसमवेतक्रियाजन्यत्वसत्त्वेऽपि प्रथमसम्बन्धाभावेन न दोषः । द्वित्वादिना चैत्रभेदमादाय "चैत्रश्चैत्रं गच्छति" इति प्रयोगापत्तिरपि नास्ति । चैत्रसमवेतसंयोगे स्वं—द्वितीयाप्रकृत्यर्थ-

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥

श्चैत्रस्तदितरो द्वित्वादिना चैत्रभेदसत्त्वाच्चैत्र एव तद्वृत्तिक्रियाजन्यत्वेऽपि स्वसमवेतक्रियाजन्यत्वाभाववत्त्वस्यासत्त्वात् ।

"मल्लो मल्लं गच्छति" इति प्रयोगस्तु व्यक्तिभेदे भवत्येव। मल्लस्तन्मल्लसमवेतक्रियाजन्यत्वाभाववत्त्वस्य, तदितरो मल्लः कर्तृत्वेविवक्षितस्तत्समवेतक्रियाजन्यत्वस्य च तन्मल्लनिष्ठसंयोगे सत्त्वे द्वितीयाप्रकृत्यर्थविशिष्टफलाश्रयत्वात् । एवं च कर्मलक्षणे परत्वस्तल्लक्षणे इतरत्वस्य च निवेशाद् गौरवं स्पष्टमेव ।

एवं प्रयागतः काशीं गच्छति चैत्रे 'चैत्रः प्रयागं गच्छति' इति प्रयोगस्य फले धात्वर्थत्वविशेषणमात्रेण फलतावच्छेदकसम्बन्धेन फलाश्रयस्य कर्मत्वविवक्षणमात्रेणैव वा वारणे धात्वर्थतावच्छेदकपर्यन्तानुधावने गौरवमिति ।

परोक्तनिवेशे गौरवमुपपाद्य तदसम्भवमपि निराकरिष्यमाणदोषतादवस्थ्येनाह—*वाच्यकथनेऽपीति । परसमवेतत्वधात्वर्थतावच्छेदकत्वयोर्वाच्यत्वकथनेऽपीत्यर्थः । द्वितीयोत्पत्तौ कर्मसंज्ञाया एव निमित्तत्वात् कर्मसंज्ञायाश्च "कर्तुरीप्सिततमम्" इति सूत्रे कर्तृवृत्तिव्यापारजन्यफलाश्रयमात्रस्यैव विधानेन चैत्रवृत्तिव्यापारजन्यफलस्य संयोगस्य विभागस्य च चैत्रे प्रयागे च सत्त्वेन द्वितीयावारणस्य कर्तुमशक्यत्वात् । परसमवेतक्रियाजन्यधात्वर्थतावच्छेदकफलाश्रयत्वरूपमेव कर्मत्वं द्वितीयोत्पत्तौ निमित्तमिति तु वक्तुमशक्यम् । चैत्रप्रयागयोस्तादृशकर्मत्वस्यासत्त्वेन दोषाभावेऽपि "पाचयति कृष्णं गोपः" इति प्रयोगापत्तेः । "गमयति कृष्णं गोकुलम्" इत्यत्र णयन्त'गमि'धात्वर्थतावच्छेदक—प्रयोजक'पर'समवेतक्रियाजन्यसंयोगानुकूलव्यापाराश्रयत्वात् कृष्णस्येव, कृष्णस्य णयन्त'पचि'धात्वर्थतावच्छेदक—गोपवृत्तिक्रियाजन्यविक्लित्त्यनुकूलव्यापाररूपफलाश्रयत्वात् । सिद्धान्ते तु न/"गमयति कृष्णं गोकुलम्" इत्यत्रैव "गतिबुद्धि" इति सूत्रस्य "पाचयति कृष्णं गोपः" इत्यत्राप्रवृत्तिरिति ।

एवं, तन्निवेशेऽपि परत्वस्य तत्समवेतत्वस्य चेष्टान्वयलाभा

इति च तत्रैवोक्तम्। घटं करोतीत्याद्यम्। काष्ठं भस्म करोतीति, सुवर्णं कुण्डलं करोतीति च * द्वितीयम्। घटं पश्यतीति * तृतीयम्। * तृणं स्पृशतीत्युदासीनम्। विषं भुङ्क्ते इति द्वेष्यम्। गां दोग्धीति * संज्ञान्तरैरनाख्यातम्। * क्रूरमभिक्रुध्यतीत्यन्यपूर्वकम्।

कर्तृतृतीयाया आश्रयोऽर्थः। तथा हि—"स्वतन्त्रः कर्ता" [पा० सू० १—४—५४]। स्वातन्त्र्यं च धात्वर्थव्यापाराश्रयत्वम्।

प्रकृत्यर्थप्रकारकशाब्दबोधं प्रति प्रकारतासम्बन्धेन द्वितीयाजन्यपरसमवेतत्वोपस्थितेः, परसमवेतत्वप्रकारकबुद्धिं प्रति विशेष्यतासम्बन्धेन धातुजन्यव्यापारोपस्थितेः कारणत्वं कल्पनीयमिति दिक्।

* द्वितीयमिति। विकार्यमित्यर्थः। तत्र "काष्ठं भस्म" इत्यस्य काष्ठप्रकृतिविनाशोद्भूतं भस्मेत्यर्थः; "सुवर्णं कुण्डलं करोति" इति गुणान्तरोत्पत्त्येति बोध्यम्।

अन्ये तु काष्ठसुवर्णयोः प्रकृत्योः परिणामित्वेन विवक्षायां भस्मकुण्डले कर्मणी विकार्ये। तत्त्वेनाविवक्षायां निर्वर्त्ये एव। तदुक्तं वाक्यपदीये—

सती वा विद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते॥
प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा। इति।

* तृतीयमिति। प्राप्यमित्यर्थः। यद्यप्येतन्मते ज्ञानार्थकधातूनामावरणभङ्गरूपफलवाचकत्वस्वीकारेण दर्शनजन्यावरणभङ्गो घटे प्रतिपत्त्राऽवगम्यते, तथापि प्रतिपत्तृव्यतिरिक्तक्रियाकृतविशेषोपलभ्यमानत्वमिति विवक्षणान्न दोषः। * तृणं स्पृशतीति। 'ग्रामं गच्छन्' इत्यादि। तथा च ग्रामस्य कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयत्वेनेच्छोद्देश्यत्वे तृणस्योदासीनत्वं फलति। * संज्ञान्तरैरनाख्यातमिति। अपादानादिभिरविवक्षितमित्यर्थः। अकथितञ्च (पा० सू० १—४—५१) इति सूत्रेणेति भावः। * क्रूरमभिक्रुध्यतीति। "क्रुधद्रुहोरुपसृष्टयोः कर्म" (पा० सू० १—४—३८) इति सूत्रेणात्र कर्मसंज्ञा।

* धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते ।

इति वाक्यपदीयात् । * अत एव यदा यदीयो व्यापारो धातुनाऽभिधीयते तदा स कर्तेति स्थाली पचति, अग्निः पचति, एधांसि पचन्ति, तण्डुलः पच्यते स्वयमेवेत्यादि संगच्छते ।

* नन्वेवं "कर्मकर्तृव्यपदेशाच्च" [ब्र० सू० १-२-४] इति सूत्रे "मनोमयः प्राणशरीर" इतिवाक्यस्थमनोमयस्य * जीवत्वे वाक्यशेषे तस्य *"एतमितः प्रेत्याभिसंभविताऽस्मि" इति प्राप्तिकर्मत्वकर्तृत्वव्यपदेशो विरुद्ध इति भगवता व्यासेन निर्णीतं कथं संगच्छताम् ? । उच्यते—जीवस्यैव ज्ञेयत्वे प्राप्तिकर्मत्वमपि वाच्यम् । कर्तृत्वं च तस्याऽऽख्यातेनोक्तम् । न चैकस्यैकदा संज्ञाद्वयं युक्तम् । कर्तृसंज्ञया कर्मसंज्ञाया बाधात् । तथा चैतमिति द्वितीया न स्यात् । कर्मकर्तृतायां च यगाद्यापत्तिरिति शब्दविरोधद्वारा भवति स भेदहेतुः । एवं च व्यापारांशस्य धातुलभ्यत्वादाश्रयमात्रं तृतीयाऽर्थः । कारक

---

* धातुनेति । धातुना उक्तक्रिये (उक्ता क्रिया यस्य तादृशे) कारके नित्यं कर्तृता इष्यते इत्यन्वयः । यन्निष्ठक्रियाया धातुवाच्यत्वेन विवक्षा स कर्तेति भावस्तदाह—* अत एवेति । तदुक्तं वाक्यपदीये—

> धर्मैरभ्युद्यतैः शब्दे नियमो न तु वस्तुनि ।
> कर्तृधर्मविवक्षायां शब्दात् कर्ता प्रतीयते ॥
> एकस्य बुद्ध्यवस्थाभिर्भेदेन परिकल्पने ।
> कर्मत्वं करणत्वं च कर्तृत्वं चोपजायते ॥ इति ।

वैवक्षिककर्तृत्वकर्मत्वयोरेकस्यापि विवक्षाभेदेन सम्भवात्कथं तद्विरोधो व्यासेनाभिहित इत्याशङ्क्य समाधत्ते—* नन्वेवमिति । * जीवत्वे इति । संकल्पकर्तृरूपत्वे, ब्रह्मभिन्नत्वे इति यावत् । * एतमित इति । इतः—अस्मात् शरीरात्, प्रेत्य—निःसृत्य, एतं—स्वप्रकाशत्वादिगुणविशिष्टं पूर्वोक्तमात्मानम्, अभिसम्भविताऽस्मि—

चक्रप्रयोक्तृत्वं *कृत्याश्रयत्वं वा 'दण्डः करोति' इत्यत्राव्याप्तम्*।

अयं च त्रिविधः। शुद्धः, प्रयोजको, हेतुः, कर्मकर्ता च। मया हरिः सेव्यते। कार्यते हरिणा। गमयति कृष्णं गोकुलम्। मदभिन्नाश्रयको हरिकर्मकसेवनानुकूलो व्यापारः, इर्यभिन्नाश्रयक उत्पादनानुकूलो व्यापारः, गोकुलकर्मकगमनानुकूलकृष्णाश्रयकव्यापारानुकूलो व्यापार इति शाब्दबोधः।

करणतृतीयायास्त्वाश्रयव्यापारौ वाच्यौ। तथा हि—"साधकतमं करणम्" [पा० सू० १-४-४९]। तमबर्थः प्रकर्षः। स चाव्यवधानेन फलजनकव्यापारवत्ता। तादृशव्यापारवत्कारणं च करणम्।

उक्तं च वाक्यपदीये—

*क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्॥
*वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः॥ इति॥

विवक्ष्यत इत्यनेन सकृदनेकेषां तदभावाद् द्वितीयासप्तम्यादेरव-

प्राप्तास्मि इत्यर्थः। * कृत्याश्रयत्वमिति। 'कर्ता' इत्यत्र 'कृ'धातोः कृतिवाचकत्वात् तृचश्चाश्रयवाचकत्वात्। तत्र, चाश्रयांशस्य प्रकृत्यैव लाभात् कृतिमात्रं तृतीयार्थ इति भावः।* अव्याप्तमिति। दण्डस्याचेतनत्वेन करणादिप्रयोक्तृत्वासम्भवात्। कृतेरपि आत्मधर्मत्वेनाचेतनदण्डेऽसम्भवात् कृतेर्धातुलभ्यत्वाच्च।

* क्रियाया इति। फलस्येत्यर्थः। क्रियते—उत्पाद्यते सा क्रिया इति योगाश्रयणात्। तथा च यत्र कर्मणि यद्व्यापाराव्यवधानेन फलसिद्धिर्विवक्षिता तत् करणमिति कारिकाऽर्थः। करणतृतीयाप्रयोजिका विवक्षैवेति फलितं, तदेव स्पष्टयति—* वस्तुत इति।

काशं *सूचयति। * न चैवं "कर्ता शास्त्रार्थवत्त्वात्" [ब्र० सू० २–३–३३] इत्युत्तरमीमांसाऽधिकरणे "शक्तिविपर्ययात्" [ब्र० सू० २–३–३८] इति सूत्रेणान्तःकरणस्य कर्तृत्वे करणशक्ति*विपर्ययापत्तिरुक्ता न युज्येतेति वाच्यम्। "तदेवैतेषां प्राणानां विज्ञानेन विज्ञानमादाय" इति श्रुत्यन्तरे करणतया क्लृप्तस्य कर्तृतां प्रकल्प्य शक्तिविपर्ययापत्तिर्निष्प्रमाणा *कल्प्येतेत्यभिप्रायात्। वस्तुतस्त्वभ्युच्चयमात्रमेतदिति "यथा च तक्षोभयथा" [ब्र० सू० २–३–४०]

---

* सूचयतीति। द्वितीयादिविभक्तीनां विषयेऽपि विवक्षया करणत्वादाश्रयार्थं उपलक्षणं तत्तदर्थानामिति सूचयतीत्यर्थः। सर्वेषां कारकाणां करणत्वेन विवक्षाया असम्भवात् न युगपत्सर्वत्र तृतीयापत्तिः फलसिद्धिप्रागनन्तरकालिकव्यापारवत एव तत्त्वेन एकस्यैव तादृशव्यापारवत्त्वेन विवक्षितुं शक्यत्वात्; एतदेवोत्तरमीमांसाऽधिकरणविरोधपरिहाराभ्यां व्याचष्टे—* न चैवमिति। एवं—सर्वेषां कारकाणां विवक्षया करणत्वे। * विपर्ययापत्तिरिति। "कर्ता शास्त्रार्थवत्त्वात्" (ब्र० सू० २—३—३३) इति सूत्रेण जीवोद्देशेन कर्तव्यविशेषोपदेशानां "यजेत्" "जुहुयात्" "दद्यात्" इत्यादीनाम् "एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः" इत्यादिशास्त्राणां चार्थवत्त्वाय जीवस्य कर्तृत्वे बोधिते "यदि बुद्धिव्यतिरिक्तो जीवः कर्ता स्यात् स स्वतन्त्रः सन् प्रियं हितं चैवात्मनो नियमेन सम्पादयेत्, न विपरीतं; विपरीतमपि तु सम्पादयन्नुपलभ्यते, न च स्वतन्त्रस्याऽऽत्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यते" इति भाष्येण जीवस्य कर्तृत्वमाक्षिप्य बुद्धेः कर्तृत्वे आशङ्किते "शक्तिविपर्ययात्" (ब्र० सू० २—३—३८) इति सूत्रेण "तदेवैतेषां प्राणानां विज्ञानेन विज्ञानमादाय" इति श्रुतौ विज्ञानेनेतिपदबोधितकरणशक्तिर्बुद्धेर्हीयेत, कर्तृशक्तिश्चापद्येतेत्युक्ता कर्तृत्वकरणत्वशक्त्योर्विपर्ययापत्तिरित्यर्थः।

*. कल्प्येतेति। न हि बुद्धेः कर्तृत्वं करणान्तरकल्पनां विना प्रामाण्यमधिगच्छति करणसाहाय्येनैव कर्तुः प्रवृत्तिदर्शनात्। करणान्तरकल्पना च नानुभवानुसारिणीति निष्प्रमाणेति भावः।

इत्यधिकरणे *भाष्ये एव स्पष्टमित्यादि प्रपञ्चितं भूषणे ।

सप्तम्या अप्याश्रयोऽर्थः । "सप्तम्यधिकरणे च" [पा० सू० २–३–३६] इत्यधिकरणे सप्तमी । तच्च "आधारोऽधिकरणम्" [पा० सू० १–४–४५] इति सूत्रादाधारः । तच्चाऽऽश्रयत्वम् । तत्राऽऽश्रयांशः शक्यः । तत्त्वमवच्छेदकम् । न चाऽऽश्रयत्वमात्रेण कर्तृकर्मकरणानामाधारसंज्ञा स्यात् । स्यादेव यदि ताभिरस्या *न बाधः स्यात् । "कारके" [पा० सू० १–४–२३] इत्यधिकृत्य विहितसप्तम्याः क्रियाश्रय इत्येवं यद्यपि तात्पर्यं, तथाऽप्यत्र कर्तृ-कर्मद्वारा तदाश्रयत्वमस्त्येव स्थाल्यादेर्भूतलकटादेश्चेति 'स्थाल्यां पचति' 'भूतले वसति' 'कटे शेते' इत्याद्युपपद्यते ।

उक्तं च वाक्यपदीये—

*कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् ।
*उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥ इति ॥

---

* भाष्ये एवेति । तत्र भाष्ये "यथा तु तक्षा वास्यादिकरण-हस्तः कर्ता दुःखी भवति. स एव स्वगृहं प्राप्तो विमुक्तवास्यादिक-रणः स्वस्थो निर्वृतो निर्व्यापारः सुखी भवति" इत्युक्त्या वास्याद्यु-पाधिसहितासहितस्यैकस्यैव तक्ष्णो दुःखित्वं सुखित्वं च, तथैव विवक्षाऽविवक्षारूपोपाधिनैकस्यैव कर्तृत्वं करणत्वं च "योधै राजा युध्यते" "योधा युध्यन्ते" इत्यादिना स्पष्टम् ।

* न बाधः स्यादिति । एवं च साक्षात्क्रियाश्रये कर्तृकर्मसं-ज्ञाभ्यां बाधात् सूत्रारम्भसामर्थ्याच्चद्वारकक्रियाश्रये एवाऽधिकरण-संज्ञा पर्यवस्यतीति भावः । अत एव "गेहं प्रविशति" "मोक्षमिच्छति" इत्यादौ द्वितीया । "मोक्षे इच्छा" इति तु आख्यातार्थकर्तृद्वारा इच्छ-तिक्रियायां मोक्षस्यान्वयाद्बोध्यम् एतेन आश्रयत्वमात्रार्थकतया द्वि-तीयातृतीयासप्तमीनां पर्यायतापत्तिर्निरस्तेति दिक् ।

* कर्तृकर्मव्यवहितामिति । स्वाश्रितकर्त्राद्याश्रितामित्यर्थः ।

* उपकुर्वत् क्रियासिद्धौ—स्वनिष्ठव्यापारेण प्रधानक्रियानिर्वर्तक-मित्यर्थः ।

एतच्च त्रिविधम्। *औपश्लेषिकं *वैषयिकमभिव्यापकं*च। कटे शेते, गुरौ वसति, मोक्षे इच्छाऽस्ति, तिलेषु तैलमिति। *एतच्च "संहितायाम्" [पा० सू० ६-१-७२] इति सूत्रे भाष्ये स्पष्टम्।

अवधिः पञ्चम्यर्थः। "अपादाने पञ्चमी" [पा० सू० २-३-२८]। *तच्च "ध्रुवमपायेऽपादानम्" [पा० सू० १-४-२४] इति सूत्रादपायो * विश्लेषस्तज्जनकक्रिया * तत्रावधिभूतमपादानमित्यर्थकाद् अवधिभूतमिति भावः।

उक्तं च वाक्यपदीये—

औपश्लेषिकमिति। श्लेषस्य सम्बन्धस्य समीपम् उपश्लेषः। तत्र भवम्, एकदेशावच्छेदेन स्वसम्बन्धि इति यावत्। उप-समीपे श्लेषः—सम्बन्धस्तत्र भवमिति वा। तत्राद्यार्थस्य 'कटे शेते' इत्युदाहरणं, द्वितीयस्य 'गुरौ वसति' इति हरिकृतकाशिकायां स्पष्टम्। 'गुरौ वसति' इत्यस्य गुर्ववधिकसमीपदेशवृत्तिशिष्यकर्तृको वास इत्यर्थः।

परे तु तादृशावधित्वसमानाधिकरणापादानत्वशक्तेः पञ्चम्यर्थतया 'गुरौ वसति' इति वैषयिकोदाहरणमिति "संहितायाम्" [पा० सू० ६-१-७२] इति सूत्रे कैयटे स्पष्टमित्याहुः।

* वैषयिकमिति। एतदुदाहरणं 'मोक्षे इच्छाऽस्ति' इति, 'गुरौ वसति' इति च।

* अभिव्यापकमिति। सर्वावयवावच्छेदेनाऽऽधेयसम्बन्धाश्रय इत्यर्थः। 'तिलेषु तैलम्' इत्युदाहरणम्।

*एतच्च—अधिकरणत्रैविध्यञ्च। *सूत्रे भाष्ये इति। तत्र हि "अयं योगः शक्योऽवक्तुम्। कथम् ?, अधिकरणं नाम त्रिःप्रकारं—व्यापकम् औपश्लेषिकं वैषयिकमिति" इत्युक्तम्।

*तच्च—अपादानञ्च। *विश्लेषः—विभागः। *तत्रावधिभूतमिति। विभागजनकक्रियानाश्रयत्वे सति विभागाश्रयत्वमित्यर्थः।

अपाये यदुदासीनं चलं वा यदि वाऽचलम् ।
ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥
पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते ॥
उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मके ।
विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते ॥
मेषान्तरक्रियापेक्षमवधित्वं पृथक्पृथक् ।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथक् ॥ इति ।

अस्यार्थः—अपाये—विश्लेषहेतुक्रियायाम् । उदासीनम्-अनाश्रयः । अतदावेशात्-तत्क्रियानाश्रयत्वात् । एवं च विश्लेष-हेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितम् । वृक्षात्पर्णं पततीत्यत्र पर्णस्य तद्वारणाय सत्यन्तम् । धावतोऽश्वात्पततीत्यत्राश्वस्य *क्रियाश्रयत्वाद्विश्लेषहेत्विति ।

कुड्यात्पततोऽश्वात्पततीत्यत्राश्वस्य *विश्लेषजनकक्रियाश्रयत्वेऽपि तन्न विरुद्धमित्याह—यस्मादश्वादिति । तद्विश्लेषहेतुक्रियानाश्रयत्वे सतीति विशेषणीयमिति भावः । एवमश्वनिष्ठक्रियानाश्रयत्वात्कुड्यादेरपि ध्रुवत्वमित्याह—तस्यापीति ।

उभयकर्मजविभागस्थले विभागस्यैक्यात्तद्विश्लेषजनकक्रियानाश्रयत्वाभावात्परस्परस्मान्मेषावपसरत इति न स्यादित्याशङ्क्य समाधत्ते—उभावपीति । मेषान्तरेति । यथा निश्चलमेषादपसरद्-द्वितीयमेषस्थले निश्चलमेषस्यापसरन्मेषक्रियामादाय ध्रुवत्वं तथाऽत्रापि

---

*क्रियाश्रयत्वादिति । धावनक्रियाश्रयत्वादित्यर्थः । *विश्लेषजनकेति । अस्य कुड्यावधिकेत्यादिः । *विशेषणीयमिति । यन्निरूपितमवधित्वमिष्यते, तद्विभागव्यक्तित्वेन निवेशनीयमित्यर्थः ।

विभागैक्येऽपि *क्रियाभेदादेकक्रियामादाय परस्य* ध्रुवत्वमिति । तथा च विश्लेषाश्रयत्वे सति तज्जनकतत्क्रियानाश्रयत्वं तत्क्रियायामपादानत्वं वाच्यम् । क्रिया चात्र धात्वर्थो न तु स्पन्दः । तेन वृक्षकर्मजविभागवति वस्त्रे वृक्षाद्वस्त्रं पततीति संगच्छते ।

वस्तुतो नैतावत्पञ्चम्यां वाच्यं,किं त्वेवमेवलक्षणमात्रम्। *द्वितीयार्थोक्तरीत्या प्रयोगातिप्रसङ्गस्यासंभवेन वाच्यकोटौ प्रवेशस्य गौरवेण।* संभ-

---

*क्रियाभेदादिति। भिन्नमेषगतत्वेन तत्तत्क्रियाभेदादित्यर्थः। अस्य विभागभेदे कल्पिते इति शेषः। *ध्रुवत्वमितीति। तदवधिकविभागजनकक्रियानाश्रयत्वादिति बोध्यम्। एवञ्च तद्विभागजनकक्रियानाश्रयत्वे सति धात्वर्थतत्क्रियाजन्यतद्विभागाश्रयत्वं तत्त्वम्।

*द्वितीयार्थोक्तरीत्येति। तद्विभागजनकक्रियानाश्रयत्वस्य पञ्चम्यवाच्यत्वे "पर्णात् पर्णं पतति" इति प्रयोगस्यातिप्रसङ्गः शाब्दबोधस्य वा ? नाद्यः। कर्तृसंज्ञाया अपादानसंज्ञाबाधकत्वेन तद्विषये पञ्चम्यप्राप्तेः। न द्वितीयः। तथा व्युत्पन्नानामिष्टापत्तेः, पञ्चमीजन्यबोधविषयविभागनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधं प्रति तद्विभागजनकधात्वर्थव्यापारानाश्रयोपस्थितेर्हेतुत्वकल्पनाच्चेति रीत्येत्यर्थः।

* असम्भवादिति। एतेन परसमवेतत्वं विभागश्च पञ्चम्यर्थः, विभागमात्रार्थस्वीकारे 'पर्णात् पर्णं पतति' इति प्रयोगापत्तेः। न च 'धात्वर्थतावच्छेदकफलानाश्रयत्वे सति' इत्यपि विशेषणीयमिति न दोष इति वाच्यम्। अधोदेशे वृक्ष एव लग्ने पर्णे वृक्षस्य संयोगरूपधात्वर्थतावच्छेदकफलाश्रयत्वेन 'वृक्षात् पतति' इत्यनापत्तेः। न च विभागार्थकपञ्चम्याः परसमवेतत्वविशिष्टे लक्षणा, तस्य च धात्वर्थेऽन्वयः, परत्वं च स्वप्रकृत्यर्थापेक्षयेति वाच्यम्। शुद्धशक्त्या प्रयोगादर्शनेन शक्यार्थग्रहं विना तत्सम्बन्धरूपलक्षणाया असम्भवात्। अन्यथैवकारस्य व्यवच्छेदमात्रे शक्तिः

वादिति तु प्रतिभाति* । न चैवमपि * वृक्षात्स्पन्दत इति स्यादिति शङ्क्यम् । आसनाच्चलितः, राज्याच्चलित इतिवदिष्टत्वात् * । एतेन पञ्चमीजन्यापादानत्वबोधे *सकर्मकधातुजन्योपस्थितेर्हेतुत्वमिति समाधानाभासोऽप्यपास्तः* । न चैवमपि वृक्षात्त्यजतीति दुर्वारम् । कर्मसंज्ञयाऽपादानसंज्ञाया बाधेन पञ्चम्यसंभवात् । भ्रमात्कृते तथा प्रयोगे यदि बोधाभावोऽनुभवसिद्धस्तर्हि पञ्चमीजन्यापादानत्वबोधे त्यजादिभिन्नधातुजन्यबुद्धेर्हेतुत्वं वाच्यम् । बलाहकाद्विद्योतते वि-

---

पार्थान्यत्वादिविशिष्टे लक्षणा, फलमेव द्वितीयाऽर्थः परसमवेतत्वे लक्षणेत्यपि स्यात् । एवञ्च परसमवेतत्वं शक्यमेव । तथा च 'वृक्षात् पर्णं पतति'इत्यादौ वृक्षनिष्ठविभागानुकूलवृक्षान्यसमवेतपतनानुकूलव्यापाराश्रयः पर्णमिति बोध इति नैयायिकोक्तमपास्तम् । परसमवेतत्वांशे शक्तिकल्पनस्यानुपयोगात् ।

* प्रतिभातीति । एवञ्च पञ्चम्यर्थो विभागमात्रम् उक्तावधित्वान्तर्गतव्यापारांशस्य धातुनाऽऽश्रयस्य च प्रकृतितो लाभसम्भवात्, विभागजनकव्यापाराश्रयत्वस्य चोक्तरीत्या वाच्यत्वाभावादित्याशयः । * एवमपीति । 'पर्णात् पर्णं पतति' इत्यादिदोषासम्भवेन विशेषणांशस्यावाच्यत्वेऽपीत्यर्थः । * वृक्षात् स्पन्दते इति । तादृशधात्वर्थानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वस्य वृक्षे सत्त्वात् । इयमापत्तिः सत्यन्तार्थस्य वाच्यत्वकथनेऽपीति बोध्यम् । *इष्टत्वादिति । "आसनाच्चलितः" "राज्याच्चलितः" इत्यादिप्रयोगोपपत्तये 'चल'धातोर्विभागजनकव्यापारवाचकत्ववत् स्पन्देरपि तदर्थकत्वस्वीकारात् ।

*सकर्मकेति । सकर्मकधातुजन्या अर्थाद् व्यापारानधिकरणवृत्तिफलावच्छिन्नव्यापारत्वावच्छिन्ना या उपस्थितिः सा कारणमित्यर्थः । तथा च 'स्पन्द्'धातोः फलसमानाधिकरणव्यापारवाचकत्वेन तज्जन्योपस्थितेस्तादृक्त्वाभावेन न पञ्चम्यापत्तिरिति तात्पर्यम् । *अपास्त इति । 'आसनाच्चलितः' इत्यादावपि 'चल'धातुजन्यो-

द्युदित्यादौ निःसृत्येत्यध्याहार्यम्। रूपं रसात्पृथगित्यत्र तु बुद्धिपरिकल्पितमपादानत्वं द्रष्टव्यम्। पृथग्विना [पा० सू० २-३-३२] इति पञ्चमी वा।

इदं च—

निर्दिष्टविषयं किंचिदुपात्तविषयं तथा।
अपेक्षितक्रियं चेति त्रिधाऽपादानमुच्यते॥

इति वाक्यपदीयात्त्रिविधम्। यत्र साक्षाद्धातुना*गतिर्निर्दिश्यते तन्निर्दिष्टविषयम्। यथा—अश्वात्पतति। यत्र धात्वन्तरार्थाङ्गं स्वार्थं धातुराह, तदुपात्तविषयम्। यथा—बलाहकाद्विद्योतते। निःसरणाङ्गे विद्योतने द्युतिर्वर्तते। अपेक्षिता क्रिया यत्र तदन्त्यम्। यथा—कुतो भवान् पाटलिपुत्रात्। अत्राऽऽगमनमर्थमध्याहृत्यान्वयः कार्यः॥

उद्देश्यश्चतुर्थ्यर्थः। तथा हि—संप्रदाने चतुर्थी। तच्च "कर्मणा यमभिप्रैति स संप्रदानम्" [पा० सू० १-४-३२] इतिसूत्रात्कर्मणा करणभूतेन यमभिप्रैति ईप्सति तत्कारकं संप्रदानमित्यर्थकादुद्देश्यः। इदमेव शेषित्वम्। तदुद्देश्यकेच्छाविषयत्वं च शेषत्वमित्येव पूर्वतन्त्रे निरूपितम्। अत एव "प्रासनवन्मैत्रावरुणाय दण्डप्रदानम्" [अ० ४ पा० २ अधि० ६] इत्यधिकरणे क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति विहितं दण्डदानं *चतुर्थीश्रुत्याऽर्थकर्मेति तत्र नि-

---

पस्थितेस्तादृक्त्वाभावेन पञ्चम्यनापत्तेरिति तदाशयः। *गतिरिति। विभागजनकक्रियेत्यर्थः।

* चतुर्थीश्रुत्याऽर्थकर्मेति। दीक्षितस्य दण्डप्रदानं विधाय पुनराम्नातं—"क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति" इति। तत्र द्वितीयाश्रुत्या दण्डस्यैवेच्छाविषयत्वावगतेः प्राधान्यात् तस्य च दीक्षितहस्ते धारणेन कृतार्थत्वादिदं दण्डदानं प्रतिपत्तिकर्म, इत्याशङ्क्य 'मैत्रावरुणाय' इति चतुर्थीश्रुत्या मैत्रावरुणस्यैवोद्देश्यत्वलक्षणार्थप्राधान्यावगतेः "दण्डी प्रैषानन्वाह" इति प्रैषानुवदनेऽवलम्बाय

र्णीतम् । रजकाय वस्त्रं ददातीत्यपि खण्डिकोपाध्यायः शिष्याय *चपेटां ददातीति*भाष्योदाहरणादिष्टमेव । *वृत्तिकारास्तु सम्यक्प्रदीयते यस्मै तत्संप्रदानमित्यन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्यन्तमर्थं वर्णयन्तो रजकस्य वस्त्रमित्येवाऽऽहुः ।

इदं च—

अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम् ।
प्रेरणानुमतिभ्यां च लभते संप्रदानताम् ॥

इति वाक्यपदीयात्त्रिविधम् । "सूर्यायार्घ्यं ददाति"इत्याद्यम् । नात्र सूर्यः प्रार्थयते, नानुमन्यते, न निराकरोति । प्रेरकं—"विप्राय गां ददाति" । अनुमन्तृ—"उपाध्यायाय गां ददाति" । अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः । विभक्तीनां धर्मिवाचकत्वात् । धर्ममात्रवाचकत्वे "कर्मणि द्वितीया" [पा० सू० २–३–२] इतिसूत्रस्वर-

---

दण्डस्योपयोक्ष्यमाणत्वाच्च मैत्रावरुणार्थमिदं दण्डप्रदानमित्यर्थकर्मेति तत्र निर्णीतं, न तु द्वितीयाश्रुत्या प्रतिपत्तिकर्मेति भावः ।

* चपेटाम्—प्रसृतकरतलम् । *भाष्योदाहरणादिति । संयोगविशेषानुकूलव्यापारार्थकत्वेऽपि ददातेरत्र भाष्यकृता चतुर्थ्या उपादानात् 'संप्रदान'संज्ञाया अन्वर्थत्वानङ्गीकारेण 'रजकाय वस्त्रं ददाति' इत्यत्राधीनीकरणार्थददातेर्योगेऽपि चतुर्थी । 'रजकस्य वस्त्रं ददाति' इति तु शेषत्वविवक्षायामिति भाष्यकृदाशयः । अत एव "नशूद्राय मतिं दद्यात्" इति स्मार्तप्रयोगः सङ्गच्छते । अत्र ददातिर्बोधनार्थः । मतिशब्दस्तज्जनकवेदादिपरः । सम्प्रदानसंज्ञायाः 'सम्यक् प्रदीयते यस्मै तत्सम्प्रदानम्' इतियोगार्थेनान्वर्थत्वं स्वीकृत्य स्वस्वत्वनिवृत्ति—परस्वत्वोत्पत्ति-एतदुभयार्थकस्यैव ददातेर्योगे सा संज्ञा नान्यत्रेति स्वीकर्तॄणां मतमाह—* वृत्तिकारास्त्विति ।

समङ्गापत्तेः। *कर्मार्थककृत्तद्धितादौ तथा दर्शनाच्च। द्वितीयाद्यर्थे कबहुव्रीहौ 'प्राप्तोदक' इत्यादौ धर्मिवाचकतालाभाच्च।

सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्।

इति भाष्याच्चेति दिक्। आश्रयस्यापि प्रकृत्यैव लाभान्न विभक्तिवाच्यता, किं त्वाश्रयत्वमात्रं वाच्यम्। * तदेव च तादात्म्येनावच्छेदकम्। करणतृतीयायाश्च व्यापारोऽपि, पञ्चम्या विभागमात्रं, चतुर्थ्या उद्देश्यत्वमात्रम्, अत एवाऽऽकृत्यधिकरणमपि न विरुध्यत इत्यभिप्रेत्याऽऽह—शक्तिरेव चेति। षण्णामपीति शेषः। "षष्ठी शेषे" [पा० सू० २–३–५०] इति सूत्रात्तस्याः संबन्धमात्रं वाच्यम्। कारकषष्ठ्यास्तु शक्तिरेवेत्यूह्यम्। "सप्तमीपञ्चम्यौ कारकमध्ये" [पा० सू० २–३–७] इति सूत्रे *शक्तिः कारकमिति पक्षस्य भाष्ये दर्शनात्। एवं च 'देवदत्तस्य गौर्ब्राह्मणाय गेहाद् गङ्गायां हस्तेन मया दीयते' इत्यत्र देवदत्तसम्बन्धिनी या गौस्तदभिन्नाश्रयकत्यागानुकूलो ब्राह्मणोद्देश्यको गेहनिष्ठविभागजनको गङ्गाधिकरणको हस्तकरणको मन्निष्ठो व्यापार इति बोधः। यथायथम्—उक्तप्रकारेण। अत्र मानमुपदर्शयन्''घटं जानाति''इत्यादौ द्वितीयाया विषयतायां लक्षणेति बहुकुलं वदतो नैयायिकादीन्प्रत्याह—सुपां कर्मेति। अयं भाव:—

कर्मार्थककृत्तद्धितादाविति। 'पक्वस्तण्डुलः' 'शत्योऽश्वः' इत्यत्र। आदिपदात् कर्त्रर्थकलडादेशशानचः 'पच्यमानस्तण्डुल' इत्यस्य संग्रहः। आश्रयत्वस्य वाच्यत्वे आश्रयत्वत्वस्यावच्छेदकत्वं कल्प्यं, तथा च गौरवमित्याशङ्कां परिहरति— तदेव चेति। * शक्तिः कारकमिति। अत्र प्रवृत्तिनिमित्तं तु स शब्द एव संज्ञाशब्दत्वादिति बोध्यम्। उक्तं च हरिणा—

नित्याः षड् व्यक्तयोऽन्येषां भेदाभेदसमन्विताः।
क्रियासंसिद्धयेऽर्थेषु जातिवत् समवस्थिताः॥

सुपां कर्मादयोऽप्यर्थाः संख्या चैव *तथा तिङाम् ।
प्रसिद्धो नियमस्तत्र* नियमः *प्रकृतेषु वा ॥

इति वार्तिकतद्भाष्याभ्यां कर्मादेर्वाच्यतायास्तन्नियमस्य च लाभः। तथा हि—"स्वौजसमौट्" [पा० सू० ४-१-२] "कर्मणि द्वितीया" [पा० सू० २-३-२] "द्व्येकयोर्द्विवचनैकवचने" [पा० सू० १-४-२२] इत्यादेः "लस्य" [पा० सू० ३-४-७७] "तिप्तस्झि" [पा० सू० ३-४-७८] "तान्येकवचनद्विवचन" [१-४-१०१] इत्यादेश्चैकवाक्यतया कर्मादेस्तत्संख्यायाश्च वाच्यता लभ्यते। तथा तन्नियमश्च द्विविधो लभ्यते। द्वितीया कर्मण्येव, तृतीया करणे एवेत्येवमादिरर्थनियमः*। कर्मणि द्वितीयैव, करणे तृतीयैवेत्येवं शब्दनियमश्च। उभयथाऽपि सिद्धनियमविरुद्धं लक्षणादिकमसाधुत्वप्रयोजकमिति याज्ञे कर्मणि "नानृतं वदेत्" इतिनि-

---

द्रव्याकारादिभेदेन ताश्चापरिमिता इव ।
दृश्यन्ते, तत्त्वमासां तु षट् शक्तीर्नातिवर्तते ॥
निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते ।
षोढा शक्तित्वमेवाहुस्तत्प्रवृत्तिनिबन्धनम् ॥ इति ॥

शक्तिः कारकमिति मते "अनभिहिते" [पा० सू० २-३-१] इति सूत्रस्य तत्तच्छक्त्यनभिधाने इत्यर्थः। * तथा—कर्मादिः संख्या चेत्यर्थः। अत्र आदिपदेन कर्त्रर्थो गृह्यते इति बोध्यम्। * तत्र—सुपां कर्मादिवाचकत्वे। * प्रकृतेषु—अर्थेषु कर्मादीनां सुब्वाच्यत्वे इत्यर्थः।

* अर्थनियम इति। अयं शब्दनियमश्चेति द्वावपि नियमौ सोपपत्तिकौ गुरुचरणकृतशब्देन्दुशेखरदीपकेऽव्ययप्रकरणे निरूपिताविति तत्र द्रष्टव्यौ ॥ १ ॥ (२४)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां सुबर्थनिर्णयः समाप्तः ॥

बेधविषयो भवत्येवेति स्वेच्छया लक्षणाऽपि विभक्तावप्रयोजिकैव । अत एव "विभक्तौ न लक्षणा" इत्यादिर्नैयायिकवृद्धानां व्यवहार इति दिक् ॥ १ ॥ (२४)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे सुबर्थनिर्णयः समाप्तः ।

नामार्थानाह—

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥१॥
(२५)

एकं—जातिः, लाघवेन तस्या एव वाच्यत्वौचित्यात् । *अनेकव्यक्तीनां वाच्यत्वे गौरवात् । *न च व्यक्तीनामपि प्रत्येकमेकत्वाद्विनिगमनाविरहः, *एवं ह्येकस्यामेव व्यक्तौ शक्त्यभ्युपगमे व्यक्त्यन्तरे लक्षणायां *स्वसमवेताश्रयत्वं संसर्ग इति गौरवम् । जात्या तु सहा-

---

* अनेकव्यक्तीनामिति । 'एकस्या जातेर्वाच्यत्वमुपेत्य' इत्यादि । ननु जातेर्वाच्यत्वे 'गामानय' इत्यादौ गोव्यक्तेरानयनकर्मत्वेन बोधाय व्यक्तौ लक्षणा त्वयाऽभ्युपगन्तव्या । तथा च व्यक्तेरेवैकस्या वाच्यत्वमस्तु व्यक्त्यन्तरबोधस्तु लक्षणया भविष्यतीति न गौरवमित्याशङ्कते—* न च व्यक्तीनामपीति । व्यक्तेर्वाच्यत्वेऽप्येकस्यैव तत्त्वेन लाघवस्य विनिगमकत्वाभावेऽपि सम्बन्धलाघवं विनिगमकं भवतीति समाधत्ते—* एवमित्यादिना । एवं—विनिगमनाविरहे ।

* स्वसमवेताश्रयत्वमिति । स्वं—वाच्यव्यक्तिः तत्समवेता—गोत्वादिजातिः तदाश्रयत्वं—समवायेन तदधिकरणत्वं व्यक्त्यन्तरे इति समन्वयः । स्वसमवेतसमवायित्वमिति यावत् । ननु व्यक्तिशक्तिवादिनाऽपि जातेर्वाच्यत्वमभ्युपेयमेव । अन्यथा शुद्धव्यक्तेर्वाच्यत्वस्वीकारे व्यक्तीनामानन्त्याद् व्यभिचाराच्च शक्तिग्रहानुप-

ऽऽश्रयत्वमेव संसर्ग इति लाघवम् । *किं च विशिष्टवाच्यत्वमपेक्ष्य *नागृहीतविशेषणन्यायेन जातिरेव वाच्येति युक्तं, व्यक्तिबोधस्तु लक्षणया । *एवं च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यत इति दिक् । *यद्वा केवलव्यक्तिरेवैकशब्दार्थः । केवलव्यक्तिपक्ष एवा*ण्ग्रहणस्यैकशेषस्य चाऽऽरम्भेण तस्यापि शास्त्रसिद्धत्वात् । युक्तं चैतत् । *व्यवहारेण व्यक्तावेव*तद्ग्रहणात् । *संबन्धितावच्छेदिकाया जातेरैक्याच्छक्तिरप्येकैवेति न गौरवमपि । न चैवं* घटत्वमपि वाच्यं स्याच्छ-

---

पत्तेः । एवं च आवश्यकत्वात् प्रथमोपस्थितेश्च जातेरेव वाच्यत्वमस्तु । उक्तं च भट्टपादैः—

अन्वयव्यतिरेकाभ्यामेकरूपप्रतीतितः ।
आकृतेः प्रथमज्ञानात् तस्या एवाभिधेयता ॥ इति ।

व्यक्तिबोधस्तु लक्षणयोपपत्स्यते इत्याह—* किं चेति । * नागृहीतेति । 'नागृहीतविशेषणाबुद्धिर्विशेष्यमवगाहते' विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतयाऽगृहीतविशेषणा एतादृशी बुद्धिर्न विशेषणविशिष्टविशेष्यविषयिणी भवतीत्यर्थकन्यायेनेत्यर्थः । * एवं च—व्यक्तौ लक्षणास्वीकारे च ।

ननु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः प्रकृतिनिष्ठशक्तिनिरूपकस्यैव च प्रकृत्यर्थतया व्यक्तेः शक्त्यनिरूपकत्वेन तत्र विभक्त्यर्थान्वयो न स्यात् 'गामानय' इत्यादौ पदार्थान्तरान्वयानुपपत्तिश्चेति । उक्तं च तद्भूताधिकरणे भट्टपादैः—

गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम् ।
शब्दान्तरैर्विभक्त्या वा धूमोऽयं ज्वलतीतिवत् ॥ इति ।

किञ्च व्यक्तौ लक्षणाऽपि अनुपपत्तिज्ञानमन्तरेणैव 'गां दद्यात्' इत्यादितो व्यक्तिबोधदर्शनान्न सम्भवति । अत एव नार्थापत्तिरपि इत्यरुचेराह—* यद्वेति । * अण्ग्रहणस्येति । "अणुदित्सवर्णस्य" [पा० सू० १–१–६९] इति सूत्रे इत्यादि । * व्यवहारेण—गवानयनादिव्यवहारेण । * तद्ग्रहणात्—शक्तिसम्बन्धग्रहणात् । * सम्बन्धितावच्छेदिकायाः—शक्यतावच्छेदिकायाः । * एवं—

क्यतावच्छेदकत्वात् । तथा च नागृहीतविशेषणन्यायात्तदेव वाच्यमस्त्विति शङ्क्यम् । *अकारणत्वेऽपि कारणतावच्छेदकत्ववदलक्ष्यत्वेऽपि लक्ष्यतावच्छेदकत्ववत्तथाऽत्रापि संभवात् ।

उक्तं च—

* आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् ।
शब्दः सुकरसंबन्धो न च व्यभिचरिष्यति ॥ इति ॥

वस्तुतस्तु " न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः " इति भाष्याद्विशिष्टं वाच्यम् । *एकमित्यस्य चायमभिप्रायः—शक्तिज्ञाने

केवलव्यक्तिशक्तिवादे । * अकारणत्वे इति । अस्य दण्डत्वादेरित्यादि । अलक्ष्यत्वे इत्यस्य तु तीरत्वादेरित्यादिरित्यर्थः । * आनन्त्येऽपीति । भावानां—पदार्थानाम् (व्यक्तीनामिति यावत्) आनन्त्येऽपि जातिरूपमेकमुपलक्षणं कृत्वा शब्दस्य सकलव्यक्तिभिः सुग्रहशक्तिकत्वाद् व्यभिचारो न भविष्यति इति कारिकाऽर्थः ।

ननु केवलव्यक्तिपदार्थस्वीकारे घटत्वादिप्रकारकघटादिविशेष्यकशाब्दबोधं प्रति घटादिव्यक्तिविषयकशक्तिज्ञानाधीनोपस्थितिः कारणमिति कार्यकारणभावो वक्तव्यः । तथा च द्रव्यादिपदानामन्येकमापत्तौ घटपदाद् द्रव्यत्वप्रकारकशाब्दबोधापत्तिः । न च द्रव्यत्वप्रकारकबोधे द्रव्यपदजन्योपस्थितेः कारणत्वेन न दोष इति वाच्यम् । तत्पर्यायान्तरात्तथाबोधानापत्तेः । द्रव्यत्वार्थकपदज्ञानत्वेन कारणता तु जातिशक्तिं विना न सम्भवति इत्यरुचिं मनसि निधायाह— * वस्तुतस्त्विति । * विशिष्टमिति । जातिविशिष्टा व्यक्तिरित्यर्थः । एवञ्च जातिव्यक्त्योरुभयोरपि वाच्यत्वमत्र पक्षे इति बोध्यम् ।

* एकमित्यस्य चायमिति । एकमेवान्तर्भाव्य कार्यकारणभाव इत्यर्थः * जातिरेकैवेति । एकपदेन व्यक्तिनिरासः । एवं च घटत्वप्रकारकघटविशेष्यकशाब्दबोधे घटत्वनिरूपितशक्तिज्ञानाधीनोपस्थितित्वेन कारणतेति फलितम् । नन्वेवं 'घटोऽस्ति'इत्यत्रैव 'घट'

विषयतयाऽवच्छेदिका*जातिरेकैव ।*तथा च घटत्वविशिष्टबोधे *घटत्वांशेऽन्याप्रकारकघटत्वशक्तिज्ञानत्वेन हेतुतेति कार्यकारणभाव इत्यादि प्रपञ्चितं भूषणे । तदेतदभिप्रेत्याऽऽह—द्विकमिति ।: जातिव्यक्ती इत्यर्थः । पूर्वपक्षविरोधपरिहारः पूर्ववत् । त्रिकमिति । जातिव्यक्तिलिङ्गानीत्यर्थः । सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम्, *आधिक्यं पुंस्त्वम्, *अपचयः स्त्रीत्वम्, *तत्तच्छब्दनिष्ठं तत्तद्वाच्यं च। तमेव विरुद्धधर्ममादाय तटादिशब्दा भिद्यन्ते । केषांचिदनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात् । एवं च पदार्थपदे पुंस्त्वमेव, व्यक्तिपदे स्त्रीत्वमेव, वस्तुपदे नपुंसकत्वमेवेति सर्वत्रैव 'अयं पदार्थः' 'इयं व्यक्तिः' 'इदं वस्तु' इति व्यवहारः तटः तटी तटमिति चोपपद्यते । तच्च लिङ्ग*मर्थपरिच्छेदकत्वेनान्वेतीति *पश्वादिशब्दोक्तं पशु स्त्रियां नास्तीति पशुनेत्यादिविधिर्न च्छाग्या-

---

त्वमस्ति' इत्यत्रापि तथा बोधापत्तिरिति चेत्तत्राह—* तथा चेति । * घटत्वांशेऽन्याप्रकारकेति । अन्यनिष्ठप्रकारतानिरूपितविशेष्यत्वाभाववद्वृत्तिशक्तिज्ञानत्वेनेत्यर्थः । निरवच्छिन्नप्रकारतासम्बन्धेन घटत्वशक्तिज्ञानत्वेन कारणतेति तात्पर्यम् । तथा च 'घटत्वमस्ति' इत्यत्र न घटत्वं प्रकार इति न दोषः । एतेन घटत्वशक्तिज्ञानत्वेन कारणतास्वीकारे घटत्वत्वस्य प्रवेशाद्गौरवमित्यपास्तम् । अयमेव कुब्जशक्तिवादो मीमांसकसम्मतः । * आधिक्यमिति । सत्त्वस्येत्यादि । * अपचयः—सत्त्वस्य न्यूनता । * तत्तच्छब्दनिष्ठमिति । यथा चैतत्तथोपपादितं शब्देन्दुशेखरदीपके गुरुचरणैरिति तत एवावगन्तव्यम् ।

* अर्थपरिच्छेदकत्वेनेति । तद्विशेषणत्वेनेत्यर्थः । स्वाश्रयपदवाच्यत्वसम्बन्धेनेति यावत् । एवं च पुंलिङ्गस्य पशुपदस्य पुंव्यक्तिवाचकत्वेन पुंस्त्वविशिष्टपशोरेव विधानात् न छाग्या यागकरणत्वम् । अन्यथा परंपरया लिङ्गस्यार्थविशेषणत्वाभ्युपगमवैयर्थ्यापत्तेरित्याह—* पश्वादिशब्दोक्तमिति । अस्य 'पुंस्त्वं पशुशब्दार्थपरिच्छेदकत्वेना-

दीनङ्गत्वेन प्रयोजयतीति विभावनीयम्। न च व्यक्त्यादि-शब्दोक्तलिङ्गस्येव पश्वादिशब्दोक्तस्यापि *साधारण्यं शङ्क्यम्। व्यक्तिशब्दस्य नित्यस्त्रीलिङ्गत्वेन तथा संभवेऽपि पशुशब्दस्य नित्यपुंलिङ्गत्वे प्रमाणाभावात्। "पश्वा न तायुं गुहा चरन्तम्" "पश्वे नृभ्यो यथा गवे" इत्यादि *वेदे दर्शनाच्च। *मीमांसायां *चतुर्थे पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोर्विवक्षितत्वान्नानेकपशुभिः पशुस्त्रिया वा याग इति प्रतिपादितत्वाच्च। वस्तुतस्तु विशेषविध्यभावे उप्रत्ययान्तानां पुंस्त्वस्य व्याकरणे निर्णीतत्वाद्वेदभाष्येऽपि "जसादिषु च्छन्दसि वावचनम्" इति नाभावाभाव इत्युक्तेः पशुशब्दस्य नित्यपुंस्त्वानिर्णयात्, प्रकृते "छागो वा मन्त्रवर्णात्" इति न्यायेनैव *निर्णयः। मन्त्रवर्णे हि "छागस्य वपाया मेदसः" इति श्रूयते। तत्र च्छागस्येति च्छाग्यामसंभावितमिति भवति ततः

न्वेतीति'इति शेषः। *साधारण्यमिति। स्वाश्रयपदवाच्यत्वसम्बन्धेन स्त्रीपुंवृत्तित्वमित्यर्थः। *वेदे इति। अस्य 'स्त्रीलिङ्गपशुशब्दस्येति शेषः। तेन नादेशाभावे,"ङिति ह्रस्वश्च" [पा० सू० १-४-६] इति नदीत्वेन छान्दसत्वादाडभावे चोक्तरूपयोः सिद्धिरिति बोध्यम्। *मीमांसायाम्—पूर्वमीमांसायाम्। *चतुर्थे—अस्य 'अध्याये प्रथमपादे पञ्चमेऽधिकरणे'इति शेषः। *निर्णय इति। "अग्नीषोमीयं पशुमालभेत' इत्यत्र पशुपदेन नाश्वादीनां ग्रहणं, किन्त्वजस्यैव "छागस्य वपाया" इति श्रुतेः; इतिवत् तत एव पुंस्त्वस्यापि निर्णय इत्यर्थः। यत्र तु विधौ सन्दिग्धं तत्रापि "सन्दिग्धे तु वाक्यशेषात्" [जै० सू० १-४-१६-२६] इति न्यायेन निर्णयः। यथा "सारस्वतौ मेषौ भवतः" इत्यत्र तद्धितप्रकृतिः स्त्रीलिङ्गः पुंलिङ्गो वेति 'सरस्वत्यै चरुम्' 'सरस्वते चरुम्' इत्युभयथाऽपि दर्शनात् सन्देहे "एतद्वै दैव्यं मिथुनम्" इत्यर्थवादादेकशेषेणोभयोर्ग्रहणम्, "आग्नेयोऽष्टाकपालोऽमावास्यायाम्" इत्यत्र च 'तद्धितप्रकृतिरेकवचनान्ता बहुवचनान्ता वेति "अग्नये-

पुंस्त्वानिर्णय इति *विस्तरेण प्रपञ्चितं भूषणे। चतुष्कं—संख्यासहितं त्रिकमित्यर्थः। पञ्चकं—कारकसहितं चतुष्कमित्यर्थः। नन्वन्वय-व्यतिरेकाभ्यां प्रत्ययस्यैव तद् वाच्यम्। तत एव लिङ्गादीनामुपस्थितौ प्रकृतिवाच्यत्वे मानाभावाच्चेति चेन्नसत्यम्। प्रत्ययवर्जिते दधि पश्येत्यादौ प्रत्ययमजानतोऽपि बोधात्प्रकृतेरेव वाचकत्वं कल्प्यते। लिङ्गानुशासनस्य प्रकृतेरेव दर्शनाच्चेति। अत एवैषु पक्षेषु न निर्बन्धः। प्रत्ययस्यैव वाचकताया युक्तत्वात्।

"द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः"।

इति वाक्यपदीयेऽपि पक्षद्वयस्य व्युत्पादनात्। शास्त्रे इति बहुषु स्थलेषु व्युत्पादनं व्यञ्जयितुम्। प्राधान्येन सरूपसूत्रादौ व्यक्तम्॥ १ ॥ (२५)

शब्दस्तावच्छाब्दबोधे भासते।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥

इत्याद्यानुभविकोक्तेः। "विष्णुमुच्चारय" इत्यादावर्थोच्चारणासंभवेन विना शब्दविषयं शाब्दबोधासंगतिश्चेति सोऽपि प्रातिपदिकार्थः। न च लक्षणया निर्वाहः। निरूढलक्षणायाः शक्त्यनतिरेकात्। "जबगडदशमुच्चारय" इत्यादौ शक्याग्रहेण शक्यसंबन्धरूपलक्षणाया अग्रहाच्च। अज्ञातायाश्च वृत्तेरनुपयोगात्। "गाङ्गमुच्चारय" इत्यादिभाषाशब्दानामनुकरणे साधुतासंप्रतिपत्तेस्तेषां शक्त्यभावेन परनये लक्षणाया असंभवाच्चेत्यभिप्रेत्य षोढाऽपि कश्चित्प्रातिपदिकार्थ इत्याह—

कृत्तिकाभ्यस्ते अस्मै" "अग्नयो द्रविणं दत्वा" इत्यादिदर्शनात् सन्देहे "सोऽग्नये म्रियस्व" इति वाक्यशेषादेकवचनान्तस्यैव ग्रहणं-

शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा ।
नो चेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थोऽत्र भासते ॥२॥
(२६)

यद्यनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थः । यदि न भेदविवक्षा तदा श्रोत्रादिभिरुपास्थितोऽप्यर्थवद्भासते । अपिर्हेतौ । उपास्थितत्वाद्भासत इत्यर्थः । अयं भावः—अनुकार्यानुकरणयोर्भेदेऽनुकार्यस्य पदानुपस्थितत्वात्तात्सिद्धये शक्तिरपेया । शब्दार्थयोरभेदे प्रत्यक्षे विषयस्य हेतुत्वात्स्वप्रत्यक्षरूपां पदजन्योपस्थितिमादाय शाब्दबोधविषयतोपपत्तिरिति । यद्यातिप्रसङ्गवारणाय वृत्तिजन्यपदोपस्थितिरेव हेतुस्तथाऽप्यत्राऽऽश्रयतया वृत्तिमत्त्वस्य सत्त्वान्नानुपपत्तिः । निरूपकताश्रयतान्यतरसंबन्धेन वृत्तिमत एव शाब्दबोधविषयत्वं कल्प्यत इत्यनवद्यम् । संबन्धस्योभयनिरूप्यत्वात्पदार्थस्येव तद्बोधकत्वेन स्वस्यापि ज्ञानसंभवाच्चेति ।

उक्तं च वाक्यपदीये—

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते ॥ इति ॥
विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते ।

इति चेति ॥ २ ॥ (२६)

प्रसङ्गादनुकार्यानुकरणयोरभेदपक्षे साधकमाह—

अत एव गवित्याह भूसत्तायामितीदृशम् ।
न प्रातिपदिकं नापि पदं साधु तु तत्स्मृतम् ॥३॥(२७)

मित्यादिविस्तरो बृहद्भूषणतोऽनुसन्धेय इत्याशयेनाह——*विस्तरेण प्रपञ्चितं भूषणे इति ॥ १-२-३ ॥ (२५-२६-२७)

"गवित्ययमाह" "भू सत्तायाम्" इत्येवमादयो यतोऽनुकरणशब्दा अनुकार्यांद्भिद्यन्तेऽतस्तेषामर्थवत्त्वाद्यभावात् "अर्थवद्धातुः" [पा० सू० १-२-४५] इत्याद्यप्रवृत्तौ न पदत्वं न वा प्रातिपदिकत्वम्, अथ च साधुत्वमित्युपपद्यते । अन्यथा "प्रत्ययः" [पा० सू० ३-१-१] "परश्च" । [पा० सू० ३-१-२] "अपदं न प्रयुञ्जीत" इति निषेधादिलङ्घनादसाधुतापत्तिरित्यर्थः ॥ ३ ॥ (२७)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे नामार्थनिर्णयः समाप्तः ॥

समासं विभजते—

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा ॥
सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः ॥ १ ॥ (२८)

सुपां सुपा, पदद्वयमपि सुबन्तम् । राजपुरुष इत्यादिः । सुपां तिङा । पूर्वपदं सुबन्तमुत्तरपदं तिङन्तम् । पर्यभूषत्, अनुव्यचलत् । "गतिमतोदात्तवता तिङाऽपि समासः" इति वार्तिकात्समासः । सुपां नाम्ना । कुम्भकार इत्यादिः । "उपपदमतिङ्" [पा० सू० २-२-१९] इति समासः । स च "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेः" इति परिभाषया भवति सुबुत्पत्तेः प्राक् । अत्रोत्तरपदं सुबुत्पत्तेः प्रागित्यर्थात् । अन्यथा चर्मक्रीतीत्यादौ नलोपानापत्तेः । सुपां धातुना । उत्तरपदं धातुमात्रं न सुप्तिङन्तम् । कटप्रूः, आयतस्तूः । "क्विब्वचिप्रच्छ्यायत

इति श्रीबलरामनामकवैयाकरणभूषणसारटीकायां नामार्थनिर्णयः समाप्तः ॥

तस्तुकटप्रुजुश्रीणां दीर्घश्च" इति वार्तिकात्। तिङां तिङा। पिबतखादता, पचतभृज्जतेत्यादिः। "आख्यातमाख्यातेन क्रियासातत्ये" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्। तिङां सुबन्तेन। पूर्वपदं तिङन्तमुत्तरं सुबन्तम्। जहिस्तम्बः। "जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्। अयं षड्विधोऽपि समासः "सह सुपा" [पा० सू० २–१–४] इत्यत्र योगविभागेन भाष्ये व्युत्पादितः स्पष्टः शब्दकौस्तुभादौ॥ १॥ (२८)

स्वयं भाष्यादिसिद्धं तद्भेदं व्युत्पाद्य प्राचीनवैयाकरणोक्तविभागस्याव्याप्त्यतिव्याप्त्यादिभिस्तल्लक्षणस्य प्रायिकत्वं च दर्शयति—

समासस्तु चतुर्धेति प्रायोवादस्तथा परः॥
योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च॥
भौतपूर्व्यात्सोऽपि रेखागवयादिवदास्थितः॥२॥२९

चतुर्धा, अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिभेदात्। अयं प्रायोवादः। भूतपूर्वः, इन्भूः, कारामूः, आयतस्तूः, वागर्थाविव इत्याद्यसंग्रहात्। तथा पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, उभयपदार्थप्रधानो द्वन्द्वः, अन्यपदार्थप्रधानो बहुव्रीहिः, इत्यादिलक्षणमपि प्रायिकम्। उन्मत्तगङ्गम्, सूपप्रति, अर्धपिप्पली, द्वित्राः, शशकुशपलाशमित्यादौ परस्परव्यभिचारात्। तथा हि—उन्मत्तगङ्गमित्यव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः। अन्यपदार्थप्राधान्याद्बहुव्रीहिलक्षणातिव्याप्तिश्च। "अन्यपदार्थे च संज्ञायाम्" [पा० सू० २–१–२१] इति समासात्। सूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात्तत्पुरुषलक्षणातिव्याप्तिरव्ययीभावाव्याप्तिश्च। "सुप्प्रतिना मात्रार्थे" [पा० सू० २–१–९] इति

समासः। अर्धपिप्पली इतितत्पुरुषे पूर्वपदार्थप्राधान्यसत्त्वादव्ययीभावातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च। "अर्धं नपुंसकम्" [पा० सू० २-२-२] इति समासात्। एवं पूर्वकाय इत्यादौ द्रष्टव्यम्। द्वित्रा इति बहुव्रीहावुभयपदार्थप्राधान्याद् द्वन्द्वातिव्याप्तिर्बहुव्रीह्यव्याप्तिश्च। शशकुशपलाशमित्यादिद्वन्द्वे समाहारान्यपदार्थप्राधान्याद्बहुव्रीह्यतिव्याप्तिर्द्वन्द्वाव्याप्तिश्च स्यादिति भावः। सिद्धान्ते त्वव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि द्रष्टव्यम्। *असंभवश्चैषामित्याह—औत्तपूर्व्यादित्यादि। रेखागवयादिनिष्ठलाङ्गूलादेर्वास्तवपशुलक्षणत्ववदेतेषामपि न समासलक्षणत्वम्। बोधकता तु *तद्वदेव स्यादिति भावः॥ २१॥ (२०...)

ननु पूर्वपदार्थप्राधान्यादि समासे सुवचम्। तथा हि—"समर्थः पदविधिः" [पा० सू० २-१-१] इति सूत्रे भाष्यकारैरनेकधोक्तेष्वपि पक्षेषु जहत्स्वार्थाजहत्स्वार्थपक्षयोरेवैकार्थीभावव्यपेक्षारूपयोः पर्यवसानं लभ्यते। तत्राजहत्स्वार्थपक्ष उक्तव्यवस्था *नासंभविनीत्याशङ्कां मनसिकृत्याऽऽह—

---

* असम्भव इति। समासे विशिष्टशक्तेरेव वक्ष्यमाणतया ततश्च पूर्वपदार्थोत्तरपदार्थादिभेदबुद्धेरभावेन पूर्वपदार्थप्रधानत्वादिलक्षणानामव्ययीभावादिसमासेषु न सम्भव इति भावः।

* तद्वदेवेति। रेखागवयादिनिष्ठलाङ्गूलादेर्वास्तवपशुस्वरूपपरिचायकत्वेन तद्बोधकत्ववद् वृत्तेः पूर्वं विग्रहवाक्यगतपूर्वपदार्थादिप्राधान्यमादाय तत्तद्वृत्तिपरिचायकत्वमुक्तलक्षणानां तत्तद्वृत्तिबोधकतेति भावः॥२१॥ (२८१)

* नासम्भविनीति। पूर्वपदार्थप्रधानत्वमव्ययीभावत्वमित्यादिपूर्वोक्तलक्षणव्यवस्थायास्तत्पक्षे वृत्ति घटकपूर्वोत्तरपदार्थयोः सत्त्वेन तदन्यतरस्य प्राधान्यसम्भव एवेत्यर्थः।

जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ॥३॥
भेदः संसर्ग उभयं वेति वाच्यव्यवस्थिते । (३०)

जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था। पदे वर्णवद् वृत्तौ पदानामानर्थक्यमित्यर्थः। अयं भावः—समासशक्त्यैव राजविशिष्टपुरुषमानसंभवे न राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यम्, वृषभयावकादिपदेषु वृषादिपदानामिव। *अन्यथा राजपदेन विग्रहवाक्ये इव राज्ञः स्वातन्त्र्येणोपस्थितिसत्त्वाद् ऋद्धस्य राज्ञः पुरुष इत्यत्रेव ऋद्धस्य राजपुरुष * इत्यस्याप्यापत्तेरिति।

अजहदिति। न जहति पदानि स्वार्थं यस्यां साऽजहत्स्वार्था। *अयमभिप्रायः–राजपुरुषादिसमासादौ नातिरिक्ता शक्तिः, कल्पकाभावात्, क्लृप्तराजादिपदादेवार्थोपस्थितिसंभवे तत्कल्पनस्य गौरवपराहतत्वाच्च। क्लृप्तशक्तित्यागोऽप्यप्रामाणिकः कल्प्येत। तथा चाऽऽकाङ्क्षादिवशात्क्लृप्तशक्त्यैव विशिष्टार्थबोधः। अयमेव

---

* अन्यथा। समासे विशिष्टशक्त्यस्वीकारे। व्यपेक्षासामर्थ्याङ्गमे इति यावत्। * इत्यस्याप्यापत्तेरिति। सिद्धान्ते तु वृत्तौ विशिष्टशक्तेः सत्त्वेन 'राजपुरुषः' इत्यतो विशिष्टस्यैव राजस्वत्ववत्पुरुषरूपार्थस्योपस्थितौ मुख्यविशेष्यतया राजन्रूपार्थस्यानुपस्थितेस्तत्र न ऋद्धादिविशेषणान्वयः 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन' इति व्युत्पत्तेः। एतद्बीजं तु (१८) कारिकाव्याख्यानावसरे पूर्वमेवोक्तम्।

ननु यत्र व्यस्तस्थलेऽर्थबोधाय तत्तत्पदनिष्ठया क्लृप्तशक्त्यैव समासेऽपि पदार्थोपस्थितौ आकाङ्क्षादिवशादन्वयबोधेनाभीप्सितार्थलाभो न तत्र विशिष्टशक्तिः कल्प्यते, किन्तु 'प्राप्तोदकः' इत्यादौ पदज्ञानक्रमेण पदार्थोपस्थितेः प्राप्तिकर्तृभिन्नमुदकमित्येवार्थबोध इति नाभीप्सितार्थलाभस्तत्रैव विशिष्टशक्तिः कल्प्यते इति मतमाह—* अयमभिप्राय इति।

व्यपेक्षापक्षो मतान्तरत्वेन भाष्यकारैरुक्तः। न चात्र मते समासे ऋद्धस्येतिविशेषणान्वयापत्तिः। "सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो न" इति वार्तिकात्। तथा चैतन्मतवादिनां पूर्वोत्तरपदार्थसत्त्वात्पूर्वपदार्थप्रधान इत्यादिव्यवस्था सूपपादेति भावः।

प्रसङ्गाद् वृत्तिभेदमपि निरूपयति—ते पुनरिति। द्वे अपि वृत्ती त्रिविधे वाच्यत्रैविध्यात्। वाच्यमेवाऽऽह—भेद इत्यादि। भेदोऽन्योऽन्याभावः। तथा च राजपुरुष इत्यादाव*राजकीयभिन्न इति बोधः। अस्यावाच्यत्वे च राजपुरुषः सुन्दर इतिवद्राजपुरुषो *देवदत्तस्य चेत्यपि स्यात्। *वाच्यत्वे *तद्विरोधान्नैवं प्रयोग इति भावः।

राजसंबन्धवानित्येव शाब्दभानं, भेदस्तूचरकालमुपतिष्ठत इत्याशयेनाऽऽह—संसर्ग इति।

*विनिगमनाविरहम*स्वामिकेऽपि राजपुरुष इत्यादिप्रयोगापत्तिं च मनसिकृत्वोभयं वाच्यमित्याह—उभयं वेति। तथा चाराजकीयभिन्नराजसंबन्धवांश्चायमिति बोधः॥ ३१॥ (३०१)

---

*अराजकीयभिन्न इति। राजेतरनिरूपितस्वत्वसम्बन्धवद्भिन्न इत्यर्थः। *देवदत्तस्येति। सुन्दरादिविशेषणान्तरान्वयवद् 'देवदत्तस्य' इति विशेषणान्वयः स्यात्। *वाच्यत्वे इति। 'भेदस्य' इत्यादिः। *तद्विरोधादिति। 'राजपुरुष'इत्यतः प्रतीयमाने राजेतरदेवदत्तादिस्वत्वाभाववति पुरुषे 'देवदत्तस्य'इतिविशेषणान्वये देवदत्तस्वत्ववत्त्वस्य प्रत्यय इति अभावप्रतियोगिनोः सामानाधिकरण्यविरोधादित्यर्थः।

*विनिगमनाविरहमिति। अस्य 'अन्यतरस्य वाच्यत्वे' इत्यादिः। *अस्वामिकेऽपीति। अस्य 'राजेतरदेवदत्तादिस्वत्वाभावस्यात्र सत्त्वेन' इति शेषः॥ ३१॥ (३०१)

व्यपेक्षावादस्यैव युक्तिभाष्यविरुद्धत्वात्तन्मूलकः पूर्वपदार्थप्रधान इत्याद्युत्सर्गोऽप्ययुक्तः। किं तु रेखागवयेनोत्सर्गोऽपि परम्परयैव बोधक इत्याशयेन समाधत्ते—

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ॥४॥(३१)
बहूनां वृत्तिधर्माणां वचनैरेव साधने ॥
स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः ॥५॥
(३२)

समास इति वृत्तिमात्रोपलक्षणम्। "समर्थः पदविधिः" [पा० सू० २–१–१] इत्यत्र पदमुद्दिश्य यो विधीयते समासादिः स समर्थः, विग्रहवाक्याभिधाने शक्तः सन् साधुरिति सूत्रार्थस्य भाष्यालाभात्। *पदोद्देश्यकविधित्वं च कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिष्वस्त्येव। शक्त्यस्वीकर्तृणां व्यपेक्षावादिनां मते दूषणं शक्तिसाधकमेवेत्याशयेनाऽऽह—पङ्कजशब्दवदिति। पङ्कजनिकर्तुरपि योगादेवोपस्थितौ *तत्रापि समुदायशक्तिर्न सिध्येत्। न च पद्मत्वरूपेणोपस्थितये तत्कल्प्यत इति वाच्यम्। चित्रगवादिपदेऽपि स्वामित्वेनोपस्थितये *तत्कल्पनावश्यकत्वात्। लक्षणयैव तथोपस्थितिरिति चेत्पङ्कजपदेऽपि *सा सुवचा। *एवं *रथकारपदेऽपि। तथा च "वर्षासु रथकारोऽग्नि-

---

* पदोद्देश्यकविधित्वमिति। पदसंज्ञाप्रयोजकसुप्तिङन्यतरविधायकशास्त्रीयोद्देश्यतावच्छेदकसम्पादकविधित्वमित्यर्थः। * तत्रापि—पङ्कजपदेऽपि। * तत्कल्पनेति। समुदायशक्तिकल्पनेत्यर्थः। * सा—लक्षणा। * एवम्—विशिष्टशक्त्यनभ्युपगमे। * रथकारपदेऽपीति। 'समुदायशक्तिर्न सिध्येत्' इत्यनुषङ्गेणान्-

माद्धीत" इत्यत्रापि *विना लक्षणां क्लृप्तयोगेन ब्राह्मणादिविषयतयैवोपपत्तौ *तत्कल्पनां कृत्वा *जातिविशेषस्याधिकारित्वं प्रकल्प्या*पूर्वविद्याकल्पनमप्ययुक्तं स्यादिति भावः ।

साधकान्तरमाह—बहूनामिति । वृत्तेर्धर्मा विशेषणलिङ्गसंख्याद्ययोगादयस्तेषां वचनैः साधने गौरवमित्यर्थः । अयं भावः—विशिष्टशक्त्यस्वीकारे 'राज्ञः पुरुषः' इत्यत्रेव 'राजपुरुषः' इत्यत्रापि स्याद्विशेषणाद्यन्वयः राजपदेन स्वतन्त्रोपस्थितिसत्त्वात् । विभाषावचनं च *समासनियमवारणाय कार्यम् ।

ननु "सविशेषणानाम्" इति वचनान्न विशेषणाद्यन्वयः । विभाषावचनं च कृतमेवेत्याशङ्कां समाधत्ते—वचनैरेवेति । न्यायसिद्धमेव सूत्रम् । व्यपेक्षाविवक्षायां वाक्यस्यैकार्थीभावे समासस्येति स्वभावत एव प्रयोगनियमसंभवात् । सविशेषणेत्यपि विशिष्टशक्तौ

सम्बध्यते । *विना लक्षणामिति । रथकारपदस्य 'रथं करोति' इति योगमात्रेण द्विजपरकत्वस्यापि सम्भवात् तस्य चाधाने कर्तृत्वेनान्वयसम्भवेन लक्षणाबीजस्य मीमांसकीयाऽन्वयानुपपत्तिरूपस्याभावात् लक्षणाया अभावे इति तदर्थः । * तत्कल्पनाम् । रूढिशक्तिकल्पनाम् । * जातिविशेषस्य—

रथकारस्तु माहिष्यात् करण्यां यस्य सम्भवः ।

इति स्मृत्युक्तप्रतिलोमजातीयस्येत्यर्थः । * अपूर्वविद्याकल्पनमिति । रथकाराधिकरणे हि रथकारपदस्य योगरूढत्वेन (विशिष्टशक्तिमत्त्वेन) न ब्राह्मणादिविषयकत्वं "वर्षासु रथकारोऽग्निमादधीत" इति विधेः किन्तु प्रतिलोमजातीयविषयकत्वम् । तस्य च वेदाध्ययनाभावाद्वेदविहिताधानाधिकाराऽन्यथाऽनुपपत्त्या तावन्मात्रोपयोगिवेदभागाध्ययनं कल्पनीयमिति मीमांसकैः सिद्धान्तितम् । तस्मान्न पक्षेऽयुक्तमित्यर्थः ।

* समासनियमवारणायेति । समासस्य नित्यत्ववारणायेत्यर्थः ।

राज्ञः पदार्थैकदेशतयाऽन्वयासंभवान्न्यायसिद्धमिति भावः । *अत एव व्यपेक्षापक्षमुद्भाव्य "अथैतस्मिन् व्यपेक्षायां सामर्थ्यें योऽसावेकार्थीभावकृतो विशेषः *स वक्तव्यः" इति भाष्यकारेण दूषणमप्युक्तम् ॥ ५ ॥ (३२)

तथा धवखदिरौ निष्कौशाम्बिः गोरथो घृतघटो गुडधानाः केशचूडः सुवर्णालङ्कारो द्विदशाः सप्तपर्ण इत्यादावितरेतरयोग-अतिक्रान्त-युक्त-पूर्ण-मिश्र-संघात-विकार-सुप्प्रत्ययलोपो वीप्साद्यर्थो वाचनिको वाच्य इत्यतिगौरवं स्यादिति दूषणान्तरमाह—

***चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम् ।**
कर्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः ॥६॥
(३३)

आदिना घनश्यामः, हंसगमनः, इत्यादाविवादीनां च संग्रहः। दूषणान्तरमाह—बहुव्युत्पत्तिभञ्जनमिति । अयमाशयः—चित्रगुरित्यत्र स्वाम्यादिप्रतीतिरनुभवसिद्धा । न च *तत्र लक्षणा । प्रासादको ग्राम इत्यादौ *तदसंभवात् ।* प्राप्तिकर्त्रभिन्नमुदकमित्या-

तेन "राज्ञः पुरुषः" इत्यादिव्यस्तप्रयोगोपपत्तिः । * अत एवेति । व्यपेक्षापक्षस्य गौरवपराहतत्वादेवेत्यर्थः । * स वक्तव्य इति । वाचनिक एव वक्तव्यः स्यात् । एकार्थीभावे तु सोऽर्थसिद्ध इति तदर्थः ॥ ५ ॥ (३२)

* चकारादिनिषेध इति । विशिष्टशक्त्यस्वीकारे धवखदिरावित्यादावितरेतरयोगादीनां प्रतीतये तद्वाचकचकारादीनामावश्यकतया तेषामृते लोपात् समासे श्रवणाभावाऽनुपपत्त्या चकारादीनां निषेधो—लोपो वक्तव्यः स्यादित्यर्थः । * तत्र—स्वामिनि । पदद्वयस्येति शेषः । * तदसंभवादिति । पदद्वयलक्षणयाऽप्यभीप्सितार्थबोधानिर्वाहादिति भावः । तदेव विशदयति—* प्राप्तीति ।

दिबोधोत्तरं तत्संबन्धिग्रामलक्षणायामप्युदककर्तृकप्राप्तिकर्म ग्राम इत्यर्थालाभात्। प्राप्तेतिक्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणेति चेत् तर्हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नप्राप्तिकर्मेति स्यात्। *अन्यथा *समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तेः। प्राप्तेर्धात्वर्थतया कर्तृतासंबन्धेन भेदेनोदकस्य तत्रा*न्वयासंभवाच्च। अन्यथा 'देवदत्तः पच्यते' इत्यतः कर्तृतासंबन्धेन देवदत्तस्यान्वयसंभवेनानन्वयानापत्तेः। अथोदकाभिन्नकर्तृका प्राप्तिरिति बोधोत्तरं तत्संबन्धिग्रामो लक्ष्यत इति चेन्न। प्राप्तेर्धात्वर्थतया क्तार्थकर्तरि विशेष्यताया असंभवात्। "प्रकृतिप्रत्यययोः प्रत्ययार्थप्राधान्यम्" इति व्युत्पत्तेः। प्राप्तपदे प्राप्तेर्विशेष्यत्वे तस्या एव नामार्थत्वेनोदकेन सममभेदान्वयापत्तेश्च। एवमूढरथः, उपहृतपशुः, उद्धृतौदना, बहुपाचिकेत्यादावपि द्रष्टव्यम्। अत्र हि रथकर्मकवहनकर्ता, पशुकर्मकोपहरणोद्देश्यः, ओदनकर्मकोद्धरणावधिः, बहुपाककर्त्रधिकरणम्, इति बोधाभ्युपगमात्। अतिरिक्तवृत्तिपक्षे च घटत्वविशिष्टे घटस्येवोदककर्तृकप्राप्तिकर्मत्वविशिष्टे प्राप्तोदक इत्यादिसमुदायशक्त्यैव निर्वाह इति भावः॥ ६॥ (३३)

अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना।
क्लृप्तत्यागश्चास्ति तव तत्किं शक्तिं न कल्पयेः॥७॥
(३४)

अयं भावः—चित्रगुरित्यादिषु चित्रगोः स्वाम्यादिप्रतीतिर्न

---

* अन्यथा—अभेदेन तयोरन्वयानङ्गीकारे। * समानाधिकरणेति। समानविभक्त्यन्तेत्यर्थः। * अन्वयासम्भवादिति। भेदसम्बन्धेन नामार्थनिष्ठप्रकारतानिरूपितधात्वर्थनिष्ठविशेष्यतया शाब्दबोधे प्रातिपदिकप्रकृतिकविभक्तिपदजन्योपस्थितेः कारणत्वेनात्र विभक्त्यर्थमन्तरा तादृशान्वयासम्भवादित्यर्थः॥ ६॥ (३३)

विना शक्तिमुपपद्यते । न च *तत्र लक्षणा । सा हि न चित्रपदे । चित्रस्वामी गौरितिबोधापत्तेः । नापि गोपदे । गोः स्वामी चित्र इत्यन्वयबोधापत्तेः । चित्रादिमात्रस्य लक्ष्यैकदेशत्वेन तत्र गवादेरन्वयायोगात् । न च चित्राभिन्ना गौरिति शक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृशगोस्वामी गोपदेन लक्ष्यत इति वाच्यम् । गोपदस्य चित्रपदस्य वा विनिगमनाविरहेण लक्षकत्वासंभवात् । न च गोपदे साक्षात्संबन्ध एव विनिगमक इति वाच्यम् । *एवमपि प्राप्तोदकः कृतविश्व इत्याद्यषष्ठ्यर्थबहुव्रीहौ विनिगमकाप्राप्तेः । यौगिकानां कर्त्रर्थकतया साक्षात्संबन्धाविशेषात् ।

न च पदद्वये लक्षणेति नैयायिकोक्तं युक्तम् । बोधावृत्तिप्रसङ्गात् । न च परस्परं तात्पर्यग्राहकत्वादेकस्यैवैकदा लक्षणा न द्वयोरिति न बोधावृत्तिरिति वाच्यम् । एवमपि विनिगमनाविरहतादवस्थ्येन लक्षणाया असंभवात् । न च चरमपद एव सा प्रत्ययार्थान्वयानुरोधात्, प्रत्ययानां संनिहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरिति वाच्यम् । एवं हि बहुव्रीह्यसंभवापत्तेः । अनेकमन्यपदार्थे." [पा० सू० २–२–४] इत्यनेनानेकसुबन्तानामन्यपदार्थप्रतिपादकत्वे * तद्विधानात् ।

किं चैवं सति घटादिपदेष्वपि चरमवर्ण एव वाचकताकल्पना स्यात् । पूर्वपूर्ववर्णानां तात्पर्यग्राहकत्वेनोपयोगसंभवात् । एवं सति चरमवर्णमात्रश्रवणेऽर्थबोधापत्तिरिति चेदत्राप्युदकपदमात्रश्रवणादर्थप्रत्ययापत्तिस्तुल्येत्यन्यत्र विस्तरः । एवं चाषष्ठ्यर्थबहुव्रीहौ व्युत्प-

---

* तत्र—सप्तम्यर्थे । 'समुदायघटकपूर्वोत्तरपदयोः' इति शेषः । * एवम्—उत्तरपदमात्रस्य लक्षकत्वे । * तद्विधानादिति ।

त्यन्तरकल्पना, * उक्तयुक्तेः, अगत्या शक्त्यन्तरकल्पना। क्लृप्तत्यागः, क्लृप्तशक्त्योपपत्तिरिति *व्युत्पत्तित्यागश्च तत्रास्ति, तत्किं सर्वत्र समासे शक्तिं न कल्पयेरिति वाक्यार्थः।

यत्तु व्यपेक्षावादिनो नैयायिकमीमांसकादयः—न समासे शक्तिः। राजपुरुष इत्यादौ राजपदादेः संबन्धिलक्षणयैव राजसंबन्ध्यभिन्नः पुरुष इति बोधोपपत्तेः। अत एव राज्ञः पदार्थैकदेशतया न तत्र शोभनस्येत्यादिविशेषणान्वयः। न वा घनश्यामो निष्कौशाम्बिर्गोरथ इत्यादाविवादिप्रयोगापत्तिः। उक्तार्थतयैवक्रान्तादिपदप्रयोगासंभवात्। न वा "विभाषा" [पा० सू० २-१-११] इतिसूत्रावश्यकत्वम्। लक्षणया राजसंबन्ध्यभिन्न इति बुबोधयिषायां समासस्य राजसंबन्धवानिति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगनियमसंभवात्। * नापि पङ्कजपदप्रतिबन्दी शक्तिसाधिका। तत्रावयवशक्तिमज्ञानतोऽपि बोधात्। न च—शक्त्यग्रहे लक्षणया तेभ्यो विशिष्टार्थप्रत्ययः संभवति। अत एव राजादिपदशक्त्यग्रहे 'राजपुरुषः' 'चित्रगुः' इत्यादौ न बोधः। नापि चित्रगुरित्यादौ लक्षणासंभवेऽप्यषष्ठ्यर्थबहुव्रीहौ लक्षणाया असंभवः। बहुव्युत्पत्तिभञ्जनापत्तेरिति वाच्यम्। प्राप्तोदक इत्यादावुदकपद एव लक्षणास्वीकारात्। पूर्वपदस्य यौगिकत्वेन तल्लक्षणया धातुप्रत्ययतदर्थज्ञानसाध्यतया

अस्य 'प्रकृते चोत्तरपदस्यैवान्यपदार्थप्रतिपादकत्वेन तदप्राप्तेः' इति शेषः। * उक्तयुक्तेरिति। प्राप्तोदकादावन्वयानुपपत्तिरूपयुक्तेरित्यर्थः। * व्युत्पत्तित्याग इति। "प्रकृतिप्रत्यययोः प्रत्ययार्थप्राधान्यम्" इति व्युत्पत्तित्याग इत्यर्थः। तथा च पूर्वोक्तेन 'अयोदकाभिन्नकर्तृका प्राप्तिः' इत्यादिमूलस्थप्रकारेण तत्राभीप्सितार्थबोधोपपत्तिरिति भावः।

पङ्कजदृष्टान्ते वैषम्यं दर्शयति— * नापीति।

विलम्बितत्वात् । प्रत्ययानां संनिहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोधाच्च । घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यते विशिष्टस्यैव सङ्केतितत्वात् । बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्वात् । प्रकृते चात्यन्तसंनिधानेन प्रत्ययार्थान्वयसौलभ्यायोत्तरपद एव सा कल्प्यत इति विशेषः । स्वीकृतं च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकंमन्यैरित्याहुः ।

अत्रोच्यते—समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यात् । अर्थवत्त्वालाभेन "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" [पा० सू० १–२–४५] इत्यस्याप्रवृत्तेः । न च "कृत्तद्धितसमासाश्च" [पा० सू० १–२–४६] इत्यत्र समासग्रहणात्सा । तस्य नियमार्थताया भाष्यसिद्धाया वैयाकरणभूषणे स्पष्टं प्रतिपादितत्वात् । समासवाक्ये शक्त्यभावेन शक्यसंबन्धरूपलक्षणाया अप्यसंभवेन लाक्षणिकार्थवत्त्वस्याप्यसंभवात् । अथ "तिप्तस्" इत्यारभ्य "ङ्योस्सुप्" इति तिप्प्रत्याहारो भाष्यसिद्धः । तमादाय "अतिप्प्रातिपदिकम्" इत्येव सूत्र्यताम्, कृतमर्थवदादिसूत्रद्वयेन, समासग्रहणं च नियमार्थमस्तु, तथा च अतिप्—तिबन्तभिन्नं प्रातिपदिकमित्यर्थात्समासस्यापि सा स्यादिति चेत्तथाऽपि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्त्वावश्यकत्वेन समासाख्यातितादवस्थ्यमेव । तथा च प्रातिपदिकसंज्ञारूपं कार्यमेवार्थवत्त्वमनुमापयति धूम इव वन्हिम् । किं चैवं चित्रगुमानयेत्यादौ कर्मत्वाद्यनन्वयापत्तिः । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः । विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात् ।

यत्तु संनिहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरेव कल्प्यत इति, तन्न । 'उपकुम्भम्' 'अर्धपिप्पली' इत्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात् । न च तत्रापि संनिधानमेव । आनुशासनिकसंनिध-

विवक्षितत्वात्। तथा च यत्पदोत्तरं याऽनुशिष्टा सा तदर्थगतं स्वार्थं बोधयति। समासे च समस्यमानपदोत्तरमेवानुशासनमिति वाच्यम्। अर्थवत्सूत्रेण विशिष्टस्यैव प्रातिपदिकत्वेन विशिष्टोत्तरमेव विभक्त्यनुशासनात्।

अथ प्रकृतित्वाश्रये विभक्त्यर्थान्वय इत्येव कल्प्यत इति चेत्तर्हि 'पङ्कजमानय' 'दण्डिनं पश्य' 'शूलिनं पूजय' इत्यादौ पङ्कदण्ड-शूलेष्वानयनदर्शनपूजनादेरन्वयप्रसङ्गः। 'अघटानानय' इत्यत्र घटेऽप्यानयनान्वयापत्तेश्च। न च दण्डादीनां विशेषणतया न तत्राऽऽनयनाद्यन्वयः। 'पाकान्नीलः' 'धर्मात्सुखी' इत्यादौ पाकधर्मा-दिजन्यताया रूपसुखादावनन्वयप्रसङ्गात्। यच्च प्रकृत्यर्थत्वं तज्जन्य-ज्ञानविषयत्वमात्रं तच्चात्राविरुद्धमिति, तन्न। घटं पश्येत्यत्र घट-पदात्समवायेनोपस्थिताकाशवारणाय वृत्त्या प्रकृत्यर्थत्वस्याऽऽवश्य-कत्वात्। अथ प्रत्ययप्राग्वर्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थ-त्वमिति चेन्न। गामानयति कृष्णो दण्डेनेत्यत्र कृष्णे तृतीयार्थान्वय-प्रसङ्गात्। अथ समस्यमानपदार्थगतस्वार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यत इति चेन्न। अक्लृप्तकल्पनां क्लृप्तव्युत्पत्तित्यागं चापेक्ष्य समुदायशक्तिकल्पनस्यैव युक्तत्वादिति दिक्।

अपि च समासे विशिष्टशक्त्यस्वीकारे 'राजपुरुषः' 'चित्रगुः' 'नीलोत्पलम्' इत्यादौ सर्वत्रानन्वयप्रसङ्गः। राजपदादेः संबन्धि-नि लक्षणायामपि 'तण्डुलः पचति' इत्यादौ कर्मत्वादिसंसर्गेण तण्डुलादेः पाकादावन्वयवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुताया आवश्यकत्वात्पुरुषादेस्तथात्वाभावात्। 'तण्डुलः शुभ्रः' इत्यादौ च प्रातिपदिकार्थकप्रथमार्थे तण्डुलादे-स्तस्य च शुक्लेऽभेदेनैवान्वयः। "शुभ्रेण तण्डुलेन" इत्यादौ च विशेषणविभक्तिरभेदार्था, पार्ष्णिको वाऽन्वय इति नातिप्रसङ्गः।

तथा च समासे परस्परमन्वयासंभवादावश्यिकैव समुदायस्य तादृशे विशिष्टार्थे शक्तिः ।

किं च राजपुरुष इत्यादेः संबन्धिनि संबन्धे वा लक्षणा ? । नाऽऽद्यः । राज्ञः पुरुष इतिविवरणविरोधात्समाससमानार्थकवाक्यस्यैव विग्रहत्वात् । अन्यथा तस्माच्छक्तिनिर्णयो न स्यात् । नान्त्यः । राजसंबन्धरूपः पुरुष इति बोधप्रसङ्गात् । विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपञ्चितं वैयाकरणभूषणे । अत एव "वषट्कर्तुः प्रथमभक्षः" इत्यत्र न भक्षमुद्दिश्य प्राथम्यविधानं युक्तमेकप्रसरत्वभङ्गापत्तेरिति* तृतीये । "त्र्यङ्गैः स्विष्टकृतं यजति" इत्यत्राङ्गानुवादेन त्रित्वविधानं न युक्तम् । एकप्रसरताभङ्गापत्तेरिति *दशमे च निरूपितं संगच्छते । संगच्छते चारुणाधिकरणारम्भः । अन्यथा "अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति" इत्यत्रारुणपदवदितरयोरप्येकाब्दत्वादिगुणमात्रवाचकतयाऽमूर्तत्वात्क्रीणातौ करणत्वासंभवस्य तुल्यत्वादारुण्यस्यैव वाक्यभेदशङ्काया *असंभवादिति प्रपञ्चितं भूषणे । तस्मात्समासशक्तिपक्षो जैमिनीयैरवश्याभ्युपेय इत्यास्तां विस्तरः ॥ ७ ॥ (३४)

राजपुरुष इत्यादौ राजा चासौ पुरुषश्चेत्येव विग्रहः । चित्रगुरित्यादौ च चित्राणां गवामयमित्येव, समानार्थत्वानुरोधात् । यद्यपि प्रथमान्तानामेव बहुव्रीहिरिति "शेषो बहुव्रीहिः" [पा०

---

* तृतीये इति । अस्य 'अध्याये पञ्चमपादे दशमाधिकरणे' इति शेषः । * दशमे इति । अस्य 'अध्याये सप्तमपादे तृतीयाधिकरणे' इति शेषः । * असंभवादिति । अयं चास्मत्कृतलघुपूर्वमीमांसाधिकरणकौमुदीस्थ परिशिष्टप्रकरणेऽरुणाधिकरणे एव शङ्कामुखेन निरूपित इति तत एवावगन्तव्यम् ॥ ७ ॥ (३४)

सू० २-२-२३] इति सूत्राल्लभ्यंत * इति प्रथमान्तं पक्षे वाक्यं चित्रा गावो यस्येत्येवं संभवत्येव, "षष्ठी" [पा० सू० २-२-९] इति समासविधानाद्राज्ञः पुरुष इति पक्षे वाक्यं, तथाऽपि तस्य न विग्रहत्वं भिन्नार्थत्वात्, किं तूक्तस्यैवेति मीमांसकाः । तान्प्रसङ्गान्निरस्यति—

आख्यातं तद्धितकृतोर्यत्किंचिदुपदर्शकम् ।
गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः ॥८॥ (३५)

तद्धितकृतोर्यत्किंचिदर्थबोधकं विवरणम् *आख्यातं, तत्र विपर्ययो दृष्टः। तथा हि-"आक्षिकः" "कुम्भकारः" इत्यत्राक्षकरणकव्यापाराश्रयः, कुम्भानुकूलव्यापाराश्रय इति बोधः । 'अक्षैर्दीव्यति' 'कुम्भं करोति' इत्यत्राक्षकरणिका देवनानुकूला भावना, कुम्भोत्पत्त्यनुकूला भावनेति बोधः कृत्प्रत्यये कारकाणामाख्याते भावनायाः प्राधान्यं वदतो मीमांसकस्यापीति गुणप्रधानभावांशव्यत्यासो न विवरणत्वबाधक इति नात्र पाक्षिकस्य 'चित्रा गावो यस्य' इत्यादेर्विग्रहत्वे बाधकमस्तीति भावः ॥ ८ ॥ (३५)

नन्वस्तूक्तरीत्या सर्वत्र समासे शक्तिः, अस्तु च तथा विग्रहस्तथाऽपि षष्ठीतत्पुरुषकर्मधारययोः शक्तिमत्त्वाविशेषात् *निषादस्थपत्यधिकरणसिद्धान्तसिद्धिर्न स्यादित्यत आह—

---

* लभ्यते इति । निरूपितं चैतत् शब्देन्दुशेखरप्रदीपके ऽस्मत्कृतबहुव्रीहिप्रकरणटिप्पणे इति तत एवावगन्तव्यम् । *आख्यातम्—तिङन्तम् ॥ ८ ॥ (३५)

* निषादस्थपत्यधिकरणेति । "वास्तुमयं रौद्रं चरुं निर्वपेत्" इति प्रकृत्य श्रूयते "एतया निषादस्थपतिं याजयेत्" इति । वास्तुशब्दः किञ्चित्प्रकृतिद्रव्यविशेषमाह । एतस्यामिष्टावधिकारी स्थपति-

पर्यवस्यच्छाब्दबोधाददूरप्राक्क्षणस्थितेः ॥
शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम् ॥९॥ (३६)

पर्यवस्यंश्चासौ शाब्दबोधश्च तस्माददूरश्चासौ प्राक्क्षणश्च *तदानींतनलाघवमादायाधिकरणाविरोध इत्यर्थः। अयं भावः—निषादस्थपतिपदं समासशक्तिपक्षे *निषादरूपे *निषादानां च स्थपतौ *निषादस्वामिके पुरुषान्तरे चेत्येवं सर्वत्र शक्तत्वान्नानार्थकम्। तथा

शब्दवाच्यस्त्रैवर्णिकः। कुतः ? निषादानां स्थपतिः—अधिपतिः इति षष्ठीसमासस्य त्रैवर्णिके सम्भवात्, तस्य चाधीतवेदत्वेन विद्यासम्भवाच्च इति चेत्—

मैवम्। 'निषादश्चासौ स्थपतिश्च' इति कर्मधारयसमासस्य मुख्यत्वेन संकरजातिविशेषस्यैवाधिकारात्। षष्ठीसमासे तु संकीर्णजातिविशेषवाचिना निषादशब्देन तत्सम्बन्ध उपलक्ष्येत, नत्वयं कर्मधारये दोषोऽस्ति। अतस्तात्कालिकाचार्योपदेशादिना विद्यां सम्पाद्य धनिको निषादो रौद्रयागं कुर्यादिति "निषादः स्याच्छब्दसामर्थ्यात्" [जै० सू० ६-१-१३-५२] 'निषादाभिन्नः स्थपतिरेव निषादस्थपतिशब्दबोध्यः। अन्तरङ्गत्वेन तथाविधेऽर्थे शीघ्रोपस्थितिजनकत्वानुकूलशक्तिमत्त्वसामर्थ्यात्' इत्यर्थकसूत्रव्याख्याने मीमांसकैः सिद्धान्तितम्। विशिष्टशक्तिपक्षे तूभयोरपि समासयोः शक्तिमत्त्वाविशेषात् 'निषादशब्दस्य तत्सम्बन्धोपलक्षकतापरया कर्मधारयेण निषादस्यैव तदधिकारावगतेस्तद्विध्यन्यथाऽनुपपत्त्या तावन्मात्रोपयोगिवेदाध्ययनकल्पना।' इति सिद्धान्तोऽसङ्गतः स्यादित्यर्थः।

* तदानींतनेति। तादृशवाक्यजन्यशाब्दबोधाव्यवहितप्राक्तनवृत्तिशक्तिग्रहनिष्ठान्तरङ्गबहिरङ्गभावचिन्तनप्रयुक्तलाघवमादायेत्यर्थः। * निषादरूपे—संकरजातिविशेषरूपे। अस्य 'स्थपतौ' इत्यनेनान्वयः। इदं च कर्मधारयसमासे। तत्पुरुषे त्वाह—* निषादानामिति। तज्जातीयानां स्थपतौ—स्वामिनि अन्यजातीये इत्यर्थः। * निषादस्वामिके इति। 'निषादः स्थपतिः—अधि-

च *"नानार्थे तात्पर्याद्विशेषावगतिः" इति न्यायेन *तत्कल्पनायां पदद्वये *पूर्वोपस्थितार्थे एवोपस्थित्यादिलाघवात् * तत् कल्प्यत इति । परेषामपि सति तात्पर्ये *"यष्टीः प्रवेशय"इतिवल्लक्षणाया दुर्वारत्वात्तात्पर्यमेव कल्प्यकोटावशिष्यत इति दिक् ॥९॥ (३६)

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे समासशक्ति-
निरूपणं समाप्तम् ।

शक्तिप्रसङ्गात्तस्याः स्वरूपमाह—

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा ॥१॥
(३७)

इन्द्रियाणां—चक्षुरादीनां स्वविषयेषु—चाक्षुषेषु घटादिषु यथाऽनादिर्योग्यता—तदीयचाक्षुषादिकारणता, तथा शब्दानाम-

---

पतिर्यस्य' इति बहुव्रीहिस्वीकारे तत्स्वामिकपुरुषान्तरस्यापि प्रतीतिरिति तत्तत्समासस्वीकारेण तदेव पदं नानार्थकं भवतीति भावः । * नानार्थे—अस्य 'क तात्पर्यमिति सन्देहे सति' इति शेषः । * तत्कल्पनायाम्—तात्पर्यकल्पनायाम् । * पूर्वोपस्थितार्थे एवेति । समासतः पूर्वं तद्बोधकविग्रहवाक्यघटकपदजन्योपस्थितार्थे एवेत्यर्थः । * तत्—तात्पर्यम् । * यष्टीः प्रवेशयेतिवदिति । तत्र यथा मुख्येऽन्वयानुपपत्त्यभावेऽपि तात्पर्यानुपपत्त्या यष्टिधरे लक्षणा तथा प्रकृतेऽन्वयानुपपत्त्यभावेऽपि षष्ठीतत्पुरुषाद्यर्थे तात्पर्यानुपपत्त्या लक्षणा दुर्वारेत्यर्थः ॥ ९ ॥ (३६)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां समासशक्ति-
निर्णयः समाप्तः ॥

प्यर्थैः सह तद्बोधकारणतैव योग्यता, *सैव शक्तिरित्यर्थः। ननु न बोध कारणत्वमनादिमूतं शक्तिः, * आधुनिकदेवदत्तादिपदे * तदभावात्, *अन्यथा पित्रादिसङ्केताज्ञानेऽप्यन्वयबोधप्रसङ्गः;*लाक्षणिकातिव्याप्तेश्चेति *सङ्केतज्ञानमपि हेतुर्वाच्यम्। तथा चाऽऽवश्यकत्वात् * स एव शक्तिरस्तु, स चाऽऽधुनिके पित्रादेर्गवादौ चेश्वरस्येति चेत्—अत्रोच्यते। सङ्केतो न *स्वरूपेण हेतुः। * अगृहीतशक्तिकादर्थबोधप्रसङ्गात्। नापि * सामान्यतो ज्ञातः। प्रमेयत्वादिना तज्ज्ञानेऽपि बोधप्रसङ्गात्। नापि सङ्केतत्वेन तज्ज्ञानं हेतुः। गवादिपदेष्वीश्वरादेः सङ्केतत्वेन * तज्ज्ञानशून्यानां * लौकिकमीमांसकादीनां

---

* सैव शक्तिरिति। बोधजनकतारूपैव शक्तिरित्यर्थः। * आधुनिकेति। आधुनिकसङ्केतितेत्यर्थः। * तदभावादिति। अनादिशक्तेरभावात्। तथा च ततः शाब्दबोधो न स्यादिति भावः। * अन्यथा—आधुनिकसंकेतितेऽप्यनादिशक्तिसत्त्वे। संकेतस्य आधुनिकत्वेऽपि तच्छब्दस्य नित्यत्वेन तत्र शक्तेरप्यनादित्वमस्त्येवेति तात्पर्यम्। * लाक्षणिकेति। लाक्षणिकगङ्गादिपदानामपि तीरादिबोधजनकत्वेन तत्राप्यनादिशक्तिमत्त्वापत्तिरित्यर्थः।

* सङ्केतज्ञानमिति। तथा च आधुनिकदेवदत्तादिपदेऽनादिशक्तेः सत्त्वेऽपि पित्रादिकृतसंकेतस्याज्ञाने न ततः शाब्दबोधापत्तिः, गङ्गादिपदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यताकत्वमीश्वरेच्छाया नोपेयते, किन्तु शुद्धविषयत्वेनैव। तथा च तत्पदजन्यबोधविषयत्वत्वावच्छिन्नप्रकारतानिरूपिततद्विशेष्यताकसंकेतज्ञानस्यैव बोधकारणत्वाभ्युपगमेन लाक्षणिके तथाविधसंकेतज्ञानाभावेन बोधाभावात्‌ तज्जनकतारूपशक्तिमत्त्वसम्भव इति भावः।

* स एव—संकेत एव। * स्वरूपेण—संकेतत्वेन। * अगृहीतशक्तिकात्—अज्ञातसंकेतात्। * सामान्यतः—येन केनापि रूपेण। * तज्ज्ञानशून्यानाम्—ईश्वरज्ञानरहितानाम्। वैदिकानां कथंचिदीश्वरज्ञानसम्भवादाह—* लौकिकेति। निरीश्वरवादिनो मीमांसका इत्यर्थः। आदिपदं च तादृशबौद्धादिपरम्।

तत्तदर्थबोधजनकत्वग्रहवतामेव बोधेन व्यभिचारात्। न चा*र्थधी-जनकतावच्छेदकत्वेन तज्ज्ञानं हेतुः। ततोऽपि *लाघवेनार्थधीजन-कत्वेनैव हेतुतायामस्मत्पक्षसिद्धेः। न चाऽऽधुनिकदेवदत्तादौ सङ्के-तज्ञानादेव बोधनास्य व्यभिचारः। तत्रापि*"इदं पदमेनमर्थं बोधयतु"

---

* अर्थधीजनकतावच्छेदकत्वेनेति। अर्थधीजनकता—अर्थ-विषयकबोधजनकयोग्यता, सा च तदवच्छेदकधर्मवत्त्वम्। स धर्मश्च क्लृप्तत्वादीश्वरसङ्केत एवेति तज्ज्ञानस्य व्यभिचाराभावाद् हेतुत्व-मित्यर्थः।

*लाघवेनेति। अवच्छेदककोटौ अर्थधीजनकतावच्छेदकत्व-स्यानिवेशरूपेण लाघवेनेत्यर्थः।

*इदं पदमिति। "निर्विशेषं न सामान्यम्" इति न्यायेन "घटपदं घटं बोधयतु" इत्यादिवाक्यानां परिचायकमिदम्। पद-विशेष्यकेश्वरेच्छाया आकारश्चायम्। अर्थविशेष्यकश्च "घटपदाद् घटो बोद्धव्यः" इत्यादिर्बोध्यः। तत्राऽऽद्ये—बुधधात्वर्थो बोधः, णिच्प्रत्ययार्थो जनकता, 'घटम्' इत्यत्र द्वितीयार्थः कर्म, तद-र्थश्च विषयता "सविषयक धातु समभिव्याहारे कर्मप्रत्ययार्थो विषयता" इति नियमात्। ज्ञानेच्छाकृत्यर्थका धातवः सविषयाः। तत्र च घटस्य द्वितीयार्थविषयतायां वृत्तित्वसम्बन्धेनाऽन्वयः। विषयतायाश्च निरूपकत्वसम्बन्धेन 'बुध'धात्वर्थबोधे, तस्य च निष्ठत्वसम्बन्धेन जन्यतायां, तस्याश्च निरूपितत्वसम्बन्धेन णिजर्थ-जनकतायां, तस्याश्चाश्रयत्वसम्बन्धेन प्रथमान्तघटपदेऽन्वयः। तथा च "वृत्ति (त्व)सम्बन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रकारता-निरूपितविशेष्यतासमानाधिकरणनिरूपकत्वसम्बन्धावच्छिन्नविषय-तात्वावच्छिन्नविषयतानिष्ठप्रकारतानिरूपितविशेष्यतासमानाधिकर-णनिष्ठत्वसम्बन्धावच्छिन्नबोधत्वावच्छिन्नबोधनिष्ठप्रकारतानिरूपित-विशेष्यतासमानाधिकरणनिरूपितत्वसम्बन्धावच्छिन्नजन्यतात्वाव-च्छिन्नजन्यतानिष्ठप्रकारतानिरूपितविशेष्यतासमानाधिकरणाश्रयत्व-सम्बन्धावच्छिन्नजनकतात्वावच्छिन्नजनकतानिष्ठप्रकारतानिरूपितवि-शेष्यताश्रयो घटपदम्" इतीश्वरेच्छाया ग्रहे जाते तद्विशेषणत्वेन

इतीच्छाग्रहे पदे तदर्थबोधकत्वस्यावगाहनेन व्यभिचाराभावात्। *न च *स्वातन्त्र्येणार्थबोधकताज्ञानं कारणं वाच्यम्। अन्यथा नेदं तद्धीजनकमिति जानतोऽस्माच्छब्दादयमर्थो बुद्धोऽनेनेति जानतस्तद्ग्रहापत्तेरिति वाच्यम्। नेदं तद्धीजनकमिति ग्रहवतो बाधेन पदे परग्रहं जानतोऽपि तद्ग्रहासंभवात्। अन्यथा भ्रान्तिज्ञस्यापि भ्रान्तत्वापत्तेरिति।

इदं चार्थधीजनकत्वं पित्रादिसङ्केतज्ञानाद् गृह्यते। अतस्तज्ज्ञानात्पूर्वं न बोधः।

नापि लाक्षणिकोच्छेदापत्तिः। *इष्टत्वात्। शक्तिग्राहकव्यवहारस्य *मुख्यलक्ष्यसाधारण्यात्।

बोधजनकत्वग्रहः स्पष्ट एवेति। ईश्वरेच्छाशरीरे बोधजनकतायाः पदे विशेषत्वेन प्रविष्टत्वादिति भावः। अर्थविशेष्यकेश्वरेच्छाकारस्यापि शाब्दबोधं उपदर्शितरीत्या विशेष्यविशेषणभावव्यत्यासेन तदनुकूलसम्बन्धव्यत्यासेन च स्वयमूह्य इति दिक्।

ननु इच्छाग्रहाधीनार्थधीजनकत्वग्रहेऽपि न तादृशार्थबोधजनकत्वज्ञानं शाब्दबोधे कारणम्। अन्यथा 'नेदं तद्बोधकम्' इति ज्ञानवतोऽपि 'अस्मात् पदादयमर्थो बुद्धोऽनेन' इति परग्रहाधीनतदर्थबोधजनकत्वग्रहेण तद्विषयकशाब्दबोधापत्तेः, किन्तु इतराविशेषणत्वेन तज्ज्ञानमिति। तथा च आधुनिकदेवदत्तादिपदेषु ईश्वरेच्छाशरीरस्थप्रथमान्तपदविशेषणतयैव तज्ज्ञानाच्च व्यभिचाराभाव इत्याशङ्क्य—*न चेति। अस्य 'इति वाच्यम्' इत्यनेनान्वयः।

*स्वातन्त्र्येण—इतराविशेषणत्वेन।

*इष्टत्वादिति। "सर्वे सर्वार्थवाचकाः" इत्यनेन सर्वेषामपि शब्दानां सर्वार्थनिरूपितशक्तिमत्त्वस्यैव वैयाकरणैः सिद्धान्तितत्वादिति भावः। *मुख्यलक्ष्यसाधारण्यादिति।

इत्युक्ते घटानयनं "घटं नय" इत्युक्तौ च घटनयनं दृष्ट्वा यथा घटपदस्य घटे गृहीतस्य सम्बन्धस्य शक्तित्वं, तथा व्यवहारेणैव

* किं च प्रत्यक्षादिजन्योपस्थितेः *शाब्दबोधानङ्गत्वात् शाब्दबोधं प्रति *शक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यम् । तथा च कार्यकारणभावद्वयकल्पने गौरवं स्यात् । अस्माकं पुनः शक्तिजन्योपस्थितित्वेनैव हेतुतेति लाघवम् ।

अपि च लक्षणावृत्तिस्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः । शक्तिजन्योपस्थितिं विनाऽपि लक्षणाजन्योऽपिस्थितितः शाब्दबोधात् । न च *अव्यवहितोत्तरत्वसंबन्धेन तत्तदुपस्थितिमत्त्वं कार्यतावच्छेदकं, तत्तदुपस्थितित्वं च कारणतावच्छेदकम् । *अनन्तकार्यकारणभावप्रसङ्गात् । किं च पदार्थोपस्थितिं प्रत्यपि शक्ति-

---

"गङ्गायां घोषे वस" इत्युक्तौ वासं "गङ्गायां घोषात् निर्गच्छ" इत्युक्तौ निर्गमं च दृष्ट्वा गृहीतस्य तीरे गङ्गापदसम्बन्धस्य लक्षणात्वमित्यस्यायुक्तत्वादित्याशयः ।

*ननु "अन्याय्यश्चानेकार्थत्वम्" इति पूर्वमीमांसाऽधिकरणकौमुदीस्थैकोनपञ्चाशत्तमन्यायविरोधाद् व्यवहारस्य लक्षणाग्राहकत्वेनाऽप्युपपत्तौ गङ्गादिपदेषु तीरादिशक्तिकल्पनाऽप्रामाणिकीत्यत आह—*किञ्चेति । *शाब्दबोधानङ्गत्वादिति । अगृहीतशक्तिकस्य घटादिकं पश्यतोऽपि पुंसो घटादिपदैः शाब्दबोधादर्शनादित्यादि । *शक्तिजन्येति । शक्तिज्ञानजन्येत्यर्थः । एवं लक्षणाजन्येत्यस्य—लक्षणाज्ञानजन्येत्यर्थो बोध्यः ।

*अव्यवहितोत्तरत्वेति । तत्पदनिष्ठशक्तिज्ञानाधीनोपस्थित्यव्यव[illegible]रशाब्दबुद्धित्वावच्छिन्नं प्रति तत्पदनिष्ठशक्तिज्ञाना[illegible]पस्थितिः कारणम्, तत्पदनिष्ठलक्षणाज्ञानाधीनोपस्थित्यव्यवहितोत्तरशाब्दबुद्धित्वावच्छिन्नं प्रति तत्पदनिष्ठलक्षणाज्ञानाधीनोपस्थितिः कारणमिति फलितोऽर्थः । *अनन्तेति । स्वध्वंसाधिकरणक्षणध्वंसानधिकरणत्वं—स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वं—स्वाधिकरणक्षणध्वंसाधिकरणसाधिकरणक्षणध्वंसानधिकरणत्वमेतदुभयसम्बन्धेन यत्किञ्चिद्व्यक्तिविशिष्टत्वरूपाव्यवहितोत्तरत्वसम्बन्धमानाय, तत्तदुपस्थितिव्यक्तीनामेव तत्र प्रवेशेन तदानन्त्यात् कार्यकारणभावानन्त्यमित्यर्थः । एवं या काचिदेकोपस्थिति-

ज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुतेति व्यभिचारो गौरवं च * प्राग्वदेव द्रष्टव्यम्।

'न च "इदं पदमेतदर्थबोधकम्" इति शक्तिज्ञानकार्यकारणभावकल्पनेऽपि *तत्तदर्थभेदेनानेककार्यकारणभावकल्पनेऽपि गौरवं तत्रापि

व्यक्तिः तद्ध्वंसाधिकरणभूतो यो द्वितीयस्तृतीयो वा क्षणस्तद्ध्वंसानधिकरणत्वं तदन्यतरक्षणे, एवं स्वाधिकरणभूतो यः प्रथमः क्षणस्तद्ध्वंसाधिकरणत्वमपि तत्रैवेति तत्क्षणिकशाब्दबोध एव तदुपस्थितिजन्य इति लक्षणसमन्वयः। चतुर्थादिक्षणव्यावृत्तये प्रथमसम्बन्धोपादानं द्वितीयसम्बन्धश्च स्वपूर्वक्षणव्यावृत्तये इति स्पष्टमेव। चैत्रीयोपस्थित्यनन्तरं तदुपस्थितेर्मैत्रात्मन्यसत्त्वेऽव्यवहितोत्तरत्वसम्बन्धेनोपस्थितिमत्त्वेन मैत्रस्य शाब्दबोधापत्तिवारणायोपस्थितौ तत्पुरुषीयत्वनिवेशे तु पुरुषानन्त्यप्रयुक्तमपि तदानन्त्यं बोध्यम्।

* प्राग्वदेवेति। शक्तिज्ञानं विनाऽपि लक्षणाज्ञानमात्रेणोपस्थितेः प्रत्येकं व्यभिचारः, शक्तिज्ञानाव्यवहितोत्तरोपस्थितिं प्रति शक्तिज्ञानस्य, लक्षणाज्ञानाव्यवहितोत्तरोपस्थितिं प्रति लक्षणाज्ञानस्य कारणत्वे तु तत्तच्छक्तिव्यक्तिनिवेशावश्यकत्वेन पुरुषान्तरशक्तिज्ञानेन पुरुषान्तरीयोपस्थितिवारणाय च तत्पुरुषीयत्वेन शक्तेर्विशेषणीयत्वेन पर्यायान्तरशक्तिग्रहेण तत्पर्यायाद्बोधवारणाय शक्तेस्तत्पदीयत्वेन विशेषणीयत्वाच्च व्यक्तिपुरुषपदानामानन्त्येनानन्ततत्सन्निवेशेन कार्यकारणभावानन्त्यमिति बोध्यम्।

* तत्तदर्थभेदेनेति। गङ्गादिपदात् प्रवाहत्वाद्यवच्छिन्नविषयकशाब्दबोधे गङ्गापदनिष्ठप्रवाहत्वावच्छिन्ननिरूपितशक्तिज्ञानाधीनोपस्थितेः कारणत्वं, तीरत्वावच्छिन्नविषयकशाब्दबोधं प्रति गङ्गापदनिष्ठतीरत्वावच्छिन्ननिरूपितगङ्गापदनिष्ठशक्तिज्ञानाधीनोपस्थितेः कारणत्वमित्यादिरीत्या लक्ष्यार्थस्यानन्तत्वेनानेककार्यकारणभावकल्पनेति भावः।

'घटपदं पटे शक्तम्' इत्यादिशक्तिभ्रमेणापि तद्बोधानुभवेन तत्तदर्थनिरूपितशक्तिग्रहस्य तज्जन्योपस्थितेश्च तत्र शाब्दबोधकारण-

समानम्, परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वघटितत्वे च सुतरामिति वाच्यम् । * शक्तिभ्रमानुरोधेन तत्तत्पदतत्तदर्थभेदेन कार्यकारणभावानन्त्यस्य तवापि साम्यात् । लक्षणाकार्यकारणभावकल्पनागौरवं परं तवातिरिच्यते ।

अथ *वृत्तिजन्योपस्थितित्वेनैव शाब्दबोधहेतुता, वृत्तिज्ञानत्वेन च पदार्थोपस्थितिकारणतेत्येवं मया वाच्यमिति चेन्न । शक्तिलक्षणाऽन्यतरत्वस्य शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वस्य वा वृत्तित्वस्य कारणतावच्छेदकत्वात् शक्तित्वमपेक्ष्य गौरवाच्छाब्दबोधहेतुतावच्छेदकस्य *पदार्थोपस्थितिवृत्तेरज्ञाने तद्घटितकार्यकारणभावग्रहस्या*संभवात् ।

अथ * ममापि शक्तिज्ञानत्वेनैव हेतुता, शक्यसंबन्धरूपलक्षणायां शक्तेरपि प्रवेशादिति चेन्न । शक्तिज्ञानपदार्थोपस्थित्योः कार्यकारणभावे समानविषयत्वस्याऽऽवश्यकत्वात् । अन्यथा गङ्गातीरयोः

ताकल्पनाऽऽवश्यिकेति तदानन्त्यस्य उभयोरपि समानत्वेऽपि लक्षणाकार्यकारणभावकल्पनागौरवं तवाधिकमेवेत्याह—* शक्तिभ्रमानुरोधेनेति ।

* वृत्तिजन्योपस्थितीति । तथा चैकस्यैव कार्यकारणभावस्य सत्त्वेन न व्यभिचारः प्रत्येकं, नाप्यव्यवहितोत्तरत्वादिनिवेशगौरवमिति । * पदार्थोपस्थितिवृत्तेरिति । पदार्थोपस्थितिनिष्ठस्य शाब्दबोधहेतुतावच्छेदकस्य वृत्तिज्ञानजन्योपस्थितित्वरूपस्येत्यर्थः । * असम्भवादिति । शाब्दबोधानुकूलत्वं—शाब्दबोधकारणत्वं, तस्य च कारणतावच्छेदकरूपापरिचये दुर्ग्रहत्वेनोक्तहेतुतावच्छेदकस्य दुर्ज्ञेयत्वेन च कार्यकारणभावस्यासम्भवादिति भावः ।

* ममापीति । लक्षणावादिनोऽपि । 'मते' इति शेषः । * तदंशविषयकेति । तद्धर्मप्रकारकतद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं कारणमित्यर्थः । प्रकृते च हस्तिपकत्वावच्छिन्ननिरूपितशक्तिग्रहाभावान्न दोषः । विस्तरस्तु

संबन्धाग्रहवतो गङ्गापदशक्तिं जानतोऽपि "गङ्गायां घोषः" इति वाक्यात्तीरबोधप्रसङ्गः। शक्तिज्ञानस्य हेतोः सत्त्वात्।

अपि च घटमानयेति वाक्यं हस्तिनं च स्मरतो घटपदादिभ्यो घटादेर्गजाद्धस्तिपकस्य च समूहालम्बनस्मरणवतो घटानयनवद्धस्तिपकस्यापि शाब्दबोधापत्तिः। समूहालम्बनरूपायां पदार्थोपस्थितौ वृत्तिजन्यत्वसत्त्वात्। तथा च विषयतया शाब्दबोधं प्रति * तदंशविषयकवृत्तिजन्योपस्थितिर्हेतुरिति वाच्यम्। एवं च लक्षणाया अपि शक्तिज्ञानत्वेन हेतुत्वम्*संभवदुक्तिकमिति। *एतेन *शक्तिप्रयोज्यैवोपस्थितिर्हेतुरिति न लक्षणाज्ञानकार्यकारणभावान्तरं ममापीति परास्तम्। प्रयोज्यत्वस्या*नतिप्रसक्तस्य दुर्वचत्वाच्चेत्यादिकं विस्तरेण प्रपञ्चितं भूषणे ॥ १ ॥ (३७)

नन्वेवं भाषादितो बोधदर्शनाद् बोधकतारूपा शक्तिस्तत्रापि स्यात्। तथा च साधुताऽपि स्यात्। शक्तत्वस्यैव साधुताया व्याकरणाधिकरणे प्रतिपादनादित्याशङ्कां द्विधा समाधत्ते—

असाधुरनुमानेन वाचकः कैश्चिदिष्यते ॥
वाचकत्वाविशेषे च नियमः पुण्यपापयोः ॥२॥

(३८)

शक्तिवादे द्रष्टव्यः। * असम्भवदुक्तिकमिति। गङ्गापदे प्रवाहत्वावच्छिन्ननिरूपितशक्तेरेव ग्रहात् तीरत्वावच्छिन्नविषयकशाब्दबोधानुत्पत्तेरिति। * एतेन—उक्तस्थले हस्तिपकस्य शाब्दबोधापत्तिरूपदूषणेन। * शक्तिप्रयोज्येति। प्रयोज्यत्वं च साक्षात्परम्परासाधारणमिति बोध्यम्। * अनतिप्रसक्तेति। "घटपदं घटे शक्तम्" इतिशक्तिग्रहवतः पुंसो घटपदाद् घटरूपार्थोपस्थितौ तेन स्वसमवाय्युपस्थिताकाशस्य घटपदजन्यशाब्दबोधविषयत्वापत्तिः। तत्रापि घटपदनिष्ठशक्तिप्रयोज्यतावच्छेदकविषयतासम्बन्धेन तादृशोपस्थितेः सत्त्वादिति भावः ॥ १ ॥ (३७)

असाधुर्गाव्यादिः अनुमानेन साधुशब्दमनुमाय वाचको बोधकः कैश्चिदिष्यते। तथा च लिपिवत्तेषां साधुस्मरण एवोपयोगो न तु साक्षात्तद्वाचकत्वमतो न साधुत्वमिति भावः।

उक्तं हि वाक्यपदीये—

* ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।
* तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः॥
* न शिष्टैरनुगम्यन्ते पर्याया इव साधवः।
* न यतः स्मृतिमात्रेण, तस्मात्साक्षादवाचकाः॥
* अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः॥
एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते॥ इति॥

नन्वपभ्रंशानां साक्षादवाचकत्वे किं मानं, शक्तिकल्पकव्यवहारादेस्तुल्यत्वादिति चेत्—सत्यम्। तत्तद्देशभेदभिन्नेषु तेषु शक्तिकल्पने

---

* ते—असाधवः 'गगरी' इत्यादिशब्दाः। * तादात्म्यमुपगम्येव—अर्थैः सह तादात्म्यं गगर्यादिशब्दानां गृहीत्वेवेत्यर्थः। अहस्य भ्रमत्वसूचनाय 'इव'पदम्। तेन तेषामवाचकत्वं ध्वनितम्।

* न शिष्टैरिति। शिष्टैः साधवः पर्यायाः—पर्यायशब्दा इव नानुगम्यन्ते इति योजना। अत्र 'ते' इति कर्माऽनुषङ्गेणान्वेतीति बोध्यम्।

न यत इति। यतः—यस्माद्धेतोः (असाधुशब्दानां) स्मरणमात्रेण नार्थबोधोपपत्तिः, तस्माद् हेतोरित्यर्थः।

* अम्बाम्बेति। यदा यस्मिन् काले 'अम्बा अम्बा' इति शिक्ष्यमाणो बालोऽसामर्थ्याद् अव्यक्तम्—'अम्मा अम्मा' इति प्रभाषते, तदा तद्विदां—साधुशब्दज्ञानां तेन—अव्यक्तेन व्यक्ते-स्मृते निर्णयः—अर्थनिश्चयो भवतीत्यर्थः।

गौरवात् । न च पर्यायतुल्यता शङ्क्या । तेषां सर्वदेशेष्वेकत्वाद्विनिगमनाविरहेण सर्वत्र शक्तिकल्पना । न ह्यपभ्रंशे तथा । अन्यथा भाषाणां पर्यायतया गणनापत्तेश्च । एवं शक्तत्वमेवास्तु साधुत्वमिति नैयायिकमीमांसकादीनां मतेनैव द्रष्टव्यम् ।

इदानीं स्वमतमाह—वाचकत्वाविशेषे चेति । अयं भावः—अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात् । न च साधुस्मरणात्ततो बोधस्तानविदुषां पामराणामपि बोधात्तेषां साधोरबोधाच्च । न च शक्तिभ्रमात्तेभ्यो बोधो बोधकत्वस्याबाधेन तद्ग्रहस्याभ्रमत्वात् । ईश्वरेच्छा शक्तिरिति मतेऽपि सन्मात्रविषयिण्यास्तस्या बाधाभावात् । शक्तेः पदपदार्थविशेषघटिताया भ्रमासंभवाच्चेति ।

उक्तं च वाक्यपदीये—

पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु ।
प्रसिद्धिमागता येन तेषां साधुरवाचकः ॥
दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः ।
अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्ययः ॥ इति ।

अवाचकोऽबोधकः, बुद्धिविपर्ययः—एत एव वाचका नान्ये इति विपर्यय इत्यर्थः । किं च विनिगमनाविरहाद् भाषायामपि शक्तिः । न च तासां नानात्वं दोषः । संस्कृतवन्महाराष्ट्रभाषायाः सर्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहतादवस्थ्यात् । किं चानुपूर्वी पदेऽवच्छेदिका । सा च पर्यायेष्विव भाषायामप्यन्याऽन्यैवेति कस्तयोर्विशेष इति विभाव्यं सूरिभिः । तथा च संस्कृतवद् भाषाशब्दाः शक्ता एव । न च पर्यायतया भाषाणां गणनापत्तिः । साधूनामेव कोशादौ विभागाभिधानात् ।

नन्वेवं साधुता तेषां स्यादित्यत आह—नियम इति । पुण्यजननबोधनाय साधूनां साधुभिर्भाषितव्यमिति विधिः । पापजनन-

योग्यत्वमसाधुत्वम् । तत्र जनकताऽवच्छेदिका च जातिः । तज्ज्ञापकं च कोशादि व्याकरणादि च । एवमेव च राजसूयादेर्ब्राह्मणे*फलाजनकत्ववद् गवादिशब्दानां *नाश्वादौ साधुत्वमिति संगच्छते । आधुनिकदेवदत्तादिनाम्नामपि "द्व्यक्षरम्" इत्यादिभाष्येण व्युत्पादितत्वात् साधुत्वम् । एवं च यः शब्दो यत्रार्थे व्याकरणे व्युत्पादितः स तत्रैव साधुरिति पर्यवसितम् । गौणानां गुणे व्युत्पादनात्तत्पुरस्कारेण प्रवृत्तौ साधुत्वमेव । आधुनिकलाक्षणिकानां त्वसाधुत्वमिष्टमेव । अत एव ब्राह्मणाय देहीत्यर्थे "ब्राह्मणं देहि" इत्यादिकं लक्षणयाऽप्यसाध्वित्यादि विस्तरेण प्रपञ्चितं भूषणे ॥२॥ (३८)

अतिरिक्तशक्तेर्ग्रहोपायमाह—

***संबन्धिशब्दे संबन्धो योग्यतां प्रति योग्यता ।**
समयाद् योग्यता संविन्मातापित्रादियोग्यवत् ॥३॥
(३९)

संबन्धो विषयः । योग्यतां प्रति योग्यता संबन्धिशब्दं प्रति योग्यता विषय इति । समयाद्—व्यवहारात् । योग्यता संवित्—शक्तिग्रहः । घटपदमत्र योग्यमेतत्संबन्धीति व्यवहारात्सा ग्राह्येत्यर्थः ॥३॥ (३९)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे शक्तिनिर्णयः समाप्तः ॥

---

*फलाजनकत्ववदिति । "राजा राजसूयेन यजेत" इति श्रुत्या राज्ञ एव राजसूयेऽधिकारबोधनादिति भावः । *नाश्वादाविति । गोशब्दस्य सास्नादिमति गोत्वविशिष्टे एव बोधजनकत्वदर्शनात् तत्रैव साधुत्वमित्यर्थः ॥ २ ॥ (३८)

*सम्बन्धिशब्दे इति । सम्बन्धिशब्दे योग्यतां प्रति—बोधजन-

नञर्थमाह—

नञ्समासे चापरस्य प्राधान्यात्सर्वनामता ।
आरोपितत्वं नञ्द्योत्यं न ह्यसोऽप्यतिसर्ववत् ॥१॥
(४०)

नञ्समासेऽपरस्योत्तरपदार्थस्य प्राधान्यात्सर्वनामता सिध्यतीति शेषः। अत एवाऽऽरोपितत्वमेव नञ्द्योत्यमिति। 'अभ्युपेयम्' इति शेषः। अयं भावः—'असर्व' इत्यादौ आरोपितः सर्व इत्यर्थे सर्वशब्दस्य प्राधान्याबाधात्सर्वनामता सिध्यति। अन्यथाऽतिसर्वे*इत्यत्रेव सा न स्यात्। घटो नास्तीत्यादावभावविषयकबोधे तस्य विशेष्यताया एव दर्शनात्। अस्मद्रीत्या च स आर्थो बोधो मानसः। तथा च असर्वस्मै इत्याद्यसिद्धिप्रसङ्ग इति। अत्र चाऽऽरोपितत्वमारोपविषयत्वम्। आरोपमात्रमर्थो*विषयत्वं तु संसर्ग इति निष्कर्षः। द्योत्यत्वोक्तिर्निपातानां द्योतकत्वमभिप्रेत्य ॥ १ ॥ (४०)

कतावच्छेदकधर्मरूपयोग्यतानिरूपितो यः सम्बन्धः—तादात्म्यलक्षणः स योग्यता सैव शक्तिरिति तात्पर्यम्। तद्ग्रहोपायमाह—*समयादिति। सा च स्वाभाविक्येवानादिवृद्धव्यवहारपरम्पराद्यालोचनयाऽस्मदादिसमयाद्वा गृहीतानुक्तेश्वरसमयान्निश्चीयते। यथा मातापुत्रयोर्जन्यजनकभावसम्बन्धस्य व्यवहारो निश्चायकस्तद्वदिति कारिकाऽर्थः ॥ ३ ॥ (३६)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां शक्तिनिर्णयः।

*अतिसर्वे इति। 'सर्वानतिक्रान्त' इत्यर्थे सर्वशब्दस्यातिक्रमणविशेषणत्वात् "संज्ञोपसर्जनानां प्रतिषेधः" इति वार्तिकात् सर्वनामसंज्ञानिषेध इति यदत्रापीत्यर्थः। *अर्थः—नञर्थः ॥ १ ॥ (४०)

घटो नास्ति, अब्राह्मणं इत्यादावारोपबोधस्य सर्वानुभवविरुद्धत्वात्पक्षान्तरमाह—

अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात् ।
विशेषणं विशेष्यो वा न्यायतस्त्ववधार्यताम् ॥२॥
(४१)

तदर्थो नञर्थः। अर्थपदं द्योत्यत्ववाच्यत्वपक्षयोः साधारण्येन कीर्तनाय। भाष्यस्येति। तथा च नञ्सूत्रे महाभाष्यम्—"निवृत्तपदार्थकः" इति। निवृत्तं पदार्थो यस्य "नपुंसके भावे क्तः" [पा० सू० ३-३-११४] इति क्तः। अभावार्थक इत्यर्थः। यत्तु निवृत्तः पदार्थो यस्मिन्नित्यर्थः। सादृश्यादिना*ऽध्यारोपितब्राह्मण्याः क्षत्रियादयोऽर्था यस्येत्यर्थ इति कैयटः तन्न, आरोपितब्राह्मण्यस्य क्षत्रियादेर्नञवाच्यत्वात्। अन्यथा सादृश्यादेरपि वाच्यतापत्तेः।

यत्तु—

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः" ॥

इति पठित्वा अब्राह्मणः, अपापम्, अनश्वः, अनुदरा कन्या, अपशवो वा अन्ये गोऽश्वेभ्यः, अधर्म इत्युदाहरन्ति; तत्तु आर्थिकार्थमभिप्रेत्येति स्पष्टमन्यत्र।

विशेषणमिति। प्रतियोगिनीति शेषः। तथा चासर्वपदे सर्वनामसंज्ञा, "अनेकमन्यपदार्थे" "सेव्यतेऽनेकया संनतापाङ्गया" इत्यादावेकशब्दार्थप्राधान्यादेकवचननियमः, अब्राह्मण इत्यादावुत्तरप-

---

*अध्यारोपितब्राह्मण्याः। अध्यारोपितं ब्राह्मण्यं येषु ते तथोक्ताः ॥ २ ॥ (४१)

दार्थप्राधान्यात्तत्पुरुषत्वम्, अत्वं भवसि, अनहं भवामीत्यादौ पुरुषवचनादिव्यवस्था चोपपद्यते। अन्यथा त्वदभावो मदभाव इतिवदभावांशे युष्मदस्मदोरन्वयेन युष्मत्सामानाधिकरण्यस्य तिङ्क्ष्वसत्त्वात्पुरुषव्यवस्था न स्यात्। अस्मन्मते च भेदप्रतियोगित्वदभिन्नाश्रयिका भवनक्रियेत्यन्वयात्सामानाधिकरण्यं नानुपपन्नमिति भावः।

विशेष्यो वेति। प्रतियोगिनीति शेषः। अयं भावः—गौणत्वेऽपि नञ्समासे "एतत्तदोः सुलोपोऽकोरनञ्समासे हलि" [पा० सू० ६-१-१३२] इति ज्ञापकात्सर्वनामसंज्ञा नानुपपन्ना। असः शिव इत्यत्र सुलोपवारणायानञ्समास इति हि विशेषणम्। न च तत्र तच्छब्दस्य सर्वनामताऽस्ति गौणत्वात्। अकोरित्यकच्सहितव्यावृत्त्या सर्वनाम्नोरेव तत्र ग्रहणलाभात्। तथा चानञ्समास इति ज्ञापकं सुवचम्। "अनेकमन्यपदार्थे" इत्यादावेकवचनं विशेष्यानुरोधात्। "सुबामन्त्रिते पराङ्गवत्स्वरे" [पा० सू० २-१-२] इत्यतोऽनुवर्तमानं सुब्ग्रहणं विशेष्यमेकवचनान्तमेव। किं चानेकशब्दाद् द्विवचनोपादाने बहूनां बहुवचनोपादाने द्वयोर्बहुव्रीहिर्न सिध्येदित्युभयसंग्रहायैकवचनं जात्यभिप्रायमौत्सर्गिकं वा। सेव्यतेऽनेकयेत्यत्रापि योषयेतिविशेष्यानुरोधात्प्रत्येकं सेवनान्वयबोधनाय चैकवचनं, न तूत्तरपदार्थप्राधान्यप्रयुक्तम्। अत एव "पतन्त्यनेके जलधेरिवोर्मयः" इत्यादिकमपि सूपपादम्।

अत्वं भवसीत्यादौ युष्मदस्मदोस्तद्भिन्ने लक्षणा। नञ् द्योतकः। तथा च भिन्नेन युष्मदर्थेन तिङः सामानाधिकरण्यात्पुरुषव्यवस्था। त्वद्भिन्नाभिन्नाश्रयिका भवनक्रियेति शाब्दबोधः। एवं न त्वं पचसीत्यत्र त्वदभिन्नाश्रयकपाकानुकूलभावनाऽभावः। घटो नास्तीत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोधः। असमस्तनञः क्रियायामेवान्वयबोधात्। स चाभावोऽत्यन्ताभावत्वान्यो-

न्याभावत्वादिरूपेण शक्यस्तत्तद्रूपेण बोधादित्यन्यत्र विस्तरः ॥ २ ॥ (४१)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे नञर्थनिर्णयः समाप्तः ॥

प्रादयो द्योतकाः चादयो वाचका इति नैयायिकमतमयुक्तं वैषम्ये बीजाभावादिति ध्वनयन्निपातानां द्योतकत्वं समर्थयते—

द्योतकाः प्रादयो येन निपाताश्चादयस्तथा ।
उपास्येते हरिहरौ लकारो दृश्यते यथा ॥१॥(४२)

येन हेतुना प्रादयो द्योतकास्तेनैव हेतुना चादयो निपातास्तथा द्योतका इत्यर्थः। अयं भावः— ईश्वरमनुभवतीत्यादावनुभवादिः प्रतीयमानो न धात्वर्थः । भवतीत्यत्राप्यापत्तेः । नोपसर्गार्थः तथा सत्यप्रकृत्यर्थतया तत्राऽऽख्यातार्थानन्वयापत्तेः । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः, * अनुगच्छतीत्यादावनुभवादिप्रत्ययापत्तेश्च । न विशिष्टार्थो *गौरवात् । तथा च धातोरेव विद्यमानत्वादिवाचकस्यास्तु *लक्षणा । उपसर्गस्तात्पर्यग्राहक इत्यस्तु । तथा च तात्पर्यग्राहकत्वमेव द्योतकत्वमिति ।

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां नञर्थनिर्णयः समाप्तः ॥

आख्यातार्थाश्रयस्य अन्वर्थानुभवेऽनन्वयेऽपि तस्य अन्वर्थान्वितव्यापारे धात्वर्थे प्रकृत्यर्थत्वेनान्वये बाधकाभावादाश्रयवृत्तिरनुभवानुकूलो व्यापार इति बोधस्य सिद्धिः । कर्मणि प्रत्ययेऽपि व्यापारस्यैव प्राधान्योऽभ्युपगन्तॄणामभीप्सितोकार्थालाभ.इत्यत आह— *अनुगच्छतीति । *गौरवात्—शक्ततावच्छेदकगौरवात् । *लक्ष-

एतच्चादिष्वपि तुल्यम्। चैत्रमिव पश्यतीत्यादौ सादृश्यविशिष्टं चैत्रपदलक्ष्यम्, इवशब्दस्तात्पर्यग्राहक इत्यस्य सुवचत्वात्, इति स्वयं युक्त्यन्तरमाह—उपास्यते इति। अत्र ह्युपासना किमुपसर्गार्थो विशिष्टस्य धातुमात्रस्य वा। नाऽऽद्यः। तथा सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्याऽऽसुधातोरुपासनरूपफलवाचकत्वाभावादनापत्तेस्ततः कर्मणि लकारो न स्यात्। न द्वितीयो गौरवात्। तृतीये त्वागतं द्योतकत्वं तात्पर्यग्राहकत्वलाभादिति भावः। दृश्यत इत्यत्र कर्मणीति शेषः ॥१॥ (४२)

तच्चादिष्वपि तुल्यमित्याह—

तथाऽन्यत्र निपातेऽपि लकारः कर्मवाचकः।
विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः॥२॥(४३)

अन्यत्र साक्षात्क्रियते, अलंक्रियते उरीक्रियते शिव इत्यादौ। अत्रापि धातोस्तदर्थे* कर्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गादेव द्योतकत्वममीषामपीत्यर्थः। यद्यपि कृधातोः सकर्मकत्वमस्त्येव तथाऽप्येष्वर्थेषु सकर्मकता न स्यात्। अन्यथा वायुर्विकुरुते, सैन्धवा विकुर्वत इत्यत्रापि * स्यादिति भावः। अथोपासनासाक्षात्कारादिर्निपातार्थोऽस्तु "साक्षात्प्रत्यक्षतुल्ययोः" इति कोशस्वरसात्। तदनुकूलो व्यापार एव धात्वर्थोऽस्तु स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वमपि सुवचमिति

णेति। यद्यदुपसर्गसमभिव्याहारे प्रतीयमानो योऽर्थस्तत्र तद्वृत्तेत्यर्थः ॥ १ ॥ (४२)

*तदर्थे—साक्षात्काराद्यर्थे। *स्यादितीति। 'सकर्मता' इति शेषः। तथा च "अकर्मकाच्च" [पा०सू० १-३-३५] इति विहिता-

दृष्टान्तदार्ष्टान्तिकावयुक्ताविति नेदं साधकमिति चेन्न । नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयासंभवान्निपातार्थधात्वर्थयोरन्वयस्यैवासंभवात् । अन्यथा *तण्डुलः पचतीत्यत्रापि कर्मतया तण्डुलानां धात्वर्थे*ऽन्वयापत्तेरिति ।

किं च प्रादीनां वाचकत्वे भूयान्प्रकर्षः, कीदृशो निश्चय इतिवद् भूयान्प्र, कीदृशो निरित्यपि स्यात् । अस्मन्मते प्रादेरनर्थकत्वान्न तदन्वय इति, अत एव द्योतकता तेषां स्यादिति साधकान्तरमभिप्रेत्याऽऽह—विशेषणेति । शोभनः समुच्चयो द्रष्टव्य इतिवच्छोभनश्च द्रष्टव्य इत्यस्याऽऽपत्तेस्तुल्यसमाधेयत्वादिति भावः । अपि च निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेनान्वयासंभवः । अन्यथा राजा पुरुष इत्यस्य राजसम्बन्धि पुरुष इत्यत्राप्यापत्तेरित्यभिप्रेत्याऽऽह— आदीति । धवखदिरयोः समुच्चय इतिवद्धवस्य च खादिरस्य चेत्येव स्यादिति भावः ॥ २ ॥ (४३)

ननु प्रातिपदिकार्थयोर्भेदनान्वयबोधे विरुद्धविभक्तिजन्योपस्थितिर्हेतुरिति कार्यकारणभावो निपातातिरिक्तविषय एवेति नोक्तदोष इत्याशङ्क्याऽऽह—

पदार्थः सदृशाऽन्वेति विभागेन कदाऽपि न ।
निपातेतरसंकोचे प्रमाणं किं विभावय ॥३॥४४॥

सदृशा सदृशेन *समानाधिकरणेनेति यावत् । अन्वेति,

त्मनेपदानुपपत्तिरिति भावः । *तण्डुलः पचतीति । अत्र नामार्थः कर्मैव । *आपत्तेरिति । षष्ठ्यर्थस्वस्वामिभावसम्बन्धेनान्वयापत्तेरित्यर्थः ॥ २ ॥ (४३)

*समानाधिकरणेनेति । भिन्नविभक्तिरहितेनेत्यर्थः । तथा च 'ज्योतिष्टोमेन यजेत" इत्यादौ 'यज'धात्वर्थयागे ज्योतिष्टोमस्याभेदेनान्वयः ॥ ३ ॥ (४४)

अभेदेनेति शेषः। विभागेन, असदृशेन, असमानाधिकरणेनेति यावत्। अयमर्थः—समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय-व्युत्पत्तिर्निपातातिरिक्तविषयेति कल्पने मानाभावो गौरवं च। अस्माकं निपातानां द्योतकत्वादन्वय एव नास्तीति नायं दोषः। अत एव घटो नास्तीत्यादौ घटपदं तत्प्रतियोगिके लाक्षणिकमिति नैयायिकाः॥ ३॥ (४४)

अपि च निपातानां वाचकत्वं काव्यादावन्वयो न स्यादिति साधकान्तरमाह—

शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव।
इत्यादावन्वयो न स्यात्सुपां च श्रवणं ततः॥४॥
॥ ४५॥

अत्रोस्रसदृशैः शरै रससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः। *अयं चोस्रादिशब्दानां तत्सदृशपरत्व इवशब्दस्य च द्योतकत्वे संगच्छते। अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः। तथाहि—उस्रैरिति करणे तृतीया। न चोस्रोऽत्र करणमिवार्थसदृशस्य करणत्वेऽपि तस्य करणत्वं नानेन*बोधयितुं शक्यमप्रकृत्यर्थत्वात्*। इवशब्दस्य चाऽसत्त्वार्थकतया तदुत्तरं तृतीयाया*असंभवात्,

---

*अयम्—उक्तार्थान्वयबोधः। *अनेन—उस्रशब्दोत्तरप्रत्ययेन। *अप्रकृत्यर्थत्वादिति। सदृशस्य 'इव'पदार्थतया उस्रपदार्थत्वा-भावात्। * असम्भवादिति। अव्ययोत्तरं सर्वविभक्तीनां प्राप्तेः "अव्ययादाप्सुपः" (पा० सू० २-४-८२) इति सुब्लुग्विधानसाम-र्थ्यादेव वर्णिततयाऽनर्थकत्वेन करणत्वार्थकतृतीयाया असम्भवा-दित्यर्थः। अत एव निपातानां कारकत्वेनान्वयोऽप्यपास्तः। ननु

*संभवे वा श्रवणप्रसङ्गात् , उत्तरपदोत्तरतृतीयानन्वयप्रसङ्गाच्चेत्याह– सुपां चेति। *सुपां श्रवणं चेत्यर्थः। चकारादुत्तरपदोत्तर*तृतीयाऽनन्वयः समुच्चीयते इत्यादावित्यादिपदात् "वागर्थाविव संपृक्तौ" "पार्वतीपरमेश्वरौ वन्दे" इत्यत्र वागर्थयोर्वैदिकर्मत्वाभावात्तदुत्तरद्वितीयाया अनन्वय इव वागर्थस्य कर्मत्वबोधकासंभवश्च संगृह्यते । यदि च विशेषणविभक्तिरभेदार्थिका* साधुत्वमात्रार्था वा तदाऽपीवशब्दस्य वाचकत्वेऽनन्वय एव । उक्तसदृशां शराणां समानाधिकरणपदोपस्थाप्यतया भेदेनान्वयायोगात् । बाधादभेदेनापि न सः । न ह्युक्ताभिन्नसदृशाभिन्नः शर इत्यर्थो द्रष्टव्यः ॥ ४ ॥ (४५)

ननु त्वन्मतेऽब्राह्मण इत्यादौ तत्पुरुषलक्षणाव्याप्त्यापत्तिः

'पृथिव्यामेव गन्धः' इत्यादौ एवपदोत्तरलुप्तसप्तम्यर्थाधेयत्वे एवार्थस्य अन्यस्यान्वयं स्वीकृत्यापरस्मिन्नेवशब्दार्थेऽभावे तदन्वयमुपगम्य पृथिवीसमवेतः पृथिवीतरासमवेतो गन्ध इत्यर्थो दीधितिकारेण वर्णितः, तथैवात्रापीवशब्दोत्तरकरणत्वार्थकतृतीयासम्भव इत्याशङ्क्याह—* संभवे वेति । इवशब्दार्थस्य कारकत्वेनान्वये तस्यासत्त्वार्थकत्वाभावेन निपातत्वाभावेऽव्ययसंज्ञाया अप्राप्तौ ततः परस्या विभक्तेः "अव्ययादाप्सुपः" (पा० सू० २-४-८२) इति लुगप्राप्त्या श्रवणं स्यादिति भावः । 'पृथिव्यामेव गन्धः' इत्यत्र पूर्वोक्तो बोधस्तु एवशब्दस्याधेयत्वार्थकत्वं स्वीकृत्योपपादनीय इति दिक् ।

सुपां चेत्यत्र चकारो ,भिन्नक्रमस्तदाह—*सुपां श्रवणं चेति । *तृतीयानन्वयं इति । एवं च तस्या असाधुत्वापत्तिः । * अभेदार्थिकेति । "न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः" इतिन्यायेन साधुत्वानुशासनाय क्रियमाणा विभक्तिः विशेष्यवाचकपदोत्तरविभक्तिसजातीयैव कर्तुमुचिता उपस्थितत्वादिति विशेषणविभक्तिराहित्यस्याभेदान्वयकारणस्य असत्त्वात्तथैवान्वय इति भावः ॥ ४ ॥ (४५)

पूर्वपदस्यानर्थकत्वेनोत्तरपदार्थप्राधान्याभावात्। *उपसर्गस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभावाद्विभक्तिश्च ततो न स्यादित्यत आह—

नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता।
द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः॥ ५॥
(४६)

नञ्समासादौ योत्तरपदार्थप्रधानता सा द्योत्यमर्थमादायैव। तमेवार्थमादायार्थवत्त्वात्प्रातिपदिकत्वमित्यर्थः। वस्तुतस्तु "अव्ययादाप्सुपः" [पा० सू० २-४-८२] इति ज्ञापकात्सुबुत्पत्तिः। "निपातस्यानर्थकस्य" इति वार्तिकाद्वा प्रातिपदिकत्वम्। *कृत्तद्धितसमासाश्च [पा० सू० १-२-४६] इत्यनुक्तसमुच्चयार्थकचकारेण निपातानां संग्रह इति बोध्यम्। तस्माद्युक्तं निपातानां द्योतकत्वम्।

*उक्तं चाऽऽकृत्यधिकरणवार्तिके—

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।
क्रियते *संशयोत्पत्तेर्नोपसर्गनिपातयोः॥

---

* उपसर्गस्येति। इदं निपातमात्रोपलक्षणम्। *न स्यादिति। ततश्च सुबन्तत्वाभावेन पदत्वाभावात्ततः परस्य तिङन्तस्य "तिङ्ङतिङः" (पा० सू० ८-१-२८) इति निघातानापत्तिरिति भावः। सूत्रकारमते तत्सिद्धिमाह—* कृतद्धितेति।

मीमांसकसम्मतिमाह—* उक्तं चेति * चतुर्विधे—नाम आख्यात-उपसर्ग-निपातरूपे। * द्विविधस्य-नाम-आख्यातरूपस्य। * संशयोत्पत्तेरिति। जातिः, व्यक्तिः, विशिष्टं वेति, व्यापारः फलं च, फलमात्रं वेति क्रमेण नामाख्यातस्थले संशयस्य उत्पत्ते-

*तयोरर्थाभिधाने हि *व्यापारो नैव विद्यते।
*यदर्थद्योतकौ तौ तु वाचकः स विचार्यते॥ इति।
उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहारसंहारविहारपरिहारवत्॥

इति वृद्धोक्तावुपसर्गपदं निपातोपलक्षणम्। धातुपदं *पदान्तरस्येति बोध्यम्॥ ५॥ (४६)

नन्वन्वयव्यतिरेकाभ्यां निपातानां तदर्थवाचकत्वमेव युक्तं बोधकतारूपशक्तेरबोधाच्च। *किं चोक्तरीत्या* पचतीत्यादौ धातोरेव कर्तृविशिष्टभावनायां लक्षणाऽस्तु तात्पर्यग्राहकत्वमात्रं तिङादेःस्यादित्यरुचेः पक्षान्तरमाह—

निपातानां वाचकत्वमन्वयव्यतिरेकयोः।
युक्तं वा न तु तद्युक्तं परेषां मतमेव नः॥६॥ (४७)

एवं च धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयबोधो न व्युत्पन्न इति निपातातिरिक्तविषयं; समानाधिकरणप्रातिपदिकार्थयोरभेदेनान्वय इत्यपि *तथेत्यगत्या कल्पनीयमिति भावः। न त्विति।

रित्यर्थः। * तयोः—उपसर्गनिपातयोः। * व्यापारः—शक्तिः। *यदर्थेति। यन्नामाख्यातान्यतरार्थगतविशेषद्योतकौ तौ निपातोपसर्गौ तत्रेति शेषः। सः-नामाख्यातान्यतरशब्द एव वाचक इत्यर्थः। * पदान्तरस्य —नामरूपस्य॥ ५ (४६)

ननु स्वसमभिव्याहृतपदनिष्ठविशेषार्थनिरूपितशक्त्युद्बोधनमात्रेणापि तद्बोधकत्वमसतमेवेत्यरुचेराह—* किञ्चेति। * उक्तरीत्या—द्योतकतास्वीकारेणाप्यन्वयव्यतिरेकबोधजनकतारूपशक्त्युपपत्तिरूपोक्तयुक्त्येत्यर्थः।

*तथा—निपातातिरिक्तविषयमित्यर्थः।

नैयायिकोक्तं* प्रादिचादिवैषम्यमित्यर्थः । *यत्तु सर्वेषां निपातानां वाचकत्वेऽर्थवत्सूत्रेणैव तेषां प्रातिपदिकत्वसंभवात् "निपातस्यानर्थकस्य" इति विधिवैयर्थ्यं, सर्वेषां द्योतकत्वे *चानर्थकस्येति व्यर्थम्, तथा च केचिद् द्योतकाः केचिद्वाचका इत्यभ्युपेयमिति । तन्न । एवं हि चादयो द्योदकाः प्रादयो वाचका इति वैपरीत्यावारणात् । सर्वथाऽनर्थकानां पादपूरणमात्रार्थमुपात्तानां*संग्रहाय वार्तिकारम्भस्य कैयटादौ स्पष्टत्वाच्च, तस्य प्रत्याख्यातत्वाच्च । परेषामिति बहुवचनं मीमांसकसंग्रहाय । केवलवृक्षशब्दात्समुच्चयाबोधाच्चकारश्रवणे तद्बोधाच्चकार एव तद्वाचको न द्योतकः । किं च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या चकारादेर्द्योतकत्वशक्तिश्च कल्प्येति गौरवं स्यादिति हि समुच्चयाधिकरणे स्थितं, तदपि न युक्तमिति भावः । तथा हि—अन्वयव्यतिरेकौ तात्पर्यग्राहकत्वेनाप्युपयुक्तौ* घटादिपदानामेव समुच्चिते लक्षणा तात्पर्यग्राहकः प्रकरणादिवच्चादिरिति स्वीकारान्न शक्तिद्वयकल्पनाऽपि । अस्माकं *लक्षणाग्रहणदशायां बोधात्तत्कार्यकारणभाव आवश्यकः । एवं शक्तिग्रहस्यापीति पक्षद्वयेऽपि कल्प्यान्तराभावेन गौरवाभावादुभयमपि युक्तमित्यभिमतम् । अत एव

"स वाचको विशेषाणां संभवाद् द्योतकोऽपि च"

प्रादिचादिवैषम्यमिति । प्रादीनामुपसर्गसंज्ञकानां द्योतकत्वं चादीनां वाचकत्वमिति वैषम्यमित्यर्थः । तदेवोपपादयति— यत्त्वित्यादिना । * अनर्थकस्येति । 'वार्तिके' इति शेषः । * उपात्तानाम्—'तुह्विचेत्यादीनाम्' इत्यग्रे शेषः ।

* उपयुक्ताविति । तथा चान्वयव्यतिरेकयोरन्यथासिद्धतया तौ न शक्तिसाधकाविति भावः । * लक्षणाग्रहेति । समभिव्याहृतपदस्य

इति वाक्यपदीयं संगच्छते । दर्शनान्तररीत्या वाचकत्वमेव द्योतकत्वमेवेति नियमस्तु न युक्त इति ध्वनयन्नाह—मतमेवेति॥ ६ ॥ (४७)

पर्यवसितमुपसंहरन्नाह—

निपातत्वं परेषां यत्तदस्माकमिति स्थितिः ।
व्यापकत्वाच्छक्तताया स्त्ववच्छेदकमिष्यते॥७॥
(४८)

परेषां यन्निपातत्वमसत्त्वार्थकत्वे सति चादिगणपठितत्वं, शक्तिसंबन्धेन निपातपदवत्त्वं वोपाधिर्जातिर्वा तदेवास्माकमपि; परंतु सामान्यधर्मे प्रमाणानां पक्षपाताच्छक्तता द्योतकता वा * तदवच्छेदेनैव कल्प्येति नैयायिकोक्तं प्रादिचाद्योर्वैषम्यमयुक्तमित्यर्थः । व्यापकत्वात् सामान्यत्वात् । शक्तताया इत्युपलक्षणं द्योतकताया वेत्यपि द्रष्टव्यम् ॥ ७ ॥ (४८)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे निपातानां द्योतकत्वादिनिर्णयः समाप्तः ।

विशिष्टार्थे लक्षणायां गृहीतायां लक्ष्यार्थस्य बोधात् लक्षणाग्रहशाब्दबोधयोः कार्यकारणभाव इत्यर्थः ॥६॥ (४७)

* तदवच्छेदेनैवेति । निपातत्वावच्छेदेनैवेत्यर्थः । सकलनिपातेषु, न तूत्कलितोपसर्गकनिपातेष्विति तात्पर्यम् ॥७॥ (४८)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां निपातार्थनिर्णयः ।

भावप्रत्ययार्थमाह—

कृत्तद्धितसमासेभ्यो मतभेदनिबन्धनम् ।
त्वतलोरर्थकथनं टीकायां हरिणा कृतम्॥१॥ (४९)

' कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेनान्यत्र रूढ्यभिन्नरूपाव्यभिचरितसंबन्धेभ्यः " इति वार्तिकवचनमिति मीमांसकादीनां भ्रममपाकुर्वन्नाह—टीकायामिति । भर्तृहरिणा महाभाष्यटीकायामित्यर्थः । त्वतलोरिति । भावप्रत्ययमात्रोपलक्षणम् । अयमर्थः—समासादौ शक्तिः कल्प्यमाना राजादिसंबन्धविशिष्टे कल्प्यत इत्युक्तम् । तथा च तदुत्तरभावप्रत्ययः संबन्धं वदतीत्यर्थः ।

एतदपि भेदः संसर्ग उभयं वेत्युक्तेषु पक्षेषु भेदपक्षे न संभवतीत्यत आह—मतभेदेति । पक्षभेदेनेत्यर्थः । एवं च राजपुरुषत्वमौपगवत्वं पक्तृत्वमित्यादौ स्वस्वामिभावः, अपत्यापत्यवत्संबन्धः, क्रियाकारकभावसंबन्ध इत्यन्वयबोधः । औपगवादावव्यभिचरितसंबन्धे *त्वर्थान्तरवृत्तिस्तद्धित उदाहार्यः । दामोदरत्वं कृष्णसर्पत्वमित्यादौ जातिविशेषबोधादाह—*अन्यत्रेति । रूढेरभिन्नरूपादव्यभिचरितसंबन्धेभ्यश्चान्यत्रेत्यर्थः । रूढिरुक्ता । द्वितीयं यथा शुक्लत्वम् । अत्र "तदस्यास्त्यस्मिन्" [पा॰सू॰५-२-९४] इति मतुपो "गुणवचनेभ्यो मतुपो लुगिष्टः" इति लुप्तत्वात्तद्धितान्तत्वेऽपि घटः शुक्ल इत्यभेदप्रत्ययाद् गुणस्यैव प्रकारत्वेन मानं जायते । तृतीये सतो भावः सत्तेति । अत्र जातावेव प्रत्यय इति दिक् ॥१॥(४९)

---

* अर्थान्तरवृत्तिरिति । ऐन्द्रत्वम्, इत्यादौ देवताद्यर्थकतद्धित उदाहार्य इत्यर्थः । * अन्यत्रेतीति । 'वार्तिके' इति शेषः ॥१॥ (४९)

दण्डीत्यादौ प्रकृत्यर्थविशिष्ट*द्रव्यमात्रवाचकता तद्धितस्येति वदन्तं मीमांसकमन्यं प्रत्याह—

अत्रार्धजरतीयं स्याद्दर्शनान्तरगामिनाम् ।
सिद्धान्ते तु स्थिते पक्षद्वयं त्वादिषु तच्छृणु ॥२॥(५०)

अत्र—भावप्रत्ययविषये। तथा हि दामोदरत्वं घटत्वमित्यादौ भावप्रत्ययस्य संबन्धानभिधायकत्वेन मीमांसकानां दण्डित्वमित्यादिष्वपि *तदभिधानं न स्यात् । प्रकृतिजन्यबोधे प्रकारः प्रकृत्यर्थसमवेतो हि तदुत्तरभावप्रत्ययेनाभिधीयते । *अन्यथा घटत्वमित्यत्र *द्रव्यत्वादेर्दण्डित्वमित्यादौ दण्डादेश्च तदुत्तरभावप्रत्ययवाच्यतापत्तेः । *न च तन्मते दण्डीत्यादिबोधे संबन्धः प्रकारः ।

यत्तु—

*यदा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोऽपरः ।
तदा गत्यन्तराभावात्सम्बन्धो वाच्य आश्रितः ॥

---

* द्रव्यमात्रवाचकतेति । न तु तदाकाङ्क्षितसम्बन्धवाचकतेत्यर्थः । * तदभिधानमिति। सम्बन्धाभिधानमित्यर्थः । *अन्यथा उभयस्यावाच्यत्वे । * द्रव्यत्वादेरिति । तस्य घटसमवेतत्वेऽपि तज्जन्यबोधे प्रकारतया भानं नास्तीति न घटत्वपदवाच्यत्वम्, एवं दण्डिपदजन्यबोधे दण्डस्य प्रकारतया भानेऽपि तत्समवेतत्वं नास्तीति न दण्डस्य दण्डित्वपदवाच्यत्वमिति भावः। *न चेति । चो हेत्वर्थः । यतस्तन्मते दण्डीत्यादितो बोधे सम्बन्धो न प्रकारतया भासते अतो दण्डित्वमित्यादिषु तदभिधानं न स्यादिति योजना ।

* यदेति । यदा यत्र (दण्डित्वमित्यत्र) स्वसमवेतः प्रकृत्यर्थे समवायसम्बन्धेन विद्यमानः वाच्यः प्रकृतिजन्यबोधे प्रकारः अपरो गुणः सम्बन्धातिरिक्तो नास्ति, तदा तत्र स्थले सम्बन्धो वाच्यः प्रकृतिजन्यबोधप्रकारोऽपि स्वसमवेतः संयोगादिसम्बन्ध-

इति, तन्न। इनादेः संबन्धावाचकत्वेनोपपत्तावगत्यभावात्। *प्रपञ्चितं चैतदादावेव वैयाकरणभूषणे। ननु तवापीदं वैषम्यं* कथमित्यत आह—*सिद्धान्ते त्विति॥ २॥ (५०)

तौ पक्षावाह—

प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थप्रकारताम्।
धर्ममात्रं वाच्यमिति यद्वा शब्दपरा अमी॥३॥(५१)
जायन्ते तज्जन्यबोधप्रकारे भावसंज्ञिते।

प्रयोग उपाधिर्निमित्तं प्रकृत्यर्थप्रकारतया भासमानं धर्मं वाच्यतयाऽऽश्रित्य त्वादयो जायन्ते। प्रकृतिजन्यबोधप्रकारस्त्वाद्यर्थ इति यावत्।

ननु घटत्वमित्यत्र प्रकारत्वात्तदुत्तरत्वप्रत्यये घटत्वत्वस्यापि

त्वादिभावप्रत्ययवाच्य आश्रितो गत्यन्तराभावादित्यर्थः। *प्रपञ्चितमिति। दण्डीत्यादौ सम्बन्धावाच्यत्वे दण्डित्वमित्यत्रापि सम्बन्धस्य वाच्यत्वं न स्यात्। प्रतीतेस्तद्वदेवोपपत्तेः। न च त्वादेर्वैयर्थ्यापत्त्या सम्बन्धे वाच्यत्वं कल्प्यते इति वाच्यम्। घटत्वमित्यादौ क्लृप्तपदार्थतावच्छेदकशक्त्यैव निर्वाहात्। अनुभवानुरोधात् सम्बन्धे त्वादिशक्तिकल्पनमिति चेन्न। शक्त्यन्तरकल्पनामपेक्ष्य इनादीनां क्लृप्तशक्तौ धर्मिवत् सम्बन्धविषयकत्वेनोपपत्तौ पृथक्शक्तिकल्पनाऽयोगात्। तथा सति क्लृप्तपदार्थतावच्छेदकशक्त्यैव तद्भानसम्भव इत्यादि बृहद्भूषणे प्रपञ्चितं तत एवावगन्तव्यम्।

*इदं वैषम्यमिति। 'दामोदरत्वम्' इत्यादौ सम्बन्धस्यावाच्यत्वं 'दण्डित्वम्' इत्यादौ तस्य वाच्यत्वमिति वैषम्यमित्यर्थः। *सिद्धान्ते त्वितीति। एतदग्रे "जायन्ते इति वक्ष्यमाणशेषेणान्वितं, सिद्धान्ते प्रकृतिजन्यबोधप्रकारे त्वादयो जायन्ते इत्यर्थः स प्रकृतिजन्यबोधप्रकारः क इत्यत्र पद्यद्वयं स्थितमिति योजना" इति पाठो मुम्बापुरीस्थमुद्रितपुस्तकेऽधिक उपलभ्यते॥ २॥ (५०)

वाच्यता स्यादित्यत्रेष्टापत्तिमाह—धर्ममात्रमिति न तत्र लघुगुरुविचार इत्यभिप्रायः । * तत्तद्व्यक्तिविशिष्टब्रह्मसत्ताया एव घटत्वत्वादिरूपत्वात् ।

संबन्धिभेदात्सत्तैव विद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः* ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥

इति वाक्यपदीयात् । उक्तं च "तस्य भावस्त्वतलौ" [पा० सू० ५-१-११९] इति सूत्रे वार्तिककारैः—"यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ" इति । यस्य गुणस्य विशेषणतया भासमानस्य भावादाश्रयत्वात्, द्रव्ये विशेष्ये शब्दनिवेशः शब्दप्रवृत्तिस्तस्मिन्वाच्ये त्वतलावित्यर्थः । तथा च रूपादिशब्देभ्यो जातौ, शुक्लाणुदीर्घमहदादिभ्यो गुणे, पाचकादिशब्देभ्यः क्रियायाम्, घटादिशब्देभ्यो जातौ प्रत्ययः, रूपादिशब्दानां जातिप्रकारकबोधजनकत्वात् । पाचकादिशब्दानां क्रियाप्रकारकबोधजनकत्वे तस्यां प्रत्ययः, संसर्गप्रकारकबोधजनकत्वमिति मते च संसर्ग इति व्यवस्था सूपपादेति भावः । * तत्र जातिवाचकानां *व्यक्तय एव शक्यतावच्छेदिकाः । तथा च घटत्वमित्यत्र घटवृत्तिरसाधारणो धर्म इति बोध इत्यादि द्रष्टव्यम् ।

पक्षान्तरमाह—यद्वेति । "यद्वा सर्वे भावाः स्वेनार्थेन भवन्ति स तेषां भावः" इति वार्तिकोक्तो यद्वाशब्दस्तत्सूचनप्र-

---

* तत्तद्व्यक्तिविशिष्टब्रह्मसत्ताया इति । वैशिष्ट्यं च स्ववृत्तित्वेन बोध्यम् । *व्यवस्थिता इति । वाच्यवाचकसम्बन्धेनेति भावः । *तत्र—जात्यादिवाचकभावप्रत्ययमध्ये । *व्यक्तय इति । भावप्रत्ययप्रकृत्यर्थरूपा इत्यर्थः ।

योजनकोऽपि * । भवन्ति वाचकत्वेन प्रवर्तन्त इति भावाः शब्दाः स्वेन स्वरूपेणार्थेन भवन्ति प्रवर्तन्तेऽतः स तेषां भावः प्रवृत्तिनिमित्तमित्यर्थः । अयं भावः—अर्थवच्छब्दोऽपि द्रव्ये प्रकारः हरिहरनलेक्ष्वाकुयुधिष्ठिरवसिष्ठादिशब्देभ्यस्तत्तद्वाच्यः कश्चिदासीदिति शब्दप्रकारकबोधस्य सर्वसिद्धत्वात् । * अन्यथा वनौषधिवर्गादेर्नागरिकान्प्रत्यबोधकत्वापत्तेश्च । * एवमेवाप्रसिद्धार्थकपदेष्वनुभवः* सर्वसिद्धः, न तु घटादिपदेष्विव *तत्तज्जात्यादिरूपेण । तथा चो*भयमवच्छेदकम्* । यस्य *तथा शक्तिग्रहस्तस्य जात्यादिरूपेणैवोपस्थितिः । पदप्रकारकः शक्तिग्रहस्तु *विशिष्य नापेक्षितः किं तु इदं पदं क्वचिच्छक्तं साधुपदत्वादित्यादिरूप एवापेक्ष्यत इति विशिष्यागृहीतशक्तिकेभ्यः* तथैव बोधः । तथा च शब्दोऽपि त्वप्रत्ययार्थं इति प्रपञ्चितं भूषणे ॥ ३३ ॥ (५१३).

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे भावप्रत्ययार्थनिर्णयः ।

* प्रयोजनकोऽपीति । 'यद्वा' इत्यादिवार्तिकसूचनायेत्यर्थः । तद्वार्तिकप्रतीकमिदमिति तात्पर्यम् । *अन्यथा—शब्दानां प्रकारतया भानस्यानङ्गीकारे । *एवमेव—शब्दस्य प्रकारत्वेनैव । *अनुभवः—बोधः । *तत्तज्जात्यादिरूपेणेति । अत्र 'अनुभवः सिद्धः' इत्यनुषङ्गेण सम्बध्यते । *उभयम्—जात्यादि शब्दश्च । *अवच्छेदकम्—शक्यतावच्छेदकम् । एतदग्रे 'एवमेव प्रसिद्धपदार्थेषु' इत्यधिकं क्वचित्पुस्तके दृश्यते । *तथा—जात्यादिपुरस्कारेण । *विशिष्य—विशेषरूपेण । *तथैव—पदप्रकारक एव । शक्तिग्रहवैलक्षण्याद्बोधवैलक्षण्यमिति भावः ॥ ३३ ॥ (५१३)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां भावप्रत्ययार्थनिर्णयः समाप्तः ।

साऽस्य देवतेत्यत्र *देवताविशिष्टं देयं प्रत्ययार्थः । ऐन्द्रं वैश्वदेवीत्यादाविन्द्रादे*र्देवतात्वोपस्थापकान्तराभावात्तेन रूपेणो-पस्थितये शक्तिकल्पनावश्यकत्वात् ।

*अत एव—

आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः ।
आमिक्षापदसांनिध्यात्तस्यैव *विषयार्पणम् ॥

इति ।

*केवलादेवतावाची तद्धितोऽग्नेः समुच्चरन् ।
नान्ययुक्ताग्निदैवत्यं प्रतिपादयितुं क्षमः ॥

इति च मीमांसकैरप्युक्तमित्याशयेनाऽऽह—

प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम् । (५२)
अभेदश्चात्र संसर्ग आग्नेयादावियं स्थितिः ॥१॥
देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा ॥(५३)

---

*देवताविशिष्टं देयमिति । वैशिष्ट्यं च स्वोद्देश्यत्वसम्बन्धेन । तथा च देवतोद्देश्यकदानकर्मभूतं द्रव्यमिति तदर्थः । *देवतात्वो-पस्थापकेति । देवतात्वेन रूपेण इन्द्रादीनामुपस्थापकम् इन्द्रादिपदं नास्ति किन्तु इन्द्रत्वादिनेति तेन रूपेण देवतात्वेन इन्द्रादीना-मुपस्थितये तद्धितस्य देवतांशेऽपि शक्तिकल्पनमावश्यकमित्यर्थः । *अत एव—देवताविशिष्टद्रव्यार्थकत्वादेव ।

*तस्यैव—तद्धितस्यैव । *विषयार्पणमिति । "साऽस्य देवता" [पा० सू० ४–२–२४] इति सूत्रेण अस्येत्यर्थे तद्धितविधानात्सर्व-नाम्नो बुद्धिविशेषबोधकतया 'कोऽसौ विशेषः' इत्याकाङ्क्षायामा-मिक्षापदसांनिध्यादामिक्षारूपो विशेष इति लभ्यते इत्यर्थः ।

*केवलादिति । आग्नेय इत्यादावग्निशब्दमात्रादुच्चार्यमाणो देवतावाची ढक् प्रत्ययस्तद्धितसंज्ञकः सोमदेवताविशिष्टाग्निदेवता-

एकदेशो देवतारूपे । तच्च विशेषणमभेदेनेत्याह—अभेदश्चेति । ननु देवतायाः *प्रत्ययार्थैकदेशत्वान्न प्रकृत्यर्थस्य तत्राभेदेनाप्यन्वय इत्याशयेनाऽऽह—देवतायामिति । तथा च पदार्थैकदेशतैव नास्तीति भावः ॥ १३ ॥ (५३)

नन्वग्न्यादिदेवस्य प्रकृत्यैव लाभान्न तत्र शक्तिः कल्प्या । न च देवतात्वेन रूपेणोपस्थितये सा कल्प्यते प्रकृतेर्लक्षणयैव तथोपस्थितिसंभवात् । उपसर्गाणां द्योतकत्वनये प्रजपतीत्यत्र प्रकृष्टजपप्रत्ययवदित्यभिप्रेत्याऽऽह—

प्रदेय एव वा शक्तिः प्रकृतेर्वाऽस्तु लक्षणा ॥ २ ॥
देवतायां निरूढेति सर्वे पक्षा अमी स्थिताः ।(५४)

न चैन्द्रं दधीत्यादौ द्रव्यस्य पदान्तराल्लाभात्कुतः पुनः प्रत्ययस्य तत्र शक्तिः कल्प्यत इति वाच्यम् । पदान्तराश्रवणेऽपि तत्प्रतीतेरैन्द्रं दधीति सामानाधिकरण्याच्च । * अन्यथाऽऽख्यातस्यापि कर्तृकर्मवाचित्वं न स्यात्* । * मीमांसकानां पुनः प्रत्ययस्य देवतात्वमेवार्थोऽस्तु । द्रव्यं पदान्तराल्लभ्यते एवेति आख्यातस्य कर्तृवद्वाच्यत्वं माऽस्त्विति कुतो न शक्यते वक्तुमिति दिक् ।

सम्बन्धं बोधयितुं न समर्थः । तथा सति अग्निशब्दस्य सोमसापेक्षत्वेन "सापेक्षमसमर्थं भवति" इति असामर्थ्यात्तद्धित एव न स्यादित्यर्थः । *प्रत्ययार्थैकदेशत्वादिति । "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति न्यायेनेति भावः ॥ १३ ॥ (५३)

*अन्यथा—समभिव्याहृतपदेनैवार्थलाभात् तत्र शक्त्यस्वीकारे । *न स्यादिति । तत्रापि 'देवदत्तः' 'ओदनम्' इत्यादि समभिव्याहृतपदैरेव कर्तृकर्मलाभसिद्धेस्तत्रापि शक्तिकल्पनं न स्यादित्यर्थः । *मीमांसकानामिति । इदं दूषणं मीमांसकानामाख्यातस्य कर्तृकर्मावाचकत्वस्वीकारे प्रतिबन्दीरूपमिति तात्पर्यम् ॥ २३ ॥ (५४)

देवतायां देवतात्वरूपेण निरूढेत्यनुपपत्तिज्ञानपूर्वकत्वमनादिप्रयोगावच्छिन्नत्वं वा तत्त्वमिति भावः ॥ २½ ॥ (५४)

अनयैव रीत्याऽन्यत्राप्यवधेयमित्याह—

क्रीडायां णस्तदस्यास्तीत्यादावेषैव दिक् स्मृता ॥३॥
वस्तुतो वृत्तिरेवेति नात्रातीव प्रयत्यते ॥ (५५)

"तदस्यां प्रहरणमिति क्रीडायां णः" [पा० सू० ४-२-५७] इत्यत्र प्रहरणविशिष्टा क्रीडा *प्रहरणक्रीडे, क्रीडामात्रं चेत्यर्थः । आदिना "सोऽस्य निवासः" [पा० सू० ४-३-८९] "साऽस्मिन्पौर्णमासीति संज्ञायाम्" [पा० सू० ४-२-२१] "तदस्यास्त्यस्मिन्निति मतुप्" [पा० सू० ५-२-९४] इत्यादिकं संगृह्यते । वृत्तिमात्रेऽतिरिक्तशक्तेः "समर्थः पदविधिः" [पा० सू० २-१-१] इति सूत्राल्लाभादुक्तो विचारः शास्त्रान्तरीयैः सह *तद्रीत्यैवोक्तः । आरोपितप्रकृतिप्रत्ययार्थमादाय वा । वस्तुतो विशिष्टशक्त्यैवार्थोपस्थितेरित्याह—वस्तुत इति ॥ ३½ ॥ (५५)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे देवताप्रत्ययार्थनिर्णयः ॥

वृत्तिप्रसङ्गात्तत्राभेदैकत्वसंख्या प्रतीयत इति सिद्धान्तं दृष्टान्तेन प्रतिपादयति—

---

* प्रहरणक्रीडे—प्रहरणं च क्रीडा च ते इत्यर्थः । * तद्रीत्यैव—शास्त्रान्तररीत्यैव । विशिष्टशक्तिस्वीकारमनभ्युपगम्येत्यर्थः ॥ ३½ ॥ (५५)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां नेने-इत्युपाह्व-गोपालशर्मकृतायां देवताप्रत्ययार्थनिर्णयः ॥

अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः ।
कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद्यथोच्यते ॥१॥
(५६)

*संख्याविशेषाणामविभागेन सत्त्वमभेदैकत्वसंख्या ।

उक्तं च वाक्यपदीये—

यथौषधिरसाः सर्वे मधुन्याहितशक्तयः ।
अविभागेन वर्तन्ते तां* संख्यां *तादृशीं विदुः ॥ इति ।

परित्यक्तविशेषं वा *संख्यासामान्यं तत् ।

उक्तं च—

*भेदानां वा परित्यागात्संख्यात्मा स तथाविधः ।
व्यापाराज्जातिभागस्य भेदापोहेन वर्तते ॥

---

* संख्याविशेषाणामिति । एकत्वद्वित्वत्रित्वादीनाम् अविभागेन—अभेदेन संख्यात्वेनेत्यर्थः । सत्त्वं बोधविषयतयेति शेषः, न तु एकत्वत्वादिनेति भावः । * ताम्—वृत्तिघटकपदार्थगतामित्यर्थः । * तादृशीम्—अभेदैकत्वसंख्याम् । * संख्यासामान्यं तदिति । अस्मिन् मते च संख्यात्वेन संख्यासामान्यस्यैव भानं, न संख्याविशेषस्य; पूर्वमते तु संख्यात्वेनैव रूपेण एकत्वादिसंख्याविशेषाणां भानमिति तात्पर्यम् । न च "निर्विशेषं न सामान्यम्" इति न्यायेन तद्विशेषानालिङ्गितसामान्यस्यासत्त्वाद् द्वितीयपक्षोऽसम्भवीति वाच्यम् । वन्ध्यासुतः राहोः शिरः इति वद्विकल्पात्मकस्य संभवेनादोषात् ।

अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि ।

इत्युक्तेः । अत्र प्रमाणमाह—* भेदानामिति—भेदानाम् एकत्वादिकानाम् परित्यागात् सः वृत्तिभास्यः तथाविधः संख्यात्मा—अभेदैकत्वसंख्यारूपः जातिभागस्य संख्यात्वस्य व्यापारात् तेन रूपेण भानात् भेदापोहेन भेदस्य विशेषस्यैकत्वादेरपोहोऽग्रहस्तेन

*अगृहीतविशेषेण यथारूपेण रूपवान् ।
प्रख्यायते न *शुक्लादिः, भेदापोहस्तु गम्यते ॥ इति ।

अस्या वृत्तौ समासादौ भानं न्यायसिद्धमिति शेषः । इति मतस्थितिर्वैयाकरणानाम् । अयं भावः—राजपुरुष इत्यादौ राज्ञः राज्ञोः राज्ञां वाऽयं पुरुष इति जिज्ञासा जायते । विशेषजिज्ञासा च सामान्यज्ञानपूर्विकेति*सामान्यरूपेण तत्प्रतीतिः शब्दादावश्यकी । अतस्तस्यां शक्तिरिति । *तस्या *एकत्वेन प्रतीतौ न्यायमाह—*कपिञ्जलेति । बहुत्वगणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात्तद्रूपेणैव भानवदेकत्वस्य सर्वतः प्रथमोपस्थितत्वमस्तीति भावः ।

वर्तते । एकत्वत्वाद्यग्रहकालिकसंख्यात्वप्रकारकप्रतीतिगोचरः संख्यापदार्थोऽभेदैकत्वपदव्यपदेश्य इति समुदायार्थः । तत्र दृष्टान्तमाह—*अगृहीतेति । अस्य 'दूरस्थघटादिः' इत्यादि । न हि यथा शुक्लादिगुणानामविज्ञातरूपस्यासत्त्वेऽपि रूपत्वेनैव हि तद्गतरूपस्य भानं न तु शुक्लत्वकृष्णत्वादिना तथा प्रकृतेऽपीति बोध्यम् । *शुक्लादिः—शुक्लत्वादिरूपेण तत्तद्रूपविशिष्टः न प्रख्यायते ज्ञायते किं तु भेदापोहः भेदाग्रहो गम्यते इत्यर्थः । *सामान्यरूपेणेति । तथा च संख्यावद्राजसम्बन्धी पुरुषः इति बोधः ।

तस्याः संख्याया एकत्वत्वेनैव भानं न तु संख्यात्वसामान्येनेति मतान्तरमाह—*तस्या इति । *एकत्वेनेति । एकत्वत्वेनेत्यर्थः । *कपिञ्जलेतीति । अश्वमेधे हि "वसन्ताय कपिञ्जलानालभते" इति श्रुतम् । कपिञ्जलः चातकस्तित्तिरिर्वा । तत्र कपिञ्जलानिति बहुत्वश्रुत्या किं त्रित्वसंख्योपादेया चतुष्ट्वादिरपि वेति संशये त्रित्व-चतुष्ट्व-पञ्चत्वादीनां बहुत्वाविशेषादिच्छया या काचिदेका संख्या ग्राह्येति पूर्वपक्षे त्रित्वमनुपादाय चतुष्ट्वादीनामुपादातुमशक्यतया प्रथमं त्रित्वे गृहीते तावतैव शास्त्रस्य कृतार्थत्वात् तदन्यसंख्याग्रहणं ततोऽधिकपक्षिहिंसायां प्रत्यवायादिति मीमांसकैः सिद्धान्तितं कपिञ्जलाधिकरणे (जै० न्या० ११-अध्या०, १-पादः, ८—

वस्तुतस्तु *जिज्ञासैव नानुभवसिद्धा । तथात्वे वा ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावात्तत्तद्रूपेणैव वाच्यता स्यादिति ध्येयम् ॥ १ ॥ (५६)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारेऽभेदैकत्वसंख्याया वृत्तौ भाननिर्णयः समाप्तः ॥

संख्याप्रसङ्गादुद्देश्यविधेययोः संख्याविवक्षाविवक्षे निरूपयति—

लक्ष्यानुरोधात्संख्यायास्तन्त्रातन्त्रे मते यतः ।
पश्वेकत्वादिहेतूनामाश्रयणमनाकरम् ॥१॥ (५७)

ग्रहं संमार्ष्टीत्यत्रोद्देश्यग्रहगतमेकत्वमविवक्षितमितिवन्नास्माकमुद्देश्यविशेषणाविवक्षानियमः । धातोरित्येकत्वस्य विवक्षितत्वात् ।

उत्पद्येत समस्तेभ्यो धातुभ्यः प्रत्ययो यदि ।
तदा सर्वैर्विशिष्येत द्वन्द्वोत्पन्नसुबर्थवत् ॥

इति शब्दान्तराधिकरणे भट्टपादैरभिधानाच्च । "आर्धधातुकस्येड् वलादेः" [पा० सू० ७–२–३५] इत्यत्रानुवाद्यार्धधातुकविशेषणस्य वलादित्वस्य विवक्षितत्वाच्च । एवं पशुना यजेतेतिवद्विधेयविशेषणं विवक्षितमित्यपि न । "रदाभ्यां निष्ठातो नः पूर्वस्य च दः" [पा० सू० ८–२–४२] इत्यत्र नकारद्वयवि-

---

अधि०) * जिज्ञासेति । राज्ञः राज्ञोः राज्ञां वा पुरुषः इति जिज्ञासेत्यर्थः ॥ १ ॥ (५६)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायामभेदैकत्वसंख्याया वृत्तौ भाननिर्णयः ।

धानानापत्तेः । तथा च भिन्न इत्यत्र नकारद्वयलाभो न स्यात् । "आद् गुणः" [पा० सू० ६-१-८७] इत्यादावेकत्वविवक्षयैवोपपत्तौ "एकः पूर्वपरयोः" [पा० सू० ६-१-८४] इत्यत्रैकग्रहणवैयर्थ्यापत्तेश्चेति भावः । शब्दार्थस्तु—संख्याया लक्ष्यानुरोधात्तन्त्रातन्त्र* यतो मते, अतः *पश्वेकत्वाधिकरणोक्तहेतूनामाश्रयणं

---

*अविवक्षितमिति । ग्रहसंमार्जनाधिकरणे (पू० मी० अध्या० ३ पाद० १ अधि० ७) हि "दशापवित्रेण ग्रहं संमार्ष्टि" इति श्रुतौ 'ग्रहम्' इति द्वितीयैकवचनार्थैकत्वं विवक्षितं 'पशुना यजेत' इत्यत्रानेकपशुकरणकत्ववारणाय विधेयपशुगतैकत्वविवक्षणवद् उद्देश्यगतस्यापि तस्य तथात्वौचित्यात्, ग्रहशब्दस्य जातिवाचित्वेन तस्या एव संस्कार्यताप्रतीत्या तदाश्रयभूतस्य कस्यचिदपि द्रव्यस्य संस्कारेण सर्वगतजातेरेकत्वेन संस्कारसिद्धेरेकत्वाविवक्षणे बीजाभावाच्चेत्याशङ्क्य 'ग्रहम्' इति द्वितीयाश्रुत्या ग्रहस्योद्देश्यत्वावगतेः प्रयोजनत्वाच्च प्राधान्येन 'प्रति प्रधानं गुणावृत्तिः' इति न्यायेन प्रधानसंख्यानुरोधिगुणावृत्तेः सर्वसंमतत्वेन संमार्जयितव्यग्रहेयत्ताया अबुभुत्सितत्वात् श्रूयमाणस्याप्येकत्वस्याविवक्षणमेव ।

किञ्च ग्रहैकत्वविवक्षायां संमार्गोद्देशेन ग्रहस्य एकत्वस्य च विधाने वाक्यभेदापत्तिः । "प्राजापत्या नवग्रहाः" इत्यादिवाक्यैर्विहितग्रहानुवादेन संमार्गविधाने ग्रहं संमार्ष्टि तं चैकमिति वचनव्यक्तौ तस्य स्पष्टत्वात् । पशुदृष्टान्तस्त्वत्र न संघटते । न हि पशोस्तत्र प्राधान्यं किन्तु यागस्य । तथा च तत्रैकत्वेऽविवक्षिते गुणभूतपश्वनेकत्वानुरोधेन प्रधानस्य यागस्याऽऽवर्तनीयतापत्तिरिति तत्रैकत्वमविवक्षितम् । नाप्यत्र ग्रहशब्दो जातिवाची । जातेरमूर्तत्वेन संस्कार्यत्वासम्भवात् । तस्मादिहैकत्वमविवक्षितमिति मीमांसकैः सिद्धान्तितम् ।

* तन्त्रातन्त्रे—विवक्षाऽविवक्षे । * पश्वेकत्वाधिकरणेति । तत्र हि "अग्नीषोमीयं पशुमालभेत" इत्यत्र पशोरेकत्वं यागाङ्गं भवति । तस्य श्रुत्या पशुसम्बन्धावगमात् । 'पशुम्' इत्येतस्मिन्नेव पदे पशुतदेकत्वयोः श्रवणात् पदान्तरनैरपेक्ष्येण तयोः परस्परसम्ब-

नास्मत्सिद्धान्तासिद्धमिति। *आदिना *ग्रहैकत्वं ग्रहः ॥१॥ (५७)

ननु विधेयविशेषणविवक्षाऽऽवश्यकी। अन्यथा सुद्ध्युपास्य इत्यत्राऽनन्तयकाराद्यापत्तेः, भिन्नामित्यत्र नकारद्वयवद् *न्येषामप्यापत्तेः। "एकः पूर्वपरयोः" इत्यत्रैकग्रहणं च स्थानिभेदादादेशभेदवारणायेत्यभिप्रेत्याऽऽह—

विधेये भेदकं तन्त्रमन्यतो नियमो न हि।
ग्रहैकत्वादिहेतूनामाश्रयणमनाकरम् ॥२॥ (५८)

भेदकं—विशेषणं तन्त्रं—विवक्षितम्=विधेयविशेषणं विवक्षितमि*त्यस्तु, तथाऽप्यन्यतः-*अनुवाद्यस्य नियमो न हि। क्वचि-

---

न्धोऽवगम्यते। यागस्तु 'आलभेत' इत्यनेन पदान्तरेणोपात्त इति तत्र वाक्येन सम्बन्धावगतिः। वाक्याच्च श्रुतिर्बलीयसी। तत एकत्वस्य यागाङ्गत्वाभावाद् द्वाभ्यां बहुभिर्वा यागोऽनुष्ठातुं शक्यते इत्याशङ्क्य—'पशुम्' इति पदं यद्यप्येकम्, तथाऽपि प्रकृत्या पशुर्निर्दिष्टः, प्रत्ययेन च कारकम्, एकत्वं च। तत एकत्वस्यासन्नतरे कारके प्रथमं सम्बन्धो भवति। कारकत्वं च क्रियापेक्षमिति। तथा सति कारकद्वारा क्रियायामपि सम्बन्धः प्रत्ययेनैवावगतः। क्रियाविशेषश्च सन्निहितपदान्तरोपात्तो याग इति यज्ञाङ्गत्वमेकत्वस्य सिद्ध्यति। तच्चैकत्वं स्वयममूर्ततया यागक्रियां निष्पादयितुमसमर्थं सत्तत्र समर्थं पशुद्रव्यं पश्चादवच्छिनत्ति। अत एकत्वस्य यागाङ्गत्वान्न द्वाभ्यां त्रिभिर्वा यागसिद्धिरित्युक्तम्। तथा च तत्राधिकरणे [जै० न्या० अ०४ पा०१ अधि०५] उक्तानां हेतूनां समानप्रत्ययोपात्तत्वादीनामित्यर्थः। *आदिना—'पश्वेकत्वादि' इति कारिकास्थादिपदेन। * ग्रहैकत्वेति। तदधिकरणोक्तहेतूनां वाक्यभेदादीनामाश्रयणं नास्मत्सिद्धान्तसिद्धमिति भावः ॥ १ ॥ (५७)

*अन्येषाम्—तृतीयादिनकाराणाम्। * अस्तु इति। अस्य 'इत्यर्थः' इति शेषः। * अनुवाद्यस्येति। विशेषणविवक्षणे इत्यग्रे शेषः।

तन्त्रं क्वाचित्कोऽर्थः । हैकत्वादौ यो हेतुर्वाक्यभेदादिस्तस्यात्राऽऽश्रयणम*नाकरम् । एकत्वविशिष्टं धातुं वलादित्वविशिष्टमार्धधातुकं चोद्दिश्य प्रत्ययेडागमाद्*विधिसंभवादिति भावः ॥२॥(५८)

नन्वेवं* भिन्न इत्यत्र नकारद्वयलाभो न स्यादित्यत आह—

रदाभ्यां वाक्यभेदेन नकारद्वयलाभतः ।
क्षतिर्नैवास्ति तन्त्रत्वे विधेये भेदकस्य तु ॥३॥
(५९)

चकारसूचितं—'निष्ठातस्य नः, पूर्वस्य दस्य च नः' इति वाक्यभेदमादाय नकारद्वयलाभ इत्यर्थः ॥ ३ ॥ (५९)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे उद्देश्यविधेययोः संख्याविवक्षानिर्णयः समाप्तः ॥

क्त्वाप्रत्ययादेरर्थं निरूपयति—

अव्ययकृत इत्युक्तेः प्रकृत्यर्थे तुमादयः ।
समानकर्तृकत्वादि द्योत्यमेषामिति स्थितिः ॥१॥
(६०)

तुमादयस्तुमुन्नादयः । प्रकृत्यर्थे—भावे । आदिना क्त्वादेः

'अन्यत' इति सप्तम्यर्थे सार्वविभक्तिकस्तसिल् । *अनाकरमिति । अस्मत्सिद्धान्तसिद्धं नेत्यर्थः । *विधिसम्भवादिति । विधेःविधानस्य संभवाद् वाक्यभेदाभावादित्यर्थः ॥ २ ॥ (५८)

* एवं—विधेयविशेषणविवक्षानिश्रमे ॥ ३ ॥ (५९)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायाम् उद्देश्यविधेयगतसंख्याविवक्षानिर्णयः समाप्तः ॥

संग्रहः। भावे इत्यत्र मानमाह—अव्यय कृत इति। *"अव्ययकृतो भावे" इति वार्तिकादित्यर्थः। ननु "समानकर्तृकयोः पूर्वकाले" (पा० सू० ३-४-२१) इत्यादिसूत्राणां* का गतिस्तत्राऽऽह—समानकर्तृकत्वादीति। अयं भावः—भोक्तुं पचति, भुक्त्वा व्रजतीत्यादावेकवाक्यता सर्वसिद्धा भोजनपाकक्रिययोर्विशेषणविशेष्यभावमन्तरेणानुपपन्ना। *अन्यथा *भुङ्क्ते व्रजतीत्यादावप्येकवाक्यतापत्तेः। तथा च *तयोर्विशेषणविशेष्यभावनिरूपकः संसर्गो जन्यत्वं,*सामानाधिकरण्यं, *पूर्वोत्तरभावो,*व्याप्यत्वं चेत्यादिरनेकविधः। तथा च भोक्तुं पचति, भुक्त्वा तृप्त इत्यादौ भोजनजनिका पाकक्रिया, भोजनजन्या तृप्तिरिति बोधः। *अत एव जलपानानन्तर्यस्य तृप्तौ सत्त्वेऽपि पीत्वा तृप्त इति* न प्रयोगः। सामानाधिकरण्यस्यापि संसर्गत्वेन अर्थात् समानकर्तृकत्वमपि लब्धम्। भुक्त्वा व्रजतीत्यादौ पूर्वोत्तरभावः सामानाधिकरण्यं च संसर्ग इति भोजनसमानाधिकरणा तदुत्तरकालिकी व्रजनक्रियेति बोधः*।

अव्ययकृतो भावे इति। अव्ययसंज्ञाप्रयोजकाः कृत्प्रत्ययाः भावेऽर्थे भवन्तीति तदर्थः। *सूत्राणामिति। 'क्त्वादिप्रत्ययानां पूर्वकालादिरूपार्थकत्वमिति बोधकानाम्' इति शेषः। *का गतिरिति। "अव्ययकृतो भावे" इति वार्तिकेन भावस्यैव तदर्थत्वबोधनादिति भावः। *अन्यथा—विशेष्यविशेषणभावं विनाऽप्येकवाक्यत्वोपगमे। *भुङ्क्ते व्रजतीति। अत्र द्वयोराख्यातयोः (तिङन्तयोः) "भावप्रधानमाख्यातम्" इति सिद्धान्तादविशेष्यत्वमिति न विशेष्यविशेषणभाव इति बोध्यम्। *तयोः—'भोक्तुं पचति' 'भुक्त्वा व्रजति' इत्यादौ भोजन-पाकव्रजनान्यतरक्रिययोः। *सामानाधिकरण्यम्। एककर्तृवृत्तित्वम्। * पूर्वोत्तरभावः—विशेषक्रियोत्तरकालिकत्वम्। *व्याप्यत्वम्। अविनाभावित्वम्। * अत एव—जन्यत्वस्य संसर्गत्वस्वीकारादेव। * न प्रयोग इति। जलपानमात्रेण तृप्तेरदर्शनात् तृप्तौ जलपानजन्यत्वस्यासम्भवात्। *बोध इति। भोजन-

*अधीत्य तिष्ठति, मुखं व्यादाय स्वपितीत्यादौ चाध्ययनव्यादानयोरभावकाले ऽप्रयोगाद्यदा यदाऽस्य स्थितिः, स्वापश्च; तदा तदाऽध्ययनं मुखव्यादानं चेति*कालविशेषावच्छिन्नव्याप्यत्वबोधाद्व्याप्यत्व सामानाधिकरण्यं च संसर्गः । एवं चा*न्यलभ्यत्वान्न सूत्रात्*तेषां *वाच्यतालाभ इति युक्तमव्ययकृतो भाव इति । एवं च प्रकृत्यर्थक्रिययोः संसर्गे तात्पर्यग्राहकत्वरूपं द्योतकत्वं क्त्वादीनाम् । * अत एव " समानकर्तृकयोः " [पा० सू० ३--४--२१] इति सूत्रे 'स्वशब्देनोपात्तत्वान्न'इति *भाष्यप्रतीकमादाय पौर्वापर्यकाले द्योत्ये क्त्वादिर्विधीयते न तु विषय इति भाव इति कैयटः ।

यत्तु—समानकर्तृकयोरिति सूत्रात्समानकर्तृकत्वं क्त्वावाच्यम् । अन्यथा "ओदनं पक्त्वाऽहं भोक्ष्ये" इत्यत्र मयेति तृतीयाप्रसङ्गाच्च । न चाऽऽख्यातेन कर्तुरभिधानान्न सेति वाच्यम् । भोजनक्रियाकर्तुरभिधानेऽपि पाकक्रियाकर्तुस्तदभावात्*। अनभिहिते भवतीति*पर्यु-

---

क्रियाश्रयवृत्तिनी भोजनोत्तरकालिकी च व्रजनक्रियेत्यर्थः । व्याप्यत्वस्य संसर्गत्वे मानमाह—* अधीत्येति । *कालविशेषावच्छिन्नव्याप्यत्वबोधादिति । स्थितौ तत्कालिकाध्ययनव्यापारव्याप्यत्वबोधादित्यर्थः । * अन्यलभ्यत्वादिति । आकाङ्क्षाभास्यत्वादित्यर्थः । * तेषाम्—अव्ययत्वादीनाम् '*वाच्यतेति । क्त्वादिप्रत्ययवाच्यतेत्यर्थः । * अत एव—अव्ययत्वसमानकर्तृकत्वादीनामन्यलभ्यत्वादेव । * भाष्यप्रतीकमिति । इह कस्मान्न भवति 'पूर्वं भुङ्क्ते पश्चाद् व्रजति' इति ?, स्वशब्देनोपात्तत्वान्न भवति" इत्यत्रत्य भाष्यप्रतीकमित्यर्थः ।

* सा । तृतीया । *तदभावादिति । पाकक्रियाकर्तृत्वशक्तेरभिधानाभावादित्यर्थः । एवं पूर्वत्रापि भोजनक्रियाकर्तृत्वशक्तेरित्येवार्थः । तेन द्वयोरपि क्रिययोः कर्त्रैक्येन नासङ्गतिरिति भावः । * पर्युदासाश्रयणादिति । " अनभिहिते " [पा० सू० २-३-१]

दासाश्रयणात् । *अत एव प्रासादे आस्त इत्यत्र प्रसादनक्रियाधि-करणस्याभिधानेऽप्यस्तिक्रियाधिकरणस्यानभिधानात्सप्तमीति;—तन्न। *सूत्रात्तस्य* वाच्यत्वालाभात् । समानकर्तृकयोः क्रिययोः पूर्वकाले क्त्वेत्येव तदर्थात् । अन्यथा समानकर्तरीत्येव सूत्रन्यासः स्यात् । * तृतीयापादनं त्वाख्यातार्थक्रियायाः प्रधानभूतायाः कर्तुरभिधानात्प्रधानानुरोधेन* गुणे कार्यप्रवृत्तेर्न संभवति ।

उक्तं च वाक्यपदीये—

* प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥
* प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।

इति सूत्रस्य कर्तृत्वादावनभिहिते तत्तद्विभक्तिरित्यर्थेन 'पच'-धात्वर्थक्रियानिरूपितकर्तृत्वशक्तेरनभिधानस्य सत्त्वेन सूत्रप्रवृत्तौ तृतीयाप्रसङ्ग इति तदाशयः। ननु प्रसज्यप्रतिषेधे कर्मत्वादे-रभिधाने न द्वितीयादिविभक्तिरिति सूत्रार्थस्य सत्त्वेन वस्तुतो भोजनक्रियाकर्तुरेव पाककर्तृत्वेऽपि तस्याऽऽख्यातेनोक्ततया निषेध-प्रवृत्तेर्न तृतीयाप्रसङ्ग इत्यभिप्रेत्य पर्युदासत्वमेव "अनभि-हिते" इति सूत्रस्याऽऽश्रयणीयमिति द्रढयति—* अत एवेत्यादि-ना । * सूत्रात्—" समानकर्तृकयोः पूर्वकाले" इति सूत्रात् । * तस्य—कर्तुः । * तृतीयापादनन्तु—तृतीयाप्रसङ्गरूपापत्तिर-पीत्यर्थः । अप्यर्थस्तुरित्याशयः । *प्रधानानुरोधेनेति । क्त्वातुमु-नाद्यन्वयिक्रियानिरूपितशक्तेः स्वसमानाधिकरणगुणभूतक्त्वातुमु-नादिप्रकृत्यर्थनिरूपितशक्तेः स्ववदभिहितत्वेनानभिहितत्वेन वा प्रकाशकत्वस्वाभाव्यात् तदनुरोधेनैव विभक्तिरिति भावः ।

* प्रधानेतरयोरिति । प्रधानाप्रधानक्रियानिरूपितशक्तिद्वयं यत्रै-कस्मिन् द्रव्ये तत्र गुणाश्रया—गुणक्रियानिरूपिता शक्तिः प्रधानं—प्रधानक्रियानिरूपितां शक्तिमनुरुणद्धि' इति पूर्वकारिकाऽर्थः । तमेवा-नुरोधं दर्शयति—*प्रधानविषयेति । यदा प्रधानविषया प्रधानक्रि-

यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते ॥ इति ।

* किं चान्यथा कर्मणोऽपि क्त्वार्थतापत्तिः "पक्त्वौदनो मया भुज्यत" इत्यत्र द्वितीयायाः प्रकारान्तरेणावारणात्, इत्यास्तां विस्तरः ॥ १ ॥ (६०)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे क्त्वाद्यर्थनिर्णयः समाप्तः ।

* सिद्धान्तनिष्कर्षमाह—

वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः ।
साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः ॥१॥
(६१)

यानिरूपिता शक्तिः कर्तृत्वादिरूपा प्रत्ययेन आख्यातेनाभिधीयते, तदा गुणे गुणक्रियानिरूपिताऽनुक्ताऽपि तद्वत् उक्तवत् प्रतीयते भासते। उपलक्षणमेतत्—यदा प्रधानक्रियानिरूपिता शक्तिरनुक्ता तदा गुणनिरूपितोक्ताप्यनुक्तवद् भासत इत्यर्थस्य। तृतीयाद्विधिय कर्तुर्वाच्यत्वाङ्गीकारे तत्तुल्यन्यायेन 'पक्त्वौदनो मया भुज्यते' इत्यत्र प्रधानभुजिक्रियाकर्मण आख्यातेनाभिधानेऽपि पचिकर्मणोऽनुक्ततया- ओदनपदाद् द्वितीयावारणाय कर्मणोऽपि क्त्वावाच्यत्वापत्तिरित्याह—*किञ्चेति ॥ १ ॥ (६०)

इतिश्री सरलानामकवैयाकरणभूषणसारटीकायां क्त्वाद्यर्थनिर्णयः ॥

अथ पूर्वं धात्वर्थादिनिर्णयेषु प्रकृतिप्रत्ययान्यतरस्य पृथग्वाचकत्वमुक्तं, तदनुपपन्नम् । क्रमिकाशुविनाशित्वेन वर्णसमूहरूपे तत्र शक्तिग्रहस्यासम्भवात् । तथा च तत्र तत्र शक्तिग्राहकव्याकरणशास्त्रस्यैतस्याप्रामाण्यप्रसङ्ग इत्याशङ्कां निराकर्तुमाह—* सिद्धान्त इति ।

यद्यपि * वर्णस्फोटः पदस्फोटो वाक्यस्फोटो *ऽखण्डपदवाक्यस्फोटौ *वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति वाक्यग्रहणमनर्थकं *दुरर्थकं च, तथाऽपि वाक्यस्फोटातिरिक्तानामन्येषामवास्तवत्वबोधनाय तदुपादानम् * । एतदेव ध्वनयन्नाह—अतिनिष्कर्ष इति । मतस्थितिर्वैयाकरणानां महाभाष्यकारादीनाम् । तत्र क्रमेण सर्वांस्तान्निरूपयन्वर्णस्फोटं प्रथममाह—साधुशब्द इति । * साधुशब्दानन्तर्गता वाचका न वेति

---

* वर्णस्फोट इति । स्फुटति प्रकाशतेऽर्थोऽस्मादिति स्फोटः । वर्णानां स्फोटः वाचकः शब्दो वर्णस्फोटः । एवं पदस्फोट इत्यादीनामप्यर्थो बोध्यः । एतेन श्रावणप्रत्यक्षविषयककारादिवर्णातिरिक्तस्तदभिव्यञ्जकः कश्चित् स्फोटशब्दाभिलप्यमानो वर्तते इति ध्वनितम् । एतदुपपादनं चान्यत्र स्पष्टम् इति विस्तरेणाक्तम् । * अखण्डपदवाक्यस्फोटौ—अखण्डपदस्फोटः अखण्डवाक्यस्फोटश्चेत्यर्थः । * वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इति । वर्णजातिस्फोट-पदजातिस्फोट-वाक्यजातिस्फोटा इत्यर्थः । * अनर्थकमिति । सर्वेषां स्फोटानां सिद्धान्तसिद्धत्वेन वाक्यपदस्य व्यावर्त्याभावादिति भावः । * दुरर्थकमिति । वाक्यग्रहणेनेतरस्फोटव्यावृत्त्यापत्तेश्च विरुद्धार्थकमित्यर्थः । * तदुपादानमिति । परे तु वाक्ये वाक्यैकदेशन्यायेन 'पिण्डम्' 'पिधेहि' इत्येतन्मात्रादपि लोकेऽर्थबोधदर्शनात्पदस्फोटस्यापि वाक्यस्फोटघटकत्वानुभवेन कारिकायां वाक्यपदस्य पदोपलक्षणपरत्वमेव । अत एव सर्वेषां तेषां क्रमेण निरूपणं संगच्छते । न हि मिथ्यापदार्थानां शशशृङ्गादीनां निरूपणं क्वचिद् दृश्यते इति, इत्याहुः ।

* साधुशब्दानन्तर्गता इति । साधुशब्दघटकस्मारिता इत्यर्थः । अन्यैरपि घटादिसाधुशब्दान्तर्गतघकारादीनां वाचकत्वाभ्युपगमेन साधुशब्दानन्तर्गतत्वं पक्षतावच्छेदकं विवक्षितमित्या-

* विप्रतिपत्तिः । * विधिकोटिरन्येषां, * नेति वैयाकरणानाम् । साधुशब्दे पचति राम इति प्रयुज्यमानेऽन्तर्गतास्तिब्विसर्गादय एव बोधका वाचकास्तेषामेव शक्तत्वस्य प्रागव्यवस्थापितत्वान्न तु तैः स्मृता लादयः स्वाद्यश्चेत्यर्थः ॥ १ ॥ (६१)

ये—तु प्रयोगान्तर्गतास्तिबादयो न वाचकास्तेषां *बहुत्वेन शक्त्यानन्त्यापत्तेः । * एधांचक्रे * ब्रह्मेत्यादावादेशभूतलुगादेरभावरूपस्य बोधकत्वासंभवाच्च, किंतु तैः स्मृता लकाराः स्वाद्यश्च वाचकाः । लत्वस्य *जातिरूपतया शक्ततावच्छेदकत्वौचि-

---

त्यः । * विप्रतिपत्तिरिति । संशयजनकं वाक्यमित्यर्थः । *विधिकोटिरिति । वाचका इति तदर्थः । * अन्येषां— नैयायिकादीनाम् ॥ १ ॥ (६१)

* बहुत्वेनेति । लकारस्थान्यपेक्षया बहुत्वेनेत्यर्थः । ननु तिबादिस्मृतस्थानिनां वाचकत्वस्वीकारे शक्त्यानन्त्याभावेऽपि स्मृतिजनकानां तिबादीनामानन्त्येन ततो जायमानस्मृतीनामानन्त्यापत्तिस्तदवस्थैवेत्यत आह—* एधांचक्रे इति । अत्र हि लिडादेशानाम् "आमः" [पा० सू० २-४-८१] इति सूत्रेण लुक् । लुकश्चाभावरूपतया जनकतायाश्च अभावेन क्वचिदपि बोधादर्शनाद् भावनिष्ठत्वेन अभावादेशेऽसम्भवादित्यर्थः । ननु एधांचक्रे इत्यत्र अनुप्रयुज्यमानकृञ्धातूत्तरलिडादेशेनैव एधधात्वर्थाश्रयस्य बोध इति प्रकृते आदेशानां वाचकतापक्षेऽपि न दोषः । स्पष्टं चेदम्—"आमः" (पा० सू० २-४—८१) इति सूत्रे भाष्ये । तत्र हि 'किं पुनर्लुग् आदेशापवाद आहो स्वित् कृतेष्वादेशेषु भवति ?, लुग् आदेशानामपवादः । (एवं तर्हि) तिङ्कृतस्य पदत्वस्याभावः प्राप्नोति । सुबन्तत्वात्सिद्धम्" इत्युक्तम् । तथा च आदेशोत्तरं लुकि कारकसंख्यावगमो न ततः प्राप्त इति फलभेदस्य सत्त्वेऽपि अपवादत्वबोधकभाष्यप्रामाण्यादनुप्रयुज्यमानधातूत्तरप्रत्यये तदर्थावगतिरिति कल्पनादिति तात्पर्यमित्युच्यते । तथा च प्रकृते न दोष इति दोषान्तरमाह—*ब्रह्मेति ।

* जातिरूपतयेति । लडादिसर्वलकारेषु 'ल' इत्यनुगतप्र-

त्यात्, * अव्यभिचाराच्च। आदेशानां भिन्नतया परस्परव्यभिचारित्वात् *। * "लः कर्मणि" [पा० सू० ३-४-६९] इत्याद्यनुशासनानुगुण्याच्च। न ह्यादेशेष्वर्थबोधकमनुशासनमुपलभामहे इत्याहुः, तान् * स्वसाधकयुक्तिभिर्निराचष्टे—

व्यवस्थितेर्व्यवहृतेस्तद्धेतुन्यायतस्तथा।
किं चाऽऽख्यातेन शत्राद्यैर्लडेव स्मार्यते यदि ॥२॥
कथं कर्तुरवाच्यत्ववाच्यत्वे तद्विभावय। (६२)

व्यवस्थानुरोधात्प्रयोगान्तर्गता एव वाचका न तु तत्स्मृता इत्यर्थः। * तथा हि–पचतीत्यादौ लकारमविदुषो* बोधान्न *तस्य वाचकत्वम्। न च तेषां तिङ्क्षु शक्तिभ्रमाद्बोधः। तस्य भ्रमत्वे * मानाभावात्। *आदेशिनामपि तत्त*द्वैयाकरणैः स्वेच्छया

तीत्यां लत्वजातिसिद्धिर्बोध्या। आदेशानां वाचकत्वपक्षे तु तेषां नानात्वेन शक्ततावच्छेदकतत्तदानुपूर्वीणामपि नानात्वं स्पष्टमेव। *अव्यभिचाराच्चेति। 'पपाच चक्रे' 'ब्रह्म' इत्यादौ प्रत्ययस्य लुका लुप्तत्वेऽपि तत्र स्थानिस्मरणेन प्रत्ययार्थबोधात्पूर्वं लकारादिज्ञानस्य नियमेन स्वरसाद्व्यभिचाराभाव इति बोध्यम्। * परस्परव्यभिचारित्वादिति। सर्वेषामपि आदेशानां तत्तदर्थबोधे कारणत्वे तदन्यतमादेशेनार्थबोधस्थलेऽन्येषामसत्त्वात्तत्र व्यभिचार इत्यर्थः। ननु तद्दोषवारणाय तत्तदादेशज्ञानाव्यवहितोत्तरकालिकतदर्थबोधं प्रति तत्तदादेशः कारणमित्यव्यवहितोत्तरत्वस्य कार्यतावच्छेदककोटौ प्रवेशेन नोक्तव्यभिचार इत्यरुचेराह—* लः कर्मणीति। * स्वसाधकेति। स्वपक्षसाधकेत्यर्थः।

व्यवस्थां दर्शयति—*तथा हीति। * अविदुषः—अजानतः। *बोधात्—आश्रयरूपार्थविषयकबोधात्। * तस्य—लकारस्य। *मानाभावादिति। तथा बोधोदयेन तिङ्क्षु वाचकत्वस्याबाधितत्वात्। बाधज्ञानं विना भ्रमत्वस्य वक्तुमशक्यत्वात्। *आदेशानाम् लकारस्थादीनाम्। *वैयाकरणैः–शाकटायन प्रभृतिभिः। *भिन्न-

*भिन्नभिन्नाना*मभ्युपगमात्कः *शक्तः को नेति व्यवस्थानापत्तेश्च। सर्वेषां शक्तत्वे गौरवं *व्यभिचारश्चास्त्येवं । आदेशानां प्रयोगान्तर्गततया नियतत्वाद् युक्तं तेषां शक्तत्वम् । तथा चाऽऽदेशिस्मरणकल्पना नेति लाघवम् । साधकान्तरमाह—व्यवहृतेरिति । व्यवहारस्तावच्छक्तिग्राहकेषु *मुख्यः । स च श्रूयमाणतिङादिष्वेवेति *त एव वाचका इत्यर्थः । *किं च—तद्धेतुन्यायत इति । *लकारस्य बोधकत्वे 'भू-ल' इत्यतोऽपि बोधः स्यात् । *तादृशे बोधे भवतीति*समभिव्याहारोऽपि कारणमिति चेत्तर्ह्यावश्यक-

---

भिन्नानाम्—सुः रुः सिः इत्यादीनाम् ।*अभ्युपगमात्—स्थानित्वेन स्वीकारात् । *कः शक्त इति । सुः शक्तः, रुः शक्तः, सिः शक्तो वेत्यर्थः । *गौरवमिति । विसर्गादीनामादेशानां वाचकत्वपक्षापेक्षया प्रत्यादेशनिरूपितस्थानिनां बहुत्वाद्गौरवं स्पष्टमेव । *व्यभिचार इति । सुस्थानितोऽर्थजननवेलायां रुस्थानिनः सिस्थानिनो वा अभावाद् व्यभिचारः । एवं क्रमेण सर्वेषां व्यभिचारः स्थानिनां वाचकत्वपक्षेऽपि बोध्यः । आदेशानां तु नियतत्वान्न व्यभिचार इति । एवं चात्र पक्षे आदेशानामेव वाचकतया न ततः स्थानिकल्पनागौरवमपि । *मुख्य इति । इतरानपेक्षत्वरूपमुख्यत्वं व्यवहारस्य बोध्यम् । व्याकरणादीनां तु न तथात्वम् । कर्मण्यणित्यादिनाऽणादिप्रत्ययस्य शक्तिग्रहे कर्मादिशब्दशक्तिग्रहोऽपेक्ष्यते, स चेच्छब्दान्तरेण, तस्यापि शब्दस्य शब्दान्तरेणैव शक्तिग्रह इत्यभ्युपगमेऽनवस्थाप्रसङ्ग इति । * ते एव—तिङादय एव । ननु व्यवहारेण तिङ्क्षु गृह्यमाणाऽपि शक्तिर्लाघवादादेशिनि व्यवस्थाप्यते, नतु तिङ्क्षु गौरवात् वाक्ये गृहीतशक्तेः पदे व्यवस्थापनवत् अनेककारणकल्पनागौरवं तु फलमुखत्वान्न दोषावहमित्यस्वरसादाह—*किं चेति । लाघवमूलकश्चायं न्यायः तद्धेतोरेव तत्त्वे किं तेनेति । एककर्तृकवर्तमानकालिकसत्तारूपे इत्यर्थः । *समभिव्याहारोऽपीति । भूधातुविशिष्टशक्तिविशिष्टतिशब्दरूपवहितोच्चरत्वसम्बन्धेन

तमेव व्युत्पादयति—* लकारस्येति । *तादृशे दोषे ।

त्वादस्तु *तादृशसमभिव्याहारस्यैव वाचकत्वशक्तिः । * अन्यथा लकारस्य वाचकत्वं * समभिव्याहारस्य कारणत्वं चेत्युभयं कल्प्यमिति गौरवं स्यात् । तथा च तादृशसमभिव्याहारः समभिव्याहृता वर्णा वेत्यत्र विनिगमकाभावात् * प्रयोगान्तर्गता वर्णा वाचका इति सिध्यतीति भावः । अपि च लकारस्यैव वाचकत्वे कृत्तिङोः * कर्तृभावनावाचकव्यवस्था स्वसिद्धान्तसिद्धा न स्यादित्याशयेनाऽऽह—किं चेति । आदेशानां वाचकत्वे तिङ्त्वेन भावनायां मानत्वादिना कर्तरि शक्तिरित्युपपद्यते विभाग इति भावः । न च शानजादौ * कृतिर्लकारार्थ आश्रयः शानजर्थ इत्यस्तु "कर्तरि कृत्" [पा० सू० ३-४-६७] इत्यनुशासना-

---

समभिव्याहार इत्यर्थः । तथा च भूल् इत्यत्र तादृशसमभिव्याहारस्यासत्वान्न दोषः । न च असाधुत्वज्ञानेनैवादोषसिद्धिः शक्तत्वरूपसाधुताया अपि सत्वादपभ्रंशादपि बोधोदयेन तदीयज्ञानस्य बोधेऽप्रतिबन्धकत्वाच्चेति भावः । 'भवति' इति समुदायः कारणमिति तत्त्वम् ।

* तादृशसमभिव्याहारस्यैवेति । तथा च समभिव्याहारस्य चाऽऽदेशरूपत्वादादेशानामेव वाचकत्वं फलितम् ।

* अन्यथा—आदेशानां बोधकत्वाऽनङ्गीकारे । *समभिव्याहारस्य वर्णसमूहस्य । * प्रयोगान्तर्गता वर्णा इति । न च वर्णानां वाचकत्वे प्रत्येकं वर्णाद् बोधापत्तिरिति वाच्यम् । समभिव्याहृतयावद्वर्णेषु वाचकताऽभ्युपगमेनादोषात् । एकस्मिन्नेव वर्णे अकारादौ शक्त्यनुशासने तु तावन्मात्राद् बोधो भवतीति तस्य शक्तत्वमपीष्टमेवेति दिक् । *कर्तृभावनेति । कृतः कर्तृवाचकत्वं तिङो भावनावाचकत्वमिति व्यवस्थेत्यर्थः । * कृतिर्लकारार्थ इति (लकारस्य) स्थानिन एव वाचकत्वाभ्युपगमेऽपि 'कर्तरि कृत्' (पा० सू० ३-४-६७) इत्यनुशासनबलाच्छानजाद्यादेशानामेवात्र कर्तृरूपोऽर्थ इति

दिति शङ्क्यम्। स्थानार्थेन * निराकाङ्क्षतया शानजादौ कर्तरी-त्यस्याप्रवृत्तेः। अन्यथा घञादावपि प्रवर्तेत ॥ २½ ॥ (६२½)

देवदत्तः पचमान इत्यादिसामानाधिकरण्यानुरोधाच्छानचः कर्ता वाच्यः स्यादित्याशङ्क्याऽऽह—

तरबाद्यन्ततिङ्क्वास्ति नामता कृत्स्विव स्फुटा॥(६३)
नामार्थयोरभेदोऽपि तस्मात्तुल्योऽवधार्यताम् ॥

पचतितरां मैत्रः, पचतिकल्पं मैत्र इत्यादिषु *नामार्थत्वाभेदा-न्वययोः संभव एवेति कर्तृवाचकता स्यादिति भावः। न च पच-तिकल्पमित्यत्र सामानाधिकरण्यानुरोधात्कर्तरि लक्षणा। पचमान इत्यत्राप्यापत्तेः; इति लः कर्मणीत्यनुशासनं च लाघवाय कल्पिते लकारे कर्त्रादिवाचित्वं कल्पितमादायेत्युक्तम् ॥ ३½ ॥ (६३½)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे स्फोटवादे वर्णस्फोटनिरूपणं समाप्तम्।

वदाशयः। * निराकाङ्क्षतयेति। अस्य 'अर्थांशे' इति शेषः। २½ ॥ (६२½)

* नामार्थत्वाभेदान्वयेति। तद्धितान्तत्वेन "कृत्तद्धित" [पा० सू० १—२—४६] इति प्रातिपदिकत्वेन तदर्थस्य नामार्थत्वं, नामार्थयो-रभेदसंसर्ग"इतिव्युत्पत्तेश्चाभेदान्वय इति। सामानाधिकरण्यस्य कर्तृ-वाचकतायां तन्त्रत्वेऽत्राप्याख्यातस्य कर्तृवाचकता स्यात्। न चेयं संभ-वेति सामानाधिकरण्यस्य तन्त्रत्वं वक्तुमशक्यमित्यर्थः। ॥३½॥(६३½)

इतिश्री सरलानामकवैयाकरणभूषणसारटीकायां नेने-इत्युपाख्यगोपालशर्मकृतौ स्फोटवादे वर्णस्फोटनिरूपणम्॥

अथाऽऽदेशा वाचकाश्चेत्पदस्फोटस्ततः स्फुटः ॥४॥(६४)

एवमादेशानां वाचकत्वे सिद्धे पदस्फोटोऽपि सिद्ध एवेत्याह—अथेत्यादि। आदेशास्तिङ्विसर्गादयः। अयं भावः—समभिव्याहृतवर्णानां वाचकत्वे सिद्धे *तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिध्यति। प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात्प्रत्येकं वर्णानामर्थवत्त्वेन प्रातिपदिकत्वापत्तौ "नलोपः प्रातिपदिकान्तस्य" [पा० सू० ८-२-७] इत्यादिभिर्धनं वनमित्यादौ *नलोपाद्यापत्तिश्च। *एतच्च—*चरमवर्ण एव वाचकत्वशक्तिः शक्तेर्*व्यासज्यवृत्तित्वे *मानाभावात्पूर्वपूर्ववर्णानुभवजन्यसंस्काराश्चरमेणा*र्थधीजनने सहकारिण इति न तन्मात्रोच्चारणादर्थधीरिति वर्णस्फोटवादिनां मतान्तरदूषणायोक्तम्। रामोऽस्तीति वक्तव्ये रामित्यनन्तरं

---

* तादृशवर्णसमभिव्याहारेति। वाचकताश्रयवर्णसमुदायेत्यर्थः। * नलोपाद्यापत्तिश्चेति। स्वादिविभक्तिश्रवणं तु न सम्भवति। समुदायस्य प्रातिपदिकत्वेनावयवेभ्य उत्पन्नस्वादीनां तदवयवत्वेन "सुपो धातु"[पा० सू०२—४—७१]इतिलुक्सम्भवात्। वस्तुतस्तु नलोपापत्तिरपि नापादयितुं शक्या। सुबन्तस्य पदत्वेन "ङ्योः"इत्याद्येकवाक्यतया स्वादीनां संख्यार्थंप्रातिपदिकादेव विधानसम्भवेन प्रतिवर्णं संख्याया अनुपस्थितेस्तदवाचकत्वेन ततः सुबनुत्पत्तेः पदत्वाभावात्। किंतु अनुभवविरुद्धार्थस्मरणापत्त्या वर्णव्यत्ययोपजनादिसंस्वेऽपि 'तर्कुः' 'रज्जुः' इत्यादौ अर्थान्तरानवगत्या गौरवेण च न प्रत्येकं वर्णानां वाचकत्वमिति। स्पष्टं चेदं "अइउण्" सूत्रे भाष्ये।

* एतच्च—तद्वाचकपुरःसरं समभिव्याहारवाचकत्वसमर्थनं चेत्यर्थः। * चरमवर्ण एवेति। प्रकृत्यादिघटकेचरमवर्णोच्चारणे पूर्ववर्णानामसत्त्वादिति भावः। * व्यासज्यवृत्तित्वे—समुदायवृत्तित्वे। * मानाभावादिति। चरमवर्णानुभवोत्तरमेवार्थबोधोदयेन तत्रैव वाचकत्वविश्रान्तिरिति भावः। * अर्थधीरिति। एत-

घटिकोत्तरमकारोच्चारणे *ऽर्थबोधापत्त्या * तादृशानुपूर्व्या एव शक्तता-वच्छेदकत्वौचित्यादिति दिक् ॥ ४ ॥ (६४)

सुप्तिङन्तं पदमिति * परिभाषितपदस्य वाचकत्वस्वीकर्तॄणां मतमाह—

घटेनेत्यादिषु न हि प्रकृत्यादिभिदास्थिता ॥
वस्नसादाविहापि संप्रमोहो हि दृश्यते ॥५॥(६५)

घटेनेत्यादौ "घटे" इति प्रकृतिः, 'न' इति प्रत्ययः; 'घट्' इति प्रकृतिः 'एन' इति प्रत्यय इति *विभागस्य "सर्वे सर्वपदादेशाः" इति स्वीकारे *विशिष्य प्रकृतिप्रत्यययोर्ज्ञानासंभवान्न वाचकत्वमित्यर्थः। वैयाकरणैर्विभागः सुज्ञेय इत्यतो दृष्टान्तव्याजेनाऽऽह—वस्नसाविति । "बहुवचनस्य वस्नसौ" [पा० सू० ८-१-२१] इति *समुदायस्याऽऽदेशविधानान्नात्र तद्विभागः संभवतीत्यर्थः ॥ ५ ॥ (६५)

[अर्थबो]धे 'नापि तेषां वैयर्थ्यम्' इतिशेषः । * अर्थबोधापत्त्येति । तदपत्तौ हि बोधं प्रति पूर्वपूर्ववर्णाहितसंस्कारसहकृतान्तिमवर्णप्रत्यक्षस्य कारणत्वेनात्रापि तथाविधस्य सत्त्वादिति भावः । * तादृशानुपूर्व्या इति । 'राम' इत्यादिपदगताया इत्यर्थः ॥ ४ ॥ ६४ ॥

* परिभाषितेति । पाणिन्यादिमुनिपरिभाषितेत्यर्थः । * विभागस्येति । अस्य ज्ञानासम्भवादित्यनेनान्वयः । तस्य च निर्णयासम्भवादित्यर्थः । ननु कश्चिदत्र प्रकृतिभागः कश्चिच्च प्रत्ययभाग इति ज्ञानं सम्भवतीत्यत आह । * विशिष्येति । अयं प्रत्ययभागः अयं प्रकृतिभाग इति विशेषरूपेण निश्चयासम्भवान्न प्रकृतिमात्रस्य प्रत्ययमात्रस्य च शक्तरूपपदस्य वाचकत्वं किं तु सुबन्तस्य प्रकृति-प्रत्ययसमुदायस्येति तात्पर्यम् । * समुदायस्य—युष्म्-आकम् । इत्यादिरूपस्य ॥ ५ ॥ (६५)

सुप्तिङन्तचयरूपवाक्यस्यापि तदाह,—

हरेऽवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु ॥
अर्थे विशिष्य संबन्धाग्रहणं चेत्समं पदे ॥६॥(६६)
लक्षणादधुना चेत्तत्पदेऽर्थेऽप्यस्तु तत्तथा ॥

हरेऽव विष्णोऽवेत्यादौ पदयोः "एङः पदान्तादति" [पा० सू० ६-१-१०९] इत्येकादेशे सति न *तद्विभागः सुज्ञानः। तथा च प्रत्येकपदाज्ञानेऽपि समुदायशक्तिज्ञानाच्छाब्दबोधात्समुदायेऽप्यावश्यिका शक्तिः। *एवं प्रकृतिप्रत्ययेषु *विशिष्याज्ञायमानेष्वपि *समुदायव्युत्पत्त्या बोधात्तत्राप्यावश्यिकैव शक्तिरिति भावः। *वस्तुतः पदैः पदार्थबोधवद्वाक्येन वाक्यार्थबोध इति पदार्थशक्तिः पदेष्विव *वाक्यार्थशक्तिर्वाक्येऽभ्युपेयेति पदस्फोटवाक्यस्फोटौ व्यवस्थितौ। * अन्यथा घटकर्मत्वमानयनं कृतिरित्यादौ * तादृशव्युत्पत्तिरहितस्यापि *बोधप्रसङ्गः।

---

* तद्विभागः—'हरे-अव' इति, 'हरे' 'व' इति वा विभाग इत्यर्थः। ननु यत्र प्रकृतिप्रत्ययविभागो न सम्भवति तत्र पदे वाचकत्वसिद्धावपि 'जिह्मौ' इत्यादौ यत्र तद्विभागज्ञानं सुलभं, तत्र तन्न सिद्ध्येदित्यत आह—* एवं प्रकृतीति। * विशिष्याज्ञायमानेष्वपीति। अपिशब्देन विशिष्यज्ञायमानसंग्रहः। * समुदायव्युत्पत्त्या—समुदायनिष्ठशक्तिज्ञानेन। सकलपदेषु वाचकत्वं प्रसाध्य तथैव विशिष्यज्ञायमानविभागकवाक्येऽपि साधयति— * वस्तुतइति। * वाक्यार्थशक्तिरिति। पदार्थसंसर्गबोधकत्वैशक्तिरित्यर्थः। *अन्यथा--वाक्यशक्तेरनभ्युपगमे। * तादृशव्युत्पत्तिरहितस्यापीति। पदार्थसंसर्गबोधकत्वरूपवाक्यशक्तिज्ञानरहितस्यापीत्यर्थः। *बोधप्रसङ्ग इति। घटकर्मकमानयनमिति शाब्दबोधप्रसङ्ग इत्यर्थः।

* घटमानयेत्यत्रैव पदार्थानामुपस्थितौ—सत्यपि तात्पर्यज्ञाने * बोधाभावाच्च। * तत्रैव घटकर्मकमानयनमिति बोधे घटार्थकप्रातिपदिकोत्तरं कर्मत्ववाचकविभक्तेस्ततो धातोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्यकारणभावज्ञानवतो बोधात्तज्ज्ञानमपि* हेतुरिति चेत्तर्हि सिद्धो वाक्यस्फोटः। घटादिपदार्थबोधे बोधकतारूपपदशक्तिज्ञानकार्यकारणभावस्येव विशिष्टवाक्यार्थबोधे पदसमभिव्याहाररूपवाक्यनिष्ठबोधकतारूपवाक्यशक्तिज्ञानस्यापि हेतुत्वकल्पनात्। * अर्थोपस्थापकज्ञानविषयशब्दवृत्तिज्ञानकारणत्वस्यैव शक्तित्वात्। युक्तं चैतत्। विषयतासंबन्धेन शाब्दबोधमात्रे वृत्तिज्ञानस्य लाघवेन हेतुत्वसिद्धेः। विवेचितं चैतद् भूषणे।

ननु वाक्यार्थस्या*पूर्वत्वात्कथं तत्र शक्तिग्रह इत्याशङ्क्याऽऽह—अर्थे इति। वाक्यस्येति शेषः। वाक्यस्य वाक्यार्थे विशिष्य शक्त्यग्रहणं चेत्तर्हि पदेऽपि समम्। पद एवान्वयांशे* शक्तिरिति पक्षेऽपि* तद्ग्रहासम्भवस्तुल्य इत्यर्थः। यदि च पदशक्तिः पदार्थांशे ज्ञाता अन्वयांशे चाज्ञातोपयुज्यते इति कुब्जशक्तिवादस्तदा ममापि वाक्यशक्तिरज्ञातैवोपयुज्यत इति वादाभ्युपगमस्तुल्य इति भावः। ननु वृद्धव्यवहारं पश्यतो मनसा पदार्थव-

---

ननु शाब्दबोधं प्रत्याकाङ्क्षायाः सहकारिकारणत्वेन तस्या अत्राभावेन न तत्प्रसक्तिः इति दूषणान्तरमाह—*घटमानयेति। अत्र शाब्दव्युत्पत्तिरहितस्येत्यनुषज्यते। *बोधाभावाच्चेति। अस्य 'किं पुनर्घटः कर्मत्वमानयनमित्यत्र वक्तव्यम्' इति शेषः। *तत्रैव—'घटमानय' इत्यत्रैव। *तज्ज्ञानमपीति। समभिव्याहारनिष्ठबोधजनकत्वज्ञानमपीत्यर्थः। *अर्थोपस्थापकेति। अयं शब्दः 'एतदर्थोपस्थापक' इति ज्ञानविषयो यः शब्दस्तन्निष्ठं यज्ज्ञानकारणत्वं बोधजनकत्वं तस्यैवेत्यर्थः। *अपूर्वत्वात्—शाब्दबोधात्प्रागज्ञानेन तत्त्वात् * अन्वयांशे—वाक्यार्थांशे। *तद्ग्रहासम्भव इति। अन्वयांशे पदनिष्ठशक्तिग्रहा-

द्वाक्यार्थेऽपि तद्ग्रह इति चेत्तुल्यमित्याह—लक्षणादिति। लक्ष्यते तर्क्यतेऽनेनेति लक्षणं मनस्तस्मात्। अपिः पदपदोत्तरं बोध्यः। पदेऽपि लक्षणात्तद्ग्रहश्चेत्तर्ह्यस्तु, वाक्येऽपीति शेषः। वस्तुतस्तु समुदितार्थे विशिष्टवाक्यस्यैव प्रथमं तद्ग्रहः। आवापोद्वापाभ्यां परं प्रत्येकं तद्ग्रह इति बोध्यम् ॥ ६½ ॥ (६६½)

सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति ये विदुः ॥७॥(६७)
भाट्टास्तेऽपीत्थमेवाऽऽहुर्लक्षणाया ग्रहे गतिम्।

भाट्टा इति तदनुयायिनां वाचस्पतिकल्पतरुप्रभृतीनामुपलक्षणम्।

ननूक्तपक्षद्वयमनुपपन्नम्। उत्पत्तेरभिव्यक्तेर्वैकदाऽसंभवेन वर्णसमूहरूपपदज्ञानासंभवात्। तथा च सुतरां तत्समूहरूपवाक्यज्ञानासंभव इति चेन्न। उत्तरवर्णप्रत्यक्षसमयेऽव्यवहितोत्तरत्वसंबन्धेनोपस्थितपूर्ववर्णवत्त्वं, तथा तदुत्तरप्रत्यक्षकाले *उपस्थितविशिष्टतद्वर्णवत्त्वं तस्मिन्सुग्रहमिति तादृशानुपूर्वीघटितपदत्वस्येव वाक्यत्वस्यापि सुग्रहत्वात् ॥ ७½॥ (६७½)

*इदानीम*खण्डपक्षमाह—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ॥८॥(६८)
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन।

सम्भवः। शाब्दबोधात् प्रागन्वयांशस्याज्ञानादित्यर्थः ॥ ६½ ॥ ६६½ ॥

*उपस्थितविशिष्टतद्वर्णवत्त्वमिति। अव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णस्मृतिविशिष्टोत्तरवर्णप्रत्यक्षमेव पदज्ञानमिति भावः ॥ ७½ ॥ (६७½)

*इदानीम्—वर्णस्फोट-सखण्डपदवाक्यस्फोटनिरूपणानन्तरम्। *अखण्डपक्षम्—अखण्डपदस्फोटाखण्डवाक्यस्फोटपक्षम्। अख-

पदे पचतीत्यादौ न वर्णाः। नातो वर्णसमूहः पदमिति शेषः। * दृष्टान्तव्याजेनाऽऽह—वर्णेष्विति। एकारौकारलकारऋकारादिवर्णेष्ववयवाः प्रतीयमाना अपि यथा नेत्यर्थः। * क्वचिद् 'इवं' इत्येव पाठः। एवं वाक्येऽप्याह—वाक्यादिति। पदानामपि वाक्याद्विवेको * भेदो नास्तीत्यर्थः। अयं भावः—वाक्यं पदं चाऽखण्डमेव न तु वर्णसमूहः। अनन्तवर्णकल्पने मानाभावात्। तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठं तत्तद्वर्णजनकताया व्यञ्जकताया वाऽवच्छेदकं *वैजात्य*मादायैव ककारो गकार इत्यादिप्रतीतिवैलक्षण्यसंभवात्। स्पष्टं हि भामत्याम्—"तारत्वादि वायुनिष्ठं वर्णेष्वारोप्यते" इत्युक्तं देवताधिकरणे। न चैवं वायुसंयोग एव वाचकोऽपि किं न स्यादिति वाच्यम्। प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात्। तथा च वाचकत्वान्यथानुपपत्त्या तदेवेदं पदं तदेवेदं वाक्यं सोऽयं गकार इति प्रतीत्या च स्फोटोऽखण्डः सिध्यति। एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकेण स्फोटाननुभवाच्छ्रूयमाणवर्णानामेव वाचकत्वमस्त्वित्यपास्तम्। * तेषां स्फोटातिरिक्तत्वाभावात्।

यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थबोधापत्तिः। समुदायस्य तु क्रमवतामाशुतरोत्पन्नानां तथैवाभिव्यक्तानां वा ज्ञानमसंभाव्यमेव। पूर्वपूर्ववर्णानुभवसंस्कारसहकारेणैकदा समूहालम्ब-

---

एडपद-वाक्य-स्फोटमात्रकथनसमये वर्णानामखण्डत्वकथनं प्रकृतानुपयुक्तमत आह—*दृष्टान्तेति। तदेव स्पष्टप्रदर्शनायाह—*क्वचिदिवेत्येव पाठ इति। "वर्णेष्ववयवा इव" इति पाठ इत्यर्थः। *विवेको भेद इति। 'विचिर् पृथग्भावे' इति धात्वर्थानुसारात् प्रविवेकपदं भेदार्थकमित्याशयः। *वैजात्यं—कत्वादि। *आदाय—पदादिस्फोटे आरोप्य। *तेषाम्—कत्वादीनाम्।

नरूपसकलज्ञानसंभवस्तु सरोरसोजराराजनदीदीनादिसाधारण इत्यतिप्रसङ्ग इति स्फोट एवाखण्डो नादाभिव्यङ्ग्यो* वाचक इति कैयटः, तत्तुच्छम् । पदज्ञानसंभवस्योपपादितत्वाद्वर्णानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेत्यादिविकल्पग्रासाच्च ।

ननु त्वन्मतेऽप्येष दोषः । तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेति विकल्पस्य संभवादिति चेत्, उच्यते । प्रत्येकमेव संयोगाभिव्यञ्जकाः, परं तु केचिद्घत्वेन केचिदोत्वेन केचिद्विसर्गत्वेनेत्यनेकैः प्रकारैः । अत एव वर्णानां तदतिरेकास्वीकारोऽप्युपपद्यते । एवं चाव्यवहितोत्तरत्वसंबन्धेन घवत्त्वं टकारे गृह्यते* । एतादृशपदज्ञानकारणताया अविवादात् । परं त्वव्यवहितोत्तरत्वं स्वज्ञानाधिकरणक्षणोत्पत्तिकज्ञानविषयत्वं वाच्यम् । अतएव घज्ञानानन्तरटज्ञानविषयत्वरूपानुपूर्व्यीत्यादिनैयायिकवृद्धानां व्यवहारः । एवं च न कश्चिद् दोषः ।* एतेन पर्यायस्थलेष्वेक एव स्फोटः, नाना वा ? । नाऽऽद्यः । घटपदे गृहीतशक्तिकस्य कलशपदाद्बोधप्रसङ्गात् । न च तत्पर्यायाभिव्यक्ते शक्तिग्रहस्तत्पर्यायश्रवणेऽर्थधीहेतुरिति वाच्यम् । एवं सति प्रतिपर्यायं शक्तिग्रहावश्यंभावेन तत्तत्पर्यायगतशक्तिग्रहहेतुताया उचितत्वात् । तथा सति शक्तिग्रहत्वेनैव हेतुत्वे लाघवाच्च । अन्यथा तत्पर्यायाभिव्यक्तगतशक्तिग्रहत्वेन तत्त्वे गौरवात् । न द्वितीयः । अनन्तपदानां तेषां शक्तिं चापेक्ष्य कॢप्तवर्णेष्वेव शक्तिकल्पनस्य लघुत्वादिति परिमलोक्त-

---

* अखण्डः—वर्णाघटित इत्यर्थः । *अत एव—स्फोटातिरेकत्वस्याभावादेवेत्यर्थः । *गृह्यत इति । अस्याग्रे 'अतो न रसात् सरोमानम्' इति शेषः । *एतेन—वर्णानुपूर्व्यवच्छिन्नस्फोटस्य वाचकत्वव्यवस्थापनेन । अस्य 'अपास्तम्' इत्यनेन सम्बन्धः ।

मपास्तम् । पर्यायेष्वनेकशक्तिस्वीकारस्य सर्वसिद्धत्वात्*तदवच्छेदकानुपूर्व्याः प्रागुपपादनादिति दिक् ।

शब्दकौस्तुभे तु वर्णमालायां पदमिति प्रतीतेर्वर्णातिरिक्त एव स्फोटः । *अन्यथा* कपालातिरिक्तघटाद्यसिद्धिप्रसङ्गश्चेति प्रतिपादितम् ॥ ८३ ॥ (६८३)

नन्वेवं* शास्त्राप्रामाण्यप्रसङ्गः पदस्याखण्डत्वात्, शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमात्रार्थत्वादित्याशङ्कां समाधत्ते—

पञ्चकोशादिवत्तस्मात्कल्पनैषा समाश्रिता ॥९॥(६९)
उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः ।

उपेयप्रतिपत्त्यर्था इत्यन्तेनान्वयः । *अयं भावः—यथा भृगुवल्ल्यां "भृगुर्वै वारुणिर्वरुणं ब्रह्म पृष्टवान् । स उवाचान्नम्" इति

---

*तदवच्छेदकेति—शक्ततावच्छेदकेत्यर्थः । अतिरिक्तस्फोटसाधिकां युक्तिमाह—*शब्दकौस्तुभे इति । *वर्णमालायाम्—आनुपूर्वीयुक्तायाम् । पदमित्युपलक्षणं वाक्यस्य । *अन्यथा—प्रतीतेः पदार्थासाधकत्वे । *कपालातिरिक्तेति—'कपाले घटः' इति भेदेन प्रतीयमानकपालातिरिक्तेत्यर्थः ॥ ८३ ॥ (६८३)

*एवं—कौस्तुभोक्तरीत्याऽतिरिक्तस्फोटस्वीकारे । *अयम्भाव इति । तत्र हि भृगुर्वै वारुणिः, वरुणं ब्रह्म पृष्टवान् । स उवाचान्नं ब्रह्मेति । तस्य अनित्यत्वं बुद्ध्वा पृष्टो मनो ब्रह्मेत्युवाच । तस्यापि अशितमन्नं त्रेधा भवति—यत्स्थूलं तत्पुरीषं, यन्मध्यमं तन्मांसं, यदणीयस्तन्मनः' इति श्रवणादनित्यत्वमवधार्य पुनः पृष्टो 'विज्ञानं ब्रह्म'इत्युवाच । तस्यापि मृत्युपहितत्वं ज्ञात्वा पुनः पृष्टोऽब्रवीत्—'आनन्दो ब्रह्म'इति । ततश्च वस्तुतत्त्वं प्राप्य स्थितो भृगुरिति । एवं च तत्र यथा पञ्चकोशव्युत्पादनं—वास्तवं यत् शुद्धं सर्वाधारभूतं ब्रह्म तत्प्रतिपत्तये, एवमिदं व्याकरणमपि प्रकृतिप्रत्ययादिप्रतिपादनद्वारा वास्तवाखण्डस्फोटप्रतिपत्त्यर्थमेवेति भावः ।

तस्योत्पत्त्यादिकं बुध्वा पृष्टे प्राणमनोविज्ञानाऽऽनन्दात्मकपञ्चकोशोपदेशोत्तरं "ब्रह्म पुच्छं प्रतिष्ठा" इति ज्ञेयं ब्रह्म प्रतिपादितम्। तत्र कोशपञ्चकव्युत्पादनं शुद्धब्रह्मबोधनाय। यथा वाऽऽनन्दवल्लीस्थपञ्चकोशव्युत्पादनं वास्तवशुद्धब्रह्मबोधनाय। एवं प्रकृतिप्रत्ययादिव्युत्पादनं वास्तवस्फोटव्युत्पादनायैवेति। ननु प्रत्यक्षस्य स्फोटस्य श्रवणादितोऽपि बोधसंभवान्न शास्त्रं तदुपाय इत्यत आह—उपाया इति। उपायस्योपायान्तरादूषकत्वात्। तथा च व्याकरणाभ्यासजन्यज्ञाने वैजात्यं कल्प्यते मन्त्रजन्यमिवार्थस्मरणे, वेदान्तजन्यमिव ब्रह्मज्ञाने। तस्य च ज्ञानस्य यज्ञादीनामन्तःकरणशुद्धाविव शरीरादिशुद्धावुपयोगः, साक्षात्परम्परया वा स्वर्गमोक्षादिहेतुत्वं च।

तदुक्तं वाक्यपदीये—

*तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥
*इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥
अत्रा*तीतविपर्यासः *केवलामनुपश्यति॥ इति।

न चालीकया प्रकृतिप्रत्ययकल्पनया कथं वास्तवस्फोटबोधः। तस्यालीकत्वासिद्धेर्वक्ष्यमाणत्वात्। एवं रेखागवयन्याय आदिना गृह्यते॥ ९३ (६९३)

---

*तदिति—वाङ्मलानां चिकित्सा सञ्जाता यत्रेति चिकित्सितमपनयनहेतुः तद् व्याकरणमपवर्गस्य मोक्षस्य द्वारमित्यर्थः। वाङ्मलापकर्षणेन परावाणीदर्शनेन मोक्षसिद्धिरिति तत्तात्पर्यम्। तदेव स्पष्टयति—*इदमाद्यमिति। *अतीतविपर्यास इति। अतीतः नष्टः विपर्यासो भ्रमो यस्येत्यर्थः। *केवलां—पराख्यां वाचम् ॥ ९३ ॥ (६९३)

ननु स्फोटस्य वर्णजातीनां च नित्यतया ककार उत्पन्न इति न स्यात् । वायुसंयोगनिष्ठजातेः स्फोटे भाने कादिप्रतीतीनां भ्रमत्वापत्तिश्चेत्यत आह—

कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि ॥१०॥(७०)
स्वरदैर्घ्याद्यपि ह्यन्ये वर्णेभ्योऽन्यस्य मन्वते ।

स्वीकारस्थलमाह—स्वरदैर्घ्याद्यपीति । आदिनोत्पत्तिविनाशादिसंग्रहः । उदात्तत्वादि न वर्णनिष्ठं तस्यैकत्वान्नित्यत्वाच्च । तच्च स एवायमिति प्रत्यभिज्ञानात् । न च *गत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयो व्यक्त्यंशाभेदस्यापि भासमानस्य विना बाधकं त्यागायोगात् । न चोत्पत्तिप्रतीतिर्बाधिका । प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्वर्णेष्वनुभवविरुद्धत्वात् । अत एव वर्णमुच्चारयतीति प्रत्ययो न तूत्पादयतीति प्रत्ययो व्यवहारश्च । उच्चरितत्वं च ताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वम् । किं च व्यञ्जकध्वनिनिष्ठोत्पत्त्यादेः परम्परया वर्णनिष्ठत्वविषयत्वेनाप्युपपत्तेर्न सा ऽतिरिक्तवर्णसाधिका । परम्परया वर्णनिष्ठत्वाभ्युपगमाच्च न भ्रमत्वम् ।

साक्षात्संबन्धांशे भ्रम इत्यवशिष्यते । तदपि सोऽयमित्यत्र व्यक्त्यभेदांशे *तव भ्रमत्ववत्तुल्यम् । परं तु ममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पना नेति लाघवमतिरिच्यते । न च वर्णस्थले ध्वनिसत्त्वे मानाभावः, तदुत्पादकशङ्खाद्यभावेन तदसंभवश्चेति वाच्यम् ।

---

*गत्वावच्छिन्नेति—'स एवायम्' इति प्रत्यभिज्ञा धर्मैक्यमादायेति भावः । *तव भ्रमत्ववदिति । वर्णानित्यत्ववादिनस्तव मते यथा "स एवायं गकारः" इति प्रत्यभिज्ञायां व्यक्त्यभेदप्रतीतिर्भ्रमविषया, एवमस्मन्मतेऽपि [illegible] भ्रम इति भावः । वर्णोत्पा-

ककाराद्युच्चारणस्थले तत्तत्स्थानस्य जिह्वाया ईषदन्तरपाते वर्णानुत्पत्तेर्ध्वन्युत्पत्तेश्च दर्शनाज्जिह्वाभिघातजन्यवायुकण्ठसंयोगादेर्ध्वनिजनकत्वकल्पनात्। तस्य च वर्णोत्पत्तिस्थलेऽपि सत्त्वात्। *तत्रैव प्रतिबन्ध्यप्रतिबन्धकभावकल्पना निष्प्रमाणिका स्यादिति विपरीतं गौरवम्। एवं परस्परविरोधादुदात्तत्वानुदात्तत्वह्रस्वत्वदीर्घत्वादिकमपि न वर्णनिष्ठं युक्तमिति तेषामभिप्रायः। एवं चोत्पत्त्यादिप्रतीतीनां तत्प्रमात्वस्य च निर्वाहः परेषामपि समान इति प्रतिबन्धेवोत्तरमिति भावः॥ १०३॥ (७०३)

इत्थं पञ्च व्यक्तिस्फोटाः। जातिस्फोटमाह—

शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्॥११॥७१
औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत्।

अयं भावः—वर्णास्तावदावश्यकाः उक्तरीत्या च सोऽयं गकार इतिवद् योऽयं गकारः श्रुतः सोऽयं हकार इत्यपि स्यात्। स्फोटस्यैकत्वात्; गकारोऽयं न हकार इत्यनापत्तेश्च। किं च स्फोटे गत्वाद्यभ्युपेयं न वा? आद्ये स एव गकारोऽस्तु। वर्णनित्यतावादिभिरतिरिक्तगत्वानङ्गीकारात्। तथा चातिरिक्तस्फोटकल्पन एव गौरवम्। अन्त्ये गकारादिप्रतीतिविरोधः। वायुसंयोगवृत्तिं ध्वनिवृत्ति वा वैजात्यमारोप्य तथा प्रत्यय इति चेत्। न, प्रतीतेर्विना बाधकं भ्रमत्वासंभवात्। अस्तु वा *वायुसंयोग एव गकारोऽपि तस्या*तीन्द्रियत्वं दोष इति चेद्—

त्वत्कल्पनप्रयोज्यप्रतिबन्धकत्वाच्च वर्णोत्पत्तिस्थले ध्वन्युत्पादस्संभव इत्याशङ्कापरिहाराय आह—*तत्रैवेति॥ १०३॥ (७०३)

*वायुसंयोग एवेति—एवकारेण स्फोटव्यावृत्तिः। *अतीन्द्रियत्वं दोष इति। संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वमभ्यु-

*धर्मवदुपपत्तेरिति *कृतं स्फोटेन । तस्मात्सन्त्येव वर्णाः, परं तु न वाचकाः गौरवात् । * आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्ववद्वाचकत्वस्यापि युक्तत्वाच्च । 'इदं हरिपदम्' इत्यनुगतप्रतीत्या हर्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वेन हेतुत्वात्* । *तदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात् । न च वर्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः, घटंघटत्वादेरपि संयोगविशेषविशिष्टमृदाकारादिभिश्चान्यथासिद्ध्यापत्तेः । तस्माज्जातिरेव वाचिका, तादात्म्येन तदवच्छेदिका चेति । ननु सरो रस इत्यादौ तयोर्जात्योः सत्त्वादर्थबोधभेदो न स्यादित्यत आह—औपाधिकी वेति । वा त्वर्थे । उपाधिरानुपूर्वी सैव जातिविशेषाभिव्यञ्जिकेति भेदः कारणीभूतज्ञानस्येति नातिप्रसङ्ग इति भावः । उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह—वर्णानामिति ॥ ११३ ॥ (७१३)

पेयम् । अन्यथा घटाकाशसंयोगप्रत्यक्षापत्तेः । तथा च वायोरप्रत्यक्षत्वेन वायुतत्तत्स्थानसंयोगस्यातीन्द्रियतया गकारादिप्रत्यक्षानुपपत्तिरित्यर्थः । *धर्मवदिति । वायुनिष्ठस्पर्शवदित्यर्थः । यथा वायोरप्रत्यक्षत्वेऽपि तन्निष्ठः स्पर्शः त्वगिन्द्रियेण गृह्यते, एवं ताल्वाद्यनुयोगिकवायुसंयोगस्यापि प्रत्यक्षं भविष्यति । तथा च बहिरिन्द्रियजन्यप्रत्यक्षविषयद्रव्यसंयोगप्रत्यक्षे एव यावदाश्रयप्रत्यक्षस्य हेतुत्वं कल्प्यते इति बोध्यम् । *कृतं स्फोटेनेति । स्फोटेनालमित्यर्थः । तत्तद्वायुसंयोगैरेव तत्तदर्थबोधनात्स्फोटकल्पना निरर्थिकेति भावः । *आकृत्यधिकरणेति । तत्र हि यथा आनन्त्यव्यभिचाराभ्यां व्यक्तिर्न शब्दवाच्या किं तु जातिरेवेत्युक्तम्, तथैव जातिरेव वाचिका न तु व्यक्तिरित्यर्थः । *हेतुत्वादिति । हरिविषयकयावदुपस्थितिं प्रति हरिपदज्ञानस्य कारणत्वादित्यर्थः । *तदवच्छेदकतया । कारणतावच्छेदकतया ॥११३॥ (७१३)

ननु जातेः प्रत्येकं वर्णेष्वपि सत्त्वात्प्रत्येकादर्थबोधः स्यादित्यत आह—

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ॥ १२ ॥ (७२)

केश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ।

अनेकाभिर्वर्णव्यक्तिभिराभिव्यक्तैव जातिः स्फोट इति स्मृता । *योगार्थतया बोधिकेति यावत् । एतेन स्फोटस्य नित्यत्वात्सर्वदाऽर्थबोधापत्तिरित्यपास्तम् । अयं भावः—यद्यपि वर्णस्फोटपक्षे कथितदोषोऽस्ति, तथाऽपि पदवाक्यपक्षयोर्न, तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वादिति केश्चिद्व्यक्तयो ध्वनय एव ध्वनिवर्णयोर्भेदाभावादित्यभ्युपेयन्त इति * शेषार्थः । उक्तं हि काव्यप्रकाशे—"बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः" इति ॥१२½॥(७२½)

ननु का सा जातिस्तत्राऽऽह—

सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ॥ १३ ॥ (७३)

सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः ।

प्रतिभावं प्रतिपदार्थं सत्यांशो जातिः, असत्या व्यक्तयः

---

*योगार्थतयेति—स्फुटत्यर्थोऽस्मादिति स्फोट इति व्युत्पत्त्या स्फोटपदस्य बोधकेत्यर्थं इति भावः । *शेषार्थं इति । उत्तरार्धार्थं इत्यर्थः ॥१२½॥ (७२½)

"आत्मैवेदं सर्वम्" "नेह नानाऽस्ति किंचन" इत्यादिश्रुतिदर्शनात् ब्रह्मातिरिक्तस्य सर्वस्य मिथ्यात्वात् कथं जातेः सत्यत्वमित्यत आह—

*तत्तद्व्यक्तिविशिष्टं ब्रह्मैव जातिरिति भावः। उक्तं च कैयटेन— "*असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थः" इति। "*ब्रह्मतत्त्वमेव शब्दस्वरूपतया भाति" इति च। कथं तर्हि—ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वम् "आत्मैवेदं सर्वम्" इति श्रुतिवचनादिति कैयटः संगच्छताम्। अविद्याऽऽविद्यको *धर्मविशेषो वेति पक्षान्तरमादायेति द्रष्टव्यम्॥ १३३॥ (७३३)

तमेव सत्यांशं स्पष्टयति—

इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम्।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः॥१४॥(७४)

अयं भावः—"नामरूपे व्याकरवाणि" इतिश्रुतिसिद्धा द्वयी सृष्टिस्तत्र रूपस्येव नाम्नोऽपि तदेव तत्त्वम्। प्रक्रियांशस्त्वविद्याविजृम्भणमात्रम्।

उक्तं च वाक्यपदीये—

"शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते।
*समारम्भस्तु भावानामनादि ब्रह्म शाश्वतम्॥

ब्रह्मेवेत्यनेन "अत्रायं पुरुषः स्वयंज्योतिः" "तमेव भान्तमनुभाति सर्वम्" "तस्य भासा सर्वमिदं विभाति" इतिश्रुतिसिद्धं स्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोऽस्मादिति स्फोट इति यौगिकं

---

*तत्तद्व्यक्तिविशिष्टेति। *असत्येति। पस्पशान्हिके "द्रव्यं नित्यम्" इति भाष्यमुपादायेदं कैयटेनोक्तम्। *ब्रह्मतत्त्वमेवेति। इदं तु प्रत्याहारान्हिके "चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः" इति भाष्यव्याख्याने उक्तम्। *धर्मविशेषो वेति। जातिरित्यर्थः॥ १३३॥ (७३३)

*समारम्भ इति। उत्पत्तिरित्यर्थः। *निर्विघ्नप्रचयान्ते—

स्फोटशब्दाभिधेयत्वं सूचयति । *निर्विघ्नप्रचयान्ते मङ्गलं स्तुतिनतिरूपमाह—पूर्णेतिन इत्यादिना ।

अशेषफलदातारमपि सर्वेश्वरं गुरुम् ।
श्रीमद्भूषणसारेण भूषये शेषभूषणम् ॥१४॥(७४)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे
पदादिस्फोटनिरूपणं समाप्तम् ।

भट्टोजिदीक्षितैः श्रेष्ठैर्निर्मिताः कारिकाः शुभाः ।
कौण्डभट्टेन व्याख्याताः कारिकास्ताः सुविस्तरम् ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीणरङ्गोजिभट्टात्मज-
कौण्डभट्टविरचितो वैयाकरणभूषणसारः समाप्तः ।

---

*कारिकावलीकृद्ग्रन्थान्ते ॥१४॥ (७३)
इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां
स्फोटनिर्णयः समाप्तः ।

इति श्रीवैयाकरणभूषणसारटीका नेने-इत्युपाह्वगोपालशर्म-
विरचिता सरलाऽभिधा समाप्ता ॥

अथ भट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकारिकाश्चरणप्रतीकानामकारादिवर्णानुक्रमसूची ।

इति श्रीभट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकारिकाश्चरण-प्रतीकानामकारादिवर्णानुक्रमसूची समाप्ता ॥

———

विज्ञापनम् ।

आवश्यक सूचना ।

हमारा नाम

हरि-कृष्ण-दास

है

नोट कर लीजिये हमारे नाम में ह–रि–कृ–ष्ण–दा–स–इस प्रकार छः अक्षर हैं हमारी दुकान से संस्कृत की सब प्रकार की पुस्तकें किफ़ायत से देख भाल कर और हिफाज़त से भेजी जाती हैं। इस सूचीपत्र में दर्ज की हुई पुस्तकों के अतिरिक्त अन्य भी पुस्तकें मिल सकती हैं। एक वार मंगाकर अनुभव कीजिये।

हमारा पताः—

हरिकृष्णदास,

मालिक

गुप्त-बुक्-डिपो,

कचौरी-गली, बनारस शहर।

		मूल्य रु० आ०
(१) फक्किकारत्नमञ्जूषा (स्त्रीप्रत्यान्त)	"	१—८
(२) फक्किकारत्नमञ्जूषा (कारकादिकृदन्तान्त)	"	१—८
(३) फक्किकाप्रकाश–सटिप्पण	"	१—८
(४) परमलघुमञ्जूषा (सटिप्पण)	"	०—६
(५) लघुशब्देन्दुशेखर चन्द्रकला टीका सहित- (अव्ययीभावान्त)	"	४—०
(६) लघुशब्देन्दुशेखर पं० नित्यानन्दकृत टिप्पणी-सहित (अव्ययीभावान्त)	"	४—८
(७) विषमी (कारकान्त) लघुशब्देन्दुशेखरव्याख्या	"	२—०

(८) श्रीधरी (प्रथमाकारकान्त) लघुशब्देन्दुशेखर-व्याख्या	„ ०—१२
(९) नागेशोक्ति (नपदान्तसूत्रपर्यन्त) लघुशब्देन्दुशेखर व्याख्या	„ २—८
(१०) परिभाषेन्दुशेखर भैरवी और तत्त्वप्रकाशिका-टीका सहित	„ २—८
(११) परिभाषेन्दुशेखर वाक्यार्थचन्द्रिका टीका सहित	„ ५—०
(१२) परिभाषेन्दुशेखर भूतिटीका सहित	„ ५—०
(१३) परिभाषावृत्ति	„ २—०
(१४) मनोरमा शब्दरत्न सहित (सम्पूर्ण)	„ ७—०
(१५) महाभाष्य कैयट विवरण सहित (नवाह्निक)	„ २—०
(१६) काशिकावृत्ति	„ ५—०
(१७) वाक्यपदीय सटीक (खण्डानि ६)	„ ६—०
(१८) व्याकरणमिताक्षरा	„ १०—०
(१९) वृहद्वैयाकरणभूषण	„ ४—०
(२०) भैरवी (कारकान्त) शब्दरत्न व्याख्या	„ ३—०
(२१) शिशुपालवध सटीक (सर्गद्वयात्मक)	„ ०—४
(२२) शिशुपालवध सटीक (सर्गत्रयात्मक)	„ ०—८
(२३) शब्दशक्तिप्रकाशिका सटीक	„ ३—४
(२४) विभक्त्यर्थनिर्णय	„ ५—०
(२५) पूर्वपक्षावलि	„ ०—२
(२६) उत्तरपक्षावलि	„ ०—२
(२७) योगदर्शन भोजवृत्ति सहित	„ १—०
(२८) कुसुमाञ्जलि हरिदासकृत टीका सहित-पं० अम्बादत्तकृत टिप्पणी सहित	„ ०—८
(२९) सरलत्रिकोणमिति	„ २—४
(३०) रेखागणितस्यैकादश द्वादशाध्यायौ	„ ०—१०

पुस्तकप्राप्तिस्थानम्—

हरिकृष्णदास मालिक,

गुप्तबुकडिपो, कचौरी गली

बनारस सिटी।

विज्ञापनम् ।

अस्तु निवेदनं सप्रार्थनं सर्वेषां सज्जनानां पुरतो यदिह कार्यालये वेद-वेदाङ्ग-(व्याकरण-ज्यौतिष-निरुक्त-धर्मशास्त्र-वेदभाष्य-छन्दःशास्त्र) षड्दर्शनपुराणोपपुराणेतिहास-रामायण-काव्य-नाटक-चम्पू-प्रभृति-सर्वविषयकाणि मुम्बयी-पूना-कलिकाता-काशीस्थ-यन्त्रालयेषु समुद्रितानि पुस्तकानि लभ्यन्ते ।

अत्रेदमवगच्छन्तु विद्वांसो यदस्मात् कार्यालयाद्यानि पुस्तकानि प्रेष्यन्ते तेषां प्रत्येकं पत्रं चावलोक्य दैवात् कण्टकादिदोषतो यदि कुत्रापि पत्र-वैकल्यादि प्राप्यते तदा तत् ततो निरस्य तत्स्थानेऽन्यत् सुदृढं सन्निवेश्य मनोहराकारे समुल्लिखितस्थानेषु समुचितमूल्येनैव सावधानतया पुस्तकानि "वी. पी." द्वारा प्रेष्यन्ते यथाऽस्मद्ग्राहकाणां कथमपि हानिर्न भवेत् । [illegible]व्यवहारत एव वणिजः सत्यताऽभिलक्ष्यतेऽलमधिकप्र[illegible] [illegible]स्त्वियं प्रार्थना यत् पुस्तकलिप्सुना स्वनाम-ग्राम-'पो. आ.-जिला' एतत् सुस्पष्टं स्वपत्रे लेखनीयम् ।

पुस्तकप्राप्तिस्थानम् — श्रीहरिकृष्णदास, मालिक, "गुप्तबुकडीपो" कचौरीगली, बनारस सिटी ।

॥ श्रीः ॥

महाकविश्रीभारविप्रणीतं

किरातार्जुनीयम् ।

(सर्गत्रयात्मकं)

महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिता

घण्टापथाख्यया व्याख्यया समुल्लसितम् ।

पण्डितश्रीरामसकलमिश्रशर्मणा संशोधितम् ।

KIRÂTÂRJUNÎYAM

OF BHÂRAVI,

Ist THREE SARGAS,

With a Commentary called Ghantâpatha

of

Mahâmahopâdhyâya Mallinâth Surî,

Edited by

Pandit Ram Sakâl Misra Sarma.

Published and Sold by H. D. Gupta & Sons,

PROPRIETORS,

THE CHOWKHAMBA SANSKRIT BOOK DEPOT;

BENARES CITY:

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press,

BENARES.

1913

आवण शुक्ल नवमी रोज सोम [illegible] को ये पोस्त[illegible]
पञ्चाङ्ग ब्राह्मण को दे[illegible]
जीवराज [illegible]
मे आहा गौजे [illegible]

॥ श्रीः ॥

महाकविश्रीभारविप्रणीतं

किरातार्जुनीयम् ।

मल्लिनाथकृतया घण्टापथव्याख्यया समेतम् ।

प्रथमः सर्गः ।

अर्धाङ्गीकृतदाम्पत्यमपि गाढानुरागि यत् ।
पितृभ्यां जगतस्तस्मै कस्मैचिन्महसे नमः ॥
आलम्बे जगदालम्बं हेरम्बचरणाम्बुजम् ।
शुष्यन्ति यद्रजःस्पर्शात्सद्यः प्रत्यूहवार्धयः ॥
तद्दिव्यमव्ययं धाम सारस्वतमुपास्महे ।
यत्प्रकाशात्प्रलीयन्ते मोहान्धतमसश्छटाः ॥
वाणीं काणभुजीमजीगणदवाशासीच्च वैयासकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥
मल्लिनाथकविः सोऽयं मन्दात्मानुजिघृक्षया ।
तत्किरातार्जुनीयाख्यं काव्यं व्याख्यातुमिच्छति ॥
नारिकेलफलसंमितं वचो भारवेः सपदि तद्विभज्यते ।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम् ॥
नानानिबन्धविषमैकपदैर्नितान्तं ।
साशङ्कचङ्क्रमणखिन्नधियामशङ्कम् ॥

कर्तुं प्रवेशमिह भारविकाव्यबन्धे ।
घण्टापथं कमपि नूतनमातनिष्ये ॥
इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ॥

अथ तत्र भवान्भारविनामा कविः 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥' इत्याद्यालङ्कारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनताम्, 'काव्यालापांश्च वर्जयेत्' इति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन्किरातार्जुनीयाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनत्वात् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्याद्याशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च वनेचरस्य युधिष्ठिरप्राप्तिरूपं वस्तु निर्दिशन्कथामुपक्षिपति—

श्रियः कुरूणामधिपस्य पालनीं ।
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ ।
युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥

श्रिय इति ॥ आदितः श्रीशब्दप्रयोगाद्वर्णगणादिशुद्धिर्नात्रातीवोपयुज्यते । तदुक्तम्—'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥' इति । कुरूणां निवासाः कुरवो जनपदाः । 'तस्य निवासः' इत्यण्प्रत्ययः । जनपदे लुप् ॥ तेषामधिपस्य दुर्योधनस्य संबन्धिनीम् । शेषे षष्ठी । श्रियो राज्यलक्ष्म्याः । 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी । पाल्यतेऽनयेति पालनी ताम् । प्रतिष्ठापिकामित्यर्थः । प्रजारागमूलत्वात्सम्पद इति भावः । 'करणाधिकरणयोश्च' इति

करणे ल्युट् । 'टिड्ढाणञ्—' इत्यादिना ङीप् । प्रजासु जनेषु विषये । 'प्रजा स्यात्संततौ जने' इत्यमरः । वृत्तिं व्यवहारं वेदितुं ज्ञातुं यं वनेचरमयुङ्क्त नियुक्तवान् । वर्णः प्रशस्तिरस्यास्तीति वर्णी ब्रह्मचारी । तदुक्तम्—'स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् । संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः । विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् ॥' एतदष्टविधमैथुनाभावः प्रशस्तिः । 'वर्णाद्ब्रह्मचारिणि' इतीनिप्रत्ययः । तस्य लिङ्गं चिह्नमस्यास्तीति वर्णिलिङ्गी । ब्रह्मचारिवेषवानित्यर्थः । स नियुक्तः वने चरतीति वनेचरः किरातः । 'भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः' इत्यमरः । 'चरेष्टः' इति टप्रत्ययः । 'तत्पुरुषे कृति बहुलम्' इत्यलुक् । विदितं वेदनमस्यास्तीति विदितः । परवृत्तान्तज्ञानवानित्यर्थः । 'अर्शआदिभ्योऽच्' इत्यच्प्रत्ययः । उभयत्रापि 'पीता गावः,' 'भुक्ता ब्राह्मणाः,' 'विभक्ता भ्रातरः' इत्यादिवत्साधुत्वम् । न तु कर्तरि क्तः । सकर्मकेभ्यस्तस्य विधानाभावात् । अत एव भाष्यकारः—'अकारो मत्वर्थीयः । विभक्तमेषामस्तीति विभक्ताः । पीतमेषामस्तीति पीताः' इति सर्वत्र । अथवोत्तरपदलोपोऽत्र द्रष्टव्यः । विभक्तधना विभक्ताः, पीतोदकाः पीता इति । अत्र लोपशब्दार्थमाह कैयटः—"गम्यार्थस्याप्रयोग एव लोपोऽभिमतः । 'विभक्ता भ्रातरः' इत्यत्र च धनस्य यद्विभक्तत्वं तद् भ्रातृषूपचरितम् । 'पीतोदका गावः' इत्यत्राप्युदकस्य पीतत्वं गोष्वारोप्यते" इति । तद्वदत्रापि वृत्तिगतं विदितत्वं वेदितरि वनेचर उपचर्यते । एतेन 'वनाय पीतप्रतिबद्धवत्साम्', 'पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु' एवमादयो व्याख्याताः । अथवा विदितो विदितवान् । सकर्मकादप्यवि-

वक्षिते कर्मणि कर्तरि क्तः । यथा 'आशितः कर्ता' इत्यादौ । यथाहुः—'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥' इति । द्वैतवने द्वैताख्ये तपोवने । यद्वा द्वे इते गते यस्मात्तद्वीतम् । द्वीतमेव द्वैतम् । तच्च तद्वनं च तस्मिन् । शोकमोहादिवर्जित इत्यर्थः । युधि रणे स्थिरं युधिष्ठिरं धर्मराजम् । 'हलदन्तात्सप्तम्याः संज्ञायाम्' इत्यलुक् । 'गवियुधिभ्यां स्थिरः' इति षत्वम् । समाययौ संप्राप्तः । अत्र 'वने वनेचरः' इति द्वयोः स्वरव्यञ्जनसमुदाययोरेकदैवावृत्त्या वृत्त्यनुप्रासो नामालङ्कारः । अस्मिन्सर्गे वंशस्थवृत्तम् । तल्लक्षणम्—'जतौ तु वंशस्थमुदीरितं जरौ इति ॥

संप्रति तत्कालोचितत्वमादेशयंस्तस्य तद्गुणसंपन्नत्वमादर्शयन्नाह ।

कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥ २ ॥

कृतप्रणामस्येति ॥ कृतप्रणामस्य तत्कालोचितत्वात्कृतनमस्कारस्य सपत्नेन रिपुणा दुर्योधनेन । 'रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः' इत्यमरः । जितां स्वायत्तीकृतां महीं महीभुजे युधिष्ठिराय । क्रियाग्रहणात्संप्रदानत्वम् । निवेदयिष्यतो ज्ञापयिष्यतः । 'लृटः सद्वा' इति शतृप्रत्ययः । तस्य वनेचरस्य मनो न विव्यथे । कथमीदृगप्रियं राज्ञे विज्ञापयामीति मनसि न चचालेत्यर्थः । 'व्यथ भयचलनयोः' इति धातोर्लिट् ॥ उक्तमर्थमर्थान्तरन्यासेन समर्थयते—न हीति ॥ हि यस्मात् । हितमिच्छन्तीति हितैषिणः स्वामिहितार्थिनः पुरुषा मृषा मि-

थ्याभूतं प्रियं प्रवक्तुं नेच्छन्ति । अन्यथा कार्यविघातकतया स्वामिद्रोहिणः स्युरिति भावः ॥ 'अमौढ्यममान्द्यममृषाभाषित्वमभ्यूहकत्वं चेति चारगुणा' इति नीतिवाक्यामृते ॥

तथापि प्रियार्हे राज्ञि कटुनिष्ठुरोक्तिर्न युक्तेत्याशङ्क्य स्वाम्यनुज्ञया न दुष्यतीत्याशयेनाह—

द्विषां विघाताय विधातुमिच्छतो
रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्यविशेषशालिनीं
विनिश्चितार्थामिति वाचमाददे ॥ ३ ॥

द्विषामिति ॥ रहस्येकान्ते स वनेचरो द्विषां शत्रूणाम् ॥ कर्मणि षष्ठी । विघाताय । विहन्तुमित्यर्थः । 'तुमर्थाच्च भाववचनात्' इति चतुर्थी । 'भाववचनाश्च' इति तुमर्थे घञ्प्रत्ययः ॥ अत्र तादर्थ्यमपि न दोषः । तथापि प्रयोगवैचित्रीविशेषस्याप्यलङ्कारत्वादेवं व्याचक्षते । विधातुं व्यापारं कर्तुमिच्छतः । 'समानकर्तृकेषु तुमुन्' । द्विषो विहन्तुमुद्युक्तज्ञानस्येत्यर्थः । अत एव भूभृतो युधिष्ठिरस्यानुज्ञामधिगम्य । सुष्ठु भावः सौष्ठवं शब्दसामर्थ्यम् । सुष्ठुशब्दादव्ययादुद्गात्रादित्वादञ्प्रत्ययः । उदारस्य भाव औदार्यमर्थसंपत्तिः । तयोर्द्वन्द्वः सौष्ठवौदार्ये । अत्रौदार्यशब्दस्याजाद्यदन्तत्वेऽपि 'लक्षणहेत्वोः क्रियायाः' इत्यत्राल्पस्वरस्यापि हेतुशब्दस्य पूर्वनिपातमकुर्वता सूत्रकृतैव पूर्वनिपातस्यानित्यत्वज्ञापनान्न पूर्वनिपातः । उक्तं च काशिकायाम्—अयमेव लक्षणहेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारचिह्नम्' इति । त एव विशेषः । तयोर्वा विशेषः । तेन शालते शोभत इति सौष्ठवौदार्यविशेषशालिनी ताम् ताच्छील्ये णिनिः । विनिश्चितार्थां विशेषतः प्रमाणतो निर्णीतार्थामिति

वक्ष्यमाणरूपां वाचमाददे स्वीकृतवान् । उवाचेत्यर्थः ॥

प्रथमं तावदप्रियनिवेदकमात्मानं प्रत्यक्षोभं याचते—

क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ॥ ४ ॥

क्रियास्विति ॥ हे नृप, क्रियासु कृत्यवस्तुषु युक्तैर्नियुक्तैरनुजीविभिर्भृत्यैः । चारादिभिरित्यर्थः । चरन्तीति चराः । पचाद्यच् । त एव चाराः । चरेः पचाद्यजन्तात्प्रज्ञादित्वादण्प्रत्ययः ॥ त एव चक्षुर्येषां ते चारचक्षुषः । 'स्वपरमण्डले कार्याकार्यावलोकने चाराश्चक्षूंषि क्षितिपतीनाम्' इति नीतिवाक्यामृते । प्रभवो निग्रहानुग्रहसमर्थाः स्वामिनो न वञ्चनीया न प्रतारणीयाः । सत्यमेव वक्तव्या इत्यर्थः । चारापचारे चक्षुरपचारवद्राज्ञां पदे पदे निपात इति भावः । अतोऽप्रतार्यत्वाद्धेतोः । असाध्वप्रियं साधु प्रियं वा । मदुक्तमिति शेषः । क्षन्तुं । सोढुमर्हसि । कुतः । हितं पथ्यं मनोहारि प्रियं च वचो दुर्लभम् । अतो मद्वचोऽपि हितत्वादप्रियमपि क्षन्तव्यमित्यर्थः ॥

तर्हि तूष्णींभाव एव वरमित्याशङ्क्याह—

स किंसखा साधु न शास्ति योऽधिपं
हितान्न यःसंशृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसंपदः ॥ ५ ॥

स इति ॥ यः सखामात्यादिरधिपं स्वामिनं साधु हितं न शास्ति नोपदिशति । 'ब्रुविशासि—' इत्यादिना शासेर्दुहादिपा-

ठाद् द्विकर्मकत्वम् । स हितानुपदेष्टा । कुत्सितः सखा किंसखा । दुर्मन्त्रीत्यर्थः । 'किमः क्षेपे' इति समासान्तप्रतिषेधः । तथा यः प्रभुर्निग्रहानुग्रहसमर्थः स्वामी हितादाप्तजनाद्धितोपदेष्टुः सकाशात् । 'आख्यातोपयोगे' इत्यपादानत्वात्पञ्चमी । न संशृणुते न शृणोति । हितमिति शेषः । 'समो गम्यृच्छि—' इत्यादिना सम्पूर्वाच्छृणोतेरकर्मकादात्मनेपदम् अकर्मकत्वं वैवक्षिकम् । स हितमश्रोता प्रभुः किंप्रभुः कुत्सितस्वामी । पूर्ववत्समासः । सर्वथा सचिवेन वक्तव्यं श्रोतव्यं स्वामिना । एवं च राजमन्त्रिणोरैकमत्यं स्यादित्यर्थः । ऐकमत्यस्य फलमाह—सदेति । हि यस्मान्नृपेषु स्वामिषु । अमा सह भवा अमात्यास्तेषु च । 'अव्ययात्त्यप्' । अनुकूलेषु परस्परानुरक्तेषु सत्सु सर्वसंपदः सदा रतिमनुरागं कुर्वते कुर्वन्ति । न जातु जहतीत्यर्थः । अतो मया वक्तव्यं त्वया च श्रोतव्यमिति भावः ॥ अत्रैवं राजमन्त्रिणोर्हितानुपदेशतदश्रवणनिन्दासामर्थ्यसिद्धेरैकमत्यलक्षणकारणस्य निर्दिष्टस्य सर्वसंपत्सिद्धिरूपकार्येण समर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः । तदुक्तम्—'सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः' इति ॥

संप्रति स्वाहंकारं परिहरति—

निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया
निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥ ६ ॥

निसर्गेति ॥ निसर्गदुर्बोधं स्वभावदुर्ग्रहम् । 'ईषद्दुः—' इत्यादिना खल्प्रत्ययः । भूपतीनां चरितं क्व । अबोधविक्लवा

अज्ञानोपहता जन्तवः । मादृशाः पामरजना इत्यर्थः । क । नो-भयं संघटत इत्यर्थः । तथापि निगूढतत्त्वं संवृतयाथार्थ्यं विद्विषां नयवर्त्म षाड्गुण्यप्रयोगः 'संधिविग्रहयानानि संस्थाप्यासनमेव च । द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम् ॥' इत्यापिरूपो यन्मयावेदि । ज्ञातमिति यावत् । विदेः कर्मणि लुङ् । अयम् । इदं वेदनमित्यर्थः । विधेयप्राधान्यात्पुंलिङ्गनिर्देशः । तवानुभावः सामर्थ्यम् । अनुगतो भावोऽनुभाव इति घञन्तेन प्रादिसमासः । न तूपसृष्टाद्धञ्प्रत्ययः । 'श्रिणीभुवोऽनुपसर्गे' इत्यनुसर्गाद्भवतेर्धातोर्घञ्विधानात् । अत एव काशिकायाम्—'कथं प्रभावो राज्ञां प्रकृष्टो भाव इति प्रादिसमासः' इति । दोषपरिहारौ सम्यग्ज्ञात्वैव विज्ञापयामि । न तु वृथा कर्णकठोरं प्रलपामीत्याशयः ॥

संप्रति यद्वक्तव्यं तदाह—

विशङ्कमानो भवतः पराभवं ।
नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते ।
नयेन जेतुं जगतीं सुयोधनः ॥ ७ ॥

विशङ्कमान इति ॥ सुखेन युध्यते सुयोधनः । 'भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः' । नृपासनस्थः सिंहासनस्थोऽपि । वनमधिवसतीति वनाधिवासिनो वनस्थात् । राज्यभ्रष्टादपीत्यर्थः । भवतस्त्वत्तः पराभवं पराजयं विशङ्कमान उत्प्रेक्षमाणः सन् । दुष्टमुदरमस्येति दुरोदरं द्यूतम् । पृषोदरादित्वात्साधु । 'दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम्' इत्यमरः । तस्य च्छद्मना मिषेण जितां लब्धां दुर्नयार्जितां जगतीं महीम् । 'जगती विष्टपे मह्यां वास्तुच्छन्दोविशेषयोः' इति वैज-

यन्ती । नयेन नीत्या जेतुं वशीकर्तुं समीहते व्याप्रियते । न तू-दास्त इत्यर्थः । बलवत्स्वामिकमविशुद्धागमं च धनं भुञ्जानस्य कुतो मनसः समाधिरिति भावः । अत्र 'दुरोदरच्छद्मजिताम्' इति विशेषणद्वारेण पदार्थस्य चतुर्थपादार्थं प्रति हेतुत्वेनोपन्यासाद् द्वितीयकाव्यलिङ्गमलङ्कारः । तदुक्तम्—हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ॥

'नयेन जेतुं जगतीं समहीते' इत्युक्तम् । तत्प्रकारमाह—

तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसंपदा यशः ।
समुन्नयन्भूतिमनार्यसंगमाद्
वरं विरोधोऽपि समं महात्मभिः ॥ ८ ॥

तथापीति । तथापि साशङ्कोऽपि । जिह्मो वक्रः । वञ्चक इति यावत् । स दुर्योधनो भवज्जिगीषया । गुणैर्भवन्तमाक्रमितुमिच्छयेत्यर्थः । 'हेतौ' इति तृतीया । गुणसंपदा दानदाक्षिण्यादिगुणगरिम्णा । करणेन । शुभ्रं यशस्तनोति । स खलो गुणलोभनीयां त्वत्संपदमात्मसात्कर्तुं त्वत्तोऽपि गुणवत्तामात्मनः प्रकटयतीत्यर्थः । नन्वेवं गुणिनः सतोऽपि सज्जनविरोधो महानस्त्यस्य दोष इत्याशङ्क्य सो ऽपि सत्संसर्गालाभे नीचसङ्गमाद्वरमुत्कर्षावहत्वादित्याह—समिति । तथाहि । भूतिं समुन्नयन्नुत्कर्षमापादयन् । 'लटः शतृशानचौ—' इत्यादिना शतृप्रत्ययः । पुनर्लड्ग्रहणसामर्थ्यात्प्रथमासामानाधिकरण्यम् । महात्मभिः समम् । सहेत्यर्थः । साकं सत्रा समं सह' इत्यमरः । अनार्यसङ्गमाद् दुर्जनसंसर्गात् । 'पञ्चमी विभक्ते' इति पञ्चमी । विरोधोऽपि वरं मनाक्प्रियः । देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये' इत्यमरः । अत्र मैत्र्यपेक्षया मनाक्प्रियत्वं विरो-

धस्य 'भूतिं समुन्नयन्' इत्यस्य पूर्ववाक्यान्वये समाप्तस्य वाक्यार्थस्य पुनरादानात्समाप्तपुनरात्ताख्यानदोषापत्तिः । तदुक्तं काव्यप्रकाशे—'समाप्तपुनरादानात्समाप्तपुनरात्तकम्' इति । न च वाक्यान्तरमेतत् । येनोक्तदोषपरिहारः स्यात् । अर्थान्तरन्यासो ऽलङ्कारः । स च भूतिसमुन्नयनस्य पदार्थविशेषणद्वारा विरोधवत्त्वं प्रति हेतुत्वाभिधानरूपकाव्यलिङ्गानुप्राणित इति ॥

ननु 'कातर्यं केवला नीतिः' इत्याशङ्क्य नीतियुक्तं पौरुषमस्येत्याह—

कृतारिषड्वर्गजयेन मानवी
मगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तंदिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम् ॥ ९ ॥

कृतेति ॥ षण्णां वर्गः षड्वर्गः । अरीणामन्तःशत्रूणां कामक्रोधादीनां षड्वर्गो ऽरिषड्वर्गः । शिवभागवतवत्समासः । तस्य जयः कृतो येन तेन तथोक्तेन । विनीतेनेत्यर्थः । विनीताधिकारं प्रजापालनमिति भावः । अगम्यरूपां पुरुषमात्रदुष्प्राप्याम् । मनोरिमां मानवीम् । मनूपदिष्टसदाचारक्षुण्णामित्यर्थः । पदवीं प्रजापालनपद्धतिं प्रपित्सुना प्रपत्तुमिच्छुना । प्रपद्यतेः सन्नन्तादुप्रत्ययः 'सनि मीमा–' इत्यादिनेसादेशः । 'अत्र लोपो ऽभ्यासस्य' इत्यभ्यासलोपः । अस्ता तन्द्रिरालस्यं यस्य तेनास्ततन्द्रिणा । अनलसेनेत्यर्थः । तदिः सौत्रो धातुः । तस्मात् 'वङ्क्यादयश्च' इत्यौणादिकः क्रिन्प्रत्ययः 'कृदिकारादक्तिनो वा ङीष् वक्तव्य इति । 'वन्दीघटीतरीतन्द्रीति ङीषन्तो ऽपि' इति क्षीरस्वामी । तथा रामायणे प्रयोगः—'निस्तन्द्रि-

प्रमत्तश्च स्वदोषपरदोषवित् इति । तेन दुर्योधनेन । पुरुषस्य कर्म पौरुषं पुरुषकारः । उद्योग इति यावत् । युवादित्वादण्-प्रत्ययः । 'पौरुषं पुरुपस्योक्ते भावे कर्मणि तेजसि' इति विश्वः । नक्तं च दिवा च नक्तंदिवम् । आहोरात्रयोरित्यर्थः । 'अतुर-' इत्यादिना सप्तम्यर्थवृत्त्योरव्ययोर्द्वन्द्वनिपाते ऽच्समासान्तः । विभज्यास्यां वेलायामिदं कर्मेति विभागं कृत्वा नयेन नीत्या वितन्यते विस्तार्यते ॥

संप्रति भृत्याद्यनुरागमाह—

सखीनिव प्रीतियुजोऽनुजीविनः
समानमानान्सुहृदश्च बन्धुभिः ।
स संततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम् ॥ १० ॥

सखीनीति ॥ गतस्मयो निरहङ्कारो ऽत एव स दुर्योधनः सन्ततमनारतं साधु सम्यक् । अकपटमित्यर्थः । अनुजीविनो भृत्यान् । प्रीतियुजः स्निग्धान्सखीनिव मित्राणीव । दर्शयते । लोकस्येति शेषः । 'हेतुमति च' इति णिच् । 'णिचश्च' इत्यात्मनेपदम् । शोभनं हृदयं येषां तान्सुहृदो मित्राणि च । 'सुहृद्दुर्हृदौ 'मित्रामित्रयोः' इति निपातः । बन्धुभिर्भ्रात्रादिभिः समानमानास्तुल्यसत्कारान् दर्शयते । बन्धूनां समूहो बन्धुता ताम् ॥ 'ग्रामजनबन्धुसहायेभ्यस्तल्' । कृतमाधिपत्यं स्वाम्यं यस्यास्तां कृताधिपत्यामिव दर्शयते । बन्धूनधिपतीनिव दर्शयतीत्यर्थः । यथा भृत्यादिषु सख्यादिबुद्धिर्जायते लोकस्य तथा तान्संभावतीत्यर्थः । अनुजीव्यादीनाम् 'कर्तुरीप्सिततमं कर्म' इति कर्मत्वम् । पूर्वे त्वस्मिन्नेव पदान्वये वाक्यार्थमित्थं वर्णयन्ति—स राजानुजीव्यादीन्सख्यादीनिव दर्शयते । सख्या-

दय इव ते तु तं पश्यन्ति। सख्यादिभावेन पश्यतस्तांस्तथा दर्शयते। स्वयमेव छन्दानुवर्तितया स्वदर्शनं तेभ्यः प्रयच्छतीत्यर्थः। अर्थात्तस्येप्सितकर्मत्वम्। अणि कर्तुरनुजीव्यादेः 'अभिवादिदृशोरात्मनेपदमुपसंख्यानम्' इति पाक्षिकं कर्मत्वम् एवं चात्राण्यन्तकर्मणो राज्ञोऽण्यन्ते कर्तृत्वेऽपि 'आरोहयते हस्ती स्वयमेव' इत्यादिवदश्रूयमाणकर्मान्तरत्वाभावान्नायं णेरणादिसूत्रस्य विषय इति मत्वा 'णिचश्च' इत्यात्मनेपदं प्रतिपेदिरे। भाष्ये तु णेरणादिसूत्रविषयत्वमप्यस्योक्तम्। यथाह—"पश्यन्ति भृत्या राजानम्', 'दर्शयते भृत्यान् राजा', 'दर्शयते भृत्यै राजा' अत्रात्मनेपदं सिद्धं भवति" इति। अत्राह कैयटः—'ननु कर्मान्तरसद्भावादत्रात्मनेपदेन भाव्यम्। उच्यते—अस्मादेवोदाहरणाद्भाष्यकारस्यायमेवाभिप्राय ऊह्यते। अण्यन्तावस्थायां ये कर्तृकर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भावादात्मनेपदं न भवति। यथा—'स्थलमारोहयति मनुष्यान्' इति। इह त्वण्यन्तावस्थायां कर्तॄणां भृत्यानां णौ कर्मत्वमिति भवत्येवात्मनेपदमिति॥

न चायं त्रिवर्गात्ममाद्यतीत्याह—

असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवान्
न बाधतेऽस्य त्रिगणः परस्परम्॥ ११॥

असक्तमिति॥ यथायथं यथास्वं विभज्य। असङ्कीर्णरूपं विविच्येत्यर्थः। 'यथास्वे यथायथम्' इति निपातनाद्द्विर्भावो नपुंसकत्वं च। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वम्। पक्षे पातः पक्षपात आसक्तिविशेषः समस्तुल्यो यस्यां त-

या समपक्षपातया । भक्त्यानुरागविशेषेण । पूज्येष्वनुरागो भक्तिरित्युपदेशः । पूज्यश्चायं त्रिवर्ग इति । असक्तमनासक्तम् । अव्यसनितयेति यावत् । आराधयतः सेवमानस्यास्य दुर्योधनस्य त्रयाणां धर्मार्थकामानां गणस्त्रिगणस्त्रिवर्गः । 'त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः' इत्यमरः । गुणानुरागात्तदीयगुणेष्वनुरागात् । गुणवदाश्रयलोभादित्यर्थः । सख्यं मैत्रीम् 'सख्युर्यः' इति यप्रत्ययः । ईयिवानुपगतवानिवेत्युत्प्रेक्षा । 'उपेयिवाननाश्वाननूचानश्च' इति क्वसुप्रत्ययान्तो निपातः । 'नात्रोपसर्गस्तन्त्रम्' इति काशिकाकार आह स्म । परस्परं न बाधते । समवर्तित्वादस्य 'धर्मार्थकामाः परस्परानुपमर्देन वर्धन्त इत्यर्थः । उक्तं च—'धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः' इति ॥

अथ श्लोकत्रयेणोपायकौशलं दर्शयन्नादौ सामदाने दर्शयति—

निरत्ययं साम न दानवर्जितं
न भूरिदानं विरहय्य सत्क्रियाम् ।
प्रवर्तते तस्य विशेषशालिनी
गुणानुरोधेन विना न सत्क्रिया ॥ १२ ॥

निरत्ययमिति ॥ तस्य दुर्योधनस्य निरत्ययं निर्बाधम् । अमायिकमित्यर्थः । अन्यथा जनानां दुर्ग्रहत्वादिति भावः । साम सान्त्वम् । 'साम सान्त्वमुभे समे' इत्यमरः । दानवर्जितं न प्रवर्तते । अन्यथा लुब्धाद्यावर्जनस्य शुष्कप्रियैर्वाक्यैर्दुष्करत्वादिति भावः । उक्तं च—'लुब्धमर्थेन गृह्णीयात्साधुमञ्जलिकर्मणा । मूर्खं छन्दानुरोधेन तत्त्वार्थेन च पण्डितम् ॥' इति । तथा भूरि प्रभूतम् । न तु कदाचित्स्वल्पमित्यर्थः । दानं ध-

नत्यागः। सदित्यादरार्थेऽव्ययम्। 'आदरानादरयोः सदसती' इति निपातसंज्ञास्मरणात्। तस्य क्रियां सत्क्रियां विरहय्य विहाय। 'ल्यपि लघुपूर्वात्' इत्ययादेशः। न प्रवर्तते। अनादरे दानवैफल्यादिति भावः। न चैवं सर्वत्र, येनाविवेकित्वं कोशहानिश्च स्यादित्याह—प्रेति। विशेषशालिन्यतिशययोगिनी सत्क्रियादराक्रिया गुणानुरोधेन गुणानुरागेण विना न प्रवर्तते। 'पृथग्विना—' इत्यादिना तृतीया। गुणेष्वेवादरो भूरिदानं चेति नोक्तदोषावकाश इत्यर्थः। अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणतया स्थापनादेकावल्यलङ्कारः। तदुक्तं काव्यप्रकाशे—'स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परम्। विशेषणतया वस्तु यत्र सैकावली द्विधा॥' इति॥

अथ दण्डप्रकारमाह—

वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम्॥ १३॥

वसूनीति॥ वशी दुर्योधनो वसूनि धनानि वाञ्छन्। लोभान्नेत्यर्थः। 'वसु तोये धने मणौ' इति वैजयन्ती। निहन्तीति शेषः। तथा मन्युना कोपेन न च। 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः। 'धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः' इति स्मरणादित्यर्थः। किंतु निवृत्तकारणो निवृत्तलोभादिनिमित्तः सन्स्वधर्म इत्येव। स्वस्य राज्ञः सतो ममायं धर्मो ममेदं कर्तव्यमित्यस्मादेव हेतोरित्यर्थः। 'अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन्। अयशो महदाप्नोति नरकं चैव गच्छति॥' इति स्मरणादिति भावः। गुरूपदिष्टेन प्राड्विवाकोपदिष्टेन।

'धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः । समाहितमतिः पश्येद्व्यवहाराननुक्रमात् ॥' इति नारदस्मरणात् । दण्डेन दमेन । शिक्षयेत्यर्थः । रिपौ सुतेऽपि वा । स्थितमिति शेषः । एतेनास्य समदर्शित्वमुक्तम् । धर्मविप्लवं धर्मव्यतिक्रमम् । अधर्ममिति यावत् । निहन्ति निवारयति । दुष्ट एवास्य शत्रुः शिष्ट एव बन्धुः । न तु संबन्धनिबन्धनः पक्षपातोऽस्तीत्यर्थः ॥

संप्रति भेदकौशलं दर्शयति—

विधाय रक्षान्परितः परेतरा-
नशङ्किताकारमुपैति शङ्कितः ।
क्रियापवर्गेष्वनुजीविसात्कृताः ।
कृतज्ञतामस्य वदन्ति सम्पदः ॥ १४ ॥

विधायेति ॥ शङ्का सञ्जातास्य शङ्कितोऽविश्वस्तः सन्परितः सर्वत्र स्वपरमण्डले परेतरानात्मीयान् । अवञ्चकानिति यावत् । यद्वा परानितरयन्ति भेदेनात्मसात्कुर्वन्तीति परेतरान् । तत्करोतीति ण्यन्तात्कर्मण्यण्प्रत्ययः । रक्षन्तीति रक्षान्रक्षकान् । मन्त्रगुप्तिसमर्थानित्यर्थः । 'नन्दिग्रहि—' इत्यादिना पचाद्यच् । विधाय कृत्वा । नियुज्येत्यर्थः । अशङ्किताकारमुपैति । स्वयमविश्वस्तोऽपि विश्वस्तवदेव व्यवहरन्परमुखेनैव परान्भिनत्तीत्यर्थः । न च तान्रक्षानुपेक्षते येन तेऽपि विकुर्वीरन्नित्याह—क्रियेति । क्रियापवर्गेषु कर्मसमाप्तिष्वनुजीविसात्कृता भृत्याधीनाः कृताः । अपरावर्तितया दत्ता इत्यर्थः । 'देये त्रा च' इति साति प्रत्ययः । सम्पदोऽस्य राज्ञः कृतज्ञतामुपकारित्वं वदन्ति । प्रीतिदानैरेवास्य कृतज्ञत्वं प्रकाश्यते, न तु वाङ्मात्रेणेत्यर्थः । कृतज्ञे राजन्यनुजीविनोऽनुरज्यन्तेऽनुरक्ताश्च तं रक्षन्तीति भावः ॥

अथोपायप्रयोगस्य फलवत्तां दर्शयति—

अनारतं तेन पदेषु लम्भिता
विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायती
रुपेत्य संघर्षमिवार्थसम्पदः ॥ १५ ॥

अनारतमिति ॥ तेन राज्ञा पदेषूपादेयवस्तुषु । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । सम्यगसङ्कीर्णमव्यस्तं च विभज्य विविच्य । विनियोग एव सत्क्रियानुग्रहः । सत्कार इति यावत् । यासां ता लम्भिताः । स्थानेषु सम्यक्प्रयुक्ता इत्यर्थः । उपायाः सामादयः । संघर्षं परस्परस्पर्धामुपेत्येवेत्युत्प्रेक्षा । परिबृंहितायतीः प्रचितोत्तरकालाः । स्थिरा इत्यर्थः । अर्थसम्पदोऽनारतमजस्रं फलन्ति । प्रसुवत इत्यर्थः ॥

अर्थसम्पदमेवाह—

अनेकराजन्यरथाश्वसंकुलं
तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रतां
भृशं नृपोपायनदन्तिनां मदः ॥ १६ ॥

अनेकेति ॥ अयुग्मच्छदस्य सप्तपर्णपुष्पस्य गन्ध इव गन्धो यस्यासावयुग्मच्छदगन्धिः । 'सप्तम्युपमान—' इत्यादिना बहुव्रीहिरुत्तरपदलोपश्च । 'उपमानाच्च' इति समासान्त इकारः । नृपाणामुपायनान्युपहारभूता ये दन्तिनस्तेषां मदः । 'उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः । राज्ञामपत्यानि पुमांसो राजन्यः क्षत्रियाः । 'राजश्वशुराद्यत्' इति यत्प्रत्ययः । राज्ञोऽपत्ये जातिग्रहणादन् । रथाश्चाश्वाश्च रथाश्वम् । सेनाङ्गत्वादेकवद्भावः । अनेकेषां राजन्यानां रथाश्वेन संकुलं व्याप्तं

तदीयमास्थाननिकेतनाजिरं सभामण्डपाङ्गणं भृशमत्यर्थमार्द्रतां पङ्किलत्वं नयति । एतेन महासमृद्धिरस्योक्ता । अत एवोदात्तालङ्कारः । तथा चालङ्कारसूत्रम्—'समृद्धिमद्वस्तुवर्णनमुदात्तः' इति ॥

संप्रति जनपदक्षेमकृत्त्वमाह—

सुखेन लभ्या दधतः कृषीवलै-
रकृष्टपच्या इव सस्यसंपदः ।
वितन्वति क्षेममदेवमातृका-
श्चिराय तस्मिन्कुरवश्चकासति ॥ १७ ॥

सुखेनेति ॥ चिराय तस्मिन्दुर्योधने क्षेमं वितन्वति क्षेमंकरे सति । देवः पर्जन्य एव माता येषां ते देवमातृका वृष्ट्यम्बुजीविनो देशाः । ते न भवन्तीत्यदेवमातृकाः । नदीमातृका इत्यर्थः । 'देशो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः । स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥' इत्यमरः । एतेनास्य कुल्यादिपूर्तप्रवर्तकत्वमुक्तम् । कुरूणां निवासाः कुरवो जनपदविशेषाः । कृष्टेन पच्यन्त इति कृष्टपच्याः । 'राजसूय—' इत्यादिना कर्मकर्तरि क्यप्प्रत्ययान्तो निपातः । तद्विपरीता अकृष्टपच्या इव । कृषिर्येषामस्तीति कृषीवलैः । कर्षकैरित्यर्थः । 'रजः कृषि—' आदिना वलच् प्रत्ययः । 'वले' इति दीर्घः । सुखेनाक्लेशेन लभ्या लब्धुं शक्याः सस्यसंपदो दधतो धारयन्तः । 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः । चकासति । सर्वोत्कर्षेण वर्तन्त इत्यर्थः । 'अदभ्यस्तात्' इति झेरदादेशः । 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञा । संपन्नजनपदत्वादसन्तापकरत्वाच्च दुःसाध्योऽयमिति भावः ॥

नन्वेवं जनपदानुवर्तिनः कथमर्थलाभ इत्यत आह—

उदारकीर्तेरुदयं दयावतः
प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता
वसूपमानस्य वसूनि मेदिनी ॥ १८ ॥

उदारेति ॥ उदारकीर्तेर्महायशसः । 'उदारो दातृमहतोः' इत्यमरः । दयावतः परदुःखप्रहाणेच्छोः । अत एव प्रशान्तबाधं प्रशमितोपद्रवं यथा स्यात्तथेति क्रियाविशेषणम् । उदयविशेषणं वा । 'वा दान्तशान्त—' इत्यादिना शमिधातोर्ण्यन्तान्निष्ठान्तो निपातः । अभिरक्षया सर्वतस्त्राणेनोदयं वृद्धिं दिशतः संपादयतो वसूपमानस्य कुबेरोपमस्य । 'वसुर्मयूखाग्निधनाधिपेषु' इति विश्वः । अस्य दुर्योधनस्य गुणैर्दयादाक्षिण्यादिभिरुपस्नुता द्राविता मेदिनी वसूनि धनानि । 'वसु तोये धने मणौ' इति वैजयन्ती । स्वयं प्रदुग्धे । अक्लेशेन दुह्यत इत्यर्थः । दुहेः कर्मकर्तरि लट् ॥ 'न दुहस्नुनमां यक्चिणौ' इति यक्प्रतिषेधः । यथा केनचिद्विदग्धेन नवप्रसूता रक्षिता च गौः स्वयं प्रदुग्धे तद्वदिति भावः । अलंकारस्तु—'विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः' इति सर्वस्वकारः । अत्र प्रतीयमानया गवा सह प्रकृताया मेदिन्या भेदेऽभेदलक्षणातिशयोक्तिवशाद्दोह्यत्वेनोक्तिरिति संक्षेपः ॥

वीरभटानुकूल्यमाह—

महौजसो मानधना धनार्चिता
धनुर्भृतः संयति लब्धकीर्तयः ।
नसंहतास्तस्य नभिन्नवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥ १९ ॥

महौजस इति ॥ महौजसो महाबलाः । अन्यथा दुर्बला-

नामनुपकारित्वादिति भावः। मानः कुलशीलाद्यभिमान एव धनं येषां ते मानधनाः। अन्यथा कदाचिद्बलदर्पाद्विकुर्वीरन्निति भावः। धनार्चिता धनैरर्चिताः सत्कृताः। अन्यथा दारिद्र्यादेनं जह्युरिति भावः। संयति सङ्ग्रामे लब्धकीर्तयः। बहुयशस इत्यर्थः। अन्यथा कदाचिन्मुह्येयुरिति भावः। संहता मिथः संगताः स्वार्थनिष्ठा न भवन्तीति नसंहताः। नञर्थस्य न शब्दस्य सुप्सुपेति समासः। भिन्नवृत्तयो मिथो विरोधात्स्वामिकार्यकरा न भवन्तीति नभिन्नवृत्तयः। पूर्ववत्समासः। अन्यथा स्वामिकार्यविघातकतया स्वामिद्रोहिणः स्युरित्युभयत्रापि तात्पर्यार्थः। धनुर्भृतो धानुष्काः। आयुधीयमात्रोपलक्षणमेतत्। प्राधान्याद्धनुर्ग्रहणम्। तस्य दुर्योधनस्यासुभिः प्राणैः प्रियाणि समीहितुं कर्तुं वाञ्छन्ति। आनृण्यार्थं प्राणान्दातुमिच्छन्ति। अन्यथा दोषस्मरणादिति भावः। अत्र महौजसादिपदार्थानां प्राणदानकर्तव्यतां प्रति विशेषणगत्या हेतुत्वाभिधानात्काव्यलिङ्गमलङ्कारः। लक्षणं तूक्तम्। तथा साभिप्रायविशेषणत्वात्परिकरालङ्कार इति द्वयोस्तिलतण्डुलवद्विभक्ततया स्फुरणात्संसृष्टिः॥

संप्रति स्वराष्ट्रवत्परराष्ट्रवृत्तान्तमपि वेत्तीत्याह—

महीभृतां सच्चरितैश्चरैः क्रियाः
स वेद निःशेषमशेषितक्रियः।
महोदयैस्तस्य हितानुबन्धिभिः
प्रतीयते धातुरिवेहितं फलैः॥ २०॥

महीभृतामिति॥ अशेषितक्रियः समापितकृत्यः। आफलोदयकर्मेत्यर्थः। स दुर्योधनः सच्चरितैः शुद्धचरितैः। अवञ्चकैरित्यर्थः। चरन्तीति चरास्तैश्चरैः प्रणिधिभिः। पचाद्यच्।

महीभृतां क्रियाः प्रारम्भाश्चिः शेषं वेद वेत्ति । 'विदो लटो वा' इति णलादेशः । स्वरहस्यं तु न कश्चिद्वेदेत्याह—महोदयैरिति । धातुरिव तस्य दुर्योधनस्येहितमुद्योगो महोदयैर्महावृद्धिभिः । हितमनुबध्नन्त्यनुरुन्धन्तीति हितानुबन्धिभिः । स्वन्तैरित्यर्थः । फलैः कार्यसिद्धिभिः प्रतीयते ज्ञायते । फलानुमेयास्तस्य प्रारम्भा इत्यर्थः ॥

मित्रबलमाह—

न तेन सज्यं कचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम् ॥ २१ ॥

नेति ॥ तेन राज्ञा कचित्कुत्रापि । सह ज्यया मौर्व्या सज्यम् । 'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः । तेन सहेति तुल्ययोगे' इति बहुव्रीहिः । धनुर्नोद्यतं नोर्ध्वीकृतम् । आननं वा कोपविजिह्मं कोपकुटिलं न कृतम् । यस्य कोप एव नोदेति कुतस्तस्य युद्धप्रसक्तिरिति भावः । कथं तर्ह्याज्ञां कारयति राज्ञ इत्यत्राह—गुणेति । गुणेषु दयादाक्षिण्यादिष्वनुरागेण प्रेम्णा । माल्यपक्षे सूत्रानुषङ्गेण । यद्वा सौरभ्यगुणलोभेन । नराधिपैरस्य शासनमाज्ञा । मालैव माल्यं तदिव । 'चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्' इति क्षीरस्वामी । शिरोभिरुह्यते । धार्यते । 'वचिस्वपियजादीनां किति' इति यकि संप्रसारणम् । अत्रोपमा स्फुटैव ॥

संप्रत्यस्य धार्मिकत्वमाह—

स यौवराज्ये नवयौवनोद्धतं
निधाय दुःशासनमिद्धशासनः ।

मखेष्वखिन्नोऽनुमतः पुरोधसा
धिनोति हव्येन हिरण्यरेतसम् ॥ २२ ॥

स इति ॥ इद्धशासनोऽप्रतिहताज्ञः स दुर्योधनो नवयौवनेनोद्धतं प्रगल्भम् । धुरंधरमित्यर्थः । दुःखेन शास्यत इति दुःशासनस्तम् । 'भाषायां शासियुधि—' इत्यादिना खलर्थे युच्प्रत्ययः । यौवराज्ये युवराजकर्मणि । ब्राह्मणादित्वात्ष्यञ् । निधाय । नियुज्येत्यर्थः । पुरोधसा पुरोहितेनानुमतोऽनुज्ञातः । तस्मिन्याजके सतीत्यर्थः । तदुल्लङ्घने दोषस्मरणादिति भावः । 'निष्ठा' इति भूतार्थे क्तः । न तु 'मतिबुद्धि—' इत्यादिना वर्तमानार्थे । अन्यथा 'पुरोधसा' इत्यत्र 'क्तस्य च वर्तमाने' इति षष्ठी स्यात् । अखिन्नोऽनलसो मखेषु क्रतुषु हव्येन हविषा । हिरण्यं रेतो यस्य तं हिरण्यरेतसमनलं धिनोति प्रीणयति । धिन्वेः प्रीणनार्थात् 'धिन्विकृण्व्योर च' इत्युप्रत्ययः । अकारश्चान्तादेशः ॥

न चैतावता निरुद्योगैर्भाव्यमित्याशङ्क्याशां दर्शयति—

प्रलीनभूपालमपि स्थिरायति
प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यती
रहो दुरन्ता बलवद्विरोधिता ॥ २३ ॥

प्रलीनेति ॥ स दुर्योधनः प्रलीनभूपालम् । निःसपत्नमित्यर्थः । स्थिरायति । चिरस्थायीत्यर्थः । भुवो मण्डलमा वारिधिभ्य आवारिधि । 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावः । प्रशासदाज्ञापयन्नपि । 'जक्षित्यादयः षट्' इत्यभ्यस्तसञ्ज्ञा । 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः । त्वत्त्वत्त एष्यतीरागमिष्यतीः । धातूनामनेकार्थत्वादुक्तार्थसिद्धिः । अथ-

वाङ्पूर्वः पाठः । 'एत्येधत्यूठ्सु' इति वृद्धिः । 'लृटः सद्वा' इति शतृप्रत्ययः । 'उगितश्च' इति ङीप् । 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः । भियो भयहेतून् । विपद इत्यर्थः । चिन्तयत्यालोचयत्येव । स एवाह—अहो बलवद्विरोधिता दुरन्ता दुष्टावसाना । सार्वभौमस्यापि प्रबलैः सह वैरायमाणत्वमनर्थपर्यवसाय्येवेति तात्पर्यम् । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

ननु गूढाकारेङ्गितस्य तस्य भयं त्वया कथं निरधारीत्यत्राह—

कथाप्रसङ्गेन जनैरुदाहृता-
दनुस्मृताखण्डलसूनुविक्रमः ।
तवाभिधानाद्व्यथते नताननः
स दुःसहान्मन्त्रपदादिवोरगः ॥ २४ ॥

कथेति ॥ कथाप्रसङ्गेन गोष्ठीवचनेन जनैः । अन्यत्र कथाप्रसङ्गेन विषवैद्येन । 'कथाप्रसङ्गो वार्तायां विषवैद्येऽपि वाच्यवत्' इति विश्वः । एकवचनस्यातन्त्रत्वाज्जनविशेषणम् । उदाहृतादुच्चारितात्तवाभिधानान्नामधेयात्स्मारकाद्धेतोः । 'हेतौ' इति पञ्चमी । 'आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्यमरः । अन्यत्र तवाभिधानात् । 'नामैकदेशग्रहणे नाममात्रग्रहणम्' इति न्यायात्तश्च वश्च तवौ तार्क्ष्यवासुकी तयोरभिधानं यस्मिन्पदे तस्मात् । यद्वा कथाप्रसङ्ग इनाश्च ते जनाश्चेत्येकं पदम् । अनुस्मृताखण्डलसूनुविक्रमः स्मृतार्जुनपराक्रमः सन्दुःसहादतिदुःसहान्मन्त्रपदान्मन्त्रशब्दात्स्मारकाद्धेतोः । आखण्डलसूनूरिन्द्रानुजः । उपेन्द्रो विष्णुरिति यावत् । 'सूनुः पुत्रेऽनुजे रवौ' इति विश्वः । तस्य

विः पक्षी । गरुड इत्यर्थः । तस्य क्रमः पादविक्षेपः । सोऽनुस्मृतो येन स तथोक्तः स्मृतगरुडमहिमा । उरग इव । नताननः सन् । व्यथते दुःखायते । 'पीडा बाधा व्यथा दुःखम्' इत्यमरः । अत्युत्कटभयदोषादिविकारा दुर्वारा इति भावः । 'सर्वतो जयमन्विच्छेत्पुत्रादिच्छेत्पराजयम्' इति न्यायादर्जुनोत्कर्षकथनं युधिष्ठिरस्य भूषणमेवेति सर्वमवदातम् ॥

निगमयति—

तदाशु कर्तुं त्वयि जिह्ममुद्यते
विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां
प्रवृत्तिसाराः खलु मादृशां गिरः ॥ २५ ॥

तदिति ॥ तत्तस्मात्त्वयि जिह्मं कपटं कर्तुमुद्यते । त्वां जिघांसावित्यर्थः । तत्र तस्मिन्दुर्योधने विधेयं कर्तव्यमुत्तरं प्रतिक्रियाशु विधीयतां क्रियताम् । ननु कर्तव्यमपि त्वयैवोच्यतामिति चेत्तत्राह—परेति । परप्रणीतानि परोक्तानि वचांसि चिन्वतां गवेषयतां मादृशाम् । वार्ताहारिणामित्यर्थः । गिरः प्रवृत्तिसारा वार्तामात्रसाराः खलु । 'वार्ता प्रवृत्तिर्वृत्तान्तः' इत्यमरः । वार्तामात्रवादिनो वयम्, न तु कर्तव्यार्थोपदेशसमर्थाः । अतस्त्वयैव निर्धार्य कार्यमिति भावः । सामान्येन विशेषसमर्थनादर्थान्तरन्यासः ॥

इतीरयित्वा गिरमात्तसत्क्रिये
गतेऽथ पत्यौ वनसंनिवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा
तदाचचक्षेऽनुजसंनिधौ वचः ॥ २६ ॥

इतीति ॥ वनसंनिवासिनां पत्यौ वनेचराधिप इति गिरमीरयित्वोक्त्वात्तसत्क्रिये गृहीतपारितोषिके गते सति । तुष्टिदानमेव चाराणां हि वेतनम् । ते हि तल्लोभात्स्वामिकार्येष्वतीव त्वरयन्ते' इति नीतिवाक्यामृते । अथ महीभुजा राज्ञा कृष्णासदनं द्रौपदीभवनं प्रविश्यानुजसंनिधौ तद्वनेचरोक्तं वचो वाक्यमाचचक्ष आख्यातम् । अथवा । कृष्णेति पदच्छेदः । सदनं प्रविश्यानुजसन्निधौ तद्वचः कृष्णाचचक्ष आख्याता । चक्षिङो दुहादेर्द्विकर्मकत्वादप्रधाने कर्मणि लिट् ॥

निशम्य सिद्धिं द्विषतामपाकृती-
स्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनी
रुदाजहार द्रुपदात्मजा गिरः ॥ २७ ॥

निशम्येति ॥ अथ द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं वृद्धिरूपां निशम्य ततस्तदनन्तरम् । ततो द्विषद्भ्य आगतास्ततस्त्याः । 'अव्ययात्त्यप्' इति त्यप् अपाकृतीर्विकारान्विनियन्तुं निरोद्धुमक्षमा सती नृपस्य युधिष्ठिरस्य मन्युव्यवसाययोः क्रोधोद्योगयोर्दीपिनीः संवर्धिनीर्गिरो वाक्यान्युदाजहार । जगादेत्यर्थः ॥

भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः ॥ २८ ॥

भवादृशेष्विति ॥ भवादृशो भवद्विधाः । पण्डिता इत्यर्थः । तेषु विषये । 'त्यदादिषु—' इत्यादिना कञ् । 'आ सर्वनाम्नः' इत्याकारादेशः । प्रमदाजनोदितं स्त्रीजनोक्तम् । वदेः

क्तः । 'वचिस्वपि–इत्यादिना संप्रसारणम् । अनुशासनं नियोगवचनमाधिक्षेपस्तिरस्कार इव भवति । अतो न युक्तं वक्तुमित्यर्थः । तथापि वक्तुमनुचितत्वेऽपि निरस्तनारीसमयास्त्याजितशालीनतारूपस्त्रीसमाचाराः । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । दुराधयः समयोल्लङ्घनहेतुत्वाद् दुष्टा मनोव्यथाः । 'पुंस्याधिर्मानसी व्यथा' इत्यमरः । मां वक्तुं व्यवसाययन्ति प्रेरयन्ति । न किंचिदयुक्तं दुःखिनामिति भावः ॥

अखण्डमाखण्डलतुल्यधामभि-
श्चिरं धृता भूपतिभिः स्ववंशजैः ।
त्वयात्महस्तेन मही मदच्युता
मतङ्गजेन स्रगिवापवर्जिता ॥ २९ ॥

अखण्डमिति ॥ आखण्डलतुल्यधामभिरिन्द्रतुल्यप्रभावैः । स्ववंशजैः भूपतिभिर्भरतादिभिश्चिरमखण्डमविच्छिन्नं धृता मही त्वया । मदं च्योततीति मदच्युत् । क्विप् । तेन मदस्राविणा मतङ्गजेन स्रगिवात्महस्तेन स्वकरेण । स्वचापलेनेत्यर्थः । अपवर्जिता परिहृता त्यक्ता । स्वदोषादेवायमनर्थागम इत्यर्थः ॥

स्वदोषादेवायमनर्थागम इत्युक्तम् । स च दोषः कुटिलेष्वकौटिल्यमेवेत्याह—

व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधा-
न संवृताङ्गान्निशिता इवेषवः ॥ ३० ॥

व्रजन्तीति ॥ मूढधियो निर्विवेकबुद्धयस्ते पराभवं व्रजन्ति ये मायाविषु मायावत्सु विषये । 'अस्मायामेधा–' इत्या-

दिना विनिप्रत्ययः । मायिनो मायावन्तः । व्रीह्यादित्वादिनिप्रत्ययः । न भवन्ति । अत्रैवार्थान्तरं न्यस्यति—प्रविश्येति । शठा अपकारिणो धूर्तास्तस्थाविधानकुटिलानसंवृताङ्गानवर्मितशरीरान्निशिता इषव इव प्रविश्य प्रवेशं कृत्वात्मीया भूत्वा घ्नन्ति हि ।' आर्जवं हि कुटिलेषु न नीतिः इति भावः ॥

न च लक्ष्मीचाञ्चल्यादयमनर्थागमः, किन्तु स्वोपेक्षादोषमूलत्वादित्याशयेनाह—

गुणानुरक्तामनुरक्तसाधनः
कुलाभिमानी कुलजां नराधिपः ।
परैस्त्वदन्यः क इवापहारये-
न्मनोरमामात्मवधूमिव श्रियम् ॥ ३१ ॥

गुणेति ॥ अनुरक्तसाधनोऽनुकूलसहायवान् । उक्तं च कामन्दकीये—'उद्योगादनिवृत्तस्य ससहायस्य धीमतः । छायेवानुगता तस्य नित्यं श्रीः सहचारिणी ॥' इति । कुलाभिमानी क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च त्वदन्यस्त्वत्तोऽन्यः । 'अन्याराद्—' इत्यादिना पञ्चमी । क इव नराधिपो गुणः संन्ध्यादिभिः सौन्द्र्यादिभिश्चानुरक्तामनुरागिणीं कुलजां कुलक्रमादागतां कुलीनां च मनोरमां श्रियमात्मवधूमिव स्वभार्यामिव 'वधूर्जाया स्नुषा स्त्री च' इत्यमरः । परैः शत्रुभिरन्यैश्चापहारयेत् । स्वयमेवापहारं कारयेदित्यर्थः । कलत्रापहारवल्लक्ष्म्यपहारोऽपि राज्ञा मानहानिकरत्वादनुपेक्षणीय इति भावः ॥

अथ दशभिः कोपोद्दीपनं करोति—

भवन्तमेतर्हि मनस्विगर्हिते ।
विवर्तमानं नरदेव वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः

शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥ ३२ ॥

भवन्तमिति ॥ हे नरदेव नरेन्द्र, एतर्हिदानीम् । अस्मिन्नापत्कालेऽपीत्यर्थः । 'एतर्हि संप्रतीदानीमधुना सांप्रतं तथा' इत्यमरः । 'इदमो र्हिल्' इति र्हिल्प्रत्ययः । 'एतेतौ रथोः' इत्येतादेशः । आपदमेवाह—मनस्विगर्हिते शूरजनजुगुप्सिते वर्त्मनि मार्गे विवर्तमानम् । शत्रुकृतां दुर्दशामनुभवन्तामित्यर्थः । भवन्तं त्वामुदीरित उद्दीपितो मन्युः क्रोधः । शुष्कं नीरसम् । 'शुषः कः' इति निष्ठातकारस्य ककारः । शमी चासौ तरुश्चेति विशेषणसमासः । तम् । शमीग्रहणं शीघ्रज्वलनस्वभावात्कृतम् । उच्छिख उद्गतज्वालः । घृणिज्वाले अपि शिखे' इत्यमरः । वह्निरिव । कथं न ज्वलयति । ज्वलयितुमुचितामित्यर्थः । 'मितां ह्रस्वः' इति ह्रस्वः ॥

नन्वन्तः शत्रुत्वादयं क्रोधस्त्याज्य एवेत्याशङ्क्याह—

अवन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः ॥ ३३ ॥

अवन्ध्येति ॥ अवन्ध्यः कोपो यस्य तस्यावन्ध्यकोपस्यात एवापदां विहन्तुः निग्रहानुग्रहसमर्थस्येत्यर्थः । पुंस इति शेषः । देहिनो जन्तवः स्वयमेव वश्या वशंगता भवन्ति । 'वशं गतः' इति यत्प्रत्ययः । अतस्त्वया कोपिना भवितव्यमित्यर्थः । व्यतिरेके त्वनिष्टमाचष्टे—अमर्षशून्येन निष्कोपेन जन्तुना । कन्यया शोक इतिवत् । 'हेतौ' इति तृतीया । हृदयस्य कर्म हार्दं स्नेहः । 'प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' इत्यमरः । युवादित्वादण् । 'हृयस्य हृल्लेखयदण्लासेषु' इति हृदा-

देशः । जातहार्देन जातस्नेहेन सता जनस्यादरो न । विद्विषा द्विषता च सतादरो न । अमर्षहीनस्य रागद्वेषावकिंचित्करत्वादगण्यावित्यर्थः । अथवा विद्विषा सता दरो भयं न । 'दरोऽस्त्रियां भये श्वभ्रे' इत्यमरः । एतस्मिन्नेव प्रयोगे संधिवशाद् द्विधा पदच्छेदः । पुंवाक्येषु न दोषः । अतः स्थाने कोपः कार्यस्त्याज्यस्त्वस्थाने कोप इति भावः ॥

परिभ्रमंल्लोहितचन्दनोचितः
पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानसं
दुनोति नो कच्चिदयं वृकोदरः ॥ १४ ॥

परिभ्रमन्निति ॥ लोहितचन्दनोचित उचितलोहितचन्दनः । 'वाहिताग्न्यादिषु—' इति साधुः । अभ्यस्तरक्तचन्दन इत्यर्थः । 'अभ्यस्तेऽप्युचितं न्याय्यम्' इति यादवः । महारथो रथचारी । उभयत्रापि प्रागिति शेषः । अद्य तु रेणुरूषितो धूलिच्छुरितः । पादाभ्यामतति गच्छतीति पदातिः पादचारी । 'अज्यतिभ्यां च' इत्यनुवृत्तौ 'पादे च' इत्यौणादिक इण्प्रत्ययः । 'पादस्य पदाज्यातिगोपहतेषु' इति पदादेशः । अन्तर्गिरि गिरिष्वन्तः । विभक्त्यर्थेऽव्ययीभावः । 'गिरेश्च सेनकस्य' इति विकल्पात्समासान्ताभावः । परिभ्रमन्नयं वृकोदरो भीमः । सत्यधनस्येति सोल्लुण्ठनवचनम् । अद्यापि सत्यमेव रक्ष्यते, न तु भ्रातर इति भावः । तवेति शेषः । मानसं नो दुनोति । कच्चिन्न परितापयति । 'कच्चित्कामप्रवेदने' इत्यमरः । स्वाभिप्रायाविष्करणं कामप्रवेदनम् ॥

विजित्य यः प्राज्यमयच्छदुत्तरा
न्कुरूनकुप्यं वसु वासवोपमः ।

स वल्कवासांसि तवाधुनाहरन्
करोति मन्युं न कथं धनञ्जयः ॥ ३५ ॥

विजित्येति ॥ वासव इन्द्र उपमा उपमानं यस्य स वासवोपम इन्द्रतुल्यो यो धनञ्जयः । उत्तरान्कुरून्मेरोरुत्तरान्मानुषान्देशविशेषान्विजित्य प्राज्यं प्रभूतम् । 'प्रभूतं प्रचुरं प्राज्यम्' इत्यमरः । कुप्यादन्यदकुप्यं हेमरूप्यात्मकम् । 'स्यात्कोशश्च हिरण्यं च हेमरूप्ये कृताकृते । ताभ्यां यदन्यत्तत्कुप्यम्' इत्यमरः । वसु धनमयच्छद्दत्तवान् । 'पाघ्रा—' इत्यादिना दाणो यच्छादेशः । स धनं जयतीति धनञ्जयोऽर्जुनः । 'संज्ञायां भृतॄवृजि—' इत्यादिना खच्प्रत्ययः । 'अरुर्द्विषत्—' इत्यादिना मुमागमः । अधुनास्मिन्काले । 'अधुना' इति निपातनात्साधुः । तव वल्कवासांस्याहरन्कथं तव मन्युं क्रोधं दुःखं वा न करोति ॥

वनान्तशय्याकठिनीकृताकृती
कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ
विलोकयन्नुत्सहसे न बाधितुम् ॥ ३६ ॥

वनान्तेति ॥ वनान्तो वनभूमिरेव शय्या तथा कठिनीकृताकृती कठिनीकृतदेहौ । आकारो देह आकृतिः' इति वैजयन्ती । विष्वक्समन्तात् । 'समन्ततस्तु परितः सर्वतो विष्वगित्यपि' इत्यमरः । कचाचितौ कचव्याप्तौ । विशीर्णकेशावित्यर्थः । अत एवागजौ गिरिसम्भवौ गजाविव स्थितावेतौ यमौ युग्मजातौ । माद्रीपुत्रावित्यर्थः । 'यमो दण्डधरे ध्वाङ्क्षे संयमे यमजेऽपि च' इति विश्वः । विलोकयंस्त्वं कथं धृतिसंयमौ सन्तोषनियमौ । 'धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु' इति विश्वः । बाधितुं नोत्सहसे न प्रवर्तसे । 'शक धृष—' इत्या-

दिना तुमुन्। अहो ते महद्धैर्यमिति भावः ॥

अथ राज्ञो दुर्दशां दर्शयितुमुपोद्घातमाह। प्रकृतार्थं वर्णयितुमर्थान्तरवर्णनमुपोद्घातः ॥

इमामहं वेद न तावकीं धियं
विचित्ररूपाः खलु चित्तवृत्तयः।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः ॥ ३७ ॥

इमामिति ॥ इमां वर्तमानाम्। तवेमां तावकीं त्वदीयाम्। 'तस्येदम्' इत्यण्प्रत्ययः। 'तवकममकावेकवचने' इति तवकादेशः। धियं त्वदापद्विषयां चित्तवृत्तिमहं न वेद कीदृशी वा न वेद्मि। परबुद्धेरप्रत्यक्षत्वादिति भावः। 'विदो लटो वा' इति लटो णलादेशः। न चात्मदृष्टान्तेनापन्नत्वाद् दुःखित्वमनुमातुं शक्यते। धीरादिष्वनैकान्तिकत्वादित्याशयेनाह—चित्तवृत्तयो विचित्ररूपा धीराधीराद्यनेकप्रकाराः खलु। किन्तु परामुत्कृष्टां भवदापदं विचिन्तयन्त्या भावयन्त्या मम चेतश्चित्तम्। आधयो मनोव्यथाः। 'उपसर्गे घोः किः' इति किप्रत्ययः। प्रसभं प्रसह्य रुजन्ति भञ्जन्ति। 'रुजो भङ्गे' इति धातोर्लट्। पश्यतामपि दुःसहा दुःखजननी त्वद्विपत्तिरनुभवितारं त्वां न विकरोतीति महाचित्रमित्यर्थः। चेत इति 'रुजार्थानां भाववचनानामज्वरेः' इति षष्ठी न भवति। तत्र शेषाधिकाराच्छेषत्वस्य विवक्षितत्वादिति ॥

तदापदमेव श्लोकत्रयेणाह—

पुराधिरूढः शयनं महाधनं
विबोध्यसे यः स्तुतिगीतिमङ्गलैः।
अदभ्रदर्भामधिशय्य स स्थलीं

जहासि निद्रामशिवैः शिवारुतैः ॥ ३८ ॥

पुरेति ॥ यस्त्वं महाधनं बहुमूल्यं श्रेष्ठम् । 'महाधनं महामूल्ये' इति विश्वः । शयनं शय्यामधिरूढः सन् । स्तुतयो गीतयश्चता एव मङ्गलानि तैः करणभूतैः पुरा विबोध्यसे । वैतालिकैरिति शेषः । पूर्वं बोधित इत्यर्थः । 'पुरि लुङ् चास्मे' इति भूतार्थे लट् । स त्वमदभ्रदर्भां बहुकुशाम् । 'अस्त्री कुशं कुथो दर्भः' इति । 'अदभ्रं बहुलं बहु' इति चामरः । स्थलीमकृत्रिमभूमिम् । 'जानपद—' इत्यादिनाकृत्रिमार्थे ङीष् । एतेन दुःसहस्पर्शत्वमुक्तम् । 'अधिशीङ्स्थासां कर्म' इति कर्मत्वम् । अधिशय्य शयित्वा । 'अयङ्यि क्ङिति' इत्ययङादेशः । अशिवैरमङ्गलैः शिवारुतैः क्रोष्टुवासितैः। 'शिवा हरीतकी क्रोष्टा शमी नद्यामलक्युभे'इति वैजयन्ती। निद्रां जहासि। अद्येति शेषः॥

पुरोपनीतं नृप रामणीयकं
द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः ॥ ३९ ॥

पुरेति ॥ हे नृप, यदेतत्पुरोवर्ति वपुः पुरा द्विजातिशेषेण द्विजभुक्तावशिष्टेनान्धसान्नेन । 'भिस्सा स्त्री भक्तमन्धोऽन्नम्' इत्यमरः । रमणीयस्य भावो रामणीयकं मनोहरत्वमुपनीतं प्रापितम् । नयतेर्द्विकर्मकत्वात्प्रधाने कर्मणि क्तः । 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्' इति वचनात् । अद्य वन्यफलाशिनस्ते तव तद्वपुर्यशसा समं परमतिमात्रं कार्श्यं परैति प्राप्नोति । उभयमपि क्षीयत इत्यर्थः । अत्र सहोक्तिरलङ्कारः । तदुक्तं काव्यप्रकाशे—'सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्' इति ॥

अनारतं यौ मणिपीठशायिना-
वरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते
मृगद्विजालूनशिखेषु बर्हिषाम् ॥ ४० ॥

अनारतमिति ॥ अनारतमजस्रं मणिपीठशायिनौ मणिमयपादपीठस्थायिनौ यौ चरणौ राजशिरःस्रजां नमद्भूपालमौलिस्रजां रजः परागोऽरञ्जयत्, तौ ते चरणौ मृगैर्द्विजैश्च तपस्विभिरालूनशिखेषु च्छिन्नाग्रेषु बर्हिषां कुशानाम् । 'बर्हिः कुशहुताशयोः' इति विश्वः । वनेषु निषीदतास्तिष्ठतः ॥

ननु सर्वप्राणिसाधारण्यामापदि का परिदेवनेत्यत्राह—

द्विषन्निमित्ता यदियं दशा ततः
समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसंपदां
पराभवोऽप्युत्सव एव मानिनाम् ॥ ४१ ॥

द्विषदिति ॥ यद्यतः कारणादियं दशावस्था । 'दशा वर्तावस्थायाम्' इति विश्वः । द्विषन्तो निमित्तं यस्याः सा । 'द्विषोऽमित्रे' इति शतृप्रत्ययः । अतो मे मनः समूलं साशयमुन्मूलयतीवोत्पाटयतीव । दैविकी त्वापन्न दुःखायेत्याह—परैरिति । परैःशत्रुभिरपर्यासितापर्यावर्तिता वीर्यसंपद्येषां तेषां मानिनां पराभावो विपदप्युत्सव एवेति वैधर्म्येणार्थान्तरन्यासः । मानहानिर्दुःसहा, न त्वापदिति भावः ॥

विहाय शान्तिं नृप धाम तत्पुनः
प्रसीद संधेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः
शमेन सिद्धिं मुनयो न भूभृतः ॥ ४२ ॥

विहायेति ॥ हे नृप, शान्तिं विहाय तत्प्रसिद्धं धाम तेजो विद्विषां वधाय पुनः सन्धेह्यङ्गीकुरु प्रसीद । प्रार्थनायां लोट् । ननु शमेन कार्यसिद्धौ किं क्रोधेनेत्यत्राह—व्रजन्तीति । निःस्पृहा मुनयः शत्रूनवधूय निर्जित्य शमेन क्रोधवर्जनेन सिद्धिं व्रजन्ति । भूभृतस्तु न । कैवल्यकार्यवद्राजकार्यं न शान्तिसाध्यमित्यर्थः ॥

पुरःसरा धामवतां यशोधनाः
सुदुःसहं प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्वते रतिं
निराश्रया हन्त हता मनस्विता ॥ ४३ ॥

पुर इति ॥ किं च धामवतां तेजस्विनाम् । परनिकारासहिष्णूनामित्यर्थः । पुरः सरन्तीति पुरःसरा अग्रेसराः । 'पुरोऽग्रतोऽग्रेषु सर्तेः' इति टप्रत्ययः । यशोधना भवादृशाः सुदुःसहमतिदुःसहमीदृशमुक्तप्रकारं निकारं पराभवं प्राप्य रतिं संतोषमधिकुर्वते स्वीकुर्वते चेत्तर्हि । हन्त इति खेदे । मनस्विताभिमानिता निराश्रया सती हता । तेजस्विजनैकशरणत्वान्मनस्वितताया इत्यर्थः । अतः पराक्रमितव्यमिति भावः । यद्यप्यत्र प्रसहनस्यासक्तेरधिपूर्वात्करोतेः 'अधः प्रसहने' इत्यात्मनेपदं न भवति । 'प्रसहनं पारभवः' इति काशिका । तथाप्यस्याः कर्त्रभिप्रायविवक्षायामेव प्रयोजकत्वात्कर्त्रभिप्राये 'स्वरितञितः—' इत्यात्मनेपदं प्रसिद्धम् ॥

अथ क्षमामेव निरस्तविक्रम-
श्चिराय पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं
जटाधरः सञ्जुहुधीह पावकम् ॥ ४४ ॥

५

अथेति ॥ अथ पक्षान्तरे निरस्तविक्रमः सन् । चिराय चिरकालेनापि क्षमां क्षान्तिमेव । 'क्षितिक्षान्त्योः क्षमा' इत्यमरः । सुखस्य साधनं पर्येष्यवगच्छसि तर्हि लक्ष्मीपतिलक्ष्म राजचिह्नं कार्मुकं विहाय । धरतीति धरः । पचाद्यच् । जटानां धरो जटाधरः सन्निह वने पावकं जुहुधि । पावके होमं कुर्वित्यर्थः । अधिकरणे कर्मत्वोपचारः विरक्तस्य किं धनुषेत्यर्थः । 'हुझल्भ्यो हेर्धिः' ।

अथ समयोल्लङ्घनाद्बिभेषि तदपि न किंचिदित्याह—

न समयपरिरक्षणं क्षमं ते
निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा
विदधति सोपधि संधिदूषणानि ॥ ४५ ॥

नेति ॥ परेषु शत्रुषु । निकृतिः परं प्रधानं येषु तेषु । तथोक्तेष्वपकारतत्परेषु सत्सु भूरिधाम्नो महौजसः प्रतीकारक्षमस्य ते तव समयस्त्रयोदशसंवत्सरान्वने वत्स्यामीत्येवंरूपा संवित् । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । तस्य परिरक्षणं प्रतीक्षणं न क्षमं न युक्तम् । 'युक्ते क्षमं शक्ते हिते त्रिषु' इत्यमरः । हि यस्माद्विजयार्थिनो विजिगीषवः क्षितीशाः । अरिषु विषये सोपधि सकपटं यथा तथा । 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे' इत्यमरः । संधिदूषणानि विदधति केनचिद्व्याजेन दोषमापाद्य संधिं दूषयन्ति । विघटयन्तीत्यर्थः । शक्तस्य हि विजिगीषोः सर्वथा कार्यसाधनं प्रधानमन्यत्समयरक्षणादिकमशक्तस्येति भावः । अर्थान्तरन्यासोऽलङ्कारः । पुष्पिताग्रावृत्तम् ॥

उक्तमर्थमाशीर्वादपूर्वकमुपसंहरति—

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥४६॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये प्रथमः सर्गः ।

विधीति ॥ विधिर्दैवम् । 'विधिर्विधाने दैवे च' इत्यमरः । समयः कालस्तयोर्नियोगान्नियमनाद्धेतोः । तयोर्दुरतिक्रमत्वादिति भावः । अगाधे दुस्तरे । आपत्पयोधिरिवेत्युपमितसमासः । दिनकृतमिवेति वक्ष्यमाणानुसाराच्चस्मिन्नापत्पयोधौ मग्नम् । सूर्योऽपि सायं सागरे मज्जति परेद्युरुन्मज्जतीत्यागमः । दीप्तिः प्रताप आतपश्च तस्याः संहारेण जिह्ममप्रसन्नम् । शिथिलवसुं शिथिलधनम्, अन्यत्र शिथिलरश्मिम् । 'वसुर्देवेऽग्नौ रश्मौ च वसु तोये धने मणौ' इति वैजयन्ती । 'शिथिलबलम्' इति पाठे तूभयत्रापि शिथिशक्तिकमित्यर्थः । रिपुस्तिमिरमिवेति रिपुतिमिरमुदस्य निरस्योदीयमानमुद्यन्तम् । 'इङ् गतौ' इति धातोर्दैवादिकात्कर्तरि शानच् । त्वां दिनादौ दिनकृतमिव लक्ष्मी भूयः समभ्येतु भजतु । 'आशिषि लिङ्लोटौ' इति लोट् । चमत्कारकारितया मङ्गलाचरणरूपतया च सर्गान्त्यश्लोकेषु लक्ष्मीशब्दप्रयोगः । यथाह भगवान्भाष्यकारः—'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथयन्ते वीरपुरुषकाण्यायुष्मत्पुरुषकाणि च भवन्त्यध्येतारश्च प्रवक्तारो भवन्ति' इति । पूर्णोपमेयम् । मालिनी वृत्तम् 'सर्गान्तत्वादूवृत्तभेदः । यथाह दण्डी—'सर्गैरनतिवि-

स्तीर्णैः श्राव्यवृत्तैः सुसंधिभिः । सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम् ॥' इति ॥

अथ कविः काव्यवर्णनीयाख्यानपूर्वकं सर्गपरिसमाप्तिं कथयति—इतीत्यादि । इतिशब्दः परिसमाप्तौ । भारविकृताविति कविनामकथनम् । महाकाव्य इति महच्छब्देन लक्षणसंपत्तिः सूचिता । किरातार्जुनीय इति काव्यवर्णनीययोः कथनम् । प्रथमः सर्गः । समाप्त इति शेषः । एवमुत्तरत्रापि द्रष्टव्यम् । किरातार्जुनावधिकृत्य कृतो ग्रन्थः किरातार्जुनीयम् । 'शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः' इति द्वन्द्वाच्छप्रत्ययः । राघवपाण्डवीयमितिवत् । तथा ह्यर्जुन एवात्र नायकः । किरातस्तु तदुत्कर्षाय प्रतिभटतया वर्णितः । यथाह दण्डी— 'वंशवीर्यप्रतापादि वर्णयित्वा रिपोरपि । तज्जयान्नायकोत्कर्षकथनं च धिनोति नः ॥' इति । अथायं संग्रहः—'नेता' मध्यमपाण्डवो भगवतो नारायणस्यांशजस्तस्योत्कर्षकृते त्ववर्ण्यततरां दिव्यः किरातः पुनः । शृङ्गारादिरसोऽङ्गमत्र विजयी वीरः प्रधानो रसः शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम् ॥' इति ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां प्रथमः सर्गः समाप्तः ।

द्वितीयः सर्गः

विहितां प्रियया मनःप्रिया
मथ निश्चित्य गिरं गरीयसीम् ।

उपपत्तिमदूर्जिताश्रयं
नृपमूचे वचनं वृकोदरः ॥ १ ॥

विहितामिति ॥ अथ वृकोदरः भीमः प्रियया द्रौपद्या । प्रियाग्रहणमस्या हितोपदेशतात्पर्यसूचनार्थम् । विहिताम् । अभिहितामित्यर्थः । विपूर्वस्य दधातेः क्रियासामान्यवाचिनो योग्यविशेषपर्यवसानात् । मनःप्रियामभिमतार्थयोगान्मनोहराम् । विशेषणद्वयेनापि गिरो ग्राह्यत्वमुक्तम् । गिरं गरीयसीं सारवत्तरां निश्चित्य नृपं धर्मराजमुपपत्तिमद्युक्तियुक्तमूर्जिताश्रयमुदारार्थं वचनमूच उक्तवान् । कर्तरि लिट् । ब्रुवो वचिरादेशः । 'ब्रुविशासि–' इत्यादिना द्विकर्मकत्वम् । 'अकथितं च इति नृपस्य कर्मत्वम् ॥

किं तद्वचनं तदाह—

यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्वचं
वचनं तद्विदधीत विस्मयम् ॥ २ ॥

यदिति ॥ मानिनी क्षत्रियकुलाभिमानवती द्रौपदी स्नेहमयेन स्नेहप्रचुरेण । 'तत्प्रकृतवचने मयट्' । चक्षुषा ज्ञानचक्षुषा । एतेनाप्तत्वमुक्तम् । परितो वीक्ष्य समन्ततो विविच्य यद्वचनमवोचत । ब्रुवो वक्तेर्वा लुङ् । 'वच उम्' इत्युमागमः । वागधिपस्य बृहस्पतेरपि दुर्वचं वक्तुमशक्यम् । शेषे षष्ठीयम्, न कृद्योगलक्षणा । अतो 'न लोक–' इत्यादिना षष्ठीप्रतिषेधो नास्ति । तद्वचनं विस्मयं विदधीत । सर्वस्यापीति शेषः । अथवा वागधिपस्यापि विस्मयं विदधीतेति सम्बन्धः । दुर्वचम् । केनापीति शेषः । यतः स्त्रैणमपि शास्त्रमनुरुणद्धि

हितं चानुबध्नाति । अतो विस्मयकरं ग्राह्यं चैतद्वचनमिति तात्पर्यार्थः ॥

विस्मयकरत्वे हेतुमाह—

विषमोऽपि विगाह्यते नयः
कृततीर्थः पयसामिवाशयः ।
स तु तत्र विशेषदुर्लभः
सदुपन्यस्यति कृत्यवर्त्म यः ॥ ३ ॥

विषम इति ॥ विषमोऽपि दुर्बोधोऽपि । अन्यत्र दुष्प्रवेशोऽपि । नयो नीतिशास्त्रम् । पयसामाशयो ह्रद इव । कृततीर्थः कृताभ्यासाद्युपायः सन् । 'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु' इति विश्वः । अन्यत्र कृतजलावतारः सन् । 'तीर्थं योनौ जलावतारे च इति लहायुधः । विगाह्यते गृह्यते प्रविश्यते च । किंतु तत्र नये जलाशये च स तादृशः पुरुषो विशेषदुर्लभोऽत्यन्तदुर्लभो यः कृत्यं संधिविग्रहादि कार्यं स्नानादिकं च तस्य वर्त्म सत्साधु देशकालाद्यविरुद्धम् । यथा तथा । अन्यत्र गर्तग्राहपाषाणादिरहितम् यथा तथोपन्यस्यत्युदाहरति । 'उपन्यासस्तु वाङ्मुखम् । उपोद्घात उदाहारः' इत्यमरः । यथा केनचित्कृततीर्थे पयसि गम्भीरेऽपि प्रवेष्टारः सन्ति । तीर्थकरस्तु विरलः । तद्वन्नीतावपि गूढमपि तत्त्वं वक्तरि सति बोद्धारः सन्ति । वक्ता तु न सुलभः । अत इयमपठितापि साधु वक्तीति युज्यते विस्मय इत्यर्थः ॥

अथ ग्राह्यत्वे हेतुमाह—

परिणामसुखे गरीयसि
व्यथकेऽस्मिन्वचसि क्षतौजसाम् ।

अतिवीर्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥ ४ ॥

परिणामेति ॥ परिणामः फलकालः परिपाकावस्था च । तत्र सुखे हिते । 'शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च' इति सुखशब्दस्य विशेष्यलिङ्गत्वम् । गरीयसि भूयिष्ठे श्रेष्ठे च । क्षतौजसामुभयत्रापि क्षीणशक्तीनां व्यथके युद्धोपोद्बलकत्वाद्भयङ्करे । अन्यत्रादौ संशयादिदुःखजनके । अल्पीयस्यल्पाक्षरेऽल्पमात्रे च । उक्तं च—'स्वल्पा च मात्रा बहुलो गुणश्च' इति । अस्मिन्वचसि द्रौपदीवाक्ये । अतिवीर्यवत्यत्यन्तसामर्थ्यवति भेषज औषध इव । 'भेषजौषधभैषज्यम्' इत्यमरः । बहुरनेको गुणो मानत्राणराज्यलाभादिरारोग्यबलपोषादिश्च दृश्यते । अतो ग्राह्यमस्या वचनमिति भावः ॥

सत्यमेवं तथापि मह्यं न रोचते । किं करोमीत्यत्राह—

इयमिष्टगुणाय रोचतां
रुचिरार्था भवतेऽपि भारती ।
ननु वक्तृविशेषनिःस्पृहा
गुणगृह्या वचने विपश्चितः ॥ ५ ॥

इयमिति ॥ रुचिरार्था महितार्थसम्पन्नेति रुचिहेतूक्तिः । इयं भारती द्रौपदीवाक्यमिष्टगुणाय । गुणग्राहिण इत्यर्थः । भवते तुभ्यमपि । 'रुच्यर्थानां प्रीयमाणः' इति सम्प्रदानत्वाच्चतुर्थी । रोचतां स्वदताम् । विध्यर्थे लोट् । हितवचने बलादपीच्छां कुर्यादौषधवदिति भावः । तथापि स्त्रैणे वचसि का श्रद्धा तत्राह—नन्विति । गुणानां गृह्या गुणगृह्याः । गुणपक्षपातिन इत्यर्थः । 'पदास्वैरिबाह्यापक्ष्येषु च' इति ग्रहेः क्यप् । विपश्चितो विद्वांसः । 'विद्वान्विपश्चिद्दोषज्ञः' इत्यमरः ।

वचने विषये वक्तृविशेषे स्त्रीपुंसादिलक्षणे निःस्पृहा ननु निरास्थाः खलु । 'बालादपि सुभाषितं ग्राह्यम्' इति न्यायादिति भावः ॥

सम्प्रति स्वयमुपालभते—

चतसृष्वपि ते विवेकिनी
नृप विद्यासु निरूढिमागता ।
कथमेत्य मतिर्विपर्ययं
करिणी पङ्कमिवावसीदति ॥ ६ ॥

चतसृष्विति ॥ हे नृप, चतसृष्वपि विद्यास्वान्वीक्षिक्यादिषु । 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती । विद्याश्चैताश्चतस्रस्तु लोकसंस्थितिहेतवः' इति कामन्दकः । निरूढिमागता प्रसिद्धिं गता । अत एव विवेकिनी सदसद्विवेकवती । यथाह मनुः—'आन्वीक्षिक्यां तु विज्ञानं धर्माधर्मौ त्रयीस्थितौ । अर्थानर्थौ तु वार्तायां दण्डनीत्यां नयानयौ ॥' इति ते मतिः कथं करिणी पङ्कमिव विपर्ययं वैपरीत्यमविवेकरूपमेत्यावसीदति नश्यति । तन्न युक्तमिति भावः ॥

किं नृश्छिन्नमिदानीं येनेत्थमुपालभ्येमहीत्यत्राह—

विधुरं किमतःपरं परै-
रवगीतां गमिते दशामिमाम् ।
अवसीदति यत्सुरैरपि
त्वयि संभावितवृत्ति पौरुषम् ॥ ७ ॥

विधुरमिति ॥ त्वयि परैः शत्रुभिरिमामीदृशीमवगीतां गर्हिताम् । 'अवगीतं तु निर्वादे मुहुर्दृष्टे च गर्हिते' इति विश्वः । दशां गमिते प्रापिते सति । सुरैरपि संभावितवृत्ति बहुकृतप्रसारम् । अथवा निश्चितसद्भावम् पौरुषं पुरुषकारः । युवादित्वा-

ण्प्रत्ययः । अवसीदति नश्यतीति यत् । अतःपरम् अतोऽन्यद-धिकं किं विधुरं किं कष्टम् । न किञ्चिदित्यर्थः । 'विधुरं प्र-त्यवाये स्यात्कष्टविश्लेषयोरपि' इति वैजयन्ती । अस्तीति शेषः । 'अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति' इति भा-ष्यकारः । भवन्तीति लटः पूर्वाचार्याणां संज्ञा । यद्वा पुरुषा-धिकारस्य दुर्दशा सा च शत्रुकृता । तदुपरि महत्कष्टं तच्च त्व-दुपेक्षयेत्युपालभ्यस इत्यर्थः ॥

अथोपेक्षाकालत्वादियमुपेक्षेत्याशङ्क्य नायमुपेक्षाकाल इति वक्तुं तदेव तावच्छ्लोकद्वयेन विविनक्ति—

द्विषतामुदयः सुमेधसा
गुरुरस्वन्ततरः सुमर्षणः ।
न महानपि भूतिमिच्छता
फलसंपत्प्रवणः परिक्षयः ॥ ८ ॥

द्विषतामिति ॥ भूतिमुदयमिच्छता । शोभना मेधा यस्य तेन सुमेधसा सुधिया । 'नित्यमसिच्प्रजामेधयोः' इत्यसि-च्प्रत्ययः । गुरुर्महानप्यस्वन्ततरोऽत्यन्तदुरन्तः । क्षयोन्मुख इत्यर्थः । द्विषतामुदयो वृद्धिः । सुखेन मृष्यत इति सुमर्षणः सुसहः । उपेक्ष्य इत्यर्थः । स्वन्तश्चेद् दुर्मर्षण इति भावः । 'भा-षायां शासि—' इत्यादिना खलर्थे युच्प्रत्ययः । महानपि फ-लसंपत्प्रवणः फलसंपदुन्मुखः । 'प्रनिरन्तर—' इत्यादिना ण-त्वम् । परिक्षयो न सुमर्षणः । नोपेक्ष्य इत्यर्थः । अन्यथा तू-पेक्ष्य इति भावः । नचुदय एव प्रतीकार्यो न च क्षय इत्येवो-पेक्ष्यः । किन्तु स्वन्तत्वास्वन्तत्वाभ्यामुभावपि प्रतीकार्यावुपे-क्ष्यौ च भवत इत्यर्थः ॥

अथोभयोरपि मध्य एकतरस्योदयक्षययोर्गतिमुक्त्वेदानीं

६

युगपत्परिक्षयागमे गतिमाह—

अचिरेण परस्य भूयसीं
विपरीतां विगणय्य चात्मनः ।
क्षययुक्तिमुपेक्षते कृती
कुरुते तत्प्रतिकारमन्यथा ॥ ९ ॥

अचिरेणेति ॥ कृतमनेनेति कृती । कुशल इत्यर्थः । 'इष्टादिभ्यश्च' इतीनिप्रत्ययः । परस्य शत्रोः क्षययुक्तिं क्षययोगमचिरेणाशुभाविनीं भूयसीं दुरन्तां च, तथात्मनः क्षययुक्तिं विपरीतां चिरभाविनीमल्पीयसीं च विगणय्य विचार्य । 'ल्यपि लघुपूर्वात्' इत्ययादेशः । उपेक्षते । अन्यथोक्तवैपरीत्ये । परस्य क्षययुक्तावल्पीयस्याम्, स्वस्य भूयस्यां च सत्यामित्यर्थः । तत्प्रतिकारं तस्याः क्षययुक्तेः प्रतिकारमाचिरेणाशु कुरुते । एवं सति यदा शत्रोरभ्युदयः स्वस्य चातिपरिक्षयो यथास्माकं तदा किं वक्तव्यम् । सद्यः । प्रतिकुरुत इत्यर्थात्सिद्धमनुसन्धेयम् ॥

तथाप्युपेक्षायामनिष्टमाचष्टे—

अनुपालयतामुदेष्यतीं
प्रभुशक्तिं द्विषतामनीहया ।
अपयान्त्यचिरान्महीभुजां
जननिर्वादभयादिव श्रियः ॥ १० ॥

अनुपालयतामिति ॥ उदेष्यतीं वर्धिष्यमाणाम् । 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः । द्विषतां प्रभुशक्तिं कोशदण्डजं तेजः । 'स प्रभावः प्रतापश्च यत्तेजः कोशदण्डजम्' इत्यमरः । अनीहयानुत्साहेनानुपालयतामुपेक्षमाणानां महीभुजां श्रियः सम्पदो जननिर्वादभयान्निकृष्टपुरुषानुरागोत्थलोकापवा-

दभयादिवेति हेतूत्प्रेक्षा । अचिरादपयान्त्यपसरन्ति । यथाह कामन्दकः—'स्त्रीभिः षण्ढ इव श्रीभिरलसः परिभूयते' इति । अतः पराक्रमितव्यमित्यर्थः ॥

ननु परिक्षीणः कथं प्रबलेनाभियुज्यत इत्यत्राह—

क्षययुक्तमपि स्वभावजं
दधतं धाम शिवं समृद्धये ।
प्रणमन्त्यनपायमुत्थितं
प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ ११ ॥

क्षयेति ॥ क्षययुक्तमपि तथा क्षीणमपि सन्तं स्वभावजं सहजं शिवं सर्वलोकाह्लादकं धाम क्षात्रं तेजः प्रकाशं च दधतं समृद्धये वृद्ध्यर्थमुत्थितमुद्युक्तम् । वर्धिष्णुमित्यर्थः । नृपं प्रजाः। प्रतिपच्चन्द्रं द्वितीयाचन्द्रमिवेत्यर्थः । प्रतिपच्छब्देन द्वितीयाग्रहणम् । प्रतिपदि तस्यादृश्यत्वादिति । प्रणमन्ति । प्रह्वीभावेन वर्तन्त इति भावः । चन्द्रं तु नमस्कुर्वन्ति । क्षीणस्याप्युत्साहः कार्यसिद्धेर्निदानमित्यर्थः । 'जयं हि सततोत्साही दुर्बलोऽपि समश्नुते' इति कामन्दकः ॥

ननु प्रभुशक्तिशून्यस्योत्साहः क्वोपयुज्यत इत्यत्राह—

प्रभवः खलु कोशदण्डयोः
कृतपञ्चाङ्गविनिर्णयो नयः ।
स विधेयपदेषु दक्षतां
नियतिं लोक इवानुरुध्यते ॥ १२ ॥

प्रभव इति ॥ कर्मणामारम्भोपायः पुरुषद्रव्यसम्पद्देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्चेति पञ्चाङ्गानि । यथाह कामन्दकः—'सहायाः साधनोपाया विभागो देशकालयोः । विनिपातप्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते ॥' इति पञ्चानाम-

ङ्गानां विनिर्णयः पञ्चाङ्गविनिर्णयः । 'तद्धितार्थ–' इत्यादिनोत्तरपदसमासः । कृतः पञ्चाङ्गविनिर्णयो यस्य येन वा स तथोक्तः । नयो नीतिः । मन्त्र इति यावत् । कोशोऽर्थराशिः । 'कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः' इत्यमरः । दण्डश्चतुरङ्गसैन्यम् । 'दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे यमे । यात्राज्ञायां सैन्यभेदे' इति वैजयन्ती । तयोः कोशदण्डयोः । प्रभुशक्तेरित्यर्थः । प्रभवत्यस्मादिति प्रभवः कारणम् । 'ऋदोरप्' स नयो विधेयपदेषु कार्यवस्तुषु । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । दक्षतां क्षिप्रकारित्वम् । उत्साहमित्यर्थः । लोकः कृष्यादिप्रवृत्तो जनः । नियतिं दैवमिव । 'नियतिर्नियमे दैवे' इति विश्वः । अनुरुध्यतेऽनुसरति । रुधेर्दैवादिकात्कर्तरि लट् । मन्त्रस्यापि मूलमुत्साहस्तन्मूलायाः प्रभुशक्तेर्मूलमिति किमु वक्तव्यम् । अतः स एवाश्रयणीयः । यतो नक्तंदिवं मन्त्रयतस्तस्यापि प्रभोर्निरुत्साहस्य न किञ्चित्सिद्ध्यतीति ॥

ननु सोत्साहस्यासहायस्य कथमर्थसिद्धिरित्यत्राह—

अभिमानवतो मनस्विनः
प्रियमुच्चैः पदमारुरुक्षतः ।
विनिपातनिवर्तनक्षमं
मतमालम्बनमात्मपौरुषम् ॥ १३ ॥

अभिमानवत इति ॥ अभिमानवतो मानधनस्य प्रियमिष्टमुच्चैरुन्नतं पदं स्थानं राज्यादिकमारुरुक्षत आरोढुमिच्छतः प्राप्तुकामस्य मनस्विनो धीरस्यात्मपौरुषं स्वपुरुषकार एव विनिपातनिवर्तनक्षममनर्थप्रतीकारसमर्थमालम्बनं सहकारि मतमिष्टम् । यथा कस्यचित्तुङ्गमारोहतः किञ्चित्पतनप्रतिबन्धकमनुचर-

हस्तादिकमालम्बनं तद्वदिति ध्वनिः । किं पौरुषादन्यैः सहायैः शूराणामिति भावः ॥

पौरुषानङ्गीकारे दोषमाह—

विपदोऽभिभवन्त्यविक्रमं
रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायते-
रगरीयान्न पदं नृपश्रियः ॥ १४ ॥

विपद इति ॥ अविक्रमं पौरुषहीनं विपदोऽभिभवन्त्याक्रामन्ति । आपदुपेतं विपन्नमायतिरुत्तरकालः । 'उत्तरः काल आयतिः' इत्यमरः । रहयति त्यजति । निरायतेः । आसन्नक्षयस्येत्यर्थः । लघुतागौरवं नियतावश्यम्भाविनी । न कश्चिदेनमाद्रियत इत्यर्थः । अगरीयांल्लघीयन्नृपश्रियो राजलक्ष्म्या पद्मास्पदं न भवति । यद्वा नृपेति पदच्छेदः । तस्मात्पौरुषं कर्तव्यमेवेत्यर्थः । अत्र पूर्वपूर्वस्याविक्रमत्वादेरुत्तरोत्तरविपदादिकं प्रति कारणत्वात्कारणमालाख्योऽलङ्कारः । तथा सूत्रम्—'पूर्वपूर्वस्योत्तरोत्तरहेतुत्वे कारणमाला' इति ॥

फलितमाह—

तदलं प्रतिपक्षमुन्नते-
रवलम्ब्य व्यवसायवन्ध्यताम् ।
निवसन्ति पराक्रमाश्रया
न विषादेन समं समृद्धयः ॥ १५ ॥

तदिति ॥ तत्तस्मात् । उपेक्षायां दोषसम्भवादित्यर्थः । उन्नतेरभ्युदयस्य प्रतिपक्षमन्तरायं व्यवसायवन्ध्यतामुद्योगशून्यतामवलम्ब्यालम् । अवलम्बनेनालमित्यर्थः । 'अलङ्खल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति क्त्वाप्रत्ययः । तस्य ल्यबादेशः ।

तथाहि। पराक्रम आश्रयः कारणं यासां तास्तथोक्ताः समृद्धयः सम्पदो विषादेन सममनुत्साहेन सह न निवसन्ति। पौरुषसाध्याः सम्पदो नानुत्साहसाध्याः। उभयोः सहावस्थानविरोधादित्यर्थः। वैधर्म्येण कार्यकारणरूपोऽर्थान्तरन्यासः॥

ननु समयः प्रतीक्ष्यते, किं वेगेनेत्यत्राह—

अथ चेदवधिः प्रतीक्ष्यते
कथमाविष्कृतजिह्मवृत्तिना।
धृतराष्ट्रसुतेन सुत्यजा-
श्चिरमास्वाद्य नरेन्द्रसम्पदः॥ १६॥

अथेति॥ अथावधिः कालः प्रतीक्ष्यते चेत्। 'अवधिस्त्ववधाने स्यात्सीम्नि काले बिलेऽपि च' इति विश्वः। आविष्कृतजिह्मवृत्तिना प्रकटितकपटव्यवहारेण धृतराष्ट्रसुतेन दुर्योधनेन नरेन्द्रसम्पदो राज्यसम्पदः। नरेन्द्रेति वा पदच्छेदः। चिरं चतुर्दशवर्षाण्यास्वाद्यानुभूय कथं सुत्यजाः। ज्ञातास्वादेन तेन पश्चादपि सुखेन युद्धक्लेशं विना न त्यक्ष्यन्त एवेत्यवधिप्रतीक्षणं व्यर्थमित्यर्थः॥

अथवा तदा दैववशात्स्वयमेव सम्पदो दास्यति चेत्तथापि तत्कथं रोचयेमहीत्याह—

द्विषता विहितं त्वयाथवा
यदि लब्धा पुनरात्मनः पदम्।
जननाथ तवानुजन्मनां
कृतमाविष्कृतपौरुषैर्भुजैः॥ १७॥

द्विषतेति॥ अथवा द्विषता विहितं पुनः प्रत्यर्पितमात्मनः पदं राज्यं त्वया लब्धा लप्स्यते यदि। लभेः कर्मणि लुट्। हे जननाथ, तवानुजन्मनामनुजानामाविष्कृतपौरुषैः प्रकटितपरा-

क्रमैर्भुजैः कृतमलम् । अस्मद्भुजैर्न किञ्चित्साध्यमित्यर्थः । राज्यदानादानयोर्द्विषतामेव स्वातन्त्र्येऽस्मद्भुजवैफल्यात् । 'क्षत्रियस्य विजितव्यम्' इति शास्त्रात्क्षात्रेणैव राज्यं ग्राह्यमिति भावः । कृतमिति प्रतिषेधार्थमव्ययं चादिषु पठ्यते 'कृतमिति निवारणनिषेधयोः' इति गणव्याख्याने । भुजैरिति गम्यमानसाधनक्रियापेक्षया करणत्वात्तृतीया । उक्तं च न्यासोद्द्योते— 'न केवलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्यापि तु गम्यमानापि' इति ॥

ननु साम्नैव कार्यसिद्धौ किं क्षात्रेण । यथाह मनुः—'साम्ना दानेन भेदेन समस्तैरथवा पृथक् । विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ॥' इति । तत्किमाग्रहेणेत्याशङ्क्याह—

मदसिक्तमुखैर्मृगाधिपः
करिभिर्वर्तयते स्वयं हतैः ।
लघयन्खलु तेजसा जग-
न्न महानिच्छति भूतिमन्यतः ॥ १८ ॥

मदेति ॥ मृगाधिपः सिंहो मदसिक्तमुखैः । मदवर्षिभिरित्यर्थः । स्वयं स्वेनैव हतैः करिभिर्वर्तयते वृत्तिं करोति । तैरेव जीवतीत्यर्थः । चौरादिकाद् वृत्तेर्लट् । भौवादिकस्य तु 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति परस्मैपदानियमादिति । तथा हि । तेजसा प्रभावेण । 'तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि' इति वैजयन्ती । जगल्लघयँल्लघूकुर्वन्महांस्तेजस्व्यन्यतोऽस्मात्पुरुषाद् भूतिं वृद्धिं नेच्छति खलु । नहि तेजस्विनः परायत्तवृत्तित्वं युक्तम् । मनुवचनं त्वशूरविषयमिति भावः । विशेषेण वक्ष्यमाणसामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥

ननु युद्धात्पाक्षिको लाभः, उपायान्तरैस्तु न तथे-

त्याशङ्क्याह—

अभिमानधनस्य गत्वरै-
रसुभिः स्थास्नु यशश्चिचीषतः ।
अचिरांशुविलासचञ्चला
ननु लक्ष्मीः फलमानुषङ्गिकम् ॥ १९ ॥

अभिमानेति ॥ अभिमानधनस्य वैरनिर्यातनमात्रनिष्ठस्य । अत एव गत्वरैर्गमनशीलैरस्थिरैः । 'गत्वरश्च' इति क्वरबन्तो निपातः । असुभिः प्राणैः करणैः । 'पुंसिभूम्न्यसवः प्राणाः' इत्यमरः । स्थास्नु स्थिरम् । 'ग्लाजिस्थश्च ग्स्नुः' इति ग्स्नु-प्रत्ययः । यशश्चिचीषतश्चेतुं संग्रहीतुमिच्छतः । चिनोतेः सन्न-न्ताच्छतृप्रत्ययः । अचिरमंशवो यस्याः साचिरांशुर्विद्युत्तस्या विलासः स्फुरणं तद्वच्चञ्चला । क्षणिकेत्यर्थः । लक्ष्मीः सम्प-दनुषङ्गादागतमानुषङ्गिकमन्वाचयशिष्टमल्पं फलम् । मानत्रा-णजं यश एव मुख्यं फलमभ्युच्चयस्तु लक्ष्मीरिति मानिनामि-दमेव श्लाघ्यमित्यर्थः । अत्रास्थिरप्राणत्यागेन स्थिरयशःस्वी-काराभिधानान्न्यूनाधिकविनिमयाख्यः परिवृत्त्यलङ्कारः । त-दुक्तं काव्यप्रकाशे—'परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समा-समैः' इति ॥

नन्वल्पस्य मानस्य हेतोः कथं प्राणत्यागः शक्यते कर्तुम्, यतः 'जीवन्नरो भद्रशतानि पश्येत्' इत्याशङ्क्याह—

ज्वलितं न हिरण्यरेतसं
चयमास्कन्दति भस्मनां जनः ।
अभिभूतिभयादसूनतः
सुखमुज्झन्ति न धाम मानिनः ॥ २० ॥

ज्वलितमिति ॥ जनो भस्मनां चयं पुञ्जमास्कन्दति पादा-

दिनाक्रमति । अदाहकत्वादिति भावः । ज्वलितं ज्वलन्तम् । कर्तरि क्तः । 'मतिबुद्धि—' इत्यादिसूत्रे चकाराद्वर्तमानार्थत्वम् । हिरण्यं रेतो यस्य तं हिरण्यरेतसमग्निं नास्कन्दति । दाहकत्वादिति भावः । अतो हेतोर्मानिनोऽभिभूतिभयात्प्राणलाभेन तेजस्त्यागे परिभवो भविष्यतीति भयादसूनेव सुखमक्लिष्टं मुञ्चन्ति । मानहानिकराज्जीवनात्स्वतेजसा मरणमेव वरमित्यर्थः । पूर्वतरश्लोकवदर्थान्तरन्यासः ।

अथवा किमत्र प्रयोजनचिन्तया । किन्तु तेजस्विनामयं स्वभाव एव यज्जिगीषुत्वमित्याशयेनाह—

किमपेक्ष्य फलं पयोधरान्
ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः
सहते नान्यसमुन्नतिं यया ॥ २१ ॥

किमिति ॥ मृगाधिपः सिंहः किं फलं प्रयोजनमपेक्ष्य ध्वनतो गर्जतः । धरन्तीति धराः । पचाद्यच् । पयसां धरास्तान्पयोधरान्मेघान्प्रार्थयतेऽभियाति । 'याच्ञायामभियाने च प्रार्थना कथ्यते बुधैः' इति केशवः । यद्वावरुणद्धीत्यर्थः । प्रा अर्थयते । 'प्रास्याद्याच्ञावरोधयोः' इत्यभिधानात्प्रा अवरोधेन । प्रा इति तृतीयान्तम् । आकारान्तस्य प्राशब्दस्य योगविभागात् 'आतो धातोः' इत्यालोपः । तथाहि । महीयसो महत्तरस्य सा प्रकृतिः खलु यया प्रकृत्यान्यसमुन्नतिं परवृद्धिं न सहते । महतः परभञ्जनमेव पुरुषार्थ इत्यर्थः । पूर्ववदलङ्कारः ॥

निगमयति—उक्तार्थोपसंहरणं निगम उच्यते ।

कुरु तन्मतिमेव विक्रमे
नृप निर्धूय तमः प्रमादजम् ।

ध्रुवमेतदवेहि विद्विषां
त्वदनुत्साहहता विपत्तयः ॥ २२ ॥

कुरु तदिति ॥ हे नृप, तत्तस्मादुक्तरीत्या पराक्रमोत्साहयोर्हेतुत्वाद्धेतोः यच्चद्यतस्ततो हेतौ' इत्यमरः । प्रमादजं तमो मोहं निर्धूय निरस्य विक्रमे पौरुष एव मतिं कुरु । विक्रममेवाङ्गीकुरु, न तूपायान्तरमित्यर्थः । न च विक्रमवैफल्यशङ्का कार्येत्याह—ध्रुवमिति । विद्विषां विपत्तयस्त्वदनुत्साहहतास्तवानुत्साहेनाव्यवसायेन हताः प्रतिबद्धाः । अन्यथा प्रागेव विपद्येरन्निति भावः । इत्येतद् ध्रुवं निश्चितमवेहि विद्धि । 'ध्रुवं नित्ये निश्चिते च' इति शाश्वतः ।

न च नः पराजयशङ्का कार्येत्याह—

द्विरदानिव दिग्विभावितां
श्चतुरस्तोयनिधीनिवायतः ।
प्रसहेत रणे तवानुजान्
द्विषतां कः शतमन्युतेजसः ॥ २३ ॥

द्विरदानिति ॥ दिग्विभावितान्दिक्षु प्रसिद्धांस्तानायत आगच्छतः । आङ्पूर्वादिण्धातोः शतृप्रत्ययः । चतुरो द्विरदान्दिग्गजानिव, तथोक्तविशेषणांश्चतुरस्तोयनिधीनिव, रण आयतो दिग्विभाविताञ्छतमन्युतेजस इन्द्रविक्रमांश्चतुरस्तवानुजान्द्विषतां मध्ये कः प्रसहेत । सोढुं शक्नुयादित्यर्थः । 'शकि लिङ् च' इति शक्यार्थे लिङ् । अतो निःशङ्कं प्रवर्तस्वेति भावः ॥

आशीर्वादव्याजेन फलितमाह—

ज्वलतस्तव जातवेदसः
सततं वैरिकृतस्य चेतसि ।
विदधातु शमं शिवेतरा

रिपुनारीनयनाम्बुसन्ततिः ॥ २४ ॥

ज्वलत इति ॥ तव चेतसि सततं ज्वलतो वैरिकृतस्य जातवेदसः । क्रोधाग्नेरित्यर्थः । शिवेतराशिवामाङ्गला । वैधव्यदुःखजनकत्वादिति भावः । रिपुनारीनयनाम्बुसन्ततिर्वैरिवनिताश्रुप्रवाहः शमं विदधातु । वैरिकृतस्य क्रोधस्य वैरिवधमन्तरेण शान्त्यसम्भवादवश्यं तद्वधस्त्वया कर्तव्य इत्यर्थः । क्रोधस्य विषयस्य निगरणेन विषयिणो जातवेदस एवोपनिबन्धादतिशयोक्तिरलङ्कारः । तदुक्तम्—'विषयस्यानुपादानाद्विषय्युपनिबध्यते । यत्र सातिशयोक्तिः स्यात्कवेः प्रौढोक्तिजीविता ॥' इति । तत्रापि क्रोधस्य जातवेदसो भेदेऽप्यभेदाध्यवसायाद्भेदेऽभेदरूपा । तत एवाम्बुनिर्वाप्यत्वोक्तिश्च घटते । तथा च यथाम्बुसेकेनाग्निः शाम्यति तथा शत्रुवधेन क्रोध इत्यौपम्यं गम्यते ।

इति दर्शितविक्रियं सुतं
मरुतः कोपपरीतमानसम् ।
उपसान्त्वयितुं महीपति
र्द्विरदं दुष्टमिवोपचक्रमे ॥ २५ ॥

इतीति ॥ इत्युक्तरीत्या दर्शिता विक्रिया विकारो वागारम्भात्मको येन तं कोपपरीतमानसं कोपाक्रान्तचित्तम् । इदं विशेषणद्वयं द्विरदेऽपि योज्यम् । मरुतः सुतं भीमं महीपतिर्युधिष्ठिरो दुष्टं द्विरदमिव । एतेन भीमस्य शौर्यमेव, न बुद्धिरस्तीति गम्यते । उपसान्त्वयितुमनुनेतुमुपचक्रमे प्रवृत्तः । 'प्रोपाभ्यां समर्थाभ्याम्' इत्यात्मनेपदम् । राज्ञा तावदुपकारविशेषापेक्षया कथञ्चिदवशो जनः शनैः शनैर्द्विरदवद्वशीकरणीयः, न तु त्याज्य इति भावः ॥

प्रथमं तावत्स्तुत्यादिभिः प्रसादयति—

अपवर्जितविप्लवे शुचौ
हृदयग्राहिणि मङ्गलास्पदे ।
विमला तव विस्तरे गिरां
मतिरादर्श इवाभिदृश्यते ॥ २६ ॥

अपवर्जितेति ॥ विप्लवः प्रमाणबाधः । अन्यत्र बाह्यमलसंक्रमः । सोऽपवर्जितो यस्य तस्मिन्नपवर्जितविप्लवे । शुचौ । सौशब्द्यं लोहशुद्धिश्च शुचित्वम् । तद्वतीत्यर्थः । अत एव हृदयग्राहिणि मनोरमे मङ्गलास्पदे । एकत्र हितार्थप्रतिपादकत्वादन्यत्र मङ्गलवस्तुत्वाच्च श्रेयस्करे । 'रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणिम् । गुरुनग्निं तथा सूर्यं प्रातः पश्येत्सदा बुधः ॥' इति पुराणवचनात् । तव गिरां विस्तरे वाक्प्रपञ्चे ।' प्रथने वावशब्दे ' इति घञ्प्रतिषेधात् ' ऋदोरप् ' इत्यप् । अत एव ' विस्तारो विग्रहो व्यासः स तु शब्दस्य विस्तरः ' इत्यमरः । मतिस्त्वद्बुद्धिरादर्शे दर्पण इव । ' दर्पणे मुकुरादर्शौ ' इत्यमरः । विमला विशदाभिदृश्यते । वाग्वैशद्यादेव मतिवैशद्यमनुमीयते । तत्पूर्वकत्वात्तस्येत्यर्थः ॥

अथ युग्मेनाह—

स्फुटता न पदैरपाकृता
न च न स्वीकृतमर्थगौरवम् ।
रचिता पृथगर्थता गिरां
न च सामर्थ्यमपोहितं क्वचित् ॥ २७ ॥

स्फुटतेति । उपपत्तिरिति च ॥ पदैः सुप्तिङन्तशब्दैः स्फुटता विशदार्थता नापाकृता न त्यक्ता । अर्थगौरवमर्थभूयस्त्वं च न न स्वीकृतम् । स्वीकृतमेवेत्यर्थः । वैशद्यप्रसक्तार्थगौर-

वाभावनिवर्तनार्थं नञ्द्वयम् । 'सम्भाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ' इति वामनः । गिरां पदानामवान्तरवाक्यानां च पृथगर्थता भिन्नार्थता । अपुनरुक्तार्थतेति यावत् । रचिता । कृता तथा क्वचिदपि सामर्थ्यं गिरामन्योन्यसाकाङ्क्षत्वं नारोहितं न वर्जितम् । अन्यथा दशदाडिमादिशब्दवदेकवाक्यता न स्यात् । यथाहुः—'अर्थैकत्वादेकं वाक्यं सापेक्षा चेद्विभागे स्यात्' इति नन्वर्थगौरवमित्यत्र कथं षष्ठीसमासः । 'पूरणगुण–' इत्यादिना प्रतिषेधात् । नैष दोषः । ये शुक्लादयः शब्दा गुणे गुणिनि च वर्तन्तेः यथा पटस्य शौक्ल्यं शुक्लः पट इति च तेषामेवात्र निषेधात् । ये पुनः स्वतो गुणमात्रवचना यथा गौरवं प्राधान्यं रसो गन्धः स्पर्श इत्येवमादयः । तेषामनिषेधात् । तथा 'तत्स्थैश्च गुणैः षष्ठी समस्यते' इति वचनाद्बहुलमभियुक्तप्रयोगदर्शनाच्च । बलाकायाः शौक्ल्यमित्यादौ तु भाष्यकारवचनादसमासः । अत एवाह वामनः—

'पुत्रपीतिमादिषु गुणवचनसमासो बालिश्यात्' इति ॥

उपपत्तिरुदाहृता बला-
दनुमानेन न चागमः क्षतः ।
इदमीदृगनीदृगाशयः
प्रसभं वक्तुमुपक्रमेत कः ॥ २८ ॥

उपपत्तिरिति ॥ किञ्च बलाद् बलमाश्रित्य । कर्मणि ल्यब्लोपे पञ्चमी वक्तव्या । उपपत्तिर्युक्तिरुदाहृता । पराक्रमपक्ष एव श्रेयानिति युक्तिरुक्तेर्थः । उचितं चैतन्महावीरस्येति भावः । तथानुमानेन युक्त्यागमः शास्त्रं च न क्षतो न हतः । किन्त्वागमाविरुद्धमेवोक्तम् । अन्यथा तद्विरोधादनुमानस्यैव प्रामाण्यभङ्गप्रसङ्गादिति भावः । ईदृगित्थं क्षात्रयुक्तमिदं वचनमविद्य-

मान ईदृगाशय इत्थं क्षात्रयुक्ताभिप्रायो यस्य सोऽनीदृगाशयः। 'अभिप्रायश्छन्द आशयः' इत्यमरः। कः प्रसभं हठाद्वक्तुमुपक्रमेत। न कोऽपीत्यर्थः। इत्थं वक्तुमुपक्रमितैव नास्ति। वक्ता तु दूरापास्त एवेति भावः। केचिदेतच्छ्लोकत्रयं निन्दापरत्वेनापि योजयन्ति। तदसत्। हितोपदेशमात्रतत्परस्यातिवत्सलस्य राज्ञो मत्सरिण इव महावीरे भ्रातरि विधेये सर्वानर्थमूलभूतानिन्दातात्पर्यकल्पनानौचित्यादिति॥

यदि साधूक्तं तर्हि तथैव क्रियतामित्याशङ्क्याह—

अवितृप्ततया तथापि मे
हृदयं निर्णयमेव धावति।
अवसाययितुं क्षमाः सुखं
न विधेयेषु विशेषसम्पदः॥ २९॥

अवितृप्ततयेति॥ तथापि त्वया सम्यङ्निर्णीतेऽपि मे हृदयमवितृप्ततयासन्तुष्टतया। अद्यापि संशयगतत्वेनेत्यर्थः। निर्णयमेव धावत्यनुसरति। अपेक्षत इति यावत्। अद्यापि निर्णयस्यानुदयादिति भावः निर्णयानुदये हेतुमाह—अवेति। विधेयेषु सन्धिविग्रहादिकर्तव्यार्थेषु या विशेषसम्पदोऽवान्तरभेदभूमानस्ताः सुखमक्लेशेनावसाययितुम्। पुरुषान्प्रत्यानुकूल्येन स्वस्वरूपं स्वयमेव शीघ्रं प्रत्याययितुमित्यर्थः। स्यतेर्ण्यन्तादणि कर्मकर्तृकात्तुमुन्। णेरनादिशूत्रस्यायं विषयः। क्षमन्त इति क्षमाः। पचाद्यच्। शक्ता न भवन्ति। 'क्षमं शक्ते हिते त्रिषु' इत्यमरः। विधेयमात्रस्य सुगमत्वेऽपि तद्विशेषाणां सौक्ष्म्याद्बाहुल्याच्च दुर्ज्ञेयत्वादद्यापि निर्णयाकाङ्क्षेति तात्पर्यार्थः। अत्र निर्णयधावनं प्रत्युत्तरवाक्यार्थस्य हेतुत्वाभिधानाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। तदुक्तम्—'हेतोर्वाक्यपदार्थत्वे काव्य-

लिङ्गमुदाहृतम् ' इति ॥

वस्तुविशेषावधारणमन्तरेणैव प्रवृत्तिरित्याशङ्क्याह—

सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ॥ ३० ॥

सहसेति ॥ क्रियत इति क्रियां कार्यं सहसा । अविमृश्ये-त्यर्थः । ' सहसेत्याकस्मिकाविमर्षयोः ' इति गणव्याख्याने स्वरादिपाठादव्ययम् । न विदधीत न कुर्वीत । कुतः । अविवेकोऽविमृश्यकारित्वं परमत्यन्तमापदां पदं स्थानम् । कारणमित्यर्थः । व्यतिरेकेणोक्तमर्थमन्वयेनाह—वृणत इति । गुणलुब्धा गुणगृध्नव इति स्वयंवरहेतूक्तिः । सम्पदः श्रियः । विमृश्यकरोतीति विमृश्यकारी । ' उपपदमतिङ् ' इति समासः । तं स्वयमेव वृणते भजन्ते हि । ' वृङ् सम्भक्तौ ' इति धातुः । तस्माद्विमृश्यैव प्रवर्तितव्यमित्यर्थः । अत्र सहसा विधाननिषेधलब्धविमृश्यकारित्वरूपकारणस्यापद्रूपव्यतिरेककार्येण समर्थनाद्वैधर्म्येणार्थान्तरन्यासः । द्वितीयार्धेन च स एव साधर्म्येणेति ज्ञेयम् ॥

ननु साहसिकस्यापि फलसिद्धिर्दृश्यत एव । तत्किं विवेकेनेत्यत्राह—

अभिवर्षति योऽनुपालय-
न्विधिबीजानि विवेकवारिणा ।
स सदा फलशालिनीं क्रियां
शरदं लोक इवाधितिष्ठति ॥ ३१ ॥

अभीति ॥ यः पुमान् । विधीयन्त इति विधयः कृत्यव-

स्तूनि बीजानीवेत्युपमितसमासः । शरद लोक इवेति वाक्यगतोपमानुसारात् । तानि विधिबीजानि । विवेको वारीव तेन विवेकवारिणा । पूर्ववत्समासः । अनुपालयन्प्रतीक्षमाणः संरक्षन्नभिवर्षति सिञ्चति । स पुमान् । फलं साधननिष्पाद्योऽर्थः, सस्यं च 'सस्ये हेतुकृते फलम्' इत्युभयत्राप्यमरः । तच्छालिनीं क्रियां कर्म लोको जनः । 'लोकस्तु भुवने जने' इत्यमरः । शरदमिव सदा नित्यमधितिष्ठति । सदा क्रियाफलं प्राप्नोत्येव । न कदाचिद्व्यभिचरतीत्यर्थः । साहसिकस्य काकतालीयन्यायेन फलसिद्धिर्विवेकिनस्तु नियतेति भावः । अत्र फलशब्देन सस्यहेतुकृतयोरर्थयोरभेदाध्यवसायाच्छ्लेषमूलातिशयोक्तिस्तदनुगृहीता चोपमेत्यनुसन्धेयम् ॥

नियता विवेकिनः फलसिद्धिरित्युक्तम् । सम्प्रति तामेव रुच्यर्थं स्तौति—

शुचि भूषयति श्रुतं वपुः
प्रशमस्तस्य भवत्यलंक्रिया ।
प्रशमाभरणं पराक्रमः
स नयापादितसिद्धिभूषणः ॥ ३२ ॥

शुचीति ॥ शुचि सम्प्रदायशुद्धं श्रुतं शास्त्रश्रवणं कर्तृ वपुर्भूषयति । अन्यथाविद्वान्पुरुषः शोच्य इति भावः । तस्य श्रुतस्य प्रशमः क्रोधोपशान्तिरलंक्रिया भूषणं भवति । अन्यथा श्रुतवैफल्यादिति भावः । पराक्रमः सत्यवसरे शौर्यं प्रशमस्याभरणं भवति । अन्यथा सर्वैः परिभूयत इति भावः । स पराक्रमः । नयापादिता नीतिसम्पादिता । विवेकपूर्विकेति यावत् । सा चासौ सिद्धिश्च सैव भूषणं यस्य स तथोक्तः । अन्यथा साहसिकस्य सिद्धिः काकतालीयत्वेन पक्षे पराक्रमवैयर्थ्यं स्यादिति

भावः। 'वपुषो भूष्यतैवात्र सिद्धेर्भूषणतैव तु उभयं मध्यमानां तु तेषां पूर्वोत्तरेच्छया ॥' इति विवेकः। एवं विशिष्टासिद्धेरनन्यभूषितया एव भूषणत्वोक्त्या सर्वोत्तरतया स्तुतिर्गम्यते। अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणत्वादेकावल्यलङ्कारः। तदुक्तम्—'यत्र विशेषणभावं पूर्वं पूर्वं प्रति क्रमेणैव। भजति परं परमेषालंकृतिरेकावली कथिता इति ॥'

विमृश्य कुर्यादिति स्थितम्। तत्र विमर्शोपायः क इत्युक्ते शास्त्रमेवेत्याह—

मतिभेदतमस्तिरोहिते
गहने कृत्यविधौ विवेकिनाम्।
सुकृतः परिशुद्ध आगमः
कुरुते दीप इवार्थदर्शनम् ॥ ३३ ॥

मतीति ॥ मतिभेदः कार्यविप्रतिपत्तिः। मतिभेदस्तम इवेत्युपमितसमासः। दीप इवेत्युपमानुसारात्। तेन तिरोहित आच्छन्नेऽतएव गहने दुरवगाहे कृत्यविधौ कार्यानुष्ठाने विवेकिनां सुकृतः सदभ्यस्तोऽतएव परिशुद्धो निश्चितोऽन्यत्र सुविहितः प्रवातादिदोषरहितश्च आगमः शास्त्रम्। 'आगमः शास्त्र आयते' इति विश्वः। दीप इवार्थदर्शनं कार्यज्ञानं वस्तुप्रतिभासनं च कुरुते ॥

एवं विमृश्य कुर्वतो दैवाद्नर्थागमोऽपि न कश्चिदपराध इत्याह—

स्पृहणीयगुणैर्महात्मभि
श्चरिते वर्त्मनि यच्छतां मनः।
विधिहेतुरहेतुरागसां
विनिपातोऽपि समः समुन्नतेः ॥ ३४ ॥

स्पृहणीयेति ॥ स्पृहणीयगुणैर्लोकश्लाघ्यगुणैर्महात्माभिः सज्जनैश्चरितेऽनुष्ठिते वर्त्मन्याचारे मनो यच्छतां निदधताम्। सन्मार्गेण व्यवहरतामित्यर्थः। विधिहेतुर्दैवनिमित्तकः। 'विधिर्विधाने दैवे च' इत्यमरः। अत एवागसामपराधानामहेतुर्विनिपातो दैविकानर्थोऽपि। 'विनिपातोऽवपाते स्याद्दैवादिव्यसनेऽपि च' इति विश्वः। समुन्नतेरतिवृद्धेः समस्तुल्यः। दैविकेषु पुरुषस्यानुपालभ्यत्वादिति भावः। यथाह कामन्दकः— 'यत्तु सम्यगुपक्रान्तं कार्यमेति विपर्ययम्। पुरुषस्त्वनुपालभ्यो दैवान्तरितपौरुषः॥' इति॥

शिवमौपयिकं गरीयसीं
फलनिष्पत्तिमदूषितायतीम्।
विगणय्य नयन्ति पौरुषं
विजितक्रोधरया जिगीषवः॥ ३५॥

शिवमिति॥ जिगीषवो विजयेच्छवो नृपा विजितक्रोधरया जितक्रोधवेगाः सन्तो गरीयसीं प्रभूतामदूषितायतीमक्षतोत्तरकालाम्। स्वन्तामित्यर्थः। फलनिष्पत्तिं फलसिद्धिं विगणय्य। फलवत्त्वं निश्चित्येत्यर्थः। पौरुषं पुरुषकारं शिवमनुकूलमौपयिकमुपायम्। विनयादित्वात्स्वार्थे ठक्। उपायाद्ध्रस्वत्वं च। नयन्ति प्रापयन्ति। पौरुषमुपायेन योजयन्तीत्यर्थः। नानिश्चितफलं कर्म कुर्वीत इति भावः। यथाह कामन्दकः—'निष्फलं क्लेशबहुलं सन्दिग्धफलमेव च। न कर्म कुर्यान्मतिमान्सदा वैरानुबन्धि च॥' इति। नयतिः प्रापणार्थे द्विकर्मकः। अत्र पौरुषस्य कर्तृस्थकर्मत्वेऽप्युपायस्यातथात्वात्क्रोधं विनयत इत्यादिवत् 'कर्तृस्थे चाशरीरे कर्मणि' इत्यात्मनेपदं न भवति॥

यदुक्तं विजितक्रोधरया इति तदावश्यकमित्याह—

अपनेयमुदेतुमिच्छता
तिमिरं रोषमयं धिया पुरः ।
अविभिद्य निशाकृतं तमः
प्रभया नांशुमताप्युदीयते ॥ ३६ ॥

अपनेयमिति ॥ उदेतुमभ्युदेतुमिच्छता राज्ञा पुरः प्रथमं रोषमयं रोषादागतम् । 'मयट् च' इति मयट् । तिमिरमज्ञानं धिया विवेकबुद्ध्या करणेनापनेयमपनोद्यम् । तथाहि । अंशुमतापि कर्त्रा प्रभया तेजसा करणेन निशाकृतं तमो ध्वान्तमविभिद्य नोदीयते । किन्तु विभिद्यैवेत्यर्थः । सूर्यस्याप्येवं किमुतान्येषामित्यपिशब्दार्थः । इणो भावे लट् ॥

ननु दुर्बलस्यैवमस्तु । बलीयसस्तु क्रोधादेव कार्यसिद्धिरित्यत आह—

बलवानपि कोपजन्मन-
स्तमसो नाभिभवं रुणद्धि यः ।
क्षयपक्ष इवैन्दवीः कलाः
सकला हन्ति स शक्तिसम्पदः ॥ ३७ ॥

बलवानिति ॥ बलवाञ्छूरोऽपि यः । कोपाज्जन्म यस्य तस्य कोपजन्मनः 'अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः' इति वामनः । तमसो मोहस्य । कृद्योगात्कर्तरि षष्ठी । अभिभवमाक्रान्तिं न रुणद्धि । न निवारयति । स नृपः । क्षयस्य पक्षः क्षयपक्षः कृष्णपक्ष ऐन्दवीरिन्दुसम्बन्धिनीः कला इव । 'कला तु षोडशो भागः' इत्यमरः । सकलाः समग्राः शक्तिसम्पदः प्रभुमन्त्रोत्साहशक्तीस्तिस्रोऽपि हन्ति नाशयति । अन्धस्य जङ्घाबलमिव क्रोधान्धस्य लोकोत्तरमपि सामर्थ्यं व्यर्थमेवेत्यर्थः । अत्र कालस्य सर्वकारणत्वात्क्षयपक्षस्य कलाक्षय-

कारित्वमस्त्येव । तमसस्तु तत्कालविजृम्भणात्तथा व्यपदेशः ॥
विमृष्य कुर्वतः क्रियाप्रकारमाह—

समवृत्तिरुपैति मार्दवं
समये यश्च तनोति तिग्मताम् ।
अधितिष्ठति लोकमोजसा
स विवस्वानिव मेदिनीपतिः ॥ ३८ ॥

समेति ॥ यः । समा नातिमृदुर्नातितिग्मा वृत्तिर्यस्य स समवृत्तिः सन्समये सत्यवसरे मार्दवं मृदुवृत्तित्वमुपैति तिग्मतां तीक्ष्णवृत्तित्वं च तनोति । स मेदिनीपतिर्विवस्वानिव ओजसा तेजसा लोकमधितिष्ठत्याक्रामति । सूर्योऽपि ऋतुभेदेन समवृत्तिरित्यादि योज्यम् ॥

उक्तान्यथाकरणेऽनिष्टमाह—

क्व चिराय परिग्रहः श्रियां
क्व च दुष्टेन्द्रियवाजिवश्यता ।
शरदभ्रचलाश्चलेन्द्रियै-
रसुरक्षा हि बहुच्छलाः श्रियः ॥ ३९ ॥

क्वेति ॥ श्रियां संपदां चिराय बहुकालं परिग्रहः स्वायत्तीकरणं क्व । इन्द्रियाणि वाजिन इवेति समासः । दुष्टानाममार्गधाविनामिन्द्रियवाजिनां वश्यो वशंगतस्तस्य भावस्तत्ता क्व । नोभयमेकत्र तिष्ठतीत्यर्थः । कुतः । हि यस्माच्छरदभ्रवच्चलाश्चलाः । किञ्च बहुच्छला बहुव्याजाः । बहुरन्ध्रा इति यावत् । ‘छलं तु स्खलिते व्याजे’ इति विश्वः । श्रियः संपदः । चलेन्द्रियैरजितेन्द्रियैरसुरक्षा रक्षितुमशक्याः । कथञ्चित्प्राप्ता अपि श्रियो नाविनीतेषु तिष्ठन्तीत्यर्थः । वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥

क्रोधस्य दुष्टतामुक्त्वा तस्य त्यागमुपदिशति—

किमसामयिकं वितन्वता
मनसः क्षोभमुपात्तरंहसः ।
क्रियते पतिरुच्चकैरपां
भवता धीरतयाधरीकृतः ॥ ४० ॥

किमिति ॥ उपात्तरंहसः प्राप्तत्वरस्य मनसः । समयोऽस्य प्राप्तः सामयिकः । 'समयस्तदस्य प्राप्तम्' इति ठञ् । स न भवतीत्यसामयिकस्तमप्राप्तकालं क्षोभं वितन्वता भवता धीरतया धैर्यगुणेन । 'मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु' इति रसिकाः । अधरीकृतस्तिरस्कृतः । प्रागिति शेषः । अपां पतिः समुद्रः किं किमर्थमुच्चकैराधिकः क्रियते । न पराजितं पुनरुच्चकैः कुर्यादिति भावः । अत्र वितन्वतेति भीमाविशेषणत्वेन अपाम्पतिपदार्थस्योच्चैःकरणे हेतुत्वोक्त्या काव्यलिङ्गमलङ्कारः ॥

श्रुतमप्यधिगम्य ये रिपून्
विनयन्ते न शरीरजन्मनः ।
जनयन्त्यचिराय सम्पदा-
मयशस्ते खलु चापलाश्रयम् ॥ ४१ ॥

श्रुतमिति ॥ किञ्च । ये श्रुतं शास्त्रमधिगम्यापि शरीरजन्मनः शरीरप्रभवान्रिपून्कामक्रोधादीन्न विनयन्ते न नियच्छन्ति । 'कर्तृस्थे चाशरीरे कर्मणि' इत्यात्मनेपदम् । ते खल्वचिराय सम्पदां चापलाश्रयमस्थैर्यनिबन्धनमयशो दुष्कीर्तिं जनयन्ति । आश्रयदोषादस्थैर्यं सम्पदां न स्वदोषादित्यर्थः । अजितारिषड्वर्गस्य कुतः सम्पद इति भावः ॥

तथा क्रोधात्कार्यहानिरित्याशयेनाह—

अतिपातितकालसाधना

स्वशरीरेन्द्रियवर्गतापनी ।
जनवन्न भवन्तमक्षमा
नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥

अतिपातितेति ॥ अतिपातितान्यतिक्रान्तानि कालः समयोऽनुरूपः साधनानि सहायादीनि यया सा तथोक्ता । तापयतीति तापनी । कर्तरि ल्युट् । टित्वान्ङीप् । स्वस्य यच्छरीरमिन्द्रियवर्गश्च तयोस्तापन्यक्षमा क्रोधो भवन्तं जनवत्पृथग्जनमिव । 'तेन तुल्यं—' इति वतिप्रत्ययः । तेनेवार्थो लक्ष्यते । 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययम् । नयसिद्धेर्नयसाध्यफलादपनेतुं पृथक्कर्तुं नार्हति । असमयक्रोधस्यात्मसन्तापातिरिक्तं फलं नास्तीत्यर्थः ।

दुष्टः क्रोध इत्युक्तम् । अथ क्षमाया गुणानाह—

उपकारकमायतेर्भृशं
प्रसवः कर्मफलस्य भूरिणः ।
अनपायि निबर्हणं द्विषां
न तितिक्षासममस्ति साधनम् ॥ ४३ ॥

उपकारकमिति ॥ आयतेरुत्तरकालस्य भृशमत्यन्तमुपकारकम् । स्थिरफलहेतुरित्यर्थः । भूरिणः प्रभूतस्य कर्मफलस्य प्रसूयतेऽनेनेति प्रसवः कारणम् । अपायि न भवतीत्यनपायि स्वयमविनश्यदेव द्विषां निबर्हणं विनाशकमेवंगुणकं साधनं तितिक्षासमं क्षमातुल्यं नास्ति । 'क्षान्तिः क्षमा तितिक्षा च' इत्यमरः । 'तिज निशाने' इति धातोः । 'गुप्तिज्किद्भ्यः सन्' इति क्षमार्थे सन्प्रत्ययः । तितिक्षासममित्यनुक्तोपमेया समास आर्थी लुप्तोपमा, भृशायत्यनपायिशब्दैः साधनान्तरवैलक्षण्याद्व्यतिरेकश्च व्यज्यते । भेदप्राधान्य उपमानादुपमेयस्या-

धिक्ये विपर्यये च व्यतिरेकः ॥

ननु तितिक्षया कालक्षेपे दुर्योधनः सर्वान्राज्ञो वशीकुर्यादित्यत्राह—

प्रणातिप्रवणान्विहाय नः
सहजस्नेहनिबद्धचेतसः ।
प्रणमन्ति सदा सुयोधनं
प्रथमे मानभृतां न वृष्णयः ॥ ४४ ॥

प्रणतीति (सहजस्नेहेनाकृत्रिमप्रेम्णा निबद्धचेतसोऽस्मासु गाढं लग्नचित्ताः । सुयोधने तु न तथेति भावः । किं च मानभृतामहङ्कारिणां प्रथमेऽग्रेसराः । सुयोधनस्तु ततोऽपीति भावः । वृष्णयो यादवाः प्रणतिप्रवणान्प्रणामपरान् । सुयोधनस्तु न तथेति भावः । नोऽस्मान्विहाय सुयोधनं सदा न प्रणमन्ति न नमन्ति नानुसरन्ति । किन्तु कार्यकाले त्यक्ष्यन्त्येवेत्यर्थः । सति यादवविग्रहे न किञ्चिदस्माकमसाध्यं भवेदिति भावः । अनेकपदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥

सुहृदः सहजास्तथेतरे
मतमेषां न विलङ्घयन्ति ये ।
विनयादिव यापयन्ति ते
धृतराष्ट्रात्मजमात्मसिद्धये ॥ ४५ ॥

सुहृद इति ॥ किं चैषां वृष्णीनां ये सहजाः सहजाताः । मातृपितृपक्षा इत्यर्थः । 'अन्येष्वपि दृश्यते' इति डप्रत्यय । सुहृदो मित्राणि तथेतरे कृत्रिमसुहृदश्च मतं. वृष्णिपक्षं न विलङ्घयन्ति नातिक्रामन्ति । ते द्वयेऽपि नृपाः । दुर्योधनोपजीविनोऽपीति भावः । आत्मजीवनार्थं धृतराष्ट्रात्मजं दुर्योधनं विनयादानुकूल्यादिव यापयन्ति कालं गमयन्ति । कार्यकाले तु वृ-

ष्णिपक्षप्रवेशिन एवेत्यर्थः । यातेर्ण्यन्ताल्लुट् । 'अर्तिंह्री—' इत्यादिना पुगागमः ॥

किञ्च नायमभियोगकाल इत्याशयेनाह—

अभियोग इमान्महीभुजो
भवता तस्य कृतः कृतावधेः ।
प्रविघाटयिता समुत्पतन्
हरिदश्वः कमलाकरानिव ॥ ४६ ॥

अभियोग इति ॥ कृतावधेः परिभाषितकालस्य । 'अवधिस्त्ववधाने स्यात्सीम्नि काले बिलेऽपि च' इति विश्वः । तस्य सुयोधनस्य । कर्मणि षष्ठी । भवता कृतः । अवधित इति शेषः । अभियोगः । आर्द्राभिभव इति यावत् । 'अभियोगस्तु शपथे स्यादार्द्रे च पराभवे' इति विश्वः । इमान्पूर्वोक्तान्महीभुजो राज्ञो हरिदश्व उष्णरश्मिः कमलाकरानिव समुत्पतन्नुद्यन्नेव प्रविघाटयिता भेत्स्यति । घाटयतेर्भौवादिकाल्लुट् । चौरादिकस्य तु 'मितां ह्रस्वः' इति ह्रस्वत्वं स्यात् ॥

अथ न ये वृष्णिपक्षास्तान्प्रत्याह—

उपजापसहान्विलङ्घयन्
स विधाता नृपतीन्मदोद्धतः ।
सहते न जनोऽप्यधःक्रियां
किमु लोकाधिकधाम राजकम् ॥ ४७ ॥

उपजापेति ॥ मदोद्धतः स दुर्योधनो नृपतीनन्यान्नृपान्विलङ्घयन्मदादवमानयन् । सहन्त इति सहाः । पचाद्यच् । उपजापस्य सहान्भेदयोग्यान् । समौ भेदोपजापौ इत्यमरः । विधाता विधास्यति । दधातेर्लुट् । अवमानितो जनः सुभेद्य इति भावः । न च ते सहिष्णव इत्याह—जनः प्राकृतोऽप्यधः-

क्रियामपमानं न सहते। लोकाधिकधाम-लोकोत्तरप्रतापं राजकं राजसमूहः। 'गोत्रोक्षोष्ट्र—' इत्यादिना वुञ्प्रत्ययः। किमु। न सहत इति किं वक्तव्यमित्यर्थः। तथा सति कृत्स्नमेव राजमण्डलमस्मानेवावलम्बिष्यत इति भावः॥

ननु सखीनिवेत्यादिवनेचरोक्त्या तस्य मदसम्भावनापि कथमित्यत्राह—

अंसमापितकृत्यसम्पदां
हृतवेगं विनयेन तावता।
प्रभवन्त्यभिमानशालिनां
मदमुत्तम्भयितुं विभूतयः॥ ४८॥

असमापितेति॥ असमापितकृत्यसम्पदामकृतकृत्यानामतोऽभिमानशालिनामहङ्कारिणां विभूतयः सम्पद एव तावता स्वल्पेन विनयेन। कार्यवशादारोपितेनेति शेषः। हृतवेगं प्रतिबद्धवेगं नतु स्वरूपतो हृतं मदमुत्तम्भयितुं वर्धयितुं प्रभवन्ति। सर्वथा दुर्जनसम्पदो विकारयन्तीति भावः॥

अथ मदस्यानर्थहेतुतां युग्मेनाह—

मदमानसमुद्धतं नृपं
न वियुङ्क्ते नियमेन मूढता।
अतिमूढ उदस्यते नया-
न्नयहीनादपरज्यते जनः॥ ४९॥

मदेति। अपरागेति च॥ मदमानाभ्यां दर्पाहङ्काराभ्यां समुद्धतं नृपं मूढता कार्यापरिज्ञानं नियमेनावश्यं न वियुङ्क्ते न विमुञ्चति। अतिमूढो नयान्नीतिमार्गादुदस्यत उत्क्षिप्यते। कर्मकर्तरि लट्। नयहीनाज्जनोऽपरज्यतेऽपरक्तो भवति। 'स्वरितञितः—' इत्यादिनात्मनेपदम्॥

९

अपरागसमीरणेरितः
क्रमशीर्णाकुलमूलसन्ततिः ।
सुकरस्तरुवत्सहिष्णुना
रिपुरुन्मूलयितुं महानपि ॥ ५० ॥

अपरागोऽप्रीतिः । द्वेष इति यावत् । समीरण इव । तेनेरितश्चोदितः । अत एव क्रमेण शीर्णा शीर्णीभूताकुला चला च मूलसन्ततिः प्रकृत्यादिस्वजनवर्गः शिफासङ्घातश्च यस्य स तथोक्तः । 'मूलं वशीकृते स्वीये शिफातारान्तिकादिषु' इति वैजयन्ती । रिपुर्महानपि तरुवद् वृक्ष इव सहिष्णुना क्षमावतोन्मूलयितुमुद्धर्तुं सुकरः सुसाध्यः । सुकरोन्मूलन इत्यर्थः । अत्र मदादेः पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणत्वात्कारणमाला, तरुवदित्युपमा चेति द्वयोः संसृष्टिः ॥

नन्वन्तर्भेदमात्रेण कथं सुसाध्यस्तत्राह—

अणुरप्युपहन्ति विग्रहः
प्रभुमन्तः प्रकृतिप्रकोपजः ।
अखिलं हि हिनस्ति भूधरं
तरुशाखान्तनिघर्षजोऽनलः ॥ ५१ ॥

अणुरिति ॥ अणुरल्पोऽप्यन्तः प्रकृतिप्रकोपजोऽन्तरङ्गामात्याद्यपरागसमुत्थः । 'प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे । छन्दःकारणगुह्येषु जन्त्वमात्यादिकेष्वपि ॥' इति वैजयन्ती । विग्रहो वैरं प्रभुमुपहन्ति नाशयति । अत्र दृष्टान्तमाह—तरुशाखान्तानां निघर्षो घर्षणं तज्जो ऽनलोऽग्निः । भूधरं गिरिमखिलं साकल्येन हिनस्ति हि । दहतीत्यर्थः । अत्रोपमानोपमेयसमानधर्माणां प्रतिबिम्बतया निर्देशेन दृष्टान्तालङ्कारः ॥

तथापि कथं वर्धमानं शत्रुमुपेक्षेतेत्याशङ्क्य दुर्विनीतत्वादित्याह—

मतिमान्विनयप्रमाथिनः
समुपेक्षेत समुन्नतिं द्विषः ।
सुजयः खलु तादृगन्तरे
विपदन्ता ह्यविनीतसम्पदः ॥ ५२ ॥

मतिमानिति ॥ मतिमान्प्राज्ञः । विनयं प्रमथ्नातीति विनयप्रमाथिनो दुर्विनीतस्य द्विषः समुन्नतिं वृद्धिं समुपेक्षेत । उपेक्षायाः फलमाह—तादृगविनीतोऽन्तरे क्वचिद्रन्ध्रे सुजयः सुखेन जेतुं शक्यः खलु । हि यस्मादविनीतसम्पदो विपदन्ता विपन्मर्यादकाः । अनर्थोदर्का इत्यर्थः ॥

कथं दुर्विनीतस्य शत्रोः सुजयत्वमित्याशङ्क्य भेदजर्जरितत्वादित्याह—

लघुवृत्तितया भिदां गतं
बहिरन्तश्च नृपस्य मण्डलम् ।
अभिभूय हरत्यनन्तरः
शिथिलं कूलमिवापगारयः ॥ ५३ ॥

लघ्विति ॥ लघुवृत्तितया स्वस्य दुर्वृत्तरूपतया बहिर्मित्रादिजनपदेऽन्तरमात्यादिषु च भिदां भेदं गतम् । 'षिद्भिदादिभ्योऽङ्' इत्यङ्प्रत्ययः । नृपस्य मण्डलं राष्ट्रमनन्तरः सन्निहितो जिगीषुरापगारयो नदीवेगः शिथिलमन्तर्भेदजर्जरं कूलमिवाभिभूयाक्रम्य हरति ॥

अनुशासतमित्यनाकुलं
नयवर्त्माकुलमर्जुनाग्रजम् ।

स्वयमर्थ इवाभिवाञ्छित-
स्तमभीयाय पराशरात्मजः ॥ ५४ ॥

अन्विति ॥ इतीत्थमाकुलमरिनिकारस्मरणात्क्षुभितमर्जुनाग्रजं भीमसेनं नयवर्त्म नीतिमार्गमनाकुलमसङ्कीर्णं यथा तथानुशासतमुपदिशन्तम् । 'जक्षित्यादयः षट्' इत्यभ्यस्ताच्छतुर्नुमभावः । तं युधिष्ठिरं पराशरात्मजो वेदव्यासः । स्वयमभिवाञ्छितोऽर्थ इव । साक्षान्मनोरथ इवेत्युत्प्रेक्षा । अभीयाय प्राप्तः ॥

अथ युग्मेनाह—

मधुरैरवशानि लम्भय-
न्नपि तिर्यञ्चि शमं निरीक्षितैः ।
परितः पटु बिभ्रदेनसां
दहनं धाम विलोकनक्षमम् ॥ ५५ ॥

मधुरैरिति ॥ मधुरैः शान्तैर्निरीक्षितैरवलोकनैः नपुंसके भावे क्तः । न विद्यते वशमायत्तत्वं येषां तान्यवशानि प्रतिकूलानि । 'वशमायत्ततायां च' इति विश्वः । तिर्यञ्चि मृगपक्ष्यादीनि शमं शान्ति लम्भयन्प्रापयन् । 'लभेश्च' इति नुमागमः । 'गत्यर्थ—' इत्यादिना द्विकर्मकत्वम् । परितः पटूज्ज्वलमेनसाम् । दह्यतेऽनेनेति दहनं निवर्तकं तथापि विलोकनक्षमं दर्शनीयम् । वह्न्यादिविलक्षणमिति भावः । धाम तेजो बिभ्रत् ॥

सहसोपगतः सविस्मयं
तपसां सूतिरसूतिरापदाम् ।
ददृशे जगतीभुजा मुनिः
स वपुष्मानिव पुण्यसञ्चयः ॥ ५६ ॥

सहसेति ॥ पुनः सहसोपगतोऽकस्मादागतस्तपसां सूतिः

प्रभव आपदामसूतिरप्रभवः । निवर्तक इति यावत् । स मुनिर्व्यासो वपुष्मान्देहधारी पुण्यसञ्चयः पुण्यराशिरिवेत्युत्प्रेक्षा । जगतीभुजा राज्ञा सविस्मयं ददृशे दृष्टः ॥

अथोच्चकैरासनतः परार्ध्या-
दुद्यन्स धूतारुणवल्कलाग्रः ।
रराज कीर्णाकपिशांशुजालः
शृङ्गात्सुमेरोरिव तिग्मरश्मिः ॥ ५७ ॥

अथेति ॥ अथ दर्शनानन्तरम् । उच्चकैरुन्नतात्परार्ध्याच्छ्रेष्ठात् । 'अर्घाद्यत्' । 'परावराधमोत्तमपूर्वाच्च' इति यत्प्रत्ययः । आसनतः सिंहासनादुद्यन्नुत्तिष्ठन्नत एव धूतानि कम्पितान्यरुणानि वल्कलाग्राणि यस्य स तथोक्तः । स नृपः कीर्णं विस्तृतमाकपिशमंशुजालं यस्य स तथोक्तः । सुमेरोः शृङ्गादुद्यंस्तिग्मरश्मिरिव । रराज ॥

अवहितहृदयो विधाय सोऽर्हा-
मृषिवदृषिप्रवरे गुरूपदिष्टाम् ।
तदनुमतमलञ्चकार पश्चात्
प्रशम इव श्रुतमासनं नरेन्द्रः ॥ ५८ ॥

अवहितेति ॥ स नरेन्द्रोऽवहितहृदयोऽप्रमत्तचित्तः सन् । ऋषिप्रवरे मुनिश्रेष्ठे । ऋषिवदृष्यर्हाम् । अर्हार्थे वतिप्रत्ययः । गुरूपदिष्टाम् । शास्त्रीयामित्यर्थः । अर्हां पूजाम् । 'गुरोश्च हलः' इत्यकारप्रत्ययः । विधाय पश्चादनन्तरं तदनुमतं तेनानुज्ञातमासनम् । प्रशमः शान्तिः श्रुतं शास्त्रश्रवणमिव । अलञ्चकार । उक्तं च—'प्रशमस्तस्य भवत्यलंक्रिया' इति । मुन्याज्ञयोपविष्टवानित्यर्थः ॥

व्यक्तोदितस्मितमयूखविभासितोष्ठ-
स्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः ।
तन्वन्तमिद्धमभितो गुरुमंशुजालं
लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्तेः ॥ ५९ ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये द्वितीयः सर्गः।

व्यक्तेति ॥ व्यक्तोदितैः स्फुटोद्गतैः स्मितमयूखैर्विभासितावोष्ठौ यस्य स तथोक्तः । विकीर्णधाम्नो विस्तीर्णतेजसो मुनेरभिमुखं तिष्ठन् स नृपः । इद्धं दीप्तमंशुजालं तन्वन्तं गुरुं गीष्पतिम् । 'गुरुर्गीष्पतिपित्रादौ' इत्यमरः । 'अभितः परितः इत्यादिना द्वितीया । अभितोऽभिमुखम् । तिष्ठत इति शेषः । सकलस्य संपूर्णस्य शशाङ्का मूर्तिर्यस्य तस्येन्दोर्लक्ष्मीमुवाह वहति स्म । अत्रोपमेयस्य राज्ञ उपमानेन्दुधर्मेण लक्ष्म्याः साक्षात्संबन्धासंभवात्तत्सदृशीं लक्ष्मीमिवेति प्रतिविम्बकरणाक्षेपादसंभवद्वस्तुसंबन्धात्पदार्थवृत्तिर्निदर्शनालंकारः। तदुक्तम्—'प्रतिविम्बस्याकरणं सम्भवता यत्र वस्तुयोगेन । तत्साम्यमसंभवता निदर्शना सा द्विधाभिमता ॥' इति ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां द्वितीयः सर्गः समाप्तः ।

तृतीयः सर्गः ।

अथ त्रिभिर्युग्मं विशेषकं चतुर्भिः कलापकमाह। तदुक्तम्—'द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम् । कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम् ॥' इति—

ततः शरच्चन्द्रकराभिरामै-
रुत्सर्पिभिः प्रांशुमिवांशुजालैः ।
बिभ्राणमानीलरुचं पिशङ्गी-
र्जटास्तडित्वन्तमिवाम्बुवाहम् ॥ १ ॥

तत इति ॥ तत उपवेशानन्तरं धर्मात्मजो युधिष्ठिरः शरच्चन्द्रकराभिरामैः । आह्लादकैरित्यर्थः । उत्सर्पिभिरूर्ध्वं प्रसारिभिरंशुजालैः प्रांशुमुन्नतमिव स्थितमित्युत्प्रेक्षा । पुनरानीलरुचं कृष्णवर्णं पिशङ्गीः पिङ्गलवर्णाः । गौरादित्वान्ङीष् । जटा बिभ्राणं धारयन्तमत एव तडित्वन्तं विद्युद्युक्तमम्बुवाहमिव स्थितमित्युत्प्रेक्षा ॥

प्रसादलक्ष्मीं दधतं समग्रां
वपुःप्रकर्षेण जनातिगेन ।
प्रसह्य चेतःसु समासजन्त-
मसंस्तुतानामपि भावमार्द्रम् ॥ २ ॥

प्रसादेति ॥ पुनः समग्रां संपूर्णां प्रसादः सौम्यता तस्य लक्ष्मीं संपदं दधतम् । अत एव जनमतिगच्छतीति जनातिगेन लोकातिशायिना । 'अन्येष्वपि दृश्यते' इति डप्रत्ययः । वपुःप्रकर्षेणाकारसंपदासंस्तुतानामपरिचितानामपि । व्यासोऽयमि-

त्यजानतामपीत्यर्थः । 'संस्तवः स्यात्परिचयः' इत्यमरः । चेतःसु चित्तेष्वार्द्रं स्नेहार्द्रं भावमभिप्रायं प्रसह्य बलात्समासजन्तम् । लगयन्तमिति यावत् । 'दंशसञ्जस्वञ्जां शपि' इत्युपधाया लोपः । प्रसन्नाकारेषु सर्वोऽपि स्निह्यतीति भावः ॥

अनुद्धताकारतया विविक्तां
तन्वन्तमन्तःकरणस्य वृत्तिम् ।
माधुर्यविस्रम्भविशेषभाजा
कृतोपसंभाषमिवेक्षितेन ॥ ३ ॥

अनुद्धतेति ॥ पुनरनुद्धताकारतया शान्ताकारत्वेन लिङ्गेनान्तःकरणस्य वृत्तिं विविक्तां पूताम् । शान्तामिति यावत् । 'विविक्तौ पूतविजनौ' इत्यमरः । तन्वन्तं प्रकटयन्तम् । आकृतिरेवास्य चित्तशुद्धिं कथयतीत्यर्थः । पुनर्माधुर्यं निसर्गसौम्यता विस्रम्भो विश्वासः । 'समौ विस्रम्भविश्वासौ' इत्यमरः । तयोर्विशेषमातिशयं भजतीति तथोक्तेनेक्षितेन दर्शनेनैव कृतोपसंभाषा संभाषणं येन तमिवेत्युत्प्रेक्षा । दृष्टिविशेषेणैवोपसंभाषमाणमिव स्थितमित्यर्थः । काशिकायां तु 'उपसंभाषणमुपसान्त्वनम्' इति भासनादिसूत्रे ॥

धर्मात्मजो धर्मनिबन्धिनीनां
प्रसूतिमेनःप्रणुदां श्रुतीनाम् ।
हेतुं तदभ्यागमने परीप्सुः
सुखोपविष्टं मुनिमाबभाषे ॥ ४ ॥

धर्मेति ॥ पुनर्धर्मं निबध्नन्तीति धर्मनिबन्धिनीनामग्निहोत्रादिधर्मप्रतिपादिकानाम् । एनः प्रणुदामघच्छिदाम् । क्विप् । श्रुतीनां वेदानाम् । श्रुतिः स्त्री वेद आम्नायः' इत्यमरः ' प्र-

सूर्तिं प्रभवं सुखेनोपविष्टं मुनिं तदभ्यागमने तस्य मुनेरागमने हेतुं परीप्सुर्जिज्ञासुः । आप्नोतेः सन्नन्तादुप्रत्ययः 'आप्ज्ञप्यृधामीत्' इतीकारः । 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः । आवभाष उवाच ॥

अनाप्तपुण्योपचयैर्दुरापा
फलस्य निर्धूतरजाः सवित्री ।
तुल्या भवद्दर्शनसंपदेषा
वृष्टेर्दिवो वीतबलाहकायाः ॥ ५ ॥

अनाप्तेति ॥ अनाप्तपुण्योपचयैरकृतपुण्यसंग्रहैर्दुरापा दुर्लभा । फलस्य सवित्री श्रेयस्करी निर्धूतरजा हतरजोगुणा । अन्यत्र निरस्तधूलिः । 'रजो रजोगुणे धूलौ परागार्तवयोरपि' इति शाश्वतः । एषा भवद्दर्शनसंपत्संपत्तिः । लाभ इति यावत् । संपदादिभ्यः क्विपो भावार्थत्वात् । वीतबलाहकाया गतमेघाया दिव आकाशस्य संबन्धिन्या वृष्टेस्तुल्येत्युपमालंकारः । अनभ्रवृष्टिवदतर्कितोपपन्नं भवद्दर्शनं सर्वथा कस्यचिच्छ्रेयसो निदानमित्यर्थः । वारि वहतीति बलाहकः । पृषोदरादित्वात्साधुः ॥

अद्य क्रियाः कामदुघाः क्रतूनां
सत्याशिषः संप्रति भूमिदेवाः ।
आसंस्कृतेरस्मि जगत्सु जात-
स्त्वय्यागते यद्बहुमानपात्रम् ॥ ६ ॥

अद्येति ॥ अद्य क्रतूनां क्रिया अनुष्ठानानि । कामान् दुहन्तीति कामदुघाः । फलदा इत्यर्थः । 'दुहः कब्घश्च' इति कप्रत्ययो घादेशश्च । संप्रत्यद्य भूमिदेवा ब्राह्मणाः । 'द्विजात्यग्रजन्मभूदेवबाडवाः । विप्रश्च ब्राह्मणः' इत्यमरः । सत्याशिषो

जाताः। ब्राह्मणाशिषोऽद्य फलिता इत्यर्थः। यद्यतः कारणात्त्वय्यागते सति। त्वदागमनेन निमित्तेनेत्यर्थः। अस्मीत्यहमर्थेऽव्ययम्। 'अस्मीत्यस्मदर्थानुवादेऽहमर्थेऽपि' इति गणव्याख्याने। 'दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि नास्मि दूये' इति प्रयोगाच्च। आसंसृतेरासंसारात्। यावत्संसारमित्यर्थः। अभिविधावाङ्विकल्पादसमासः। जगत्सु बहुमानपात्रं बहुयोग्यताभाजनं जातः। सकलसत्कर्मफलभूतं त्वदागमनं येन मे जगन्मान्यतेति भावः॥

श्रियं विकर्षत्यपहन्त्यघानि
श्रेयः परिस्नौति तनोति कीर्तिम्।
संदर्शनं लोकगुरोरमोघं
तवात्मयोनेरिव किं न धत्ते॥ ७॥

श्रियमिति॥ आत्मयोनेर्ब्रह्मण इव लोकगुरोस्तवामोघमविफलं संदर्शनं श्रियं विकर्षत्याकर्षति। अघानि दुःखान्यपहन्ति। 'अंहोदुःखव्यसनेष्वघम्' इत्यमरः। श्रेयः पुरुषार्थं परिस्नौति स्रवति। कीर्तिं च तनोति किं बहुना किं न धत्ते किं न करोति। सर्वं करोतीत्यर्थः॥

श्च्योतन्मयूखेऽपि हिमद्युतौ मे
ननिर्वृतं निर्वृतिमेति चक्षुः।
समुज्झितज्ञातिवियोगखेदं
त्वत्सन्निधावुच्छ्वसतीव चेतः॥ ८॥

श्च्योतदिति॥ हे भगवन्, श्च्योतन्मयूखे सुधास्रावकिरे हिमद्युताविन्दावपि विषये ननिर्वृतम्। नञर्थस्य नशब्दस्य सुप्सुपेति समासः। मे चक्षुस्त्वत्सन्निधौ निर्वृतिं सुखमेति। तथा चेतश्च समुज्झितज्ञातिवियोगखेदं त्यक्तबन्धुविरहदुःखं समुच्छ्व-

सतीवानुपरोधेन प्राणितीवेत्युत्प्रेक्षा । पूर्वार्धे तु निर्वृतिकारणे सत्यपीन्दावनिर्वृतिकथनाद्विशेषोक्तिः । तदुक्तम्—'तत्सामग्र्यामनिर्वृत्तिर्विशेषोक्तिर्निगद्यते' इति ॥

निरास्पदं प्रश्नकुतूहलित्व-
मस्मास्वधीनं किमु निःस्पृहाणाम् ।
तथापि कल्याणकरीं गिरं ते
मां श्रोतुमिच्छा मुखरीकरोति ॥ ९ ॥

निरास्पदमिति ॥ प्रश्नकुतूहलित्वं निरास्पदम् । त्वदागमनप्रयोजनप्रश्नो निरास्पद इत्यर्थः । 'आस्पदं प्रतिष्ठायाम्' इति निपातः । प्रश्नानवकाशे हेतुमाह—निःस्पृहाणाम् । युष्मादृशामित्यर्थः । अस्मास्वधीनमायत्तं किमु । न किञ्चिदस्मत्तो लभ्यमित्यर्थः । आधारत्वविवक्षायां सप्तमी । तथापि कल्याणकरीम् । अस्मद्धितैकहेतुमित्यर्थः । निःस्पृहवृत्तेः पारार्थ्यादिति भावः । 'कृञो हेतु—' इति टप्रत्यये ङीप् । अतस्ते गिरं श्रोतुमिच्छा माम् । मुखं वागस्यास्तीति मुखरो निरन्तरभाषी । 'रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्' इति रः । 'दुर्मुखे मुखराबद्धमुखौ' इत्यमरः । ततश्च्विप्रत्ययः । मुखरीकरोति । व्याहरयतीत्यर्थः । निःस्पृहस्यापि ते वाक्यमस्मद्धितकरत्वाच्छ्रोतव्यमिति भावः ॥

इत्युक्तवानुक्तिविशेषरम्यं
मनः समाधाय जयोपपत्तौ ।
उदारचेता गिरमित्युदारां
द्वैपायनेनाभिदधे नरेन्द्रः ॥ १० ॥

इतीति ॥ इतीत्थमुक्तिविशेषरम्यमुक्तिवैचित्र्यचारु यथा तथोक्तवान् । उदारचेता महामना नरेन्द्रो द्वैपायनेन व्यासेन ।

द्वीपमयनं स्थानं जन्मभूमिर्यस्य स द्वीपायनः । स एव द्वैपायनस्तेन । 'प्रज्ञादिभ्यश्च' इति स्वार्थेऽण्प्रत्ययः । नापत्यार्थे । 'नडादिभ्यः फक्' । तेष्वेव पाठाद्बाधितार्थत्वाच्च । जयोपपत्तौ मनः समाधाय । जयसिद्धिमपेक्ष्येत्यर्थः । इति वक्ष्यमाणप्रकारामुदारामर्थवतीं गिरमभिदध उक्तः । दुहादित्वादप्रधाने कर्मणि लिट् । 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ॥' इति वचनात् ।

आदौ तावत्तस्य माध्यस्थ्यभङ्गदोषं युग्मेन परिहरति—

चिचीषतां जन्मवतामलघ्वीं
यशोवतंसामुभयत्र भूतिम् ॥
अभ्यर्हिता बन्धुषु तुल्यरूपा
वृत्तिर्विशेषेण तपोधनानाम् ॥ ११ ॥

चिचीषतामिति ॥ अलघ्वीं गुर्वीम् । 'वोतो गुणवचनात्' इति ङीष् । यशोवतंसां कीर्तिभूषणाम् । उभयत्रेह चामुत्र च भूतिं श्रेयश्चिचीषतां चेतुं सङ्ग्रहीतुमिच्छताम् । चिनोतेः सन्नन्ताच्छतृप्रत्ययः । जन्मवतां शरीरिणां बन्धुषु विषये तुल्यरूपैकविधा वृत्तिर्व्यवहारोऽभ्यर्हितोचिता तपोधनानां त्वस्मत्सदृशां विशेषेण नियमेनाभ्यर्हिता ॥

तथापि निघ्नं नृप तावकीनैः
प्रह्वीकृतं मे हृदयं गुणौघैः ।
वीतस्पृहाणामपि मुक्तिभाजां
भवन्ति भव्येषु हि पक्षपाताः ॥ १२ ॥

तथापीति ॥ तथापि तुल्यवृत्तौ चित्तेऽपि । हे नृप, तावकीनैस्त्वदीयैः । 'युष्मदस्मदोरन्यतरस्यां खञ्च' इति खञ्प्रत्ययः । 'तवकममकावेकवचने' इति तवकादेशः । गुणौघैः

मह्वीकृतमावर्जितं मे हृदयं निघ्नं त्वदायत्तम् । 'अधीनो निघ्न आयत्तः' इत्यमरः । ननु निःस्पृहस्य कोऽयं पक्षपात इत्यत्राह वीतेति । वीतस्पृहाणां विरक्तानां मुक्तिभाजाम् । मुमुक्षूणामपीत्यर्थः । भवन्तीति भव्याः साधवः । 'भव्यगेय–'इत्यादिना कर्तरि निपातः । तेषु पक्षपाताः स्नेहा भवन्ति । न तु साध्वनुग्रहो महतां माध्यस्थ्यभञ्जक इति भावः ॥

अथ नृपस्य गुणवत्तां प्रकटयितुं धृतराष्ट्रस्य दुश्चेष्टामुद्घाटयति—

सुता न यूयं किमु तस्य राज्ञः
सुयोधनं वा न गुणैरतीताः ।
यस्त्यक्तवान्वः स वृथा बलाद्वा
मोहं विधत्ते विषयाभिलाषः ॥ १३ ॥

सुता इति ॥ यूयं तस्य राज्ञो धृतराष्ट्रस्य सुताः पुत्रा न किमु । अपि तु सुता एवेत्यर्थः । गुणैः शान्तिदानदाक्षिण्यादिभिः । सुयोधनं नातीता नातिक्रान्ता वा । अतीता एवेत्यर्थः । कर्तरि क्तः । असुतत्वमगुणत्वं च त्यागे हेतुः । युष्मासु तन्नास्तीत्यर्थः । उपालम्भे कारणमाह—य इति । यो धृतराष्ट्रो वो युष्मान्वृथा निष्कारणमेव त्यक्तवान् । यदि वयं सुता गुणाधिकाश्च तर्हि कथमत्याक्षीत्तत्राह—बलादिति । स विषयाभिलाषो भोगतृष्णा बलाद्वा बलादिव । 'वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये' इति विश्वः । मोहमविवेकं विधत्ते । विषयाभिलाषातिरिक्तो न कश्चिद्युष्मत्त्यागहेतुरस्तीत्यर्थः । अत्र कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥

अथ राज्ञ उत्साहवर्धनाय शत्रोर्हानिं सूचयति—

जहातु नैनं कथमर्थसिद्धिः
संशय्य कर्णादिषु तिष्ठते यः ।
असाधुयोगा हि जयान्तरायाः
प्रमाथिनीनां विपदां पदानि ॥ १४ ॥

जहात्विति ॥ एनं धृतराष्ट्रमर्थसिद्धिः कथं न जहातु । जहात्वेवेत्यर्थः । 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' इति प्राप्तकाले लोट् । तस्य हानिकालः प्राप्त इत्यर्थः । कुतः । यो धृतराष्ट्रः संशय्य संदिह्य कर्णादिषु तिष्ठते । कर्णादीन्दुर्मन्त्रिणः संन्दिग्धार्थे निर्णेतृत्वेनावलम्बत इत्यर्थः । 'प्रकाशनस्थेयाख्ययोश्च' इति स्थेयाख्यायामात्मनेपदम् । तिष्ठतेऽस्मिन्निति स्थेयो विवादपदनिर्णेता । तथाहि । असाधुयोगा दुर्जनसंसर्गा जयान्तराया जयविघातकाः । किञ्च प्रमाथिनीनामुन्मूलनशीलानां विपदां पदानि स्थानानि । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । न केवलं जयघातिनः किंत्वनर्थकारिणश्चेत्यर्थः । धृतराष्ट्रोऽपि दुर्जनविधेयत्वाद्विनङ्क्ष्यतीति भावः ॥

एवं शत्रोरनर्थं सूचयित्वा राज्ञोऽर्थसिद्धिं सूचयति—

पथश्च्युतायां समितौ रिपूणां
धर्म्यां दधानेन धुरं चिराय ।
त्वया विपत्स्वप्यविपत्ति रम्य-
माविष्कृतं प्रेम परं गुणेषु ॥ १५ ॥

पथ इति ॥ रिपूणां समितौ सभायाम् । 'सभासमितिसंसदः' इत्यमरः । पथश्च्युतायां मार्गाद् भ्रष्टायाम् । दुरात्मनो दुःशासनस्य स्त्रीग्रहणसाहसमङ्गीकृतवत्यामित्यर्थः । चिराय धर्म्यां धर्मादनपेताम् । 'धर्मपथ्यर्थन्यायादनपेते' इति यत्प्रत्ययः । धुरं भारं दधानेन । कृच्छ्रेष्वपि धर्मादचलतेत्यर्थः त्वया विप-

त्स्वपि अविन्त्यविपनाश्यत एव रम्यं गुणेषु शान्त्यादिषु विषये परमुत्कृष्टं प्रेमाविष्कृतं प्रकटीकृतम्। दुःसहमपि सोढवता त्वया साधु कृतमिति भावः॥

विधाय विध्वंसमनात्मनीनं
शमैकवृत्तेर्भवतश्छलेन।
प्रकाशितत्वन्मतिशीलसाराः
कृतोपकारा इव विद्विषस्ते॥ १६॥

विधायेति॥ किं च शम एवैका मुख्या वृत्तिर्यस्य तस्यापरोपतापिनो भवतश्छलेन कपटेन। आत्मने हित आत्मनीनः। स न भवतीत्यनात्मनीनः। स्वस्यैवानार्थहेतुरित्यर्थः। तम्। 'आत्मन्विश्वजनभोगोत्तरपदात्खः' इति खप्रत्ययः। विध्वंसमपकारं विधाय कृत्वा। प्रकाशितः प्रख्यापितस्त्वन्मतिशीलयोस्तव प्रज्ञासद्वृत्तयोः सारः प्रकर्षो यैस्ते तथोक्ताः। ते तव विद्विषः कृतोपकारा इवोपकृतवन्त इव। अपकारोऽप्युपकारायैव संवृत्तः। यदेषां दौर्जन्यं युष्मत्सौजन्यं च जगति सुव्यक्तमासीदित्यर्थः। विद्यमानस्यापि सुजनस्य चन्दनदारुण इव गुणाः परिभव एव प्रचुरीभवन्तीति भावः॥

अथ प्रयोजनान्तरमाह—

लभ्या धरित्री तव विक्रमेण
ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः।
अतः प्रकर्षाय विधिर्विधेयः
प्रकर्षतन्त्रा हि रणे जयश्रीः॥ १७॥

लभ्येति॥ तव। त्वयेत्यर्थः। 'कृत्यानां कर्तरि वा' इति षष्ठी। धरित्री विक्रमेण लभ्या प्राप्तव्या। न च सुलभ्या तं विनेत्याह—विपक्षश्च शत्रुरपि। वीर्यं शौर्यमस्त्राण्याग्नेयादीनि

बलानि सैन्यानि तैर्ज्यायान्प्रशस्यतरः। अधिकतर इति यावत्, ज्येष्ठस्य। 'ज्यादादीयसः' इति ज्यादेशः। अतः प्रकर्षायाधिक्याय विधिरुपायो विधेयः कर्तव्यः। कुतः। हि यस्माद्रणे जयश्रीः प्रकर्षतन्त्रा प्रकर्षप्रधाना। प्रकर्षायत्तेत्यर्थः। 'तन्त्रं प्रधाने सिद्धान्ते' इत्यमरः। बलिन एव जयः, न तु दुर्बलस्येति भावः॥

अथ 'त्रिः—इत्यादिना श्लोकचतुष्टयेन विपक्षज्यायस्त्वं वर्णयति—

त्रिःसप्तकृत्वो जगतीपतीनां
हन्ता गुरुर्यस्य स जामदग्न्यः।
वीर्यावधूतः स्म तदा विवेद
प्रकर्षमाधारवशं गुणानाम्॥ १८॥

त्रिःसप्तेति॥ त्रिरावृत्तान्सप्तवारांस्त्रिःसप्तकृत्वः। एकविंशतिकृत्व इत्यर्थः। त्रिःसप्तशब्दयोः सुप्सुपेति समासः। 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति कृत्वसुच्प्रत्ययः। जगतीपतीनां महीपतीनां हन्ता नाशको गुरुरस्त्रवेदोपदेष्टा सः प्रसिद्ध इत्यर्थः। अत एव यच्छब्दानपेक्षत्वम्। तदुक्तं काव्यप्रकाशे—'प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते' इति। जमदग्नेरपत्यं पुमाञ्जामदग्न्यः। 'गर्गादिभ्यो यञ्' इति यञ्प्रत्ययः। यस्य भीष्मस्य वीर्यावधूतो विक्रमाभिभूतः। अम्बिकास्वयंवर इत्यर्थः। तदा भङ्गप्राप्तिसमये गुणानां शौर्यादीनां प्रकर्षमतिशयमाधारवशमाश्रयाधीनं विवेद वेत्ति स्म। स्वविद्यायाः स्वशिष्ये भीष्मे स्वस्मादपि प्रकर्षाधानदर्शनादिति भावः। 'स्म पादपूरणे भूतेऽर्थे च' इति विश्वः॥

यस्मिन्ननैश्वर्यकृतव्यलीकः
पराभवं प्राप्त इवान्तकोऽपि ।
धुन्वन्धनुः कस्य रणे न कुर्यान्
मनो भयैकप्रवणं स भीष्मः ॥ १९ ॥

यस्मिन्निति ॥ यस्मिन्भीष्मे विषये । अनीश्वरस्य भावोऽनैश्वर्यमसामर्थ्यम् । 'नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्' इति विकल्पान्नञः पूर्वपदवृद्ध्यभावः । तेन कृतव्यलीको जनितवैलक्ष्यः । 'दुःखे वैलक्ष्ये व्यलीकम्' इति यादवः । अन्तकोऽपि यमोऽपि पराभवं प्राप्त इव । भीष्मस्येच्छामरणत्वादन्तकोऽपि पराजित इवास्ते, किमुतान्य इति भावः । स भीष्मो रणे धनुर्धुन्वन्कम्पयन्कस्य मनो भयैकप्रवणं भय एकप्रवणमेकोन्मुखम् । शिवभागवतवत्समासः । न कुर्यात् । सर्वस्यापि मनसि भयं कुर्यादेवेत्यर्थः ॥

सृजन्तमाजाविषुसंहतीर्वः
सहेत कोपज्वलितं गुरुं कः ।
परिस्फुरल्लोलशिखाग्रजिह्वं
जगज्जिघत्सन्तमिवान्तवह्निम् ॥ २० ॥

सृजन्तमिति ॥ आजौ रणे इषुसंहतीर्बाणसङ्घान्सृजन्तं वर्षन्तं कोपज्वलितमत एव परिस्फुरन्त्यो लोलाश्च शिखाग्राण्येव जिह्वा यस्य तं तथोक्तं जगल्लोकं जिघत्सन्तमत्तुमिच्छन्तम् । अदेः सन्नन्ताच्छतृप्रत्ययः । 'लुङ्सनोर्घस्लृ' इति घस्लादेशः । अन्तवह्निं कालाग्निमिव स्थितं गुरुं द्रोणं वो युष्माकं मध्ये कः सहेत सोढुं शक्नुयात् । न कोऽपीत्यर्थः । 'शकि लिङ् च' इति शक्यर्थे लिङ् ॥

११

निरीक्ष्य संरम्भनिरस्तधैर्यं
राधेयमाराधितजामदग्न्यम् ।
असंस्तुतेषु प्रसभं भयेषु
जायेत मृत्योरपि पक्षपातः ॥ २१ ॥

निरीक्ष्येति ॥ संरम्भेण कोपेन निरस्तं त्याजितं धैर्यं निर्विकारचित्तत्वं येन तं तथोक्तम् । आटोपेनैव परधैर्यापहारिणमित्यर्थः । आराधितजामदग्न्यं शुश्रूषितभार्गवम् जामदग्न्यादधिगतास्त्ररहस्यमित्यर्थः । राधेयं राधासुतं कर्णम् । 'स्त्रीभ्यो ढक्' निरीक्ष्य मृत्योरप्यसंस्तुतेष्वपरिचितेषु । 'संस्तवः स्यात्परिचयः' इत्यमरः । भयेषु प्रसभं पक्षपातः परिचयो जायेत । मृत्युरप्यस्माद्बिभीयात्किमुतान्य इति भावः । संभावनायां लिङ् । अत्र जनिक्रियापेक्षया समानकर्तृकत्वाभावेऽपि पक्षपातक्रियापेक्षया तत्संभवान्निरीक्ष्येति ल्यब्निर्देशः । 'समर्थनीयः प्रधानोपसर्जनभावस्त्वप्रयोजकः' इति व्यक्तिविवेककारः । अत्र भयसंबन्धरहितस्य मृत्योर्भयसंबन्धाभिधानादसंबन्धे संबन्धरूपातिशयोक्तिरलंकारः ॥

अथानन्तरं करणीयमागमनप्रयोजनं च युग्मेनाह—

यया समासादितसाधनेन
सुदुश्चरामाचरता तपस्याम् ।
एते दुरापं समवाप्य वीर्य-
मुन्मूलितारः कपिकेतनेन ॥ २२ ॥

ययेति ॥ यया विद्यया करणेन सुदुश्चरामतिदुष्करां तपस्यां तपश्चर्याम् । 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इति क्यङ् । 'अप्रत्ययात्' इति स्त्रियामप्रत्ययः । आचरता । पशुपतिं प्रति तपः कुर्वतेत्यर्थः । अत एव समासादितं प्राप्तं सा-

धनं पाशुपतास्त्ररूपं येन तेन । कपिर्हनुमान्केतनं चिह्नं यस्य तेन । अर्जुनेनेत्यर्थः । दुरापमन्यस्य दुर्लभं वीर्यं तेजः समवाप्य । एते पूर्वोक्ता भीष्मादय उन्मूलितार उन्मूलयिष्यन्ते । उन्मूलयतेर्ण्यन्तात्कर्मणि लुट् । अत्र चिण्वदिडागमेऽपि तस्य 'असिद्धवदत्राभात्' इत्यसिद्धत्वात् 'णेरनिटि' इति णिलोपः । तन्निमित्तस्यैव 'अनिटि' इति निषेधात् । उक्तं च—'चिण्वद् वृद्धिर्युक्च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति । इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विघाती ॥' इति ॥

महत्त्वयोगाय महामहिम्ना-
माराधनीं तां नृप देवतानाम् ।
दातुं प्रदानोचित भूरिधाम्नी-
मुपागतःसिद्धिमिवास्मि विद्याम् ॥ २३ ॥

महत्त्वेति ॥ हे नृप, महत्त्वयोगाय प्रकर्षलाभाय महामहिम्नां महानुभावानां देवतानामिन्द्रादीनाम् । आराध्यतेऽनयेत्याराधनी ताम् । प्रसादयित्रीमित्यर्थः । करणे ल्युट् । ङीप् । भूरिधाम्नीं महाप्रभावाम् । 'धाम देशे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति विश्वः । 'अन उपधालोपिनोऽन्यतरस्याम्' इति वा ङीप् । विद्यामिन्द्रमन्त्ररूपां सिद्धिं साक्षात्कार्यसिद्धिमिवेति विद्याया अमोघत्वोक्तिः । हे प्रदानोचित दानपात्रभूत । फलभोक्तृत्वादस्य पात्रत्वोक्तिः । दातुमुपागतोऽस्मि ॥

इत्युक्तवन्तं व्रज साधयेति
प्रमाणयन्वाक्यमजातशत्रोः ।
प्रसेदिवांसं तमुपाससाद
वसन्निवान्ते विनयेन जिष्णुः ॥ २४ ॥

इतीति ॥ इत्युक्तवन्तं प्रसेदिवांसं प्रसन्नम् । ‘ भाषायां सदवसश्रुवः ’ इति क्वसुः । तं मुनिं जिष्णुर्जयनशीलोऽर्जुनः । ‘ ग्लाजिस्थश्च—’ इति ग्स्नुप्रत्ययः । व्रज साधयानुतिष्ठेत्येवंरूपम् । अजातशत्रोर्धर्मराजस्य । स्वयमविद्वेषणशीलत्वादियं संज्ञा । वाक्यं प्रमाणयन् । तदादिष्टः सन्नित्यर्थः । अन्ते वसंश्छात्र इव । ‘ छात्रान्तेवासिनौ शिष्ये ’ इत्यमरः । विनयेनानौद्धत्येनोपाससाद समीपं प्राप ॥

निर्याय विद्याथ दिनादिरम्या-
द्बिम्बादिवार्कस्य मुखान्महर्षेः ।
पार्थाननं वह्निकणावदाता
दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ २५ ॥

निर्यायेति ॥ अथ वह्निकणावदाता स्फुलिङ्गवदुज्ज्वला । देवतासान्निध्यादिति भावः । विद्येन्द्रमन्त्ररूपा । दिनादिरम्यादर्कस्य प्रभातभास्करस्य विम्बादिव महर्षेर्व्यासस्य मुखान्निर्याय निर्गत्य । समासेऽनञ्पूर्वे क्त्वो ल्यप् । दीप्तिरर्कदीधितिः । स्फुरद्विकसत्पद्ममिव । पार्थाननमर्जुनस्य मुखमाभिपेदे प्रविष्टा ॥

योगं च तं योग्यतमाय तस्मै
तपःप्रभावाद्वितताए सद्यः ।
येनास्य तत्त्वेषु कृतेऽवभासे
समुन्मिमीलेव चिराय चक्षुः ॥ २६ ॥

योगं चेति ॥ योग्यतमायार्हतमाय तस्मै पार्थाय तं वक्ष्यमाणमहिमानं योगं ध्यानविधिं च । ‘ योगः संनहनोपायध्यानसङ्गतियुक्तिषु ’ इत्यमरः । तपःप्रभावात् सद्यो वितताार ददौ । चिरकालग्राह्यमपीति भावः । येन योगेन तत्त्वेषु प्रकृतिमह-

दादिषु । तथा च । मूलप्रकृतिर्महानहङ्कारो मनश्च पञ्च तन्मात्राणि पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च महाभूतानीति चतुर्विंशति तत्त्वानि । तत्रावभासे साक्षात्कारे कृते सत्यस्यार्जुनस्य चक्षुराक्षि चिराय समुन्मिमीलेवोन्मिषितमिवेत्युत्प्रेक्षा । तदा तस्य कोऽपि महानाखिलाज्ञानभञ्जनस्तत्त्वावभासश्चिरादन्धस्य दृष्टिलाभ इवाभवदिति भावः ॥

आकारमाशंसितभूरिलाभं
दधानमन्तःकरणानुरूपम् ।
नियोजयिष्यन्विजयोदये तं
तपःसमाधौ मुनिरित्युवाच ॥ २७ ॥

आकारमिति ॥ आशंसित आख्यातो भूरिलाभोऽनेकश्रेयःप्राप्तिर्येन तं तथोक्तम् । महाभाग्यसूचकमित्यर्थः । अन्तःकरणशब्देन तद्वृत्तिरुत्साहो लक्ष्यते । तदनुरूपं तदनुकूलम् । उत्साहानुगुणव्यापारक्षममित्यर्थः । आकारं मूर्तिं दधानं तमर्जुनं मुनिर्विजयोदये विजयफलके तपःसमाधौ तपोनियमे । 'समाधिर्नियमे ध्याने नीवाके च समर्थने' इति विश्वः । नियोजयिष्यन् नियोजयितुमिच्छन्नित्यर्थः । 'लृट् शेषे च' इति लृट् । 'लृटः सद्वा' इति सत्प्रत्ययः इति वक्ष्यमाणमुवाच ॥

अनेन योगेन विवृद्धतेजा
निजां परस्मै पदवीमयच्छन् ।
समाचराचारमुपात्तशस्त्रो
जपोपवासाभिषवैर्मुनीनाम् ॥ २८ ॥

अनेनेति ॥ अनेन स्वोपदिष्टेन योगेन विवृद्धतेजा निजां पदवींपरस्मा अयच्छन् । परस्य प्रवेशमयच्छन्नित्यर्थः । उपात्तशस्त्रो निगृहीतायुधः सन् । जपोपवासाभिषवैः स्वाध्यायान-

शनस्नानैर्मुनीनामाचारं समाचरानुतिष्ठ ॥

क्षेत्रविशेषे तपःसिद्धिरित्याशयेन तं निदर्शयन्नाह—

कारिष्यसे यत्र सुदुश्चराणि
प्रसत्तये गोत्रभिदस्तपांसि ।
शिलोच्चयं चारुशिलोच्चयं त-
मेष क्षणान्नेष्यति गुह्यकस्त्वाम् ॥ २९ ॥

कारिष्यस इति ॥ यत्र शिलोच्चये गोत्रभिद इन्द्रस्य प्रसत्तये प्रसादाय सुदुश्चराणि तपांसि करिष्यसे । चारुशिलोच्चयं रम्यशिखरं तं शिलोच्चयं गिरिमिन्द्रकीलरूपम् । 'अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः' इत्यमरः । त्वामेष गुह्यको यक्षः । अनन्तरमेवास्य पुरःप्रादुर्भावादेष इति निर्देशः । क्षणान्नेष्यति प्रापयिष्यति ॥

इति ब्रुवाणेन महेन्द्रसूनुं
महर्षिणा तेन तिरोबभूवे ।
तं राजराजानुचरोऽस्य साक्षा-
त्प्रदेशमादेशमिवाधितष्ठौ ॥ ३० ॥

इतीति ॥ इतीत्थं महेन्द्रसूनुमर्जुनं ब्रुवाणेनोक्तवता । 'वर्तमानसामीप्ये' इति भूते वर्तमानवत्प्रत्ययस्तिरोधानस्याविलम्बसूचनार्थः । तेन महर्षिणा व्यासेन तिरोबभूवेऽन्तर्दधे । भावे लिट् । राजराजो यक्षराजः । 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः' इति विश्वः । तस्यानुचरः पूर्वोक्तयक्षोऽस्य मुनेरादेशं साक्षादिव प्रदेशमर्जुनाधिष्ठितस्थानमधितष्ठौ । प्राप्त इत्यर्थः । 'स्थादिष्वभ्यासेन चाभ्यासस्य' इति षत्वम् ॥

कृतानतिर्व्याहृतसान्त्ववादे
जातस्पृहः पुण्यजनः स जिष्णौ ।

इयाय सख्याविव संप्रसादं
विश्वासयत्याशु सतां हि योगः ॥ ३१ ॥

कृतेति ॥ स पुण्यजनो यक्षः कृताननतिः कृतप्रणामः स-न्व्याहृतसान्त्ववादे उक्तप्रियवचने । 'व्याहार उक्तिर्लपितम्' इत्यमरः । जिष्णावर्जुने जातस्पृहो जातानुरागः सन् । सख्यौ सुहृदीव । 'अथ मित्रं सखा सुहृत्' इत्यमरः । संप्रसादं वि-श्रम्भामियाय प्राप । तथाहि । सतां साधूनां योगः संगतिरा-शु विश्वासयति विश्वासं जनयति हि । सामान्येन विशेषसम-र्थनरूपोऽर्थान्तरन्यासः ॥

अथोष्णभासेव सुमेरुकुञ्जा-
न्विहीयमानानुदयाय तेन ।
बृहद्द्युतीन्दुःखकृतात्मलाभं
तमः शनैः पाण्डुसुतान्प्रपेदे ॥ ३२ ॥

अथेति ॥ अथोष्णभासा सूर्येणोदयाय पुनरुद्गमाय विही-यमानांस्त्यज्यमानानिति तमःप्राप्तिकारणोक्तिः । बृहद्द्युती-न् । सौवर्णत्वाद्दीप्यमानानित्यर्थः । इति तमसः संकोचकार-णोक्तिः । सुमेरुकुञ्जानिव । अत्र सुमेरुग्रहणं कुञ्जानां सौवर्ण-त्वद्योतनार्थम् । तेनार्जुनेनोदयाय श्रेयसे विहीयमानान्बृहद्द्यु-तीननेकबुद्धिप्रकाशान् । पूर्ववद्विशेषणद्वयस्य प्रयोजनमनुसंधे-यम् । पाण्डुसुतान् । चतुर इति शेषः । दुःखेन कृच्छ्रेण कृत उपपादित आत्मलाभ उत्पत्तिर्यस्य तत्तथोक्तम् । तेषां विवे-कित्वात्कथंचिल्लब्धोदयमित्यर्थः । तमः शोकोऽन्धकारश्च । 'त-मोऽन्धकारे स्वर्भानौ तमः शोके गुणान्तरे' इत्युभयत्रापि वि-श्वः । शनैर्मन्दं प्रपेदे । तेषां विवेकित्वाद्भीतभीतमिवेति भा-वः । अत्र तमःशब्दस्य श्लिष्टत्वाच्छ्लेषानुप्राणितेयमुपमा ॥

असंशयालोचितकार्यनुन्नः
प्रेम्णा समानीय विभज्यमानः ।
तुल्याद्विभागादिव तन्मनोभि-
र्दुःखातिभारोऽपि लघुः स मेने ॥ ३३ ॥

असंशयेति ॥ असंशयमसंदिग्धं यथा तथालोचितं विवेचितं यत्कार्यं तेन नुन्नो निरस्त इति लघुत्वहेतूक्तिः । 'नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्' इति निष्ठानत्वम् । कार्यगौरवमालोच्य निरस्त इत्यर्थः । तथापि प्रेम्णा भ्रातृवात्सल्येन कर्त्रा समानीय पुनराकृष्य विभज्यमानः समशोभागी क्रियमाणः । तुल्येन प्रेम्णा तुल्यदुःखत्वं भववीति भावः । स पूर्वोक्तो दुःखमेवातिभारोऽपि । अतिभारभूतमपि दुःखमित्यर्थः । तन्मनोभिस्तेषां चतुर्णां पार्थानां मनोभिस्तुल्याद्विभागादिव । पूर्वोक्तात्प्रेमकृतात्समविभागादिवेत्यर्थः । वस्तुतस्तु विवेकादेवेति भावः । पुनर्विभागग्रहणं तस्य हेतुत्वोत्प्रेक्षार्थमनुवादाददोषः । लघुर्मेने मतः यथैकोऽनेकधा विभज्य बहुभिरुह्यमानो महानपि भारो लघुर्मन्यते तद्वदित्यर्थः ॥

अथैवं प्रेम्णाकृष्यमाणमपि शोकं विवेको निर्जिगायेत्याह—

धैर्येण विश्वास्यतया महर्षे-
स्तीव्रादरातिप्रभवाच्च मन्योः ।
वीर्यं च विद्वत्सु सुते मघोनः
स तेषु न स्थानमवाप शोकः ॥ ३४ ॥

धैर्येणेति ॥ धैर्येण तेषां निसर्गतो निर्विकाराचित्तत्वेन तथा महर्षेर्व्यासस्य । प्रवर्तकस्येति शेषः । विश्वास्यतया । श्रद्धेयवचनत्वेनेत्यर्थः । अरातिप्रभवादरातिहेतुकात्तीव्राद्दुःसहान्मन्योः क्रोधाद्धेतोस्तथार्जुनप्रभावपरिज्ञानाच्चेति । हेत्वन्तरं वि-

शेपणमुखेनाह—मघोनः सुतेऽर्जुने वीर्ये च । 'न लोक–' इत्यादिना षष्ठीप्रतिषेधः । विद्वत्सु । ज्ञातवत्स्विति यावत् । 'विदेः शतुर्वसुः' इति वैकल्पिको वस्वादेशः । तेषु पार्थेषु स शोकः स्थानं स्थितिं नावाप न प्राप ॥

तान्भूरिधाम्नश्चतुरोऽपि दूरं
विहाय यामानिव वासरस्य ।
एकौघभूतं तदशर्म कृष्णां
विभावरीं ध्वान्तमिव प्रपेदे ॥ ३५ ॥

तानिति ॥ तत्पार्थास्त्यक्तवच्छर्म सुखम् । 'शर्मशातसुखानि च' इत्यमरः । तद्विरुद्धमशर्म दुःखम् । 'नञ्' इति नञ्समासः । भूरिधाम्नोऽतितेजस्विन इति हानिहेतुत्वोक्तिः । चतुरस्तान्पार्थानपि वासरस्य भूरिधाम्नश्चतुरो यामान्प्रहरानिव । दूरं विहाय त्यक्त्वैकौघभूतमेकराशिभूतं सत् । 'श्रेण्यादयः कृतादिभिः' इत्यर्थे कर्मधारयः 'श्रेण्यादिराकृतिगणः' इति शाकटायनः । कृष्णां विभावरीं कृष्णपक्षरात्रिं ध्वान्तमिव । कृष्णां द्रौपदीं प्रपेदे प्राप ॥

तुषारलेखाकुलितोत्पलाभे
पर्यश्रुणी मङ्गलभङ्गभीरुः ।
अगूढभावापि विलोकने सा
न लोचने मीलयितुं विषेहे ॥ ३६ ॥

तुषारेति ॥ सा द्रौपदी विलोकनेऽर्जुनावलोकनेऽगूढभावागूढाभिप्रायापि । स्फुटाभिलाषिणीति यावत् । 'भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु' इति वैजयन्ती । मङ्गलभङ्गभीरुर्मङ्गलहानेर्भीता सती । पर्यश्रुणी परिगताश्रुके । बाष्पाकृते इत्यर्थः । अत एव तुषारलेखाकुलितोत्पलाभे हिमबिन्दु-

सहितेन्दीवरसंनिभे इत्युपमालङ्कारः । लोचने मीलयितुं न विषेहे न शशाक । अश्रुणोर्दृष्ट्यावरकत्वेऽपि तन्निपातस्यामङ्गलत्वात्तन्निर्वर्तकं निमीलनं सा न चकारेत्यर्थः ॥

अकृत्रिमप्रेमरसाभिरामं
रामार्पितं दृष्टिविलोभि दृष्टम् ।
मनःप्रसादाञ्जलिना निकामं
जग्राह पाथेयमिवेन्द्रसूनुः ॥ ३७ ॥

अकृत्रिमेति ॥ इन्द्रसूनुरर्जुनः । क्रियया निर्वृत्तः कृत्रिमः । 'ड्वितः क्त्रिः' इति क्त्रिः । 'क्त्रेर्मम्नित्यम्' इति मप्प्रत्ययः । तद्विरुद्धम् । प्रेमैव रसः । अकृत्रिमेण प्रेमरसेनाभिरामम् । अन्यत्र प्रेमरसेन मधुरादिना चाभिरामम् । रामया रमण्यार्पितम् । दृष्टिं विलोभयतीति दृष्टिविलोभि । दृष्टिप्रियमित्यर्थः । दृष्टं दर्शनम् । 'नपुंसके भावे क्तः' । मनःप्रसादः । प्रसन्नं मन इत्यर्थः । सोऽञ्जलिरिवेत्युपमितसमासः । तेन मनःप्रसादाञ्जलिना । पथि साधु पाथेयं शम्बलमिव । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' निकाममतिशयेन जग्राह । रामार्पितं पाथेयं पथि क्षेमाय भवतीत्यागमः ॥

धैर्यावसादेन हृतप्रसादा
वन्यद्विपेनेव निदाघसिन्धुः ।
निरुद्धबाष्पोदयसन्नकण्ठ
मुवाचकृच्छ्रादिति राजपुत्री ॥ ३८ ॥

धैर्येति ॥ वन्यद्विपेन । वन्यग्रहणमुच्छृङ्खलत्वद्योतनार्थम् । निदाघसिन्धुर्ग्रीष्मनदीव । निदाघग्रहणं दौर्बल्यद्योतनार्थम् । धैर्यावसादेन धैर्यभ्रंशेन कर्त्रा हृतप्रसादा हृतनैर्मल्या । क्षोभं गमितेत्यर्थः । राजपुत्री क्षत्रियसुता द्रौपदी । अतः क्षात्रयुक्त-

मेव वक्ष्यतीति भावः । निरुद्धवाष्पोदयं संरुद्धरोदनं सन्नकण्ठं हीनस्वरम् । अथ तयोरुभयोः कृतबहुव्रीह्योः क्रियाविशेषणयोर्विशेषणसमासः । कृच्छ्रात्कथंचिदिति वक्ष्यमाणमुवाच ॥

मग्नां द्विषच्छद्मनि पङ्कभूते
संभावनां भूतिमिवोद्धरिष्यन् ।
आधिद्विषामा तपसां प्रसिद्धे-
रस्मद्विना मा भृशमुन्मनीभूः ॥ ३९ ॥

मग्नामिति ॥ पङ्कभूते पङ्कोपमिते । 'भूतं क्ष्मादौ पिशाचादौ न्याय्ये सत्योपमानयोः' इति विश्वः । द्विषच्छद्मनि शत्रुकपटे मग्नाम् । दुरुद्धरामित्यर्थः । संभावनां योग्यताम् । गौरवमिति यावत् । भूतिं संपदमिव । 'भूतिर्भस्मनि संपदि' इत्यमरः । उद्धरिष्यन् । उद्धारकस्त्वमिति शेषः । आधिद्विषां दुःखच्छिदां तपसामा प्रसिद्धेः सम्यक्सिद्धिपर्यन्तमस्माद्विना । अस्माभिर्विनेत्यर्थः । 'पृथग्विना—' इत्यादिना विकल्पात्पञ्चमी । भृशं मोन्मनीभूः । अस्मद्विरहाद्दुर्मना मा भूरित्यर्थः । दौर्मनस्यस्य तपःपरिपन्थित्वादिति भावः । 'माङि—' इत्याशीरर्थे लुङ् । 'न माङ्योगे' इत्यडागमप्रतिषेधः । अनुन्मना उन्मनाः संपद्यमान उन्मनी । अभूततद्भावे च्विः । 'अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च' इति सकारलोपः । 'अस्य च्वौ' इतीकारः ॥

अथानौत्सुक्यदार्ढ्यार्थं तस्य सर्वार्थसिद्धिनिदानत्वमाह—

यशोऽधिगन्तुं सुखलिप्सया वा
मनुष्यसंख्यामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां
समुत्सुकेवाङ्कमुपैति सिद्धिः ॥ ४० ॥

यश इति ॥ यशोऽधिगन्तुम् । कीर्तिं लब्धुमित्यर्थः । सु-

खस्य लिप्सया लब्धुमिच्छया वा। मनुष्यसंख्यां मनुष्यगणनामतिवर्तितुमतिक्रमितुं वा। अमानुषं कर्म कर्तुं वेत्यर्थः। अभियोगभाजामभिनिवेशवतां निरुत्सुकानामनुत्सुकानाम्। अदुर्मनायमानानामित्यर्थः। सिद्धिः पूर्वोक्तं यशः सुखाद्यर्थसिद्धिश्च। समुत्सुकेवानुरक्तकान्तेवाङ्कमुत्सङ्गमन्तिकं चोपैति। तस्मादस्मद्विरहदुःखमातपःसिद्धेः सोढव्यमिति भावः॥

अथास्य मन्यूद्दीपनद्वारा तपःप्रवृत्तिं प्रथयितुमरिनिकारं तावच्चतुर्भिरुद्धाटयति—

लोकं विधात्रा विहितस्य गोप्तुं
क्षत्रस्य मुष्णन्वसु जैत्रमोजः॥
तेजस्विताया विजयैकवृत्ते-
र्निघ्नन्प्रियं प्राणमिवाभिमानम्॥ ४१॥

लोकमिति॥ विधात्रा ब्रह्मणा लोकं गोप्तुं विहितस्य सृष्टस्य क्षत्रस्य क्षत्रियजातेः सम्बन्धि। जयनशीलं जेतृ तदेव जैत्रम्। जेतृशब्दात्तृन्नन्तात् 'प्रज्ञादिभ्यश्च' इति स्वार्थेऽण्प्रत्ययः। ओजो बलं दीप्तिर्वा। 'ओजो बले च दीप्तौ च, इति विश्वः। तदेव वसु धनमिति रूपकालाङ्करः। मुष्णन्नपहरन्। अरिनिकृतस्य कुतः क्षात्रं तेज इति भावः। किंच विजयैकवृत्तेर्विजयैकजीवितायाः। 'क्षत्रियस्य विजितव्यम्' इति स्मरणादिति भावः। 'वृत्तिर्वर्तनजीवने' इत्यमरः। तेजस्वितायाः। तेजस्विनामित्यर्थः। तेजःप्राधान्यद्योतनार्थं भावप्रधानो निर्देशः। प्रियं प्राणमिव। प्राणसममित्यर्थः। अभिमानमहंकारं निघ्नन्खण्डयन्। तेजस्विनां प्राणहानिप्राया मानहानिरिति भावः॥

'अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि' न त्याज्यमित्याह—

व्रीडानतैराप्तजनोपनीतः
संशय्य कृच्छ्रेण नृपैः प्रपन्नः ।
वितानभूतं विततं पृथिव्यां
यशः समूहन्निव दिग्विकीर्णम् ॥ ४२ ॥

व्रीडेति ॥ पुनश्च । आप्तजनेनोपनीतः साधितः । प्रापित इत्यर्थः । तथापि संशय्य संदिह्य । असंभावितबुद्ध्येति भावः । व्रीडानतैः । जुगुप्सितवृत्तान्तश्रवणादिति भावः । नृपैर्देशान्तरस्थैः कृच्छ्रेण प्रपन्नः । आप्तोक्तत्वात्कथंचिद्विश्वस्त इत्यर्थः । यः शृण्वतामपि दुःसहः किमुतानुभवतामिति भावः । इत्येषा पूर्वेषां व्याख्या । अन्यथा च व्याख्यायते—आप्तजनोपनीतो ज्ञातिकृतः संशय्य कथमिदमन्याय्यमुपेक्ष्यमिति विचार्य व्रीडानतैः । जुगुप्सितकर्मदर्शनादिति भावः । नृपैस्तत्रत्यैः कृच्छ्रेण प्रपन्नोऽङ्गीकृतः । गोत्रकलहेषु मध्यस्थैरुदासितव्यमिति बुद्ध्योपेक्षित इत्यर्थः । पक्षद्वयेऽपि प्रपन्न इत्यत्राप्तजनोपनीतत्वस्य पदार्थभूतस्य विशेषणगत्या हेतुत्वोक्त्या काव्यलिङ्गमलंकारः । पृथिव्यां वितानभूतमुल्लोचोपमितम् । यद्वा वितानभूतं वितानसमम् । उल्लोचतुल्यमिति यावत् । 'युक्ते क्ष्मादावृते भूते प्राण्यतीते समे त्रिषु' इत्यमरः । 'अस्त्री वितानमुल्लोचः' इत्यमरः । दिग्विकीर्णं दिगन्तलग्नम् । वितानमपि दिगन्तलग्नमिति भावः । विततं प्रथितं यशः समूहन्निव संकोचयन्निवेत्युत्प्रेक्षा । अरातिपरिभूतस्य कुतः कीर्तिरिति भावः ॥

वीर्यावदानेषु कृतावमर्ष-
स्तन्वन्नभूतामिव सम्प्रतीतिम् ।

कुर्वन्प्रयामक्षयमायतीना-
मर्कं त्विषामह्न इवावशेषः ॥ ४३ ॥

वीर्येति ॥ पुनश्च । वीर्याण्येवावदानानि तेषु कृतावमर्षः कृतास्कन्दनः । पुराकृतपराक्रमजातान्यपि प्रमृजन्नित्यर्थः । 'अवदानं कर्म वृत्तम्' इत्यमरः । अत एव संप्रतीतिं ख्यातिम् । 'प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः' इत्यमरः । अभूतामविद्यमानामिवेत्युत्प्रेक्षा । सतोऽप्यसत्त्वमुत्प्रेक्ष्यते । तन्वन्कुर्वन् । पुनश्चाह्नोऽवशेषो दिनान्तोऽर्कत्विषामिवायतीनामुत्तरकालानां प्रयामक्षयं दैर्घ्यनाशं कुर्वन्निति श्रौती पूर्णेयमुपमा । अरिनिराकृतस्य कुतश्चिरावस्थानमिति भावः ॥

प्रसह्य योऽस्मासु परैः प्रयुक्तः
स्मर्तुं न शक्यः किमुताधिकर्तुम् ।
नवीकरिष्यत्युपशुष्यदार्द्रः
स त्वद्विना मे हृदयं निकारः ॥ ४४ ॥

प्रसह्येति । पुनश्च । परैः शत्रुभिरस्मासु प्रसह्य प्रयुक्त आचरितो यो निकारः परिभवः केशाकर्षणरूपः स्मर्तुं न शक्यः । अधिकर्तुमनुभवितुं किमुत । यस्य स्मरणमपि दुःसहमनुभवस्तु दुःसह इति किमु वक्तव्यमित्यर्थः । स निकारस्त्वद्विना त्वया विना । 'पृथग्विना—' इत्यादिना पञ्चमी । आर्द्रः सन्कुतश्चिदभिभूतात्पुराणप्रहार इव । त्वद्विरहदुःखात्पुनर्नवीकरिष्यति । नवीभविष्यतीत्यर्थः । उपशुष्यत् । त्वया विना शुष्कमिति भावः । दुःखस्तम्भनं शोषपदार्थो मे हृदयं नवीकरिष्यत्यार्द्रीकरिष्यति । व्रणमिवेति भावः । दुःखितस्य पुनर्दुःखोपचयः प्रशान्तप्रायमपि दुःखहेतुं पुनरुद्घाटयतीत्यर्थः । अत्र शोषादिविशेषणसाम्याद्व्रणाद्यप्रस्तुतार्थप्रतीतेः समासोक्तिरलंकारः ॥

पुनः प्रकारान्तरेण मन्युमुद्दीपयति 'प्राप्तः' इत्यादिभिस्त्रिभिः । तत्र वक्ष्यमाणप्रत्यभिज्ञानहेतुभिर्धनञ्जयं विशिनष्टि—

प्राप्तोऽभिमानव्यसनादसह्यं
दन्तीव दन्तव्यसनाद्विकारम् ।
द्विषत्प्रतापान्तरितोरुतेजाः
शरद्घनाकीर्ण इवादिरह्नः ॥ ४५ ॥

अभिमानस्य व्यसनाद्भ्रंशात् 'व्यसनं विपदि भ्रंशे दोषे कामजकोपजे' इत्यमरः दन्तव्यसनाद्दन्तभङ्गाद्दन्तीवासह्यं विकारं वैरूप्यं प्राप्तः । अतो न प्रत्यभिज्ञायत इति भावः । एवमुत्तरत्राप्यनुसंधेयम् । पुनश्च । द्विषत्प्रतापेन शत्रुतेजसान्तरितं तिरस्कृतमुरुतेजः प्रतापो यस्य स तथोक्तः । अत एव शरद्घनाकीर्णः शरन्मेघच्छन्नोऽह्न आदिः प्रत्यूष इव स्थितः । तद्वदेवाप्रत्यभिज्ञायमान इत्यर्थः । मध्याह्नस्तु मेघावरणेऽपि कथंचित्प्रत्यभिज्ञायत एवेत्याशयेनोक्तमादिरिति ॥

सव्रीडमन्दैरिव निष्क्रियत्वा-
न्नात्यर्थमस्त्रैरवभासमानः ।
यशःक्षयक्षीणजलार्णवाभ-
स्त्वमन्यमाकारमिवाभिपन्नः ॥ ४६ ॥

सव्रीडेति ॥ पुनश्च । निष्क्रियत्वादर्थक्रियाशून्यत्वात्सव्रीडमन्दैरिव सव्रीडैरत एव मन्दैरपटुभिरिव स्थितैरित्युत्प्रेक्षा । 'मूढाल्पापटुनिर्भाग्या मन्दाः' इत्यमरः । अस्त्रैरत्यर्थं नावभासमानो न प्रकाशमानः । पूर्वं तु नैवमिति भावः । किं तु यशःक्षयाद्धेतोः क्षीणजलो योऽर्णवस्तदाभस्तत्सदृशस्त्वमन्यमाकारमभिपन्नः प्राप्त इव स्थित इवेत्युत्प्रेक्षा । तस्य क्षीणजलार्णवाभ इत्युपमासंसृष्टिः ॥

दुःशासनामर्षरजोविकीर्णै-
रेभिर्विनाथैरिव भाग्यनाथैः ।
केशैः कदर्थीकृतवीर्यसारः
कच्चित्स एवासि धनञ्जयस्त्वम् ॥ ४७ ॥

दुःशासनेति ॥ पुनश्च । दुःशासनस्य कर्तुरामर्ष आमर्षणमाकर्षणं स एव रजो धूलिः । मालिन्यहेतुत्वादिति भावः । तेन विकीर्णैर्विक्षिप्तैरत एव विनाथैरिव स्थितवतां युष्माकमस्वप्रायत्वादनाथैरिव । स्थितैरित्युत्प्रेक्षा । अन्यथा कथमियं दुर्दशेति भावः । किंतु भाग्यनाथैर्दैवमात्रशरणैः । अन्यथा स्वरूपमपि लुप्येतेति भावः । एभिः परिदृश्यमानैः । असंयमितैरिति भावः । केशैः शिरोरुहैः कुत्सितोऽर्थो वस्तु कदर्थः । 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः । 'कोः कत्तत्पुरुषेऽचि' इति कुशब्दस्य कदादेशः । कदर्थीकृतौ गर्ह्यार्थीकृतौ वीर्यसारौ शौर्यबले यस्य स तथोक्तः । इत्थं पूर्वविलक्षणस्त्वं स एव धनञ्जयोऽसि कच्चित् । कच्चित्कामप्रवेदने ' इत्यमरः । स एव चेत्त्वं नैवमस्मानुपेक्षस इति भावः ॥

अथाप्युपेक्षणे दोषमाह—

स क्षत्रियस्त्राणसहः सतां य-
स्तत्कार्मुकं कर्मसु यस्य शक्तिः ।
वहन्द्वयीं यद्यफलेऽर्थजाते
करोत्यसंस्काररहतामिवोक्तिम् ॥ ४८ ॥

स इति ॥ क्षतात्त्रायत इति क्षत्रं क्षत्रियकुलम् । 'सुपि' इति योगविभागात्कप्रत्ययः । पृषोदरादित्वात्पूर्वपदस्यान्त्यलोपः । अथवा क्षदिति क्विबन्तोपपपात्कप्रत्ययः । क्षत्रे जातः क्षत्रियः । 'क्षत्राद्धः' इति घप्रत्ययः । कर्मणे प्रभवतीति कार्मुक

म् । कर्मण उकञ्' इत्युकञ्प्रत्ययः । एवं स्थिते वाक्यार्थः कथ्यते । यः सतां साधूनाम् । सहत इति सहः । पचाद्यच् । यत्त्राणस्य सहस्त्राणसहो रक्षणक्षमः स एव क्षत्रियशब्दवाच्यः । तथा यस्य कार्मुकस्य कर्मसु रणक्रियासु शक्तिः । अस्तीति शेषः । तदेव कार्मुकशब्दवाच्यम् । अत्रैवैतौ शब्दौ मुख्यौ । नान्यत्रेत्यर्थः । एवं स्थिते द्वयीं द्विविधामुक्तिम् । द्वाविमौ क्षत्रियकार्मुकशब्दावित्यर्थः । अफले । पूर्वोक्तावयवार्थशून्ये अर्थजाते । स्वाभिधेयसामान्यजातिमात्र इत्यर्थः । 'जातं जात्योघजन्मसु' इति विश्वः । वहन्वर्तयन् । संस्कारहतामव्युत्पत्तिदूषितामिव करोतीत्युत्प्रेक्षा । तस्मात्त्वमस्मद्रक्षणेनोक्तदोषादात्मानं मोचयस्वेत्यर्थः ॥

अथ त्वद्गुणा अपि नोज्जीवयेयुरित्याह—

वीतौजसः संनिधिमात्रशेषा
भवत्कृतां भूतिमपेक्षमाणाः ।
समानदुःखा इव नस्त्वदीयाः
सरूपतां पार्थ गुणा भजन्ते ॥ ४९ ॥

वीतेति ॥ हे पार्थ, वीतौजसो निष्प्रभाः संनिधिमात्रशेषाः सत्तामात्रावशिष्टा भवत्कृतां भवता करिष्यमाणाम् । 'आशंसायां भूतवच्च' इति भूतवत्प्रत्ययः । भूतिमभ्युदयमपेक्षमाणास्त्वदीया गुणाः समानदुःखाः समदुःखभाज इव नोऽस्माकं सरूपतां वीतौजस्त्वादिसाधर्म्यं भजन्त इत्युपमा । सा च समानदुःखा इवेत्युत्प्रेक्षया वीतौजस्त्वादिसंभावितयानुप्राणितेत्यनुसन्धेयम् ॥

तथापि ममैव कोऽयं भार इत्यत आह—

आक्षिप्यमाणं रिपुभिः प्रमादा-
न्नागैरिवालूनसटं मृगेन्द्रम् ।
त्वां धूरियं योग्यतयाधिरूढा-
दीप्त्या दिनश्रीरिव तिग्मरश्मिम् ॥ ५० ॥

आक्षिप्येति ॥ प्रमादात्प्रज्ञाहीनत्वात् । नतु दौर्बल्यादिति भावः । रिपुभिराक्षिप्यमाणमाधिक्षिप्यमाणमत एव प्रमादात् । नागैर्गजैः । 'ग्रहेभाहिगजा नागाः' इति वैजयन्ती । आलूनसटमाक्षिप्तकेसरम् । 'सटा जटाकेसरयोः' इत्यमरः । मृगेन्द्रं सिंहमिव स्थितम् । त्वामियं धूः कार्यभारः । तिग्मरश्मिं सूर्यं दीप्त्या दिनश्रीरिव. योग्यतया निर्वाहकतयाधिरूढारूढवती । कर्तरि क्तः । त्वदधीनेत्यर्थः ॥

पूर्वं निर्व्यवसायस्य 'स क्षत्रियः' इत्यादिना दोष उक्तः । संप्रति व्यवसायिनो गुणमाह—

करोति योऽशेषजनातिरिक्तां
सम्भावनामर्थवतीं क्रियाभिः ।
संसत्सु जाते पुरुषाधिकारे
न पूरणी तं समुपैति संख्या ॥ ५१ ॥

करोतीति ॥ यः पुमानशेषजनादितरजनादतिरिक्तामधिकाम् । सर्वातिशायिनीमित्यर्थः । सम्भावनां योग्यतां क्रियाभिश्चरितैरर्थवतीं सफलां करोति । तं पुमांसं संसत्सु सभासु 'सभासमितिसंसदः' इत्यमरः । पुरुषाधिकारे योग्यपुरुषगणनाप्रस्तावे जाते सति । पूर्यतेऽनयेति पूरणी संख्या द्वित्वादिसंख्या न समुपैति न गच्छति । अद्वितीयो भवतीत्यर्थः । तस्मादसाधारणलाभाय त्वयापि महानुत्साह आस्थेय इति भावः ॥

अथ द्वाभ्यां सुलभविपक्षस्य प्रोषितस्यार्जुनस्य कर्तव्यमुपदिशति—

प्रियेषु यैः पार्थ विनोपपत्ते-
र्विचिन्त्यमानैः क्लममेति चेतः ।
तव प्रयातस्य जयाय तेषां
क्रियादघानां मघवा विघातम् ॥ ५२ ॥

प्रियेष्विति ॥ हे पार्थ, प्रियेष्वस्मासु विषय उपपत्तेः कारणाद्विनैव विचिन्त्यमानैरकस्मादेवाशङ्क्यमानैर्यैरघैश्चेतः क्लमं खेदमेति । जयाय प्रयातस्य तव सम्बन्धिनां तेषामघानां व्यसनानाम् । 'दुःखैनोव्यसनेष्वघम्' इत्यमरः । मघवेन्द्रः । योऽस्माभिरुपास्यत इति भावः । विघातं निवारणं क्रियात्करोतु । आशिषि लिङ् । तस्मादस्मच्चिन्तया न चेतः खेदयितव्यं जयार्थिना त्वया । अन्यथा तदसंभवादिति भावः ॥

मा गाश्चिरायैकचरः प्रमादं
वसन्नसंबाधशिवेऽपि देशे ।
मात्सर्यरागोपहतात्मनां हि
स्खलन्ति साधुष्वपि मानसानि ॥ ५३ ॥

मा गा इति ॥ असंबाधोऽसङ्कटः । विजन इत्यर्थः । 'संकटं ना तु सम्बाधः' इत्यमरः । शिवो निर्बाधः । द्वयोरन्यतरस्य विशेष्यत्वविवक्षायां विशेषणसमासः । अस्मिन्नसम्बाधशिवेऽपि देशे चिराय चिरमेकश्चासौ चरश्चेत्येकचर एकाकी वसन्प्रमादं दौर्बल्यं मा गाः । 'इणो गा लुङि' इति गादेशः । ननु निःस्पृहस्य ममाकिञ्चित्करः प्रमाद इति वाच्यमित्याशङ्क्याह—मात्सर्येति । मत्सर एव मात्सर्यं द्वेषो रागः स्नेहस्ताभ्यामुपहतात्मनां रागद्वेषदूषितस्वभावानां मानसानि मनांसि साधुषु स-

ज्ञनेष्वपि विषये स्खलन्ति विकुर्वते हि। अत्र प्रमादनिषेधलब्धाप्रमादरूपकारणेनार्थप्राप्तिरूपकार्यस्य व्यतिरेककारणसमर्थनाद्वैधर्म्येण कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥

निगमयति—

तदाशु कुर्वन्वचनं महर्षे
मनोरथान्नः सफलीकुरुष्व।
प्रत्यागतं त्वास्मि कृतार्थमेव
स्तनोपपीडं परिरब्धुकामा ॥ ५४ ॥

तदिति ॥ तत्तस्मात्कारणात्। आशु शीघ्रं महर्षेर्वचनं कुर्वन्। तपस्यन्नित्यर्थः। नोऽस्माकं मनोरथान्सफलीकुरुष्व। अरिनिर्यातनेनास्मान्प्रतिष्ठापयेत्यर्थः। प्रार्थनायां लोट्। किञ्च कृतार्थं कृतकृत्यं प्रत्यागतमेव त्वा त्वाम्। 'त्वामौ द्वितीयायाः' इति त्वादेशः। स्तनयोरुपपीड्य स्तनोपपीडम्। 'सप्तम्यां चोपपीडरुधकर्षः' इति णमुल्। परिरब्धुं कामो यस्याः सा परिरब्धुकामास्मि। आलिङ्गितुमिच्छामीत्यर्थः। 'तुंकाममनसोरपि' इति मकारलोपः। प्राक्कार्यसिद्धेः प्रमदालिङ्गनमपि न प्रीतिदमिति भावः ॥

उदीरितां तामिति याज्ञसेन्या
नवीकृतोद्ग्राहितविप्रकाराम्।
आसाद्य वाचं स भृशं दिदीपे
काष्ठामुदीचीमिव तिग्मरश्मिः ॥ ५५ ॥

उदीरितामिति ॥ सोऽर्जुन इतीत्थं यज्ञसेनस्यापत्येन स्त्रिया याज्ञसेन्या द्रौपद्योदीरितामुक्ताम्। नवीकृतः पुनरुद्घाटनेन तथा प्रत्यायितोऽत एवोद्ग्राहितो मनसि निश्चापितश्च विप्रकारः परिभवो यया सा तां वाचमासाद्य। आकर्ण्येत्यर्थः। उदीचीं

काष्ठां दिशम् । 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः । तिग्मरश्मिरिव । भृशं दिदीपे जज्वाल । चुक्रोधेत्यर्थः ॥

अथाभिपश्यन्निव विद्विषः पुरः
पुरोधसारोपितहेतिसंहतिः ।
बभार रम्योऽपि वपुः स भीषणं
गतः क्रियां मन्त्रइवाभिचारिकीम् ॥ ५६ ॥

अथेति ॥ अथ विद्विषः शत्रून्पुरोऽभिपश्यन्निव स्थितस्तथा पुरोधसा धौम्येनारोपिता समन्त्रमाहिता हेतिसंहतिरायुधकलापो यस्य स तथोक्तः । 'हेतिर्ज्वालाङ्कुरायुधे' इति वैजयन्ती । सोऽर्जुनो रम्यः सौम्यः सन्नपि । अभिचारः परहिंसा प्रयोजनं यस्याः साभिचारिकी । 'प्रयोजनम्' इति ठञ् । तां क्रियां गतः । अभिचारकर्मणि नियुक्त इत्यर्थः । मन्त्र इव । रम्यः प्रकृत्या रमणीयः । भीषयत इति भीषणम् । नन्द्यादित्वाल्ल्युप्रत्ययः । वपुर्बभार । प्रशान्तो मन्त्रः प्रयोगभेदादिव । सोऽप्यवस्थाभेदाद्भीषणो बभूवेत्यर्थः ॥

उक्तमायुधारोपणं विवृण्वन्प्रस्थानमाह त्रिभिः—

अविलङ्घ्यविकर्षणं परैः
प्रथितज्यारवकर्म कार्मुकम् ।
अगतावरिदृष्टिगोचरं
शितनिस्त्रिंशयुजौ महेषुधी ॥ ५७ ॥

अविलङ्घ्येति ॥ परैः शत्रुभिरविलङ्घ्यमनतिक्रमणीयं विकर्षणं यस्य तत् । अमोघाकर्षणमित्यर्थः । किञ्च प्रथितो ज्यारवो गुणध्वनिः कर्म बाणमोक्षणादिकं च यस्य तत्कार्मुकं चोद्वहन्नित्यन्वयः । तथारीणां दृष्टिगोचरं दृष्टिपथमगतौ । आहवेष्वनिवर्तित्वादस्येति भावः । निर्गतस्त्रिंशतोऽङ्गुलिभ्यो नि-

स्त्रिंशः खड्गः । डप्रत्यये संख्यायास्तत्पुरुषस्योपसंख्याना-त्समासान्तः । तेन शितेन तीक्ष्णेन युङ्क्त इति शितनिस्त्रिंशयुजौ । 'सत्सूद्विष–' इत्यादिना क्विप् । महेषुधी महानिषङ्गौ । इषवो धीयन्तेऽनयोरिति विग्रहः । 'कर्मण्यधिकरणे च' इति किप्रत्ययः । 'तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः । तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः ॥' इत्यमरः ॥

यशसेव तिरोदधन्मुहु-
र्महसा गोत्रभिदायुधक्षतीः ।
कवचं च सरत्नमुद्वह-
न्ज्वलितज्योतिरिवान्तरं दिवः ॥ ५८ ॥

यशसेति ॥ किञ्च । गोत्रभिद इन्द्रस्यायुधक्षतीर्वज्रप्रहाररन्ध्राणि । खाण्डवदाहसम्भवादिति भावः । महसा स्वकान्त्या यशसेव मूर्तया कीर्त्येव मुहुस्तिरोदधदाच्छादयन् । सरत्नं रत्नसहितमत एव ज्वलितज्योतिर्दीप्ततारकम् । 'ज्योतिस्ताराग्निभाज्वाला दक्पुत्रार्थधरात्मसु' इति वैजयन्ती । दिवोऽन्तरं नभोमध्यमिवावस्थितम् । 'अन्तरं परिधानीये बाह्ये स्वीयेऽन्तरात्मनि । क्लीबे मध्ये प्रकाशे च' इति वैजयन्ती । कवचं चोद्वहन् ॥

अलकाधिपभृत्यदर्शितं
शिवमुर्वीधरवर्त्म संप्रयान् ।
हृदयानि समाविवेश स
क्षणमुद्बाष्पदृशां तपोभृताम् ॥ ५९ ॥

अलकेति ॥ सोऽर्जुनोऽलकाधिपभृत्येन यक्षेण दर्शितमतः शिवं निर्बाधमुर्वीधरवर्त्म हिमवन्मार्गं प्रति सम्प्रयान्प्रगच्छन् । क्षणमुद्बाष्पदृशां वियोगदुःखात्साश्रुनेत्राणां तपोभृतां द्वैतवन-

निवासिनां तपस्विनां हृदयानि समाविवेश । खेदयामासेत्यर्थः ॥

अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने ।
प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं
भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥ ६० ॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये
तृतीयः सर्गः ।

अनुजगुरिति ॥ अथाशा दिशः । दिवि भवं दिव्यम् । 'दिवादिभ्यो यत्' । दुन्दुभिध्वानमनुजगुरनुदध्वनुः । गायतेर्लिट् । व्योम्नि सुरकुसुमनिपातैर्लक्ष्मीर्वितेने । पुष्पवृष्टिश्चाजनिष्टेत्यर्थः । किञ्च । अनिभृताश्चञ्चला वेलायां कूले या वीचयस्ता एव बाहवो यस्य स तथोक्तः । 'वेला कूलविकारयोः' इति शाश्वतः । पयोधिः स्फुरन्तीमुल्लसन्तीं हर्षात्स्पन्दमानां च भुवं प्रियमिष्टं भारावतारणरूपं कथयिष्यन्निव । कथयितुमिवेत्यर्थः । 'लृट् शेषे च' इति चकारात्क्रियार्थायां क्रियायां लृट् । आलिलिङ्ग । सर्वं चेदं शिवं दैवकार्यप्रवृत्तत्वादस्येति भावः । अत्र विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वात्समासोक्तिरलङ्कारः । तत्र चाप्रस्तुतयोर्भूमिसमुद्रयोः प्रतिपन्नाभ्यां नायकभ्यां भेदेऽभेदलक्षणातिशयोक्तिवशादालिङ्गनोक्तिरिति रहस्यम् । एवमतिशयोक्त्यनुप्राणिता समासोक्तिः । प्रियकथनात्स्नेहमुज्जीवयति तदङ्गभावं भजत इत्युभयोरङ्गाङ्गिभावेन सङ्कर इति विवेचनीयम् ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां
तृतीयः सर्गः समाप्तः ।

सूचीपत्रम् ।

—:o:—

१ श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता । श्रीमद्भागवतव्याख्यागोस्वामीश्रीविठ्ठलनाथदीक्षितविरचित टिप्पणितथाप्रकाश गोस्वामी श्रीपुरुषोत्तमजीमहाराजविरचितः सहिता दशमस्कन्ध जन्मप्रकर्णः खण्डाः ३ मूल्यम् ३—०—०

२ विरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचित पुजाप्रकाश संपूर्ण खण्डाः ४ ४—०—०

३ वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारी वनमालीमिश्रविरचितः । तथा वेदान्तकारिकावली अध्यात्मसुधातरङ्गिण्याख्यव्याख्यासहिता खण्डाः ३ मूल्यम् ३—०—०

४ स्वानुभवादर्शः श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रम शिष्यमाधवाश्रमविरचितः । स्वकृतटीकाविभूषितश्च संपूर्णः खण्डाः २ मूल्यम् २—०—०

५ याज्ञवल्कस्मृतीः । बालमभट्टीसमाख्यव्याख्यासमलङ्कृत मिताक्षरासहिता । व्यवहाराध्याय संपूर्णः ११—०—०

६ शास्त्रदीपीका । मिमांसाधुरन्धर श्रीपार्थसारथीमिश्रप्रणीता पण्डितप्रवरश्रीरामकृष्णविरचित युक्तिस्नेह प्रपूरण्याख्यव्याख्यासमलङ्कृताः खण्डा १० १०—०—०

७ गादाधरी । श्रीगदाधरभट्टाचार्य चक्रवर्तीकृता । श्रीगङ्गेशोपाध्याय विरचित तत्वचिन्तामण्या श्रीरघुनाथतार्कीकशीरोमणीविरचित दीधित्याच गर्भिता । खण्डा १० १०—०—०

८ वैयाकरणसिद्धान्तमंजुषा श्रीनागेशभट्टविरचिता श्रीमद्वुर्बलाचार्यविरचित कुञ्जिकाटीका—श्रीमद्बाळम्भट्टविरचित कलाटीका । इति टीकाद्वयसंवलीता । खण्डा ६ मूल्यम् ६—०—०

९ विरमित्रोदयः । महामहोपाध्याय श्रीमित्रमिश्रविरचितः । लक्षण प्रकाश खण्डा ५ ५—०—०

१० महाभास्यव्याख्या श्रीसुक्तिरत्नाकरः । श्रीशेषनारायणविरचीतः । खण्डा १० १०—०—०

पत्रादिप्रेषणस्थानम्—हरिदासगुप्तः—
कार्याध्यक्षः चौखम्बासंस्कृतसीरीज कार्यालय—
बनारस सिटी

सूचीपत्रम् ।

—:०:—

पत्रादिप्रेषणस्थानम्—हरिदासगुप्तः—

कार्याध्यक्षः चौखम्बासंस्कृतसीरीज कार्यालय—

बनारस सिटी

वृत्तरत्नाकरम्

पिङ्गलमुनिकृत-छन्दःसूत्रसहितम्

केदारभट्टविरचितम्

काव्यतीर्थ—रामप्रपन्नशास्त्रिसङ्कलित

नूतनरत्नसंग्रहनामकटीकोपेतम्

THE

VRITTARATNAKARA

OF

KEDARABHATTA

With the Pingala Muni's Chhanda Sootras

AND

With the Ratna sangrha new Commentary

BY

Kavyatirtha P. RAMPRAPANNA SHASTRI.

Professor,

Sri Raghunath Mahavidyalaya.

——o——

व्याख्यात्रैव टिप्पणसूच्यादिभिः स्वयं संशोध्य सुपरिष्कृत्य
पं० चरणदास बी० ए० द्वारा संमुद्राप्य च प्रकाशितम्
अस्य पुनर्मुद्रणाद्यधिकारः व्याख्यातुरायत्तः ।

Printed and published at Punjab Printing Works, Lahore
by Pandit Charan Das, B.A.

विषयावलीसूचीपत्रमिदम् ।

( )

इति विषयावलीसूचीपत्रं समाप्तम् ।

छन्दः सूचीपत्रमिदकम् ।

—o—

अत्र च केवलं समन्वयितश्लोकाङ्का एव प्रदत्ताः, एतदुपर्य्येव पिङ्गलसूत्राणि, तत्सर्व-प्रकरणोपरि च मूल श्लोकाः स्थूलाक्षरैर्लिखिता विज्ञेयाः ॥

श्रीहरिश्शरणम्

समाप्तम् शुभं भवतु

उदाहारः ।

स्वकृत्या साधनेनापि परकार्यप्रणाशने ।

चिन्तयाहर्निशं ग्रस्ता वन्ध्यादौ दौर्जनी स्थितिः ॥

प्रवृत्तौ खलु कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं च मिलितं सत्कारणं भवति । तच्चानुबन्ध—चतुष्टयतो जायते । अनुबन्ध-चतुष्टयन्तु अधिकारि-विषय-सम्बन्ध-प्रयोजनात्मकम् । तथा चानुबन्धचतुष्टयमनवबुध्य प्रवृत्तेरभावादादौ तदभिधानीयम्, तदिदं विचार्यते ।

वेदाः खलु मुख्यतः परमपुरुषार्थे प्रवृत्ता अनुषङ्गतश्चाद्यमपि त्रिवर्गं ततः सिध्यति "शाल्यर्था हि कुल्याः प्रणीयन्ते" इति न्यायात् इति मान्याः । वेदार्थादिप्रतिपादनाय च षडङ्गानि आस्यादीनीव तत एव पृथक्पृथगाविर्भूतानि भूतानीव प्रजापतेः । तानि च

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ।

छन्दसां लक्षणं चेति षडङ्गो वेद उच्यते ॥ इति

तत्र रूपक-निरूपणेनाङ्गविन्यासस्तु इत्थमकारि पाणिनीयशिक्षायाम् ।

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ कथ्यते ।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥

शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् ।

तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

व्यतिरेकेणाप्यन्यत्र किञ्चिदन्यथा

विना व्याकरणेनान्धो बधिरः कोशवर्जितः ।

छन्दःशास्त्रं विना पङ्गुर्मूकस्तर्कविवर्जितः ॥

अत्र सर्वाण्यपि अंगानि समानि, नतु न्यूनाधिकता कतमस्यापि । सर्वेषामपि स्वस्वकार्यार्थमवश्यमपेक्षितत्वेन, । अंगमहिम्नः प्रदर्शनेच्छुकत्वेनैवाविशेषेण ग्रहणेन च, । अत एव छन्दसां पादसादृश्यप्रतिपादनेन अधमत्वं मा प्रसाङ्क्षीदिति मुनिपादौ तदुपवर्णनं विदधे । अत्र 'अधीत्यैवे'ति एवकारो विपरीतक्रमो बोध्यः । साङ्गमेवाधीत्येत्यर्थः । "निष्कारणं ब्राह्मणस्य धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति महाभाष्येऽपि षडङ्गसहितस्यैवाध्ययनविधिरुक्तः ।

तत्र व्याकरणस्याधिक्यप्रतिपादनं गणेशदेवीभागवतादिपुराणेषु तत्तद्देवतायाः "यस्य विवाहस्तस्यैव सर्वाधिकस्तुतिरिति" न्यायेन तत्स्तुतौ तात्पर्यग्राहकत्वेन सर्वोत्कर्षप्रतिपादनवद्बोध्यम् मुण्डकोपनिषद्यपि अपरविद्यात्वेनाङ्गानां कीर्तनम् 'द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति, अथ परा यया तदक्षरमधिगम्यते, इत्यादिना शिक्षादीनि प्रतिपादितानि। तथा छन्दोविशेषाणां तत्र तत्र विहितत्वात्। 'यो ह वा अविदितार्षेयछन्दोदैवत विनियोगेन ब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति स स्थाणुं वर्च्छति गर्तं पद्यते प्र वा मीयते पापीयान् भवति यातयामानि अस्य छन्दांसि भवन्ति, तस्मादेतानि मन्त्रे मन्त्रे विद्यात्, (सा० आ० ब्रा०) इति अथाऽनुष्टुभा यजति बृहत्या गायति गायत्र्या स्तौतीति श्रवणाच्च तस्मात्तद्वेदनाय छन्दोग्रन्थोऽप्युपयुज्यते॥ तत्र किं नाम छन्दः? इति प्रश्ने "छादनादिति' निरुक्तनिरुक्त्या "यदेभिरात्मानमाच्छादयन् देवा मृत्योर्बिभ्यतः, तच्छन्दसां छन्दस्त्वम्" इति ब्राह्मणेन च। इतोऽग्रे "गायत्री गायतेः" इत्यादिना छन्दसां प्रत्येकं निरुक्त्या एतेष्वेव स्थानव्यूहेषु ऋतुच्छन्दःस्तोमपृष्ठस्येत्यादौ, उत्तरत्र च्छन्दःपदेन अनुष्टुबाद्युक्तेश्च श्यादिकमेव गृह्यतेऽन्यार्थे शक्तिस्तु भाक्तैव तत्र २ इति बोध्यम्, एतदभेदेन यथा अष्टाध्यायीमहाभाष्यादौ वेदानामपि च्छन्दस्त्वमभाणि, अयस्मयादीनि छन्दसि" सू० ।१।० च्छन्दोवत्सूत्राणि भवन्ति" भा० तदेवं वेदार्थसाहाय्यदानद्वारा लौकिकच्छन्दोज्ञानेन काव्यकौशलबोधनद्वारा च चतुर्वर्ग फलप्राप्तिः परम्परया छन्दःशास्त्रस्य प्रयोजनमिति सिद्धम्। तज्जिज्ञासुरधिकारी, च्छन्दांसि विषयाः, प्रतिपाद्यप्रतिपादकभावो ग्रन्थस्य, बोध्यबोधकभावो जिज्ञासोश्च सम्बन्धः, इत्यनुबन्धचतुष्टयमत्रावसेयम्। आदिमपद्यत्रयेण प्रतिपादयिष्यते तत्॥ शास्त्रस्य ग्रन्थस्य च कर्त्रोर्नामापि गौरवलाघववेदनद्वारा प्रवृत्तिनिवृत्तिनिमित्तं भवतीति तदप्यवधीयते। शास्त्रस्यास्य कर्ता तु पिङ्गलमुनिः प्रसिद्धः। तद्यथा—

क्षीराब्धेरमृतं यद्वदुद्धृतं देवदानवैः।
छन्दोब्धेः पिङ्गलाचार्यैश्छन्दस्तद्वदुद्धृतमिति॥ १॥

अग्निपुराणे अग्निनामा ऋषिरपि बहूनि छन्दांसि ॥
'छन्दो वक्ष्ये मूलजैस्तैः पिङ्गलोक्तं यथा क्रमम् ॥

सर्वादिमध्यान्त गलौ म्नौ भ्यौ जौ स्तौ त्रिका गणाः ॥ अ० ३२८ श्लो०१ इत्यादिना वर्णितवान्। अन्येषामपि बहूनां महर्षीणां ग्रन्था आसन् येषां नामानि पिङ्गलग्रन्थे उपलभ्यन्ते यथा—सर्वतः सैतवस्य सू० ५।१८ " सिंहोन्नता काश्यपस्य " सू० ७। ६ अन्यत्र " रातमाण्डव्याभ्याम् " सू० ८।३५ सू० ८।३५ परन्तु ते ग्रन्था लुप्तप्राया एव प्रतीयन्ते ॥ वैदिकछन्दः प्रतिपादनादस्यैव पाणिन्यष्टकवदन्यत्र्यः वेदाङ्गत्वं जेगीयते विपश्चिद्भिः ॥

अयं यद्यपि बहुषु स्थलेषु पिङ्गलनागनाम्नाप्युक्तस्तथापि महाभाष्यकारपतञ्जलितो भिन्नो नामकृतिरीतितो बहुभेदप्रतीतेः,यद्यपि 'अयं महर्षिवरः कस्मिन्काले कां भूमिमलञ्चकारेति वाङ्मनसाऽगोचरमन्येषामिव भारतीयानामीदृशां, तथापि एतद्विषये यत् २ समुपलब्धं क्षोदीयस्यां मत्यां च विवेचितं तत् २ विदुषां पुरस्तात् कुसुमाञ्जलिरिव उपनेतुमनुचितमपि परीक्षणार्थं केवलमुपनीयते ॥ एतद्ग्रन्थरचनातोऽरण्यजलशीत प्रधानप्रदेशीयोऽयमिति प्रतीयते । यतोऽस्य ग्रन्थे पुष्पिताग्रा—वसन्ततिलका—वानवासिका—मञ्जरी—लवल्यऽमृतधारा—चित्रक—द्रुतमध्या—वेगवती—विद्युन्माला—हरिणी—सिंहोन्नता—श्येनी—कोकिलक-हंसरुत—मयूरसारिणी-न्द्रवज्रा—वातोर्मी-जलोद्धतगतीत्यादि नामानि समुपलभ्यन्ते यद्यैतद्विषयक—यौक्तिकजनग्रन्था नावलोकितास्तथापि निजानुमानतः कश्मीरेष्वयमभूदिति विज्ञायते। स एव देशोऽरण्यजलशीतप्रधानो विद्यावेश्म नागानां राज्यभूरपि पुरा आसीत्। तथाहि—नागप्रार्थितो—

विष्णुरुवाच। तमाह भगवान्देवो वासुकिं भयविह्वलम् ॥
सतीदेशेऽत्र पुण्योदे सरस्यमरभूषिते ॥ १ ॥
धर्मिष्ठः सहितो नागैर्वलस्वामितविक्रमः ।
तस्मिन्सरसि ये स्थानं करिष्यन्ति भुजङ्गमाः ॥ २ ॥
तस्य तस्याऽहिशत्रुर्वै न हनिष्यति जीवितम् ।
सतीदेशे कृतस्थानं तिष्ठन्तमकुतोभयम् ॥ ३ ॥
न हनिष्यति नागेन्द्र ! नागारिर्मम वाहनः ।
नीलमतपुराणे ॥ अ० ७। ×। ××

तत्र स्थाने च नागानां नासीद्गरुडतो भयम् ॥

नागान्तमस्य नाम भुजगशिशुभृता भुजंगप्रयातादिषु नागवाचिनामकच्छन्दोरचना च तथा अद्यापि तत्र अनन्तनाग–वैरिनाग–शेषनागेत्यादि नागपदघटितनगराद्युपलम्भः । तत्तत्पुरुषनाम्नैव नगराणां नामान्यासन्निति तु सुप्रसिद्धमेव । यादृशः तत्र वसन्तोत्सवस्तादृशो नान्यत्राद्यापि प्रायोवलोक्यते अत एव वसन्ततिलक–लता–पुष्प–वृक्ष–पक्षिनामान्येतद्ग्रन्थे बहुशोऽवलोक्यन्ते । अत्रैकस्य छन्दसः गौरीति नाम "गौरी नौ न्सौ ग्" ७।४ गौरी वितस्तात्वेन परिणतेति प्रसिद्धं कश्मीरेषु।

गुहोन्मुखी नागमुखा पीतभूरिपया रुचिम् ।
गौरी यत्र वितस्तात्वं याताप्युज्झति नोचिताम् ॥ इति

राजतरंगिणी प्र० तरङ्ग श्लोक २९ मधुमतीनामकमत्र छन्दः मधुमती चात्र नदी ।

आलोक्य शारदां देवीं यत्र सम्प्राप्यते क्षणात् ।
तरंगिणी मधुमती वाणी च कविसेविता ॥ रा०त०प्र०त० श्लो० ३७।

सैतवमुनिरत्रत्य एव यतोऽत्र स्थाने २ सेतवः नदमध्यकनगरत्वात् ये महासेतूपरी निवसन्ति । ते तन्नाम्नैव बोध्यन्ते। "उद्धर्षिणी काश्यपस्येति" सूत्रतोऽपि ज्ञायते । यतः कश्यपेन कश्मीरभूमिर्निवासिता, तन्मतमपि तत्रासीदेव, काव्यरचनाया द्वे एव स्थले दृश्येते कश्मीर–दक्षिणदेशाख्ये । ते तत्रत्या नागा इच्छानुसारिशरीरधारित्वात, राज्यग्रन्थादिशासनरचनादिसमर्था आसन् । अथवा ते शेषनागादीनामवतारत्वात्, नागा इत्युच्यन्तेस्म। केषांचिद्, ईश्वरसृष्टि–शक्तिमविदुषामेतत्कथनं यत्ते नागोपासकत्वान्नागा उच्यन्तेस्मेति ॥

समयश्चैतोऽपि ज्ञातुमतीव दुष्करः । किन्तु व्यासदेवस्याग्निपुराणे नामदर्शनात्ततः प्राचीनः स्पष्ट ज्ञात ॥

यास्कनिरुक्तेऽपि सप्तमे बहूनां छन्दसां निर्वचनानि प्रदर्शितानि तेन कश्चिच्छन्दोग्रन्थस्ततः प्रागभवदेव एष वान्यो वा, नागानां प्रादुर्भावसमये एष ग्रन्थो निरमायि । नागाश्च कश्यपापत्यानि,तदुक्तं महाभारते आदिपर्वणि अ०३५ शेषः प्रथमतो जातो वासुकिस्तदनन्तरम् ॥

ऐरावतस्तक्षकश्च कर्कोटक–धनञ्जयौ ॥ इत्यारभ्य
निष्टानको हेमगुहो नहुषः पिङ्गलस्तथा । इत्यादि—
कश्चिन्मुनिरपि पिंगलोऽभूत, तदुक्तं तत्रैव आदिप० अ ५३ ।
ब्रह्माऽभवच्चात्र गार्ग्यो ऽथाध्वर्युश्चापि पिङ्गलः ॥

परन्तु सर्पयाग एतदुक्तेरयं नैतद्ग्रन्थकर्ताऽस्य नागोपाहृत्वात्। एवं चैतत्सर्गादावस्य निर्मितिरिति सिद्धम् ॥ केचिदत्रेममितिहासमाचक्षते "यद्भूमौ कदाचित्परिभ्रमन्यथेच्छं श्रीपिङ्गलनागो गरुडवशगोऽभूत्। तेनात्तुमाक्रान्तस्तमाह यदस्ति मे सविधे छन्दःशास्त्ररत्नं यन्मयि हते विनङ्क्ष्यति । अतस्तावद्भवानुपसद्य परिगृह्णातु, पश्यतु च मदीयां चातुरीं यन्मयैकधा विन्यस्यते। तद् द्वितीयवारं न लेखिष्यते। तदनन्तरं प्रकामं भवान् भक्षयतु मामहञ्च भवन्तं संसूच्यैव गमिष्यामीति एवं प्रतिपन्ने हरिवाहने सर्वमिदमागमरत्नं नागराजस्तस्मिन्सञ्चारयाञ्चकार। उत्तराम्भोनिधितटाद्दक्षिणपारावारतीरपर्यन्तं समस्तं रसातलं प्रस्तारादिप्रत्ययभेदप्रभेदैः परिपूरयन् पयोधिप्रान्तं प्रयातो "भुजङ्गप्रयातं यः" इति सूत्रमभिधायाऽन्तरं जलधेरियाय, ततो गरुडो जगाद गुरो! किमिदं? तेनाभाषि वत्स! चरम-वचनार्थं विचारयेति तथेति नागारिर्विरराम। इति शब्दकल्पद्रुमे प्राकृतछन्दःशास्त्रप्रथमपद्यटीकात उद्धृतम्।

बहुतिथं कालमेतस्य वेदेषूपयोगो ज्ञानज्ञापनतादिकं चाभूत्। कदाचित्तु दैवी पद्यात्मिकैषा सरस्वती गङ्गेव शिवे वल्मीकजन्मनि मुनौ समवातरत्। नद्यां स्नातुं गच्छतः पथि क्रौञ्चमिथुनादेकं हतवतो व्याधस्य क्रौञ्चीसमाक्रन्दस्य च दर्शनात् शोक एव श्लोकीभूय तन्मुनेर्मुखाद्बहिर्निरगात्। ("शोकः श्लोकत्वमागतः" वा० रा०)

मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥

तत्प्रभृति लोकवेदयोरस्य समुपयोगः समजनि। लोकेऽपि पुराणेतिहासकाव्यादावेतज्ज्ञानमन्तरा छन्दोयतिभङ्गादीनि विविधानि दूषणानि गायने उच्चारणे च भवन्तीति साहित्यशास्त्रतोऽवसेयानि।

तत्संग्रहसंस्कारविस्तारादीनि च बहुभिर्महर्षिभिर्विहितानि भवेयुः। परन्तु ते ग्रन्थास्तत्कृता अद्यश्वो नोपलभ्यन्ते येन तद्विषयेऽपि परिपक्वविवेचनादि विधीयताम्। किन्तु पिङ्गलमुनिसंकलितं छन्दःशास्त्रमेवैकं त्रुटितस्फुटितं पुस्तकं विदुषां मनांसि विरहिणः प्रियवार्तेव समाश्वासयति।

तत्रैव च "सर्वतः सैतवस्य" ५।१८। "सिंहोन्नता काश्यपस्य" ७।६। इत्यादिसूत्रेषु तन्नामानि श्रूयन्ते । अन्यथा तज्ज्ञानमपि बहुसम्भवतायामापद्येतेति ।

अयं च वृत्तरत्नाकरो नाम ग्रन्थः केदारभट्टेन पव्येकात्मजेन संकलित इत्येतदाद्यपद्यत्रयेण प्रतीयते । अत्र च यदेव लक्षणं तदेव लक्ष्यमिति पूर्वेषां ग्रन्थेभ्योऽस्यागतार्थताऽकारि । एष च केदारभट्टेत्युपाधिना दाक्षिणात्य इति भाति । कश्मीरेष्वपि यद्यपि भट्टशब्दान्तानि नामान्युपलभ्यन्ते तथापि दक्षिणदेशादेत्यैव ते तत्र निवासं चक्रुः । अस्य काश्मीरकत्वमपि सयुक्तिकं यतो रामचन्द्रनामा लंकाद्वीपं (सिंहलद्वीपं) गतोऽस्य स्वदेशीयमेणैवात्र व्याख्यां विधाय स्वगुरवे समर्पितवान् ॥

एष च छन्दोमञ्जरीकारगंगादासतः प्रागभूदिति—

व्यवहारोचितं प्रायो मया छन्दोऽत्र कथ्यते ।
प्रस्तारादि पुनर्नोक्तं केवलं कौतुकं हि तत् ॥ ७ ॥

इत्येतत्पद्योक्तेन वृत्तरत्नाकरप्रपञ्चितप्रस्तारादिनिषेधेन ज्ञायते ।

सन्ति यद्यपि भूयांसश्छन्दोग्रन्था मनीषिणाम् ।
तथापि सारमाकृष्य नवकार्थो ममोद्यमः ॥

इति श्लोकतो विशेषाधानहेतोश्च ज्ञायते । यद् बहुशः छन्दोग्रन्थानवलोक्यैषा निर्मितेति । वृत्तरत्नाकरं विहायाऽपर आकरग्रन्थो नावलोक्यते लोके ततश्च समायातमेतत् यदेनं वीक्ष्यैव विरचितेति । गङ्गादासस्तु मुरारिकवितः अर्वाभूगत् इत्येतदुदाहरणेषु मुरारिमिश्रकृतानर्घराघवश्लोकदर्शनतो निर्णीयते । दासान्तनाम्ना चातोवार्वाचीनता प्रतीयते । रामानुजीयवैष्णवमतानुसृतेः । तस्य वैष्णवत्वस्य दृढतरनिश्चयकारकत्वं तु तदीयोदाहरण-श्लोकग्रन्थान्तरैश्च प्रकाश्यते । अन्यच्च म. म. मल्लीनाथीयटीकासु रघुवंशाद्युपरिस्थितासु एतल्लक्षणसत्वात्ततः प्राचीनत्वमपि निर्विवादम् ।

किञ्च "शैवशास्त्रज्ञः-शैवसिद्धान्तवेत्ता" इत्येतस्य पितुर्विशेषणे आद्यन्तपद्ययोर्लभ्येते तेनास्य शैवशास्त्रप्रचारोत्तरत्वं विज्ञायते तत्प्रचारश्च बौद्धह्रास-शंकराचार्य्यमत-मध्येऽभूत् किञ्चास्यैका टीका लंका(सिंहल) द्वीपत उपलब्धा या पराक्रमबाहोर्बौद्धस्य मौर्य्यस्य राज्ञोऽमात्यभूतेन

रामचन्द्रेण महाविपश्चिता विरचिताऽस्ति । अयञ्च रामचन्द्रः पूर्वं श्रौतस्मार्त्तमतीयः कश्मीरदेशीयवीरवटिकानामके अग्रहारे गृहीतजन्मा न्यवसत् । स एव कालान्तरे लंकाद्वीप (सिंहल) गतो राहुलाख्यबौद्धाचार्य्याद् बौद्धधर्मं शिश्रिये इति तद् ग्रन्थतः प्रतीयते तत्परिचयस्तु मुद्रितपङ्क्तिकासनाथपुस्तकभूमिकायां दत्तोऽवलोकनीयः । एवञ्चैतज्ज्ञायते यद्बौद्धैरेव तत्र नीता प्रचलिता बौद्धप्रचारोत्तरन्तु किमपि मतमद्यपर्यन्तन्न तत्र प्रचलितमिति तेन तन्मतह्रासकाल एवास्येति सुस्पष्टम् (२२१३) त्रयोदशाधिकद्वाविंशशतसंवत्सरोत्तरं पाटलीपुत्रपत्तने अभिषिक्तेन धर्माशोकेन स्वजातीया राजकुमारा लंकाद्वीपं प्रेषिताः तेषां वंश एव मौर्य्यत्वेनाख्यातस्तत्राभूत् । यन्मध्ये पराक्रमवाहुस्तत्रत्यजयवर्द्धनाख्ये पुरे तदाऽभिषिक्तोऽभूत् । तेनोपर्युक्तसमयोत्तरमेव तत्रास्य पुस्तकस्य प्रचारोऽभूत् । अशोकराज्यकाल एव बौद्धमतप्रगाढताऽभूत् । इतो बहुकालानन्तरं शिवसूत्राविष्कारोत्तरं शैवागमप्रादुर्भावस्तत्समनन्तरं वृत्तरत्नाकरविरचना समजनि ॥

शिवसूत्राणि शिलायां लिखितानि काश्मीरिकशिवोपलग्रामे नागबोधिबौद्धकाले वसुगुप्ताचार्येण लब्धानि तदुपरि बहुतिथे काले गते अभिनवगुप्तपादाचार्य्येण टीका व्यरचि तदवलम्ब्य क्षेमराजेन शिवसूत्रविमर्शिनी व्याख्या व्यधायीति विमर्शिन्यां स्पष्टम् । अभिनवगुप्तपादाचार्यश्च शङ्करस्वामिसमकाल एव तेन यतः शङ्कराचार्य्यस्य शास्त्रार्थोऽभूत् इति शङ्करदिग्विजये स्पष्टम् । शङ्कराचार्यस्तावत्कलिगतेषु ३८८९ वर्षेषु प्रादुर्बभूवेति विज्ञायते तथाचोक्तं शङ्करमन्दारसौरभे ।

प्रासूत तिष्यशरदामतियातवत्याम् ॥ एकादशाधिकशतोनचतुःसहस्र्याम् ॥
इति अन्यत्रापि निधिनागेशवन्ह्यब्दे विभवे मासि माधवे ॥

तेन ८४५ इति वैक्रमवत्सरलब्धिः । एवं चास्य शंकरस्वामितः अत्यल्पपूर्वं तस्मिन्नेव शतकेऽस्य वृत्तरत्नाकरस्य विरचनकाल इति प्रतीयते । यतोऽस्य शङ्करस्वामिनः कश्मीरगमनात्पुरैव बौद्धमतं निरस्य शाम्भवशाक्तमतप्राबल्यं प्रवृत्तमासीद्यतस्तन्मतीयैरेव कश्मीरेषु तद्विवादोऽभूत् ॥


अत्र बह्वो व्याख्याः सन्ति बालबोधजनकतया लघ्यजन्या

संगमिका नासीत्कापीदृशी टीकेति तदर्थं, किञ्चानया प्रचलितया आर्ष-स्याङ्गस्य मन्दप्रचारताऽजनीति तदाविष्करार्थं च ममायमायासः। यत इमं ग्रन्थं परीक्षाफललिप्सया व्युत्पित्सया वा पठन्तः आर्षग्रन्थमार्गपरिचिताः सन्तस्तदध्ययनेन ऋषिऋणमपनयन्त आर्षपुस्तकपठनफलमपि अल्पाया-सेन व्युत्पद्यमाना लभेरन्निति ॥

अधुनाऽऽशासे यदिमां मामिकां रत्नसंग्रहाख्यां व्याख्यां समुपाश्रयन्तोऽन्तेवा-सिनो मदायासं कृतार्थयिष्यन्तीति। विदुषामग्रे चैषाऽभ्यर्थना मया प्राचीन-तत्त्वविदां कान्यपि पुस्तकानि नावलोकितानितानि, नच काप्यन्या विशेष-सामग्री समुपलब्धा। किन्तु निजमतिमनुसृत्य यत्किंचिदत्र विन्यस्तम्। किञ्च संभवोस्ति यद्ग्रन्थेऽपि बहवोऽशुद्धयो बुद्धिदोषादक्षरयोजक-संशोधक भ्रान्त्यादिभिश्च तिष्ठेयुरिति। ताः करुणया संशोध्य प्रचारयेयुः। मामपि तथा सूचयेयुर्येन द्वितीयस्यामावृत्तौ तथैव सुमुद्रितं भवेदिदमिति यतः॥

चलज्जनानां स्खलनं स्वभावो ब्रह्मादयो यत्र निदर्शनं हि।
किं तत्र दोषो मनुजस्य वाच्यस्तज्ज्ञैः समाधेयमथो हि शोध्यम्॥
श्रीहरिश्शरणं भूयान्निजकारण्यमात्रतः।
अन्यथा का गतिर्मादृक्पापानां नरकोद्धृतेः॥

इति सज्जनविपश्चिदनुचरो रामप्रपन्न शास्त्री।



भूमिका वा प्रशंसापत्रम् ।

रायबहादुर पं० उदयचन्द्र शर्म महोदयानाम् ऐम० ए० उपाधिकानां कश्मीर राज्यान्तर्गत जम्मू (द्विगर्त) प्रदेशीय (गवर्नर) पदवाच्य-राजप्रतिनिधीनाम् ।

JAMMU:
29th May 1918.

I have carefully examined the "Ratna Sangraha" Commentary on the "Vritta Ratnakara" by Pandit Ram Prapanna Shastri, Kavyatirtha. The Commentary is a very great improvement on its predecessors; giving as it does the Sutras by Pingala Muni, and their illustrations from the Vritta Ratnakara in one and the same Metre. In the Commentary itself again the Explanatory notes have been given in the same Metre. The Commentary is a very useful work both for students preparing for University Examinations, and for the General Student of Sanskrit Prosody. The book should, in my opinion, be prescribed as a text book. I wish the author all Success in his undertaking, and trust that Sanskrit Scholars will extend their patronage.

UDAY CHAND,
RAI BAHADUR,
Governor, Jammu Province.

[illegible]

[illegible]

[illegible]

JAMMU :

29*th May* 1918.

I have carefully examined the " Ratna Sangraha " Commentary on the " Vritta Ratnakara " by Pandit Ram Prapanna Shastri, Kavyatirtha. The Commentary is a very great improvement on its predecessors: giving as it does the Sutras by Pingala Muni, and their illustrations from the Vritta Ratnakara in one and the same Metre. In the Commentary itself again the Explanatory notes have been given in the same Metre. The Commentary is a very useful work both for students preparing for University Examinations, and for the General Student of Sanskrit Prosody. The book should, in my opinion, be prescribed as a text book. I wish the author all Success in his undertaking, and trust that Sanskrit Scholars will extend their patronage.

UDAY CHAND.

RAI BAHADUR,

Governor, Jammu Province.

ॐ श्रीगणेशायनमः ।

अथ सटीको वृत्तरत्नाकरः

प्रारभ्यते ।

सन्मानसे प्रकटहंसकिशोरिकान्तां ध्यात्वा सरोवसतिमादिमपिङ्गलर्षिम् ।
चालोच्य प्राक्तनविदां कृतिमत्र शास्त्रे संवृत्तरत्नखनिसंग्रहमातनोमि ॥

ग्रन्थकर्त्रा सप्तमे श्लोके गणलक्षणमात्रमुक्तम् अन्यैश्चाऽत्र देवताफल स्वरूपादीन्यप्येषामुक्तानि तानि च स्पष्टप्रतिपत्तयेऽत्रै(प्रथममे)वोच्यन्ते ।

मो भूमिस्त्रिगुरुः श्रियं दिशति, यो वृद्धिं जलं चादिलो,
रोऽग्निर्मध्यलघुर्विनाशम,ऽनिलो देशाटनं सोऽन्त्यगः ।
तो व्योमान्तलघुर्धनापहरणं, जोऽर्को रुजं मध्यगो,
भश्चन्द्रो यश उज्वलं मुखगुरु,र्नो नाक आयुस्त्रिलः ॥ १ ॥

एषां मित्रादिसंज्ञा अभिहिताः शास्त्रकारैः ।
मनौ मित्रे भयौ भृत्यावुदासीनौ जरौ स्मृतौ ।
तसावरी नीचसंज्ञौ द्वौ द्वावेतौ मनीषिभिः ॥ २ ॥

संख्या	गणनाम	रूपम्	देवता	फलम्	मित्रादि	शुभाऽशुभम्
१	मगणः	ऽऽऽ	मही	लक्ष्मीः	मित्रम्	शुभम्
२	नगणः	।।।	स्वर्गः	बुद्धिः	मित्रम्	शुभम्
३	भगणः	ऽ।।	शशी	यशः	दासः	शुभम्
४	यगणः	।ऽऽ	जलम्	आयुर्वृद्धी	दासः	शुभम्
५	जगणः	।ऽ।	रविः	रुक्	उदासः	अशुभम्
६	रगणः	ऽ।ऽ	अग्निः	दाहः	उदासः	अशुभम्
७	सगणः	।।ऽ	वायुः	विदेशः	शत्रुः	अशुभम्
८	तगणः	ऽऽ।	नभः	शून्यम्	शत्रुः	अशुभम्

एतेषामाद्यद्वितीययोः सन्निवेशे फलमुक्तमाकरे ।

मित्रान्मित्रं वितनुते प्रचुरधनम्,ऽथो मित्रतो भृत्यसंज्ञः ।
स्थैर्य्यं, मित्रादुदासो न किमपि च फलं, मित्रतः शत्रुसंज्ञः ॥
बन्धोः पीडाम्,ऽथो स्याद् यदि खलु नियतं भृत्यतो मित्रसंज्ञः ।
सर्वं कार्यं च, भृत्याद् भृतगण इह चेदायातिं सर्वलोके ॥ ३ ॥
भृत्याच्चेत्स्यादुदासो धनविगमम्,ऽथो भृत्यतः शत्रुसंज्ञः ।
शोकं कुर्य्यादुदासात् यदि भवति तदा मित्रसंज्ञोऽल्पकार्य्यम् ॥
तस्माद्भृत्यः प्रभुत्वं, तत इह सततं स्यादुदासो विनाशम् ।
तस्माच्छत्रुः स्ववैरं विविधसुखहरं सर्वसत्कारनाशम् ॥ ४ ॥
शत्रोर्मित्रञ्च शून्यं, यदि भवति ततो भृत्यसंज्ञो गृहिण्या ।
नाशं, तस्मादुदासो धनहरमधिकं दुःखदारिद्र्यशोकम् ॥
शत्रोः शत्रुर्भवच्चेदिह खलु नितरां नायकस्यैव नाशं ।
देशोद्वासं विधत्ते, कथयति च फलं पिङ्गलो नागराजः ॥ ५ ॥

मित्रान्मित्रादौ फलम्					भृत्यान्मित्रादौ फलम्				
मनाभ्यां SSS-|||	मनयोः SSS-|||	मित्रात्	मित्रे	प्रचुरधनम्	भयाभ्यां S||-|SS	मनयाः SSS-|||	भृत्यात्	मित्रे	सर्वकार्य सिद्धिः
SSS |||	भययोः S||-|SS	मित्रात्	भृत्ये	स्थैर्य्यम्	S||-|SS	भययोः S||-|SS	भृत्यात्	भृत्ये	सार्वलौकिकौत्तरकालिकशुभम्
SSS-|||	जरयोः |S|-S|S	मित्रात्	उदासे	शून्यम्	S||-|SS	जरयोः |S|-S|S	भृत्यात्	उदासे	धननाशः
SSS-|||	सतयोः ||S-SS|	मित्रात्	शत्रौ	बन्धुपीडा	S||-|SS	सतयोः ||S-SS|	भृत्यात्	शत्रौ	शोकः

उदासान्मित्रादौ फलम् ।					शत्रोर्मित्रादौ फलम् ।				
जराभ्यां |S|-S|S	मनयोः SSS-|||	उदासात्	मित्रे	अल्पकार्यम्	सताभ्यां ||S-SS|	मनयोः SSS-|||	शत्रोः	मित्रे	शून्यम्
|S|-S|S	भययोः S||-|SS	उदासात्	भृत्ये	प्रभुत्वम्	||S-SS|	भयदोः S||-|SS	शत्रोः	भृत्ये	स्त्रीनाशः
|S|-S|S	जरयोः |S|-S|S	उदासात्	उदासे	विनाशः	||S-SS|	जरयोः |S|-S|S	शत्रोः	उदासे	धनहरण दुःखदारिद्र्यशोकाः
|S|-S|S	सतयोः ||S-SS|	उदासात्	शत्रौ	स्ववैरावविधसुखसत्कारनाशः	||S-SS|	सतयोः ||S-SS|	शत्रोः	शत्रौ	नायकनाशः देशोद्वासः

गद्यप्रसङ्गेनाऽक्षरशुद्धिरप्यभिधीयते "अक्षरे परिशुद्धे तु ।
नायको भूतिमृच्छति" इत्युक्तेरक्षरशुद्धेरावश्यकत्वात् ॥

अवर्णात् सम्पत्तिर्भवति, च मुदिवर्णाद्धनशता-
न्युवर्णाद्ध्यातिः, सरमसमृवर्णाद्व वराहितात् ॥
तथाह्येवः सौख्यं, ङञणरहिताद्क्षरगणात् ।
पदादौ विन्यासाद् भरवहलपूर्वैर्विरहितात् ॥ ६ ॥ इति भामहः

भरवहलास्तत्पूर्वाणि यान्यक्षराणि तैर्विरहितादित्यर्थः ।
हलवर्णानां फलान्युक्तान्याकरे ॥

कः खो गो घश्च लक्ष्मीं वितरति, वियशो ङस्तथा चः, सुखं छः ।
प्रीतिं, जो मित्रलाभं, भयमरणकरौ झञौ, ट्ठौ खेददुःखे ॥
डः शोभां, ढो विशोभां, भ्रमणमथच णस्तस्तु खं थस्तु युद्धम् ॥
दो,धः सौख्यं, मुदं नः, सुखभयमरणक्लेशदुःखं पवर्गः ॥ ७ ॥
यो लक्ष्मीं, रस्तु दाहं, व्यसनमथ लवौ, शः सुखं, षस्तु खेदं ।
सः सौख्यं, हस्तु खेदं, विलयमपि च ळः, क्षः समृद्धिं करोति ।
संयुक्तं चेह न स्यात् सुखमरणफलं वर्णविन्यासयोगः ।
पद्यादौ, गद्यवक्त्रे, वचसि च सकले, प्राकृतादौ समोऽयम् ॥ ८ ॥

इति भामहः ॥ एतेषां फलाफलनिरूपणमप्याकरे ।

नायको वर्ण्यते यत्र फलं तस्य समादिशेत् ।
अन्यथा तु कृते काव्ये कवेर्दोषावहं फलम् ॥ ९ ॥

तस्य प्रतिप्रसवोऽप्युक्तः ॥

देवता वर्ण्यते यत्र क्वापि काव्ये कवीश्वरैः ।
मित्राऽमित्रविचारो वा न तत्र फलकल्पना ॥ १० ॥
देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥ ११ ॥

अथ मूलम् ।

सुखसन्तानसिद्ध्यर्थं नत्वा ब्रह्माच्युतार्चितम् ।
गौरीविनायकोपेतं शङ्करं लोकशंकरम् ॥ १ ॥

प्रारिप्सितपरिसमाप्त्यर्थं कृतं मङ्गलं शिष्यशिक्षार्थं निबध्नाति, सुखेति–ब्रह्मा च अच्युतश्च ताभ्यां विधात्रा विष्णुना च अर्चितं पूजितम् ॥ अपरे तु अकारं प्रश्लिष्य अविद्यमानौ ब्रह्माच्युतौ येषु ते देवदानवमनुजादयः अब्रह्माच्युतास्तैरार्चितः स तम् अब्रह्माच्युतार्चितं तयोर्गुरुत्वात् तद्भिन्नसकललोकार्चितमित्यर्थः इति व्याचक्षते । गौरी पार्वती विनायको गणेशस्ताभ्याम् उपेतं युक्तं लोकानां जगतां शं सुखं करोतीति ताद्दशम् शंकरं शिवं सुखमात्यन्तिकम् मोक्षलक्षणं सन्तानः पुत्रपौत्रादिः सिद्धयोऽणि-मादयस्तदर्थं नत्वा तेन केदारेणेदं वृत्तरत्नाकरं नाम छन्दः क्रियते इति तृतीयेनान्वयः॥१॥

वेदार्थशैवशास्त्रज्ञः पव्येकोऽभूद्द्विजोत्तमः ॥
तस्य पुत्रोऽस्ति केदारः शिवपादार्चने रतः ॥ २ ॥

वेदेति वेदार्थश्च शैवशास्त्राणि रुद्रयामलादीनि च तेषां(जानातीति)ज्ञः वेदार्थशैवशास्त्रज्ञः (आतोऽनुपसर्गे कः) एवंविधः पव्येको नाम द्विजोत्तमो ब्राह्मणश्रेष्ठोऽभूज्जातस्तस्य पुत्रः शिवपादार्चने शिवस्य ईश्वरस्य पादौ शिवपादौ तयोरर्चनं पूजनं तस्मिन् रत आसक्तः केदारोऽस्ति। अत्र द्विजोत्तमग्रहणेनास्य ग्रन्थस्य श्रवणे ब्राह्मणकर्तृत्वेन दोषाभावःसूचितः॥२

तेनेदं क्रियते छन्दो लक्ष्यलक्षणसंयुतम् ।
वृत्तरत्नाकरं नाम बालानां सुखबुद्धये ॥ ३ ॥

तेनेति तेन प्रकृतेन केदारेण लक्ष्यमुदाहरणमेव लक्षणं छन्दोनियमस्तेन संयुतं वृत्तानि श्रीप्रभृतीन्येव रत्नानि तेषामाकरः खनिः समूहो यत्र तत् वृत्त-रत्नाकरं नाम छन्दः छन्दोग्रन्थ इत्यर्थः यथा महाभाष्ये "सूत्रं व्याकरण"मिति । बालानामधीतशब्दशास्त्राणामनधीतछन्दःशास्त्राणां सुखबुद्ध्ये सुखेनाऽनायासेनावबोधाय क्रियते निर्मीयते । लक्ष्येत्यादिना केवललक्ष्येभ्यः काव्यादिभ्यः केवललक्षणेभ्यः सूत्रादिभ्यः पृथग्लक्ष्यलक्षणेभ्यः सूत्रवृत्तिग्रन्थेभ्यश्चास्याऽगतार्थता सूचिता । अत एवाह बालानामित्यादि । एतेनानुबन्धचतुष्टयमप्युक्तम् ॥ ३ ॥ त्रिभिर्विशेषकम् ॥

पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा ।
मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते ॥ ४ ॥

पिङ्गलेति यत्पिङ्गलादिभिः पिङ्गलः एतच्छास्त्रसूत्रकर्ता आदिपदेन भाष्यकारादयस्तैः आचार्यैर्लौकिकं लोके भवं न पुनर्वैदिकं काव्यादिष्वनुपयोगात् एतेन वैदिकनिरास-स्तैस्तस्याप्युक्तेः । मात्रावर्णविभेदेन इदं मात्राछन्द इदं वर्णछन्द इति विशेषेण द्विधा द्विप्रकारम् उक्तं तच्छन्द इहास्मिन्ग्रन्थे कथ्यते इत्यभिधेयमुक्तमत्र ॥ ४ ॥

षडध्यायनिबद्धस्य छन्दसोऽस्य परिस्फुटम्।
प्रमाणमपि विज्ञेयं षट्त्रिंशदधिकं शतम् ॥ ५ ॥

षडिति षट् च तेऽध्यायाः षडध्यायास्तैर्निबद्धं तत् तस्य अस्य छन्दसः छन्दोग्रन्थस्य प्रमाणं मानं परिच्छेदः इति यावत् अपि षट्त्रिंशत्संख्ययाधिकं शतं परिस्फुटं परि समन्तात्प्रकटं विज्ञेयं ज्ञातव्यम्। द्वात्रिंशद् (३२) वर्णात्मकानुष्टुप्छन्दसां श्लोकानां षट्त्रिंशदधिकं शतं (१३६) प्रमाणमत्र बोध्यम् लोके तस्यैव ग्रन्थगणनायां प्रसिद्धेः ॥ ५ ॥

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥ ६ ॥

म्येति समस्तं वाङ्मयं वाग्रूपं शास्त्रं म्यरस्तजभ्नगैः-मगण-यगण-रगण-सगण-तगण-जगण-भगण-नगण-गुरुभिर्लान्तैर्लघुयुक्तैः एभिः दशभिरक्षरैर्गणाष्टकघटकैः संज्ञारूपैः वर्णैः त्रैलोक्यं त्रिभुवनं विष्णुना नारायणेनेव व्याप्तम् ॥ ६ ॥

अथ पिङ्गलमुनिसूत्राणि क्रमेण मगणादिज्ञानाय लिख्यन्ते।

"धीश्रीस्त्री म्" १।१ "वरासा य्" १।२ "कागुहा र्" १।३
ऽऽऽ ।ऽऽ ऽ।ऽ

"वसुधा स्" १।४ "सातेक त्" १।५ "कदास ज्" १।६ "किंवद भ्"
।।ऽ ऽऽ। ।ऽऽ ऽ।।

१।७ "नहस न्" १।८ "ग्" ल्" १।९
।।। ।

इदानीं गणाष्टकलक्षणान्याह मूल ग्रन्थकारः—

तथाच

+ सर्वगुर्मो मुखान्तलौ यरावन्तगलौ सतौ।
गमध्याद्यौ ज्भौ त्रिलो नोऽष्टौ भवन्त्यत्र गणास्त्रिकाः ॥ ७ ॥

सर्वेति सर्वे त्रयः गवो गुरवो यत्र स सर्वगुः मः मगणः। नामैकदेशे नामग्रहणमिति न्यायेन गुशब्दो गुरुवाची, लो लघुवाची एवं गलौ। चिटिनत्वसङ्केतेन वा बोधः एवं सर्वत्र। मुखे आदौ अन्तमध्ये च लो लघुर्ययोस्तौ मुखान्तलौ यरौ यगण-रगणौ आदिलघुर्यगणः

---

१ (टि०) ईदृशगुरुलघुवर्णत्रिकायाम्—यकारादयः संज्ञा बोद्धव्या इत्यर्थः यथा 'धीश्रीस्त्री' इति गुरुवर्णत्रयस्य मगण इति संज्ञा। 'वरासा' इत्यादि लघु-त्रिकस्य यगण इत्येवं सर्वत्र ज्ञेयं। २ 'ग्' इत्येतादृशस्य वर्णस्य ल् (लघु) संज्ञेति च दिक्।

मध्यलघुः रगण इत्यर्थः । अन्ते अवसाने गुरुर्लघुश्च ययोस्तौ अन्तगलौ सतौ सगण–तगणौ अन्तगुरुः सगणः अन्तलघुस्तगण इत्यर्थः । गुरुर्मध्य आद्यश्च ययोस्तौ मध्याद्यौ ज्भौ जगण-भगणौ मध्यगुरुर्जगणः आदिगुरुर्भगणः । त्रयो ला लघवो यत्र सः त्रिलो नः नगणः एवम् अत्र अस्मिन्छन्दसि त्रिकास्त्र्यवयवा अष्टौ गणा भवन्ति मात्रावर्णान्यतरसमूहो गणः । यथा—

मगणः	यगणः	रगणः	सगणः	तगणः	जगणः	भगणः	नगणः	{ गुरुः	लघुः
SSS	ISS	SIS	IIS	SSI	ISI	SII	III	S	I

लः समुद्राः गणः ॥ गौ गन्तमध्यादिल्श्च

ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः ।
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः ॥ ८ ॥

ज्ञेया इति चतुष्कलाः चतुर्मात्राः चतुर्लघूपेताः पञ्चमो गणश्चतुर्लघुः चत्वारो लघवो यस्मिन् स तेनोपेताः युक्ताः सर्वान्तमध्यादिगुरवः सर्वश्च मध्यश्च अन्तश्च आदिश्च ते गुरवो येषु ते अत्र "द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते" इति न्यायेन गुरुशब्दस्य प्रत्येकं संबन्धः । आर्यादिषु मात्रावृत्तेषु संस्थिताः पञ्च गणाः ज्ञेयाः बोध्याः ॥ ८ ॥ गौ गन्तमध्यादि ल्श्च" "लःसमुद्रा गणः" ४।१२ ४।१३ इति पिङ्गलमुनिः ।

सर्वगुरुः	अन्तगुरुः	मध्यगुरुः	आदिगुरुः	चतुर्लघुः
SS	IIS	ISI	SII	IIII

गन्ते १।१ आदिपरः १।११ हे १।१२

+ सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः ॥
वा पदान्ते त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रिको लृजुः ॥ ९ ॥

(टि) १. लः मात्राः समुद्राः चत्वारः गण इत्युच्यते मात्रावृत्तेष्विति ज्ञेयम् । तद्विन्यासमाह गावित्यादि गौ गुरुद्वयमेको गणः । गन्तो गुर्वन्तो द्वितीयः । मध्यगुरुस्तृतीयः । आदिगुरुश्चतुर्थः । लः सर्वे (चत्वारः) पञ्चमः । २ "ल्"—इत्यनुवर्त्य पदान्ते लघुः ग् गुरुर्भवतीति तदर्थः । ध्रू इति व्यञ्जनसंयोगोपलक्षणं ध्रू आदिर्येषां ते ध्रादयः । आदिपदेन विसर्जनीयानुस्वारजिह्वामूलीयोपध्मानीयानां ग्रहणं ते परे यस्मात् स आदिपरः लघुः गुरुर्भवतीत्यर्थः । हे इतीदृशो द्विमात्रश्च गुरुरित्यर्थः ।

इति सानुस्वारः सह अनुस्वारेण वर्तत इति सानुस्वारः विसर्गान्तः विसर्गः अन्ते यस्य सः । दीर्घः द्विमात्रः युक्तपरः युक्तं संयुक्ताक्षरं परं यस्मात् स युक्त परः संयोगे परभूते यः पूर्व इति यावत् एतादृशो वर्णः 'ग्' गुरुर्भवति । व्यञ्जन-जिह्वामूलीयोपध्मानीयानामप्युपलक्षणमिदम् तेन तदन्तोपि गुरुर्भवति । लघुश्च वा विकल्पेन पदान्ते गुरुर्भवति । तदुक्तं पिङ्गलमुनिना "गन्ते" १।१० ॥ असौ (ग्) गुरुस्तु पुनः प्रस्तारे वक्रः कुटिलरेखाकारः ज्ञेयः अन्यः अस्माद्विपरीतो ल् लघुः (एक) मात्रिकः ज्ञेयः । तदुक्तं पैङ्गले "गृ लृ" इति । स च प्रस्तारे ऋजुः सरलरेखाकारो ज्ञेयः बोध्यः । अत्र पिङ्गलमुनिः गन्ते-घ्रादिपरः-हे—॥ ९ ॥

गुरुः—लघुः—
(ऽ) (।)

अस्य प्रतिप्रसवमाह

प्रह्वेवा ॥ पि० सू०

पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः ।
पुरःस्थितेन तेन स्याल्लघुतापि क्वचिद्गुरोः ॥ १० ॥

पादादाविति इह छन्दःशास्त्रे पादादौ वर्णस्य संयोगः वर्णान्तरेणेति भावः क्रमसंज्ञकः आचार्यैरुक्त इति शेषः तेन पादादिस्थवर्णसंयोगेन पुरःस्थितेन अग्रेभवेन क्वचिद् इष्टस्थले गुरोरपि लघुता स्यात् । "वा पदान्ते" इत्यत्र "गन्ते" इति मुनिसूत्रे "गृ लृ" इत्यतो-ऽनुवृत्तिवशानुसारेण लघोर्गुरुत्वं पादान्ते भवतीत्युक्तम् । इह तु गुरोर्लघुत्वमिति न पौनरुक्त्यम् "प्रह्वे वेति" पिङ्गलमुनिः इदञ्च प्रायः संयोगमात्रस्योपलक्षणमिति व्याचक्षते विद्वांसः तेन प्रह्ववर्णोपलक्षितसंयोगमात्रे परे पूर्वस्य वा गुरुत्वमिति विकल्पः इष्टस्थले सिद्ध्यति ॥ १० ॥

यदा तीव्रप्रयत्नेन संयोगादेरगौरवम् ॥
नच्छन्दोभङ्ग इत्याहुस्तदा दोषाय सूरयः ॥ इति मञ्जर्याम् ।

इदमस्योदाहरणम्—

तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥ ११ ॥

क्रमस्योदाहरणं दर्शयति—तरुणमिति हे सुन्दरि ! ग्राम्यजनः तरुणमभिनवं सर्षपशाकं तरुणमास पिच्छिलानि तैलयुक्तानि दधीनि नेत्येवम् अल्पव्ययेन स्तोक

द्रव्यविगमेन मिष्टं मधुरमश्नाति भुङ्क्ते। अत्रार्यायां "आ" इत्येतस्मिन् पादादिस्थिते सुन्दरीत्यत्रत्यरीवर्णस्य युक्तपरत्वात् यदि गुरुत्वं क्रियते तदा पंचमात्रस्तृतीयो गणो भवति। चतुर्मात्रास्तु गणाः आर्यायाः कर्तव्याः तस्माच्छन्दःशुद्धिकरणाय क्वचिद्गुरोरपि लघुत्वं भवतीति प्रतिज्ञातम् ॥ ११ ॥

अथ संख्यादिसंज्ञामाह—

अष्टौ वसवः १।१५ पादश्चतुर्भागः ४।१० यथावृत्तसमाप्तिर्वा ४।११ यतिर्विच्छेदः ६।१।

अब्धिभूतरसादीनां ज्ञेया संज्ञाऽत्र लोकतः।
ज्ञेयः पादश्चतुर्थोंऽशो यतिर्विच्छेदसंज्ञिका ॥ १२ ॥

अब्धयः समुद्राश्चत्वारः (४) भूतानि पञ्च महाभूतानि (५) रसाः षट् (६) आदिशब्दग्रहणेन अश्वाः पर्वताः मुनयश्च सप्त (७)। वसवश्च अष्टौ (८) ग्रहाः रन्ध्राणि च नव (९) दिशो दश (१०) रुद्राः एकादश (११) सर्पाः द्वादश (१२) विश्वेदेवाः त्रयोदश (१३) भुवनानि चतुर्दश (१४) इत्यादयो गृह्यन्ते। एतेषां संज्ञा (जातावेकवचनं) लोकतः लोकाः शास्त्रान्तराणि अथवा लोक्यते ज्ञायते शब्दार्थनिबन्धोऽस्मिन्निति लोकः व्यवहारस्तत इत्यर्थः ज्ञेया अवगन्तव्या।"अष्टौ वसव इति" १।१५एतच्चोपर्युक्तस्योपलक्षणं ज्ञेयम्।चतुर्थः अंशः पद्यस्य पादो ज्ञेयः 'पादश्चतुर्भागः' 'यथावृत्तसमाप्तिर्वा'४।१०इति तु पिङ्गलमुनिः। यतिः विरतिश्च विच्छेदसंज्ञिका ज्ञेया ॥

यतिर्जिह्वेष्टविश्रामस्थानं सद्भिर्निगद्यते।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया ॥ १ ॥
क्वचिच्छन्दस्यास्ते यतिरभिहिता पूर्वकृतिभिः
पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च ॥
पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां
यथा कृष्णः पुष्यात्त्वतुलमहिमा मां करुणया ॥ २ ॥ इति गङ्गादासः

(टि०)१ एतच्चाष्टकसंख्यासंज्ञोपलक्षणम्।२ चतुर्भागः चतुर्थोंश इत्यर्थः एतत्समेषु,अन्ये-ष्वाह यथेति यस्य वृत्तस्य यादृशैः पादैर्न्यूनाधरैरधिकाक्षरैर्वा वृत्तं समाप्यते तस्य तस्य तादृशा एव पादा गृहीतव्या इत्यर्थः ॥ विच्छेदस्य जिह्वाविरामस्य यतिरिति संज्ञा ज्ञेया॥

श्वेतमाण्डव्यमुख्यास्तु नेच्छन्ति मुनयो यतिम् ॥

इत्याह भट्टः स्वग्रन्थे गुरुर्मे पुरुषोत्तमः ॥ ३ ॥

इति च मञ्जरीकारः तत्र च बहुमहाकव्युदाहरणैर्मण्डितमेतत् 'यतिर्विच्छेदः' ६।१ इति पिङ्गलसूत्रम् ॥ १२ ॥

वृत्तम् ५।१ सममर्द्धसमं विषमं च ५।२

युक्समं विषमं चायुक्स्थानं सद्भिर्निगद्यते।
सममर्द्धसमं वृत्तं विषमं च तथा परम् ॥ १३ ॥

युगिति सद्भिः विद्वद्भिः समं स्थानं द्वितीय–चतुर्थादि युक् निगद्यते विषमं स्थानं प्रथम–तृतीयादि च अयुक् निगद्यते। येन अनोज–युग्मादि समस्य संज्ञा ओजा–ऽयुग्मादि च विषमस्येति ज्ञेयम्। तथा समम् अर्धसमं तथा परम् अन्यत् विषममित्येवं त्रिविधं वृत्तं ज्ञेयम्। अत्र "वृत्तम्" ५।१ इत्यधिकृत्याऽऽशास्त्रसमाप्ति,–"सममर्धसमं विषमं च" ५।२ इति पि० सू० ॥१३॥

एतत्त्रयं लक्षयति—

अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः।
तच्छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥ १४ ॥

यस्येति यस्य वृत्तस्य चत्वारोऽङ्घ्रयः पादास्तुल्यलक्षणलक्षिताः तुल्येन समानेन एकेनेति यावत् लक्षणेन लक्षिता भवन्ति। तद् वृत्तं छन्दःशास्त्रतत्त्वज्ञाःएतच्छास्त्रपरमार्थवेत्तारः समं प्रचक्षते वदन्ति यथा श्रयादि ॥ १४ ॥

प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत्।
द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते ॥ १५ ॥

प्रथमेति यस्य वृत्तस्य तृतीयः चरणः पादः प्रथमेन अङ्घ्रिणा पादेन समो भवेत्। द्वितीयः पादश्च चतुर्थपादवत् स्यात् तद्वृत्तम् अर्धसमम् उच्यते यथा द्रुतमध्यादि॥१५॥

यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम्।
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥ १६ ॥

यस्येति यस्य पादचतुष्टयेऽपि परस्परं लक्ष्म लक्षणं भिन्नं भेदयुक्तम् भवति छन्दःशास्त्रविशारदाः तद्विद्वांसः तद् वृत्तं विषमम् आहुः कथयन्ति। यथा पदचतुरूर्ध्वादि॥१६॥

आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्धितैः।
पृथक्छन्दो भवेत्पादैर्यावत् षड्विंशतिं गतम्॥ १७॥

आरभ्येति एकाक्षरात्पादादारभ्य आदौ कृत्वैकैकाक्षरेण वर्धितैः वृद्धिं प्रापितैः पादैरित्थंभूतैः षड्विंशतिं यावत् (२६) गतं प्राप्तं यावत्पर्यन्तं तत्प्राप्तिः भवति तावत् पर्यन्तं पृथक्पृथक्छन्दो भवेत्। तथाच प्रथमजातावुक्तायां चत्वारोऽप्येकाक्षराः पादा भवन्ति। अत्युक्ताजातौ चत्वारोऽपि द्व्यक्षराः पादाः भवन्ति। इत्थं षड्विंशतिं यावत् यथा—अपवाह्याख्यवृत्तस्य चत्वारोऽपि पादाः षड्विंशतिवर्णप्रमाणा भवन्ति॥ १७॥

तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः।
शेषं गाथा त्रिभिः षड्भिश्चरणैश्चोपलक्षिता॥ १८॥

तदिति तस्याः षड्विंशत्यक्षरजातेरूर्ध्वं यावत्पादाक्षराणि स्युः ते चण्डवृष्टिरादिर्येषां ते च ते दण्डकाश्च चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः कथिताः। यत् शेषं उक्तान्यच्छन्दः सा गाथा उक्ता। सा च त्रिभिः षड्भिश्च चरणैः पादैरुपलक्षिता बोधिता युक्ता वा भवति॥ १८॥

उद्दिशति—

उक्ताऽत्युक्ता तथा मध्या प्रतिष्ठाऽन्या सुपूर्विका।
गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च॥ १९॥

इदानीं छन्दोजातेरुद्देशमाह उक्तेति उक्ता १ अत्युक्ता २ मध्या ३ प्रतिष्ठा ४ अन्या सुपूर्विका सुप्रतिष्ठा इत्यर्थः ५ गायत्री ६ उष्णिक् ७ अनुष्टुप् ८ बृहती ९ पङ्क्तिः १० इत्युक्ता इति द्वाविंशेनान्वयः उत्तरत्राप्येवम्॥ १९॥

त्रिष्टुप् च जगती चैव तथाऽतिजगती मता।
शक्करी साऽतिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते॥ २०॥

त्रिष्टुबिति त्रिष्टुप् ११ जगती १२ अतिजगती १३ शक्करी १४ सा शक्करी अतिपूर्वा स्याद् अतिशक्करी इत्यर्थः १५ ततोऽष्टिः १६ अत्यष्टिः १७ च स्मृते॥ २०॥

धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः।
विकृतिः संकृतिश्चापि तथाभिकृतिरुत्कृतिः॥ २१॥

(टि०) १ नाममात्रेण वस्तुसंकीर्तनमुद्देशः। २ भूपणपार्श्वमावास 'सम्परीति' मुद्र।

धृतिश्चेति धृतिः १८ अतिधृतिः १९ कृतिः २० प्रकृतिः २१ आकृतिः २२ विकृतिः २३ संकृतिः २४ अभिकृतिः २५ उत्कृतिः २६ ॥ २१ ॥

इत्युक्ताश्छन्दसां संज्ञाः क्रमशो वच्मि साम्प्रतम् ।
लक्षणं सर्ववृत्तानां मात्रावृत्तानुपूर्वकम् ॥ २२ ॥

इति भट्टकेदारविरचितवृत्तरत्नाकरे प्रथमोऽध्यायः ॥ १ ॥

इतीति इति अमुना प्रकारेण छन्दसां संज्ञा जात्याख्याः क्रमशः क्रमेण उक्ताः । सांप्रतं सर्ववृत्तानां श्रीप्रभृतीनां मात्रावृत्तान्यार्यादीनि अनुगतानि क्रमप्राप्तानि पूर्वं प्रथमं यस्मिल्लक्षणे तन्मात्रावृत्तानुपूर्वकं लक्षणं (जातावेकवचनं) लक्षणानीत्यर्थः वच्मि वादिष्यामीत्यर्थः । वर्तमानसमीपे भविष्यति लट् ॥ २२ ॥ इति वृत्तरत्नाकराख्यछन्दःशास्त्रस्य संग्रहटीकायां प्रथमोऽध्यायः ॥ १ ॥

अथार्याप्रकरणम् ।

लक्ष्मैतत्सप्तगणा गोपेता भवति नेह विषमे जः ।
षष्ठोऽयं नलघू वा प्रथमेऽर्धे नियतमार्यायाः ॥ १ ॥

षष्ठे द्वितीयलात्परके न्ले मुखलाच्च सयतिपदनियमः ।
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥ २ ॥

त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याम् ।
पथ्येति नाम तस्याश्छन्दोविद्भिः समाख्यातम् ॥ ३ ॥

संलङ्घ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः ।
यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति ॥ ४ ॥

उभयार्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः ।
चपलेति नाम तस्याः प्रकीर्तितं नागराजेन ॥ ५ ॥

आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ।
शेषे पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना ॥ ६ ॥

प्राक्प्रतिपादितमर्धे प्रथमे प्रथमेतरे तु चपलायाः ।
लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ॥ ७ ॥

"स्वरा अर्धं चार्यार्द्धम्" ४।१४ "अत्रायुङ् न ज्" ४।१५ "षष्ठो ज्" ४।१६ "न्लौ वा" ४।१७ इति चात्र पिङ्गलपादसूत्राणि ॥४॥

अत्रैव समन्वयो यथा—

१ २ ३ ४ ५ ६ज० ७ गु०
– ऽ ऽ–ऽ ऽ– । । ऽ– ऽ ऽ–ऽ । ।–। ऽ ।– । । ऽ– ऽ
लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः।
१ २ ३ ४ ५ ७ गु०
–ऽ ऽ–ऽ । ।–ऽ ऽ– । । ऽ–ऽ । ।-।–ऽ ऽ–ऽ–
षष्ठोऽयं नलघू वा प्रथमेऽर्धे नियतमार्यायाः ॥ १ ॥

साम्प्रतमार्यालक्षणमाह ॥ आर्यायाः प्रथमेऽर्धे एतल्लक्ष्म लक्षणं नियतं निश्चितं वर्तते। एतत्किं सप्त गणाश्चतुर्मात्रा गोपेताः गेन गुरुणोपेता युक्ता भवन्ति। इहाऽस्यामार्यायां विषमे स्थाने प्रथम-तृतीय-पञ्चम-सप्तम-गणरूपे जो जगणो मध्यगुरुः न भवति षष्ठश्चाऽयं जगणो भवति। अथवा नलघू नः त्रिलघुर्नगणश्च (।।।) लघु श्चेति द्वन्द्वे चतुर्लघुरित्यर्थः। नलघु इति पाठे समाहार द्वन्द्वः। नलघुर्वा इति पाठे न सहितो लघुरिति मध्यमलोपी बोध्यः, भवति। इत्यार्यायाः प्रथमदले निश्चितं लक्षणं भवति।

शिष्येण पृष्टं क्वचिदार्यायाः पदनियमोऽस्ति ? गुरुराह।

"न्लौ चेत्पादं द्वितीयादि" ४।१८ "सप्तमः प्रथमादि" ४।१९ "अन्त्ये पञ्चमः" ४।२० "षष्ठश्च ल्" ४।२१ इति चात्र पिं० सू०

(टि०)१ स्वराः सप्त 'गणा' इत्यनुवृत्य वचनं विपरिणाम्य सप्त गणा अर्द्धं च गणस्य मात्राद्वयात्मकं (गुरुरूपम्) आर्यार्द्धं प्रथमं स्यात् ॥ अत्र च अयुक् प्रथमतृतीयादिः गणः ज् जगणो न स्यात् षष्ठश्च ज् जगणः स्यात् यद्वा न्लौ नगणो लघुश्च स्याताम् इत्यर्थकानि॥२॥ न्लौ चेत् यदि षष्ठो गणश्चतुर्लघुरूपो भवति तदा द्वितीयादि द्वितीयाक्षरादारभ्य पदं प्रवर्तते ॥ सप्तमश्चेत् नलघुरूपस्तदा तस्य (सप्तमस्यैव) प्रथमाक्षरादारभ्य पदं प्रवर्तते ॥ अन्त्ये आर्योत्तरार्द्धे पञ्चमश्चेत् सर्वलघुः स्यात् तदापि तस्य (पञ्चमस्य) प्रथमाक्षरतः पदं प्रवर्तते। अन्त्येऽर्द्धे षष्ठः यत्किञ्चित्षष्ठस्थानिकः लः लघुरेक एव स्यात्॥ इति क्रमेणैषामर्थः ॥

समन्वयः

१ २ ३ ४ ५ ६ ७ गु०

–ऽ ऽ– । ऽ।–ऽ ?। ऽ ऽ–।।ऽ–। ।। ।–।।। ।–ऽ–

षष्ठे द्वितीयलात्परकेऽन्ले मुखलाच्च सयतिपदनियमः।

१ २ ३ ४ ५ ल०७ गु०

–।।ऽ–ऽ ऽ–। । ऽ–ऽ ऽ–। ।।।–।–ऽ ऽ– ऽ

चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः॥ २॥

षष्ठे न्ले सति मुखलात्पूर्वं सयति० चरमेऽर्द्धे पञ्चमकेन्ले सति तस्मात् पञ्च ात् पूर्वं सयति० इहोत्तरार्द्धे षष्ठो लो (मात्रारूपो) भवतीत्यन्वयः। षष्ठे इति षष्ठे स्थाने न्ले नलघुरूपे चतुर्लघुके (।।।।) गणे कृते सति द्वितीयलात् तस्यैव षष्ठस्य चतुर्लघुरूपस्य गणस्य द्वितीयलघोः पूर्वमिति शेषः (दिग्योगलचणपञ्चमीवशेन इष्टानुरोधात्) प्रथमकध्वन्ते सयतिपदनियमः यतिसहितस्य पदस्य सुप्तिङन्त रूपस्य नियमो नियमनं निरोधः समाप्तिरिति यावत् कर्तव्य इति शेषः। परके प्रत्यासत्त्या षष्ठापेक्षया परस्मिन् सप्तमे न्ले (–।।।।) गणे कृते सति मुखलात् सप्तमस्यैव प्रथमलघोः पूर्वं षष्ठगणान्ते सयति–पदनियमः।

एतत्सर्वं पूर्वार्द्धस्य लक्षणमुक्तम् :—

चरमे द्वितीये पुनरर्द्धे पञ्चमके न्ले नलघुरूपे (।।।।) सति तस्मात् पञ्चमगणात्पूर्वम् अर्थाच्चतुर्थगणान्ते। सयतिपदनियम इति सम्बध्यते–इह आर्योत्तरार्द्धे षष्ठो लःएको लघुरूप एव भवति नतु चतुर्मात्रात्मक इत्यर्थः।उत्तरार्द्धे एतावन्मात्रं विशेषं वदताऽन्यत्सर्वं पूर्वार्धसमं भवतीति द्योतितम्॥ इदमेवात्रोदाहरणम्–उत्तरत्रापि तदेवेति॥२॥

"त्रिषु गणेषु पादः पथ्याद्ये च" पि० सू०

समन्वयः

१ २ ३ ४ ५ ६ ७ गु०

–ऽ ऽ– ।ऽ।– ऽ ऽ– ।। ऽ–ऽ ऽ–। ऽ ।–ऽ ऽ–ऽ

त्रिष्वं शकेषु पादो दलयोराद्येषु दृश्यते यस्याम्।

१ २ ३ ४ ५ ल० ७ गु०

–ऽ ऽ–। ऽ ।–ऽ ऽ–ऽ ऽ–ऽ ऽ–।–ऽ ऽ– ऽ–

पथ्येति नाम तस्याश्छन्दोविद्भिः समाख्यातम्॥ ३॥

त्रिष्विति यस्या आर्यायाः द्वयोर्दलयोराद्येषु त्रिष्वंशेषु गणेषु द्वादशमात्रात्मकेषु पादो

(टि०) १यस्या आर्याया आद्ये पादस्ये (इत्यनुकृष्यम्) अर्द्धे आद्येषु त्रिषु गणेषु पादस्समाप्यते सा पथ्या इत्यर्थः॥

दृश्यते द्वादशमात्रान्ते पादसमाप्तिर्भवतीत्यर्थः प्रथमः तृतीयश्च पादो द्वादशमात्रात्मको भवतीति यावत्। नागराजेन पिङ्गलमुनिना तस्या आर्याया नाम पथ्येति प्रकीर्तितम् कथितम्। सर्वमन्यदार्यातुल्यम्। सर्वत्रात्र ऋषिनामनिर्देशः समूलताप्रदर्शनार्थः ॥३॥

"विपुलाऽन्या" ४।२२ इति पि० सू०

समन्वयः

१ २ ३ ४ ५ ६ ७ गु०

–ऽ ऽ– । । ऽ–। । ऽ– । ऽ । – । । ऽ– । ऽ । – । । ऽ–ऽ–

संलङ्घ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः।

१ २ ३ ४ ५ ल० ७ गु०

–ऽ ऽ– ऽ ऽ– । । ऽ–ऽ । । –ऽ । । – । –ऽ ऽ–ऽ–

यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति ॥ ४ ॥

यस्या आर्याया द्वयोः शकलयोः पूर्वार्द्ध–परार्द्धरूपखण्डयोः आदिमं गणत्रयं द्वादशमात्रारूपं संलङ्घ्यातिक्रम्य यत्र क्वचित् पादः प्रथम–तृतीयपादसमाप्तिर्भवति तां पिङ्गलश्चासौ नागश्च पिङ्गलनागः (पिङ्गलाचार्यस्य शेषरूपत्वात्) विपुलार्यामिति समाख्याति ब्रूते ॥ ४ ॥

"चपला द्वितीयचतुर्थौ गमध्ये जौ" ४।२४ इत्यधिकृत्य

"उभयार्द्धयोर्महाचपला" ४। २७ इति पि० सू०

समन्वयः

१ २ज० ३ ४ज० ५ ६ ७ गु०

–। । ऽ–। ऽ । –ऽ ऽ– । ऽ । –ऽ ऽ–। ऽ । – ऽ ऽ– ऽ–

उभयार्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः।

१ २ज० ३ ४ज० ५ ल० ७ गु०

–। । ऽ– । ऽ । – ऽ ऽ – । ऽ । – ऽ ऽ–।–ऽ ऽ–ऽ–

चपलेति नाम तस्याः प्रकीर्तितं नागराजेन ॥ ५ ॥

यस्या आर्यायाः उभयार्द्धयोः पूर्वार्द्धोत्तरार्द्धयोः द्वितीयतुर्यौ द्वितीयचतुर्थौ जकारौ जगणौ गमध्यगौ गयोरभितः स्थितयोः गुर्वोः मध्यं गच्छत इति तौ तादृशौ स्याताम्

(टि०)—१ अन्या यस्या उभयोरर्द्धयोरन्यतरे वा त्रिषु अंशकेषु पादो न विश्राम्यति सा विपुला। २ यत्रोभयार्द्धयोः पूर्वार्द्धोत्तरार्द्धयोः गमध्ये गोः गुर्वोः मध्ये स्थितौ द्वितीयतुर्यौ जगणौ सा स्यात् चपला महाचपला नाम स्यादित्यर्थः ॥

तस्या नाम नागराजेन चपलेति प्रकीर्तितं कथितम् । यथाऽत्र "धेयोज" इति द्वितीयः "गा" "का" इत्येतयोः पार्श्वद्वयावस्थितयोर्गुरुवर्णयोर्मध्ये स्थितो "द्वितीय" इति तुर्यः सोऽपि पार्श्वद्वयावस्थितयोः 'रो' 'तु' इति गुरुवर्णयोर्मध्ये स्थितः पैङ्गले त्वेषा महाचपला नाम्नोक्ता ॥ ५ ॥

"पूर्वे मुखपूर्वा" ४।२४ इति पि० सू०

समन्वयः

१ २ज० ३ ४ज० ५ ६ ७ गु०

-S S-| S |·S S-| S|-S| |-| S |-S S- S-

आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ॥

१ २ ३ ४ज० ५ ल० ७ गु०

-S S- S| |-S 'S ·| | | |--S S--|-- S | |- S-

शेषे पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना ॥ ६ ॥

आद्यमिति यस्या आर्याया आद्यं दलं प्रथमं पूर्वार्धः (कर्तृ) समस्तं चपलागतम् चपलायां समन्वितं लक्ष्म लक्षणं भजेत आश्रयेत शेषे पश्चिमेऽर्धे पूर्वजं सामान्यार्याभवं लक्ष्म लक्षणं यस्याः सा पूर्वजलक्ष्मा भवति । सा मुनिना पिङ्गलेन मुखचपला (मुखे आदौ चपला यस्याः सा) उदिता कथिता ॥ ६ ॥

"जंघनपूर्वेतरत्र" ४।२६ इति पि० सू०

समन्वयः

१ २ ३ ४ ५ ६ ७ गु०

-S | |-S | |-S S- | | S-| | S-|S |-- | | S-- S-

प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे तु चपलायाः ।

१ २ज० ३ ४ज० ५ ल० ७ गु०

-S S -| S |- S S - | S |--S S--|--| | | |-S

लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ॥ ७ ॥

इति पञ्चार्याभेदाः ।

प्रथमेऽर्द्धे प्राक् पूर्वं प्रतिपादितं कथितम् । "सप्त गणाः गोपेता भवति नेह विषमे जः" इत्यादि लक्षणं भवति प्रथमेतरे तु पुनः चरमेऽर्द्धे चपलाया लक्ष्म लक्षणमाश्रयेत भजेत । सा विशुद्धधीभिः स्वच्छप्रज्ञैर्जघने पश्चाद्भागे चपला इवेति सा जघनचपला उक्ता कथिता ॥ ७ ॥

(टि०)—१ पूर्वेऽर्द्धे चपला लक्षणं चेत् मुखचपला । २ इतरत्र अन्त्येऽर्द्धे चेत् जघनचपला । ३ आर्यायाः आपाद्यैर्न समा गतिः ॥

अधुना गीतिप्रकरणमाह ।

आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ।
दलयोः कृतयतिशोभां तां गीतिं गीतवान् भुजङ्गेशः ॥ १ ॥
आर्याद्वितीयकेऽर्धे यद्गदितं लक्षणं तत्स्यात् ।
यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ २ ॥
आर्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः ।
सोद्गीतिः किल कथिता तद्वद्यत्यंशभेदसंयुक्ता ॥ ३ ॥
आर्यापूर्वार्धं यदि गुरुणैकेनाधिकेन निधने युक्तम् ।
इतरत्तद्वन्निखिलं भवति यदीयमुदितेयमार्यागीतिः ॥ ४ ॥

इत्यार्याप्रकरणम् ।

"आद्यार्धसमा गीतिः" ४।२६ इति पि० सू०

समन्वयः

१ २ ३ ४ ५ ६ ७ गु०
–ऽ ऽ– ।।। ।–ऽ ऽ–। ।।।–। । ऽ–। ऽ ।-ऽ। ।–ऽ-
आर्या प्रथम दलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ॥
१ २ ३ ४ ५ ६ ७ गु०
–।। ऽ–। ।।–ऽ ऽ–ऽ ऽ– ऽ ऽ–। ऽ ।–ऽ ऽ–ऽ-
दलयोः कृतयतिशोभां तां गीतिं गीतवान्भुजङ्गेशः ॥ १ ॥

यदि कथमप्यार्यायाः प्रथमदलोक्तं पूर्वार्द्धोक्तं सप्त गणा गोपेता इत्यादिकं लक्षणमुभयोरपि दलयोरर्द्धयोर्भवेत् भुजङ्गेशः पिङ्गलः मुनिः कृता यतिभिर्विच्छेदैः शोभा प्रतिसौभाग्यं यस्याः यया वा सा तथा तां गीतिं गीतवान् उक्तवान् ॥ १ ॥

"अन्त्येनोपगीतिः" ४।२६ इति पि० सू०

समन्वयः

१ २ ३ ४ ५ ल० ७ गु०
–ऽ ऽ– । ऽ ।-ऽ ऽ– ऽ । ।-ऽ ऽ–।–ऽ ऽ– ऽ–
आर्याद्वितीयकेऽर्धे यद्गदितं लक्षणं तत्स्यात् ।
१ २ ३ ४ ५ ल० ७ गु०
–ऽ । ।–ऽ। ।–।। ऽ-। । ऽ–ऽ ऽ–।–ऽ ऽ-ऽ-
यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ २ ॥

(टि०)—१ यस्या द्वितीयार्धमपि आद्यार्धेन समा सा गीतिः ।

आर्येति आर्याद्वितीयकेऽर्धे यत् षष्ठलघ्वादि लक्षणं गदितं कथितं तल्लक्षणं यदि उभयोरपि दलयोः स्यात्तदा पिङ्गली मुनिः तामुपगीतिं ब्रूते भणति ॥ २ ॥

"उत्क्रमेणोद्गीतिः" ४।३० इति पि० सू०

समन्वयः

१ २ ३ ४ ५ ल०७ गु०

S S—I I S—I I S—S I I—I I S—I—S S—S

आर्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः ।

१ २ ३ ४ ५ ६ ७ गु०

S S—S I I—I I S—SS—S S—I S I—S S—S

सोद्गीतिः किल कथिता तद्वद्यत्यंशभेदसंयुक्ता ॥ ३ ॥

यस्या आर्यायाः शकलद्वितयं खण्डद्वयं व्यत्ययरचितं प्रथमे स्थाने द्वितीयं द्वितीयस्थाने प्रथमं भवेत् (प्रथमे दले मात्राः २७ द्वितीयदले मात्राः ३०) सा तद्वत् तेनैव प्रकारेण यतयश्च विरामस्थानानि अंशाश्च गणाः यत्यंशाः तेषां भेदस्तेन संयुक्ता उद्गीतिः किल शब्दो निश्चये (एतद्धेवं किल श्रूयते) कथिता ॥३॥

"अर्द्धे वसुगण आर्य्यागीतिः" इति पि० सू० ४।३१

समन्वयः

१ २ ३ ४ ५ ६ ७ गु०गु०

S S—S S—S I I—I I S—S S—I S I—I I S—S—S

आर्यापूर्वार्द्धं यदि गुरुणकेनाधिकेन निधने युक्तम् ।

१ २ ३ ४ ५ ६ ७ गु०गु०

I I S—S S—I I S—I S I—S I I—I S I—S S—S—S

इतरत्तद्वन्निखिलं दलं यदीयमुदितेयमार्या गीतिः ॥ ४ ॥

इति गीतिप्रकरणम् ॥

यदि आर्या पूर्वार्द्धमेकेनाधिकेन गुरुणा निधने अन्ते युक्तं भवति यदीयमितरदन्यत् निखिलं समस्तं तद्वत् तस्यैव अस्या एव पूर्वार्द्धवद्भवति । तदेयमार्यागीतिरुदिता ।

(टि०) १ उत्क्रमो व्युत्क्रमो अर्द्धव्यत्यय इति यावत् तेनोपलक्षिता आर्या उद्गीतिर्नामेत्यर्थः। २आर्याप्रथमार्द्धे वसवोऽष्टौ गणा यत्र तादृशे सति आर्यागीतिर्नामेत्यर्थः॥

आर्यायां हि पूर्वार्धे सान्तगुरुकाः सप्तगणा उत्तरार्द्धे षष्ठलघुयुताः सान्तगुरुकाः षड्गणाः । इह तु द्वयोरर्द्धयोः अष्टौ अष्टौ गणाः ॥ "अर्द्धे वसुगण आर्यागीतिः" इति पि० सू० ४ । ३१ दर्शनात् ॥ ४ ॥ इति गीतिप्रकरणम् ॥

इति चतस्रो गीतयः ॥

षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः ।
न समाऽत्र पराश्रिताः कला वैतालीयेऽन्ते रलौ गुरुः ॥१॥
पर्यन्ते यौं तथैव शेषं त्वौपच्छन्दसिकं सुधीभिरुक्तम् ॥२॥
आपातलिका कथितेयं भाद्गुरुकावथ पूर्ववदन्यत् ॥३॥
तृतीययुग्दक्षिणान्तिका समस्तपादेषु द्वितीयलः ॥४॥
उदीच्यवृत्तिर्द्वितीयलः सक्तोऽग्रेण भवेद्युग्मयोः ॥५॥
पूर्वेण युतोऽथ पञ्चमः प्राच्यवृत्तिरुदितेति युग्मयोः ॥६॥
यदा समावोजयुग्मकौ पूर्वयोर्भवति तत्प्रवृत्तकम् ॥७॥
अस्य युग्मरचिताऽपरान्तिका ॥८॥
अयुग्मगा चारुहासिनी ॥९॥ इति वैतालीयं प्रकरणम् ॥९॥

"वैतालीयं द्विःस्वरा अयुक्पादे युग्वसवोऽन्ते र्लगाः" इति४।३२पि०सू० "शेषे परेण युङ् न साकम्" ४॥३५॥"षट् चामिश्रा युजि" ४॥३६॥ पि० सू० ॥ ३ ॥

(टि०) १—अयुक्पादे (१-३) द्विरावृत्ताः स्वराः त्रयः षड्मात्राः । युजि (२-४) पादे तु वसवोऽष्टौ मात्रा अन्ते तूभयत्र र्लगाः रगणलघुगुरवः शेषे उक्तमात्रानियमातिरिक्तस्थले युक् सममात्राः परेण साकं सह युक्ता न स्यात् । युजि समपादे षट्मात्रा अमिश्रा निरन्तरा न स्युः तदा वैतालीयं भवेदिति सूत्रार्थः ॥

समन्वयः

६ मात्रा र० ल०गु० ८ मात्रा र० ल०गु०

S | | S– S | S– | –S–S | | S S–S | S–|–S

षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः ।

न समाऽत्र पराश्रिताः कला वैतालीयेऽन्ते रलौ गुरुः ॥ १ ॥

विषमे पादे प्रथमतृतीयरूपे षट् कला भवन्ति । समे पादे द्वितीयचतुर्थ रूपे अष्टौ कला भवन्ति च पुनस्ताः कलाः समे पादे निरन्तरा अव्यवहिता लघुरूपा एव केवला न स्युः किन्तु गुरुमिश्रा एव तिष्ठन्तीत्यर्थः । अत्र वैतालीये समकला द्वितीया चतुर्थी षष्ठी च पराश्रिता परायामग्रेस्थितायामाश्रिता मिलिता न भवति । कोऽर्थः द्वितीया लघुरूपा कला तृतीयायां चतुर्थी पञ्चम्यां षष्ठी च सप्तम्यां न मिलेत् पूर्वाश्रितास्तु कामं स्युर्द्वितीया प्रथमायां चतुर्थी तृतीयायामेवं च कामं स्यादिति यावत् । अन्ते विषमे षट् कलाग्रतः समेऽष्टकलाग्रतश्च परत्र रलौ रगणलघू कार्यौ ततो गुरुरेक इति वैतालीये छन्दसि इदं लक्षणं प्रोक्तम् ॥ १ ॥

"औपच्छन्दसिकम्"[1] इति पि० सू० ४ ॥ ३३ ॥

समन्वयः

६ मात्रा र० य० ८ मात्रा र० य०

S S S–S | S–| S S– S S S | | –S | S–| S S

+ पर्यन्ते यौ तथैव शेषं त्वौपच्छन्दसिकं सुधीभिरुक्तम् ॥ २ ॥

पर्यन्ते समविषमपादयोः षण्णामष्टानां चान्ते यौ रगणयगणौ भवतः शेषं तथैव षट्कला विषमेऽष्टौ समे इत्यादि तत् सुधीभिः पण्डितैः छन्दसां समीपमुपच्छन्दः तत्र भवम् औपच्छन्दसिकम् उक्तं भणितम् ॥ २ ॥

"आपातलिका भगौग्"[2] इति पि० सू० ४ । ३४ ॥

(टि०) १ यदि वैतालीयस्यान्ते एकोऽधिको ग् गुरुः शेषं सर्वं पूर्ववत् तदा औपच्छन्दसिकं नामेत्यर्थः । २ विषमे षण्मात्रातः समेऽष्टमात्रातश्च भगणो गुरुद्वयं च चेत् आपातलिका नामेत्यर्थः ॥

समन्वयः

६ मात्राः भ० २ गु० ८ मात्राः भ० २ गु०
S S | |–S | |–S S–S | | S | |–S | |–S S

आपातलिका कथितेयं भाद्गुरुकावथ पूर्ववदन्यत् ॥३॥

समविषमपादयोः षण्णामष्टानां च कलानामन्ते भात् भगणात् गुरुकौ द्वौ गुरू भवतश्चेत् अथानन्तरमन्यत् पूर्ववत् वैतालीयवत् भवति तदा आपातलिका नाम छन्दो भवति ॥

६ मात्राः र० ल०गु० ८ मात्राः र० ल०गु०
| S | S–S | S– |–S– | S | S S–S | S–|–S

तृतीययुग्दक्षिणान्तिका समस्तपादेषु द्वितीयलः ॥४॥

यदि पूर्वोक्तानां त्रयाणां समस्तेषु पादेषु चतुर्षु द्वितीयो लघुस्तृतीयेण सह युक् संमिलितो भवेत् तदा दक्षिणान्तिका नाम छन्दो भवति । शेषं यथाप्राप्तं वैतालीयौपच्छन्दसिकापातलिकापूर्वकत्वेन त्रेधोदाहार्या ॥४॥

[1] **अयुक् तृतीयेनोदीच्यवृत्तिः** इति० पि० सू० ४।३८।

समन्वयः

६ मात्राः र० ल०गु० ८ मात्राः र० ल०गु०
| S | S–S | S–|–S– S S S | |–S | S–| S

उदीच्यवृत्तिर्द्वितीयलः सक्तोऽग्रेण भवेदयुग्मयोः ॥ ५ ॥

पूर्वेषु यदि अयुग्मयोर्विषमपादयोर्द्वितीयो लो मात्रा अग्रेण तृतीयेन लघुना मात्रारूपेण सह सक्तः संबद्धो मिलितो भवति शेषं च यथाप्राप्तं स्यात्तदा सा उदीच्यवृत्तिरुदिता कथिता मुनिना ।

[2] **"पञ्चमेन पूर्वः साकं प्राच्यवृत्तिः"** इति पि० सू० ४।३७

(टि०) १ अयुक् विषमपादे (लुप्तविभक्तिकं) द्वितीय इति शेषः तृतीयेन सक्तश्चेत् तदा उदीच्यवृत्तिश्छन्द इत्यर्थः । २ पूर्वः चतुर्थः पंचमेन सह युतः चेत् प्राच्यवृत्तिर्नामेत्यर्थः ।

समन्वयः

६ मात्राः र० ल०गु० ८ मात्राः र० ल०गु०

S S I I-S I S- I-S- S I S I I I-S I S- I-S

पूर्वेण युतोऽथ पञ्चमः प्राच्यवृत्तिरुदितेति युग्मयोः ॥६॥

पूर्वेणेति अथेति यद्यर्थे यदि युग्मयोः समपादयोः पञ्चमो लघुः पूर्वेण युतः चतुर्थेन संयुक्तो भवति सा प्राच्यवृत्तिरुदिता कथिता मुनिनेति शेषः ॥ ६ ॥

[1]"आभ्यां युगपत्प्रवृत्तकम्" इति पि० सू० ४।३६

समन्वयः

६ मात्राः र० ल०गु० ८ मात्राः र० ल०गु०

I S I S-S I S- I-S- S I S I I I- S I S-I-S

यदा समावोजयुग्मकौ पूर्वयोर्भवति तत्प्रवृत्तकम् ॥ ७ ॥

यदेति । यदा पूर्वयोरुदीच्यवृत्तिप्राच्यवृत्त्योः ओजयुग्मकौ विषमसमौ पादौ समौ तुल्यौ यथासंख्येन विषमसमसदृशौ भवतस्तदा प्रवृत्तकं नाम छन्दो भवति । अस्य प्रथमतृतीयपादौ उदीच्यवृत्तेः प्रथमतृतीयपादाभ्यां सदृशौ द्वितीय चतुर्थपादौ प्राच्यवृत्तेः द्वितीयचतुर्थपादाभ्यां समाविति निष्कर्षः ॥७॥

[2]"युगपरान्तिका" इति पि० सू० ४।४१

समन्वयः

८ मात्राः र० ल०गु०

S I S I I I-S I S-I-S

अस्य युग्मरचिताऽपरान्तिका ॥ ८ ॥

अस्येति अस्य प्रवृत्तकस्य युग्माभ्यां द्वितीयचतुर्थाभ्यां पादाभ्यां या सम्पूर्णा रचिता भवति साऽपरान्तिका नाम छन्दः भवति । षोडश षोडश मात्राश्चतुर्ष्वपि पादेषु पञ्चमी च चतुर्थमात्रया युक्ता कार्येति निष्कर्षः ॥ ८ ॥

[3]"अयुक्चारुहासिनी" इति पि० सू० ४।४२

---

१ उदीच्यवृत्तिप्राच्यवृत्तिभ्यां युगपत् एकत्रैवेत्यर्थः । विशेषस्तु अस्यायः संग्रहे द्रष्टव्यः। २ प्रवृत्तकस्य युग्मपादाभ्यां रचितेत्यर्थः । ३ अयुग्मपादाभ्यां रचितेत्यर्थः।

समन्वयः

६ मात्राः र० ल०गु०

| S | S– S | S– |–S

अयुग्मगा चारुहासिनी ॥६॥ इति वैतालीयं प्रकरणम् ॥६॥

अयुग्मेति । अस्य प्रवृत्तकस्य अयुग्मगा अयुक्पादैः विषमपादैः रचिता चारुहासिनी नाम भवति । सर्वपादेषु चतुर्दशमात्राः द्वितीया तृतीयया मिलिता कार्येति निष्कर्षः ॥ ६ ॥

'इति वैतालीयं प्रकरणम् ॥

वक्त्रं नाम्नाम्भसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम् ॥१॥

युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम् ॥२॥

अयुजोर्जेन वारिधेस्तदेव विपरीतादि ॥३।

चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशेः ॥४॥

यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता ॥५॥

सैतवस्याखिलेष्वपि ॥६। भेनाब्धितो भाद्विपुला ॥७॥

इत्थमन्या रश्चतुर्थात् ॥ ८ ॥ नोम्बुधेश्चेन्नविपुला ॥९॥

तोऽब्धेस्तत्पूर्वान्या भवेत् ॥१०॥

अत्र "पादस्यानुष्टुब्वक्त्रम्"[1] ५ । ९ । इत्याधिकृत्य "न प्रथमात् स्नौ" ५ । १० इत्याह , "द्वितीयचतुर्थयो रश्च" ५।११ । "वान्यत्" ५।१२। "य चतुर्थात्" ५।१३। इति पिं० सू०

(टि०) १ पादस्येति आसप्तमाध्यायान्तम् अनुष्टुप्-वक्त्रमिति पदद्वयं च पदचतुष्टयात्प्राग् अधिक्रियते । प्रथमाक्षरादग्रे स्नौ सगणनगणौ न कार्यौ (द्वितीयचतुर्थपादयोश्च पूयमात् रगणो न कार्यः । अन्यत् सगणनगणाभ्यां मगणादि त्रिकान्तरं वा कार्यं चतुर्थाक्षरात् य (लुप्तविभक्तिकं) यगणश्च कार्यं इति सूत्रपञ्चकार्थः ॥

समन्वयः

गु० म० य० गु०गु० म० य० गु०

S-S S S –| S S–S–S–S S S–| S S –|

वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम् ॥ १ ॥

वक्त्रेति । आद्यात् प्रथमाक्षरात् (दिग्योगे पञ्चमी तथाब्धेरित्यत्रापि) परतो नसौ नगणसगणौ न स्यातां न भवेतां । किन्तु इह नियमेनाऽब्धेः परो यो यगणः स्यात् (समयोश्च पादयोराद्यक्षरादूर्ध्वं[१] रगणोपि न कार्यः इति सम्प्रदायः) तदा अनुष्टुभि अनुष्टुप्प्रकरणे वक्त्रं नाम छन्दः ख्यातं प्रसिद्धम् । अर्द्धोऽयम् ॥ १ ॥

"पथ्या[१] युजो ज्" इति पि० सू० ५।१४

समन्वयः

ल० त० य० गु०गु० म० ज० गु०

|–S S |–| S S–S–S–S S S–| S |–S

युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम् ॥ २ ॥

युजेति—युजोः समपादयोः सरिद्भर्तुः समुद्राच्चतुर्थाक्षरात् परतो जेन जगणेन सहितं पथ्यावक्त्रं नाम छन्दः प्रकीर्तितं कथितं पिङ्गलमुनिना तद्यथा "पथ्या युजो ज्" ५।१४ विषमयोस्तु यगणः सामान्येन पूर्वतः प्राप्तः ॥ २ ॥

"विपरीतैकीयम्[२]" इति पि० सू० ५।१५

समन्वयः

ल० य० ज० गु०ल० म० य० ल०

|–| S S–| S |–S–,–S | |–| S S–|

अयुजोर्जेन वारिधेस्तदेव विपरीतादि ॥ ३ ॥

अयुजोरिति—अयुजोर्विषमपादयोर्वारिधेश्चतुर्थाक्षरात् परे जेन जगणेन सहितं विपरीतादि विपरीतशब्दादि तदेव पथ्यावक्त्रं विपरीतपथ्यावक्त्रं 'नाम छन्दो भवतीत्यर्थः । अर्थात्समयोर्यगणो यथाप्राप्तः मुनिस्तु 'विपरीतैकीयम्' इति सू० ५।१५ ॥३॥

(टि०) १ चतुर्थादिति अनुवृत्य युजः पादस्य चतुर्थाक्षरात् अग्रे जगणः प्रयोज्यः तदा पथ्येत्यर्थः । २ [illegible] विपरीत[illegible] पथ्या [illegible]एवेति प्राचीनं मतमित्यर्थः ॥

"चपलाऽयुजोन्[1]" इति पि० सू० ५।१६

समन्वयः

ल० य० न० गु० ल० म० य० गु०

।-। ऽ ऽ-।।।-ऽ-।-ऽ ऽ ऽ-, ऽ-ऽ-ऽ

चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशेः ॥ ४ ॥

चपलेति । यदि अयुजोः विषमपादयोः पयोराशेः समुद्राच्चतुर्थाक्षरात् नकारो नगणो भवति तदा चपलावक्त्रं नाम छन्दः स्यात् "चपलाऽयुजोन्" इति पि०सू०॥४॥

"विपुला युग्लः सप्तमः[2]" इति पि० सू० ५।१७

समन्वयः

म० य० गु० गु० म० स० ल० गु०

ऽ ऽ ऽ- ऽ । ऽ- ऽ-ऽ- ऽ ऽ ऽ-।। ऽ-।-ऽ

यस्यां लः सप्तमो युग्मे सा युग्मविपुला लता ॥ ५ ॥

यस्यामिति ॥ यस्यां छन्दोजातौ युग्मे समपादे सप्तमो वर्णो लो लघुर्भवति सा युग्मविपुला मताऽभिप्रेता मुनेरिति शेषः "विपुला युग्लः सप्तमः" वक्त्रमारभ्य सर्वे मर्द्धाः ॥ ५ ॥

"सर्वतः[4] सैतवस्य" इति पि० सू० ५।१८

समन्वयः

गु० य० ज० गु०

ऽ-। ऽ ऽ-। ऽ ।-ऽ

सैतवस्याखिलेष्वपि ॥ ६ ॥

सैतवस्येति ॥ सैतवस्याचार्यस्य मते यस्याः अखिलेषु समस्तेषु चतुर्षु पादेषु सप्तमो लघुर्भवति सा विपुला भवति ॥ इयं पादः चतुर्वारं पठित्वा श्लोकपूर्तिः । एवं सति एकत्रोदाहरणत्वसम्भवे अन्यत्राऽपि बोध्यम् ॥ ६ ॥

(टि०) १ अयुजः प्रथमस्य तृतीयस्य च चतुर्थाक्षरात् नगणः युक्पादस्य यगणस्तदा चपलेत्यर्थः । २ युगिति (लुप्तविभक्तिकं) युक्पादे सप्तमोवर्णो लःलघुश्चेत् विपुला नामत्यर्थः । ३ यद्यपि पथ्यायामपि युजोः सप्तमो लस्तथापि तत्र जगणेनैव अत्र तु नजभतैः । ननु जगणपक्षे तथापि सङ्करः इति चेत्तर्हि तत्र संज्ञाविकल्प एवास्तु इति विद्धि । २ सर्वतः सर्वेषु पादेषु सार्वविभक्तिकस्तासिः ।

इतश्चतुर्विंशः ये "[1]श्नौ न्तौ" इति पि० सू० ५।१६

समन्वयः

गु० र० म० गु०
—ऽ । ऽ—ऽ । ।—ऽ

भेनाब्धितो भाद्विपुला ॥ ७ ॥

भेनेति । अब्धितः समुद्राच्चतुर्थाक्षराद्भेन भगणेन उपलक्षिता चेत् भविपुला (भात् भगणात्परा विपुला) भवतीत्यर्थः ॥ ७ ॥

गु० य० र० गु०
ऽ—।ऽ ऽ— ऽ। ऽ—ऽ

इत्थमन्या रश्चतुर्थात् ॥ ८ ॥

इत्थमिति ॥ इत्थमनेन प्रकारेणं चतुर्थाच्चतुर्थाक्षरात् रो रगणो यदि भवति तदाऽन्या रविपुला भवतीत्यर्थः ॥ ८ ॥

गु० य० न० गु०
ऽ— ।ऽ ऽ—। ।।—ऽ

नोऽम्बुधेश्चेन्न विपुला ॥ ९ ॥

नो इति ॥ अम्बुधेः समुद्राच्चतुर्थाक्षरात्परो यदि नो नगणस्तदा नविपुला भवति ॥ ९ ॥

गु० म० त० गु०
ऽ— ऽ ऽ ऽ—ऽ ऽ ।—ऽ

तोऽब्धेस्तत्पूर्वान्या भवेत् ॥ १० ॥ इति वक्त्रप्रकरणम् ॥

तो इति ॥ अब्धेश्चतुर्थाक्षराद्यदि तस्तदा तत्पूर्वा तकारपूर्वा विपुला अन्या तविपुला भवति । मञ्जर्यां तु विषमवृत्तान्ते वक्त्रप्रकरणमाह तद्यथा ।

"भवत्यर्द्धसमं वक्त्रं विषमञ्च कदाचन ॥ तयोर्द्वयोरुपान्तेऽत्र छन्दस्तदधुनोच्यते" ॥ इत्याद्युक्त्वान्ते ।

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ॥ गुरु षष्ठं च पादानां शेषेष्वनियमो मतः ॥

(टि०) १ यदि चतुर्थाक्षरात् भगणरगणौ नगणतगणौ वा स्यातां पृथक् २ तदा भविपुलादिनामानीत्यर्थः ॥

प्रयोगे प्रायिकं प्राहुः केप्येतद्वक्त्रलक्षणम् ॥ लोकेऽनुष्टुबिति ख्यातं तस्याष्टाक्षरता कृता ॥

इति वक्त्रप्रकरणम् ॥ अथ मात्रासमान्याह—

द्विकगुणितवसुलघुरचलधृतिरिति ॥ १ ॥

मात्रासमकं नवमो ल्गोऽन्त्यः ॥ २ ॥

जोन्लावथाम्बुधेर्विश्लोकः ॥ ३ ॥

तद्युगलाद्वानवासिका स्यात् ॥ ४ ॥

वाणाष्टनवसु यदि लश्चित्रा ॥ ५ ॥

उपचित्रा नवमे परयुक्ते ॥६॥ (अष्टाभ्यो भाद्गावुपचित्रा)

यदतीतकृतविविधलक्ष्मयुतैः । मात्रासमादिपादैः कलितम् ॥
अनियतवृत्तपरिमाणसहितं । प्रथितं जगत्सु पादाकुलकम् ॥७॥

वृत्तस्य ला विना वर्णैः गाँ वर्णा गुरुभिस्तथा ।
गुरवो लैर्द्विले नित्यं प्रमाणमिति निश्चितम् ॥ ८ ॥

"गीत्यार्या[1] लः" इति पि० सू० ४।४८

समन्वयः

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
द्विक गुणित वसुलघुरचलधृतिरिति ॥ १ ॥

द्विकेति द्वावेव द्विकौ द्वाभ्यां गुणिता वसवोऽष्टौ लघवो यस्यां सा द्विकगुणित वसुलघुः अचलधृतिर्नाम छन्दो भवति ॥ तथा आपादाकुलकच्छन्दो यावद्विकगुणित वसुलघुरिति वर्तते । तेनोत्तरत्र षोडशमात्रा आधिक्रियन्ते अत्रेतिशब्देन "गीत्यार्या लः" इति पि० सू० ४।४८ उक्ता गीत्यार्येति संज्ञापि बोधिता तत्र च "शिखा विपर्यस्तार्द्धा" ४।४९ इति छन्दोऽन्तरमप्युक्तम् ॥ १ ॥

"गन्ता[2] द्विर्वसवो मात्रासमकं नवमः" इति पि० सू० ४।४२

(टि०) १ यत्र पादे द्विर्वसवः (अनुवृत्तमिदं पूर्वसूत्रतः) षोडश लकारा भवन्ति सा गीत्यार्या नाम जातिः । लग्रहणे प्रकृते पुनर्लग्रहणं केवलैकमात्रिकत्वार्थम् । २ यत्र पादे गन्ता गुर्वन्ता द्विर्वसवः षोडश लकाराः नवमश्च लघुः शेषे गोऽन्त्येत्यादि पूर्ववत् ।

समन्वयः

लं० गु०

१-२ ३-४ ५ ६ ७-८ ९ १० ११-१२ १३-१४ १५-१६

मा त्रा स म कं न व मो लगो ऽन्त्यः ॥ २॥

मात्रेति। यत्र नवमो ल् लघुः अन्त्योऽन्ते भवश्च ग् गुरुः स्यात् तत् मात्रासमकं नाम छन्दः स्यात्। षोडशमात्रास्त्वात्र। नवमान्त्ययोर्लघुगुरुनियमाच्छेषे नियमाभावः सूचितः॥ २॥

विश्लोकः पञ्चमाष्टमौ[1] । ४ । ४४ । पि० सू०

जं०

१-२ ३-४ ५ ६-७ ८ ९-१० ११-१२ १३-१४ १५-१६

जो न्लौ व था म्बु धे र्वि श्लो कः ॥ ३॥

ज इति यदि अम्बुधेश्चतसृभ्यो मात्राभ्यः परो जगणो[2] भवति अथ अथवा कुत्रचित् न्लौ नगणलघू (॥॥) भवतस्तदा स विश्लोको नाम छन्दो भवति ॥ ३ ॥

द्वादशश्च[3] वानवासिका । ४ । ४३ । पि० सू०

समन्वयः

जं०

१-२ ३ ४ ५-६ ७-८ ९ १०-११ १२ १३-१४ १५-१६

त द्युग ला द्वा न वा सि का स्यात् ॥ ४॥

तदिति। तद्युगलादम्बुधियुग्मात् अष्टाभ्यो मात्राभ्यः परो यदि जो जगणः अथवा क्वचित् न्लौ नगणलघू (॥॥) भवतः (पूर्वतोऽनुवर्त्येदं व्याख्यानम्) तदा वानवासिका नाम छन्दो भवति ॥ ४॥

चित्रा नवमश्च[4] । ४ । ४५ ॥ पि० सू०

समन्वयः

लं० लं०लं०

१-२ ३-४ ५ ६ ७ ८ ९ १० ११-१२ १३-१४ १५-१६

+ धा णा ष्ट नव सु यदि ल श्चि त्रा ॥ ५॥

वाणेति॥ वाणाष्टनवसु पञ्चमाष्टमनवममात्रासु यदि लो लघुः अर्थाल्लघुरूपास्ताः ५।८।९। मात्रा भवति शेषं पूर्ववत् तदा चित्रा नाम छन्दो भवति ॥ ५॥

(टि०) १ यत्र पञ्चमाष्टममात्रे लघुरूपे। २ अत्र जगणो न्लौ स्तूदाहरणं मृग्यम्। ३ यत्र मात्रासमकस्य पादे द्वादशी चात् नवमी च मात्रा लघुरूपा सा। ४ यस्य नवमी चात् पञ्चमाष्टम्यौ मात्रे लघुरूपे सा।

परयुक्तेनोपचित्रा[1] । ४ । ४६ । पिं० सू०

समन्वयः

१ २ ३–४ ५–६ ७ ८ ९–१० ११ १२ १३–१४ १५–१६
उ प चि त्रा न व मे प र यु क्ते ॥ ९ ॥

मात्रा षोडशके अष्टाभ्यो मात्राभ्यः नवमे परयुक्ते दशमयुक्ते सति उपचित्रा भवति ॥९॥

अन्यत्र विशेषः।

१–२ ३–४ ५–६ ७–८ ९–१० ११ १२ १३–१४ १५–१६
(अ ष्टा भ्यो मा त्रा उ प चि त्रा)॥

(अष्टाभ्य इति यस्याम् अष्टाभ्यो मात्राभ्यः परस्मात् भगणाद् द्वौ गुरू भवतः सा उपचित्रा स्यात्)॥

एभिः पादाकुलकम्[2] । ४ । ४७ । पिं० सू०

समन्वयः

स० न०स० गु०
१ २ ३–४ ५ ६ ७ ८ ९ १० ११–१२ १३ १४ १५–१६
य द ती त कृत विविध ल क्ष्म यु तैः ।

ज० गु०
१–२ ३–४ ५ ६–७ ८ ९–१० ११–१२ १३ १४ १५–१६
मा त्रा स मा दि पा दैः क लि तम् ॥

ज० गु०
१ २ ३ ४ ५–६ ७ ८ ९ १०–११ १२ १३ १४ १५–१६
अ नि य त वृ त्त परि मा ण स हि तं ।

(टि०) १ दशमेन सहैकीभूतेन। २ एषां पञ्चानां मध्ये यैः कैश्चिदपि पादैः मिश्रितैरित्यर्थः। नन्वेवम् उपजातितः को भेदः? तत्र प्रतिपादमेकलक्षणयोगः अत्र तु अनेकलक्षणयोगोऽपि। यथा यदतीतेत्यत्रैव आद्ये मात्रासमकविश्लोकचित्राणां। द्वितीये विश्लोकोपचित्रयोः। तृतीये मात्रासमकवानवासिकयोः। तुर्ये उपचित्राविश्लोकयोः। कश्चित्तु अन्यर्थसंज्ञया सर्ववृत्तविषयकोमतावृति प्राहुः।

जं० गु०
१ २ ३-४ ५ ६-७ ८ ९-१० ११-१२ १३ १४ १५-१६
प्रथि तं ज ग त्सु पा दा कु ल कम् ॥ ८ ॥

यदिति ॥ यत् छन्दः अतीते पूर्वत्र कृतानि विविधानि नानारूपाणि यानि लक्ष्माणि लक्षणानि तदुक्तैः प्रागुक्तानां मात्रसमादीनां पद्यानां पादैः कलितं तथाऽनियतं नियमरहितं वृत्तमेकवृत्तलक्षणं तेन तथा यद् वृत्तस्य षोडशमात्रात्मकं परिमाणं तेन सहितमेवंविधं तत् जगत्सु संसारे प्रथितं प्रसिद्धं पादाकुलकं नाम छन्दो भवति ॥८॥

सांख्येन न समा लां ग्लः[1] ।४।५३॥ पिं० सू०

समन्वयः

वृत्तस्य लो विना वर्णैर्गा, वर्णा गुरुभिस्तथा ॥
गुरवो लैर्दले नित्यं प्रमाणमिति निश्चितम् ॥ ९ ॥

वृत्तस्येति ॥ वृत्तस्य लो मात्रा वर्णैर्विना गा गुरवो ज्ञेया इत्यध्याहारः। लो वर्णा गा इत्यादिभिः शब्दैस्तत्तत्संख्या लक्ष्यते । ततश्चायमर्थः—यदि वृत्तस्य मात्रा-वर्णयोः संख्या विज्ञाता गुरुलघुसंख्या चाज्ञाता । तदा मात्रासंख्यामपनीयावशिष्टा गुरुसंख्या ज्ञेयेति, वर्णसंख्यातश्च गुरुसंख्यामपनीयावशिष्टा लघुसंख्या ज्ञेयेत्याशयः। यदि तु मात्राणां गुरूणां च ज्ञातसंख्यात्वं वर्णानामज्ञातसंख्यात्वस्तदा तज्ज्ञानो-पायमाह वर्णा इति तथा वृत्तमात्रा गुरुभिर्विना वर्णा ज्ञेयाः । वृत्तमात्रासंख्या तो गुरुसंख्यामपनीयावशिष्टा वर्णसंख्येत्यर्थः । वृत्तमात्रालघुसंख्यायाः संज्ञाने

(टि०) १ सा गुरुसङ्ख्या, वेदितव्या, येन यावद्भिः अक्षरैः लां लघूनां मात्राणां, समाः समसङ्ख्याः, ग्लः न स्युः, अपितु न्यूनसङ्ख्या एव। ग्लः इति अक्षराणि अभिधीयन्ते, तेषां गुरुलघुरूपत्वात् । अयम् अभिप्रायः, आर्यादिषु शास्त्रे यावत्यः मात्राः उपदिष्टाः तावन्ति अक्षराणि यथासङ्ख्यं न पूर्यन्ते, सा तत्र गुरुसंख्या वेदि-तव्या, अवशिष्टा लघुसङ्ख्या। तत्रायम् उपयोगः यदि कश्चित् पृच्छति चत्वारिंशद-क्षरायाम् आर्य्यायां कति गुरवः सम्पद्यन्ते, कति वा लघवः? इति तदा सप्तपञ्चाशन्मात्रो-पदिष्टायाम् आर्य्यायां मात्रासङ्ख्यायां चत्वारिंशदक्षरसङ्ख्यम् अपनीय तत्र ये अव शिष्यन्ते, तान् गुरून् उपदिशेत् । ते च सप्तदश एव । शेषान् तु त्रयोविंशतिलघून् उपदिशेत् ।

सति गुरुज्ञाने प्रकारान्तरमाह।-गुरुत्वं इति। वृत्तस्य ला इत्यनुषङ्गः। वृत्तस्य मात्राभिः लघुभिर्विना कृता दले अर्धे कृते सति गुरवो ज्ञेयाः। वृत्तमात्रासंख्यतो लघुसंख्यामपनीयाऽवशिष्टां संख्यामर्द्धीकृत्य तावत्प्रमाणा गुरुसंख्येत्यर्थः। उक्तां गुर्वादिसंख्यामुपसंहरति-नित्यमिति। इत्यमुना प्रकारेण गुर्वादीनां प्रमाणं नित्यं सर्वदा निश्चितं भवतीति शेषः॥ यथाऽत्रैव वृत्तस्येत्यादिप्रथमपादे मात्रासंख्यः चतुर्दश (१४) वर्णसंख्या अष्टौ (८) तया भागे दत्ते [$\frac{१४}{८}$] शिष्टाः षट् (६) तत्संख्याका एवात्र गुरवो गणनीयाः। तथा पुनरत्रैव वृत्तमात्रासंख्या (१४) गुरु संख्या षट् (६) तया भक्ते [$\frac{१४}{६}$] शिष्टा अष्टौ (८) तत्संख्याका एवात्र पादे वर्णाः सन्ति। पुनरत्रैव वृत्तसंख्या (१४) लघु संख्या द्वे (२) तया शेषिते [$\frac{१४}{२}$] जाता द्वादश (१२) पुनः अर्द्धीकरणे शिष्टाः (६) तथा च तत्संख्याका (६) एवात्र गुरवः सन्ति "साम्येन न समा लां ग्लः" इति चात्र पि० सू० ।४।५३॥ उपलक्षणमात्रम्॥ ९॥

इति मात्रासमप्रकरणम्

शिखिगुणितदशलघुरचितमपगतलघुयुगलमपरमिदमखिलम्॥
सगुरु सकलयुगलकमपि सुपरिघटितललितपदवितति भवति शिखा।१।
विनिमयविहितशकलयुगलकलितपदविततिविरचितगुणनिचया॥
श्रुतिसुखकृदियमपि जगति जिजशिर उपगतशति सति भवति शिखा।२।
अष्टावर्के गा द्व्यभ्यस्ता यस्याः साऽनङ्गक्रीडोक्ता॥
दलमपरमपि वसुगुणितसलिलनिधिलघुकविरचितपदविततिं भवति।३।
त्रिगुणनवलघुरवसितिगुरुरिति दलयुगलकृततनुरतिरुचिरा॥ ४॥

चूलिकैकोनत्रिंशदेकत्रिंशदन्ते ग्[१]।४।५२। पि० सू०

समन्वयः

ल०	गु०
२८	ऽ

शिखिगुणितदशलघुरचितमपगतलघुयुगलमपरमिदमखिलम्॥ { गु० १ ऽ, ३०ल० }

सगुरुशकलयुगलकमपि सुपरिघटितललितपदनिचितं भवति शिखा॥१०॥

शिखीति। शिखी अग्निः ३ अत्र त्रित्वसंख्या तेन हन्यते एवञ्च शिखिभिस्त्रिभि-

(टि०) १. यत्र प्रथमेऽर्द्धे एकोनत्रिंशत् लघुरूपा मात्राः। द्वितीयेऽर्द्धे चैकत्रिंशत् तयोश्चान्तयोः स्थितौ द्वौ लकारावुन्मूल्य प्रत्यकम् एको गुरुः क्रियते सा चूलिका नामेत्यर्थः।

गुणिता ये दशलघवस्तैस्त्रिंशल्लघुभिरित्यर्थः रचितं निर्मितं यत्तत् । अथ च अपगतं लघुयुगलं लघुद्वयं यस्मात्तत् । एवं प्रथमं दलं । तथाऽपरं द्वितीयं दलमुक्तमखिलं सम्पूर्णं लघुद्वयेनाऽन्यूनं त्रिंशन्मात्रकमित्यर्थः तथा शकलयुगलकमपि दलद्वयमपि सगुरु अन्तेऽधिकैकगुरुयुक्तम् ॥ कोऽर्थः प्रथमे दलेऽष्टाविंशतिर्लघवः प्रान्ते गुरुश्च । द्वितीये च त्रिंशल्लघवः प्रान्ते गुरुश्चेति एवं दलद्वये द्विषष्टिर्लघव इत्यर्थः । तथा सुपरि घटितानि शोभनप्रकारेण बद्धानि ललितानि मनोज्ञानि यानि पदानि तेषां निचितिः रचना यस्मिंस्तच्छिखा नाम छन्दो भवति। पिङ्गलमुनिना तु शिखेत्युपक्रम्य "चूलिकैकोन त्रिंशदेकत्रिंशदन्ते ग् ४।५२। इति सूत्रे चूलिकाशिखानाम्नोक्तम् ॥ १० ॥

३०ल० ऽ
विनिमयविहितसकलयुगललघुललितपदविततिरचितगणनिचया ।
२८ल०१ गु०१
श्रुतिसुखकृदियमपि जगति जि ज्ञशिर उपगतवति सति भवति खजा॥११॥

विनिमयेति विनिमयेन वैपरीत्येन विहितं यत्सकलयुगलं तस्य लघवस्तैर्ललिता या विततिः पदश्रेणिस्तया रचिता निबद्धा गणनिचया गणसमूहा यस्यां सा श्रुत्योः कर्णयोः सुखं करोतीति श्रुतिसुखकृत् जि जकारे जकारस्य शिरसि उपरि उपगतवति सति खजा नाम अर्थात् खञ्जा नामकं छन्दो भवतीत्यर्थः ॥११॥

"शिखा विपर्यस्तार्द्धा" ४।४६ "लः पूर्वश्चेज्ज्योतिः" ४।५० "गश्चेत्सौम्या" इति पि०सू० ४।५१।

समन्वयः

१६ गु०
अष्टावर्धे गा द्व्यभ्यस्ता यस्याः सानङ्गक्रीडोक्ता ॥
३२ल०
दलमपरमपि वसुगुणितसलिलनिधिलघुकविरचितपदविततिभवति॥१२॥

अष्टाविति ॥ यस्या अर्धे प्रथमदले द्व्यभ्यस्ता द्विगुणिताः अष्टौ गा गुरवः

(टि०) १ गीत्यायां चेत् विपर्यस्तार्द्धा अयमर्थः अर्द्धं च सर्वलघु अर्द्धं च सर्वगुरु इति तदा शिखाख्यां लभते । तत्र यदि पूर्वोर्द्धो भागः लः सर्व(३२)लघुरूपः परिशेषात् उत्तरश्च सर्व(१६)गुरुः तदा ज्योतिर्नाम शिखा । यदि पूर्वभागः गः-सर्वगुरुरूपः तदा सौम्या नाम शिखेति विन्यासभेदेन नामद्वयं शिखाया एतेषां सूत्रत्रयार्थः ।

षोडशगुरव एव स्युरित्यर्थः ॥ तयाऽपरं द्वितीयमपि दलं वसुभिरष्टभिर्गुणिताः सङ्ख्या निधयश्चत्वारो लघवो यस्मिन् तेन समुदायेन कविभी रचिता पदर्शितातिः पदश्रेणिर्यस्य तत् अर्थात् पूर्वार्धे षोडशगुरव उत्तरार्द्धे द्वात्रिंशल्लघवः कार्या इति । सा अनङ्गक्रीडा नाम च्छन्दो भवति समस्तोऽयं श्लोकः । "गश्चेत् सौम्या" इति "लः पूर्वश्चेज्ज्योतिः" इति पि० सूत्रे तु विन्यासभेदेन शिखाद्वैविध्ये नामान्तरेणोक्तम् ॥ १२ ॥

त्रिगुणनवलघुरवसितिगुरुरिति दलयुगकृततनुरिह रुचिरा ॥१३॥

इति मात्राप्रकरणम्

इति भट्टकेदाररचिते वृत्तरत्नाकरे द्वितीयोऽध्यायः ॥ २ ॥

त्रयो गुणा आवृत्तयो येषान्ते नवलघवो यस्याः सा त्रिगुणनवलघुः सप्तविंशति लघुकम् इत्यर्थः अवसितौ अवसाने गुरुर्यस्याः सा अवसितिगुरुः इत्येवं दलयुगेन खण्डयुग्मेन कृता तनुर्यस्या सा दलयुगकृततनुः रुचिरेति नाम छन्दः ॥१३॥ इति वृत्तरत्नाकराख्यछन्दःशास्त्रस्य संग्रहटीकयां मात्राप्रकरणवृत्तौ द्वितियोऽध्यायः ॥ २ ॥

अथेदानीं समवृत्ताध्यायमुपक्रमते ।

S

(उक्तायाम्) ग् श्रीः ॥ १ ॥

(उक्तायां १जातौ) अत्रोत्तरत्र च यत्रान्वयो न स्यात् तत्र यदि तदेति प्रायोऽध्याहारः । यदि ग्, गुरुर्नेयः पादे २ एकैको भवति तदा श्रीनाम छन्दो भवति ॥ १ ॥

S S

(अत्युक्तायाम्) गौ स्त्री ॥ २ ॥

(अत्युक्तायां २जातौ) यदि पादे पादे गौ द्वौ २ गुरू भवतस्तदा स्त्रीनाम छन्दो भवति ॥ २ ॥

म-गणः

S S S

(मध्यायाम्) मो नारी ॥ ३ ॥

(मध्यायां ३जातौ) यदि पादे पादे एकैको मो मगणो भवति तदा नारी नाम छन्दो भवति ॥

(टि०) १ पैङ्गले तु चूलिकापूर्वार्द्धतुल्यमुत्तरार्द्धं [illegible] [illegible] तद्भेदाविशेष ।

समन्वयः

रगणः

S S S

रो मृगी ॥ ३ ॥

यदि रो रगणो भवति तदा मृगी नाम छन्दो भवति (यङ्कला) ॥ ३ ॥

श्री ॥ गौ स्त्री ॥ मो नारी ॥ रो मृगी ॥ म्गौ चेत्कन्या ॥ भ्गौ गिति पङ्क्तिः ॥ त्यौ स्तस्तनुमध्या ॥ शशिवदना न्यौ ॥ स्सौ चेद्वसुमती ॥

समन्वयः

म० गु०२

S S S – S S

(प्रतिष्ठायाम्) म्गौ चेत् कन्या ॥ ४ ॥

एवं यावन्तः छन्दोभेदा भवन्ति तावन्त एवमवतार्याः (प्रतिष्ठायाम् (४) जातौ) चेत् यदि प्रतिपादं म्गौ मगणगुरू भवतस्तदा कन्या नाम छन्दो भवति ॥

ननु एतासां प्रतिष्ठान्तानां सूत्रानुक्तत्वादप्रामाण्यमिति चेन्न "द्विकौ ग्लौ" ८।२०"परे पूर्णम्"८।३४। इति रूपप्रस्तारकथने प्रदर्शितत्वात् (यगौ व्रीडा ॥ जग लासिनी ॥ भ्गौ सुमुखी ॥ सुमतिः स्गौ ॥ गौं समृद्धिः) ॥ ६ ॥

समन्वयः

भ० गु०गु०

S । । S S

(सुप्रतिष्ठायाम्) भ्गौ गिति पङ्क्तिः ॥५॥

(सुप्रतिष्ठायां ५ जातौ) यदि भ्गौ भगणो द्वौ गुरू च भवतः तदा पङ्क्तिर्नाम छन्दो भवति। गौं गिति प्रीतिः ॥ सती जगौ गः ॥ मन्दा तलगैः ॥५॥

"तनुमध्या त्यौ"६।२। इति पि०.सू० ॥)

समन्वयः

त० य०

S S ।–। S S

(गायत्र्याम्) त्यौ स्तस्तनुमध्या ॥ ६ ॥

(गायत्र्याम् ६ जातौ) यदि पादे पादे त्यौ तगण-जगणौ स्तः भवतस्तदा तनुमध्या नाम छन्दो भवति ॥

समन्वयः

न० य०
। । ।-। ऽ ऽ
शशिवदना न्यौ ॥
शशीति यदि न्यौ नगण-यगणौ स्यातां तदा शशिवदना ॥

त० स०
ऽ ऽ ।-। । ऽ
त्सौ चेद्वसुमती ॥
त्साविति चेद्यदि त्सौ तगण-सगणौ भवतस्तदा वसुमती नाम उक्तेति । एतदन्तं पादान्ते एव यतिरित्याम्नायः (विद्युल्लेखा मो मः ॥ मौ सावित्रीमाहुः ॥ म्रौ यस्याः सा नदी ॥ म्सौ प्रोक्तं मुकुलम् ॥ मालिनी मभ्यौ स्यात् ॥ सयुगं रमणी ॥ (स्याद्रौ स्रग्विणी ॥ यथौ सोमराजी ॥ स्यान्म्सौ सोमकुलम् ॥ कामलतिका म्यौ ॥ सूत्रचतुष्टयमेतत्सेतुटीकाटिप्पण्याम् ॥ मधु यदि ननगाः॥ कुमारललिता ज्सौ ग् ॥ म्सौ गः स्यान्मदलेखा॥

समन्वयः

न० न० गु०
। । ।-। । ।-ऽ
(उष्णिहि) मधु यदि ननगाः ॥ ७ ॥
(उष्णिहि ७ जातौ) यदि ननगाः द्वौ नगणौ एको गुरुश्च भवति तदा मधुसञ्ज्ञं छन्दो भवति ॥ ७ ॥

"कुमारललिता ज्सौ ग्" इति पि० सू० ६ । ३ ॥

समन्वयः

ज० स० गु०
। ऽ ।-। । ऽ- ऽ
कुमारललिता ज्सौ ग् ॥
कुमार्येति ज्सौ ग् जगण-सगणौ गुरुश्च कुमारललिता ॥

समन्वयः

म० स० गु०
ऽ ऽ ऽ-। । ऽ
म्सौ गः स्यान्मदलेखा ॥

(टि०) १ एवमग्रे टीकायां स्थलान्तरैः पुस्तकान्तरोपलब्धान्यधिकानि छन्दांसि ज्ञातानि ज्ञेयानि ॥

म्सावितिं यदा म्सौ मगण-सगणौ गः गुरुश्च भवति तदा मदलेखा। पादान्ते यतिः॥ स्रगैर्हंसमाला॥ मधुमति ननगाः॥ चूडामणि स्तभगात्॥ (क्वचित्) मधुमती नभगाः॥ ७॥

भौ गिति चित्रपदा गः॥ मो मो गो गो विद्युन्मालां॥ माणवकं भात्तलगाः॥ म्नौ गौ हंसरुतमेतत्॥ जौ समानिका गलौ च॥ प्रमाणिका जरौ लगौ॥ वितानमाभ्यां यदन्यत्॥

"चित्रपदा भौ गौ" इति पि० सू० ६। ५॥

समन्वयः

म० म० गु० २
S । ।– S । ।–S S

(अनुष्टुभि) भौ गिति चित्रपदा गः॥ ८॥

(अथानुष्टुभि ८ जातौ) यदा भौ द्वौ भगणौ ग् गः गुरुद्वयं च भवति तदा चित्रपदा नाम छन्दो भवति। पादान्ते यतिः॥ ८॥

"विद्युन्माला मौ गौ" इति पि० सू० ६। ६॥

समन्वयः

म० म० गु०२
S S S– S S S– S S

मो मो गो गो विद्युन्माला

मो इति यदा मो मो द्वौ मगणौ गो गो द्वौ गुरू च स्यातां। तदा विद्युन्माला नाम छन्दः। चतुर्भिर्यतिरत्र॥

"माणवकक्रीडितकं भ्तौ लगौ" इति पि० ६। ७॥

समन्वयः

भ० त० ल०गु०
S । ।–S S ।–।–S

माणवकं भात्तलगाः

माणवकमिति यदि भात् भगणात् परे तलगाः तगण-लघु-गुरवो भवन्ति तदा माणवकं नाम छन्दः। चतुर्भिः २ यतिः॥

"हंसरुतं म्नौ गौ" इति प्रा० पि० सू० ६॥८॥

समन्वयः

म० न०गु०२

S S S-| | |-S-S

म्नौ गौ हंसरुतमेतत्

म्नाविति यदि म्नौ मगण-नगणौ गौ द्वौ गुरू च चेत्तत् हंसरुतं नाम छन्दः ॥

समन्वयः

र० ज० गु०ल०

S | S--| S |--S--|

जौं समानिका गलौ च

जौंविति यदि जौं रगण-जगणौ गलौ गुरु-लघू च भवतस्तदा समानिका नाम छन्दः ॥

ज० र० ल०गु०

| S |--S | S--|--S

प्रमाणिका जरौ लगौ

प्रमाणिकेति यदा जरौ जगण-रगणौ लगौ लघु-गुरू च तदा प्रमाणिका नाम छन्दः । नगस्वरूपिणीत्यस्या नामान्तरं श्रुतबोधादौ ॥ तद्यथा

"द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा । तदा निवेदयन्ति तां बुधा नगस्वरूपिणीम्" ॥१॥

"वितानमन्यत्" इति पि० सू० ५।८

समन्वयः

ज० त० गु०२

| S |--S S |--S--S

वितानमाभ्यां यदन्यत्

वितानमिति आभ्यां समानिका-प्रमाणिकाभ्यां यदन्यदनुष्टुब्जातीयं छन्दः तद्वितानं नाम भवति॥ तत्र च केचिद्बहुधा नियमं विदधति परन्तु सूत्रकृतानुक्तत्वान्न तत्प्रमाणयामः ॥ "वितानमन्यत्" इति सामान्यत एव तत्सूत्रम् । यतिः पादान्ते अनियता वा (नाराचिका तरौ लगौ । नागरकं भरौ लगौ ॥ *जौं जगौ च सिंहलेखा ॥ ८ ॥

---

* एतच्चिह्नाङ्कितमग्रेऽपि च सर्वत्र सत्पुस्तकटिप्पण्यां द्रष्टव्यम् ।

रान्ससाविह हलमुखी ॥ भुजगशिशुभृता नौ मः ॥

"हलमुखी नौ स्" इति पि० सू० ६।६॥

समन्वयः

र० न० स०
S । S—। । ।—। । S
(वृहत्यां) रान्ससाविह हलमुखी ॥ ६ ॥

अथ (वृहत्यां (६)जातौ) इहास्मिन् शास्त्रे यदि रात् रगणात्परौ नसौ नगण-सगणौ भवतस्तदा हलमुखी नाम छन्दः स्यात्। त्रिभिः षड्भिश्च यतिः॥

"भुजगशिशुभृता नौ म्" इति पि० सू० ६।७॥

समन्वयः

न० न० म०
। । ।—। । ।—S S S
भुजगशिशुभृता नौ मः

भुजगेति यदि नौ द्वौ नगणौ ततो मो मगणश्च भवति तदा भुजगशिशुभृता नाम छन्दो भवति। सप्तभिर्द्वाभ्यां च यतिः॥ भद्रिकेति रनैरियम्॥

म्सौ ज्गौ शुद्धविराडिदं मतम् ॥ म्नौ य्गौ चेति पणवनामेदम् ॥ जौं रगौ मयूरसारिणी स्यात् ॥ भ्मौ सगयुक्तौ रुक्मवतीयम् ॥ ज्ञेया मत्ता मभसगयुक्ता॥ चम्पकमाला चेद्भमसाद्गः॥ नरजगैर्भवेन्मनोरमा॥

"शुद्धविराण्मसौ जगौ" इति पि० सू० ६।१०॥

समन्वयः

म० स० ज० गु०
S S S—। । S—। S ।—S
(पङ्क्तौ) म्सौ ज्गौ शुद्धविराडिदं मतम्

(पङ्क्त्यां (१०) जातौ) यदि म्सौ मगण-सगणौ ज्गौ जगणं-गुरू च भवतस्तदा शुद्धविराड् इति मतमभिमतम्। पादान्ते यतिः॥

"पणवो म्नौ ग्गौ" इति पि० सू० ६।११

समन्वयः

म० न० य० गु०

S S S–। ।।–। SS–S

म्नौ ग्गौ चेति पणवनामेदम्

म्नाविति यदा म्नौ मगण-नगणौ ग्गौ जगण-गुरू च भवतस्तदा पणवनामकं छन्दः। पञ्चभिः २ यतिः॥

"मयूरसारिणी जौ गौ" इति पि० सू० ६।१२

समन्वयः

र० ज० र० गु०

S । S । S । S । S S

जौ रगौ मयूरसारिणी स्यात्

जौविति यदि जौ रगण-जगणौ रगौ रगण-गुरू च भवतस्तदा मयूरसारिणी नाम छन्दः स्यात्। पादान्ते यतिः॥

"रुक्मवती भ्मौ स्गौ" इति पि० सू० ६।१२॥

समन्वयः

भ० म० स० गु०

S । ।–S S S–। । S–S

भ्मौ सगयुक्तौ रुक्मवतीयम्

भ्माविति यदि भ्मौ मगण-सगणौ सगाभ्यां सगण-गुरुभ्यां युक्तौ भवतस्तदा इयं रुक्मवती नाम छन्दो भवति। पादान्ते यतिः॥

"मत्ता म्भौ स्गौ" इति पि० सू० ६।१३

समन्वयः

म० भ० स० गु०

SS S–S ।।–। । S–S

ज्ञेया मत्ता मभसगयुक्ता

ज्ञेयेति यदा मभसगैः मगण-भगण सगण-गुरुभिर्युक्ता भवति तदा मत्ता ज्ञेया। चतुर्भिः षड्भिश्च यतिः॥

समन्वयः

म० म० स० गु०
S | | — S S S — | | S — S

चम्पकमाला चेद्भमसाद्गः ॥

चम्पकेति चेद्यदि भमसाद् भगण-मगण-सगणात् गो गुरुर्भवति तदा चम्पकमाला नाम छन्दः स्यात् । पञ्चभिः २ यतिः ॥

समन्वयः

न० र० ज० गु०
| | | — S | S — | S | — S

नरजगैर्भवेन्मनोरमा ॥

नेति यदि नरजगैः नगणजगणरगणगुरुभिः रचिता भवेत्तदा मनोरमा नाम छन्दो भवति । अत्रापि पादान्ते एव यतिः ॥ १० ॥

"उपस्थिता त्जौ ज्गौ" ६ । १५ इति पि० सू०

समन्वयः

त० ज० ज० गु०
S S | — | S | — | S | — S —

त्जौ जो गुरुणेयमुपस्थिता ॥

त्जौ तगण-जगणौ जो जगणश्च गुरुणा सह स्युः तदेयमुपस्थिता उक्ता कथिता मुनिना । तथा च "उपस्थिता त्जौ ज्गौ" पि० सू० ६—१५ इति । पादे यतिः २+८ इत्येके (दीपकमाला चेद्भमौ जगौ ॥ श्लेषा हंसी भमनगयुक्ता ॥ त्जौ जो गुरुणेयमुपस्थिता) ॥

स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥ उपेन्द्रवज्रा जतजास्ततो गौ ॥
अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥
इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम ॥
सान्द्रपदं भ्तौ नगलघुभिश्च ॥ नजजलगैर्गदिता सुमुखी ॥
दोधकवृत्तमिदं भभभाद्गौ ॥ शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः ॥
वातोर्मीयं कथिता म्भौ तगौ गः ॥ म्भौ न्लौ गः स्याद् भ्रमरविलसितम् ॥
रान्नराविह रथोद्धता लगौ ॥ स्वागतेति रनभाद्गुरुयुग्मम् ॥

ननसगगुरुरचिता वृत्ता ॥ ननरलगुरुभिश्च भद्रिका ॥

श्येनिका रजौ रलौ गुरुर्यदा ॥ मौक्तिकमाला यदि भतनाद्गौ ॥

उपस्थितमिदं ज्सौ ताद्गकारौ ॥

"इन्द्रवज्रा तौ ज्गौ ग्" ६ । १६ इति पि० सू०

समन्वयः

त० त० ज० गु० गु०

ऽ ऽ ।–ऽ ऽ ।–। ऽ ।–ऽ– ऽ

(त्रिष्टुभि) स्यादिन्द्रवज्रा यदि तौ जगा गः ॥

(त्रिष्टुभि(११)जातौ) स्यादिति यदि तौ द्वौ तगणौ ज्गौ जगण-गुरू गो गुरुश्च भवति तदा इन्द्रवज्रा नाम छन्दः स्यात् । ५ । ६ यतिः ॥

"उपेन्द्रवज्रा ज्तौ ज्गौ ग्" ६ । १७ इति पि० सू०

समन्वयः

ज० त० ज० गु०२

। ऽ ।–ऽ ऽ ।–। ऽ ।–ऽ ऽ

उपेन्द्रवज्रा जतजास्ततो गौ ॥

उपेन्द्रेति यदि जतजा जगण-तगण-जगणास्ततोऽप्रतो गौ द्वौ गुरू च भवतस्तदा उपेन्द्रवज्रा नाम छन्दो भवति । ५ । ६ यतिः ॥

"आद्यन्तावुपजातयः" ६ । १७ इति पि० सू०

समन्वयः

ज० त० ज० गु०२ त० त० ज० गु०२

। ऽ ।–ऽ ऽ ।-। ऽ ।–ऽ ऽ–ऽ ऽ ।–ऽ ऽ ।-। ऽ।-ऽ ऽ

अनन्तरोदीरित लक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥

अनन्तरेति अनन्तरशब्देन पाश्चात्यवृत्तद्वयमिन्द्रवज्रोपेन्द्रवज्राख्यं गृह्यते यस्या इमौ यदीयौ पादौ अनन्तरमुदीरतमनन्तरोदीरितं तच्च तत् लक्ष्म लक्षणं तद्भजतः तौ अनन्तरोदीरितलक्ष्मभाजौ स्यातां ता उपजातय उपजातिनामकानि वृत्तानि उच्यन्ते ॥

इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम ॥

इत्थमिति अनेन प्रकारेण अन्यास्वपि जातिषु जगत्यादिषु सर्वासु यथासम्भवं

मिलितासु मिश्रितासु सतीषु पूर्वाचार्या इदमेव नाम स्मरन्ति । यथा कुमारसम्भवे "अस्त्युत्तरस्यां दिशि देवतात्मा" "हिमालयो नाम नागाधिराजः" अत्र स्मरन्तीत्यनेन कविप्रयोगानुरोधेन मिश्रणं विवक्षितमिति सूचितम् । परस्परपादमिश्रणे चतुर्दशास्या भेदाः तथा चोक्तम् ।

एकत्र पादे चरणद्वये वा पादत्रये वाऽन्यतरः स्थितश्चेत् ॥
तयोरिहान्यत्र तदोहनीयाश्चतुर्दशोक्ता उपजातिभेदाः ॥

समन्वयः

भ॰ त॰ न॰ गु॰ल॰
S । ।-S S ।-। । ।-S ।
सान्द्रपदं भ्तौ नगलघुभिश्च ॥

सान्द्रेति यदि भ्तौ भगण-तगणौ नगलघुभिः नगण-गुरु-लघुभिश्च युतौ स्यातां तदा सान्द्रपदं नाम छन्दो भवति । पादे यतिः ॥

सुमुखी न्जौ ज्लौ ग् ॥ २ । इति प्राकृतपैङ्गले सू॰

समन्वयः

न॰ ज॰ ज॰ ल॰गु॰
। । ।-। S ।-। S ।-।-S
नजजलगैर्गदिता सुमुखी ॥

नेति नजजलगैः नगण-जगण-जगण-गुरु-लघुभिः कृता सुमुखी नाम कथिता॥
"सुमुखी न्जौ ज्लौ ग्" २ । इति प्रा॰ पै॰ सू॰ २ ॥

"दोधकं भौ भ्गौ ग्" ६ । १९ इति पि॰ सू॰

समन्वयः

S । ।-S । ।-S । ।-S S
दोधकवृत्तमिदं भभभाद्गौ ॥

दोधकेति यदि भभभात् भगणत्रयाद् गौ द्वौ गुरू भवतस्तदा इदं दोधकं नाम वृत्तं स्यात् । पदान्ते यतिः ॥

"शालिनी म्तौ त्गौ समुद्रऋषयः" ६ । २० इति पि॰ सू॰

समन्वयः

म० त० त० गु०गु०
S S S–S S | |–S S | |–S–S

+ शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः ॥

शालिनीति यदि म्तौ मगण-तगणौ तगौ-गः तगणो द्वौ गुरू च भवतोऽथचाऽब्धिलोकैश्चतुर्भिः सप्तभिश्चाक्षरैर्यतिर्भवति तदा शालिनी नाम उक्ता । अत्र छन्दसि चतुर्वर्णेभ्यः एका यतिः कार्या ततः सप्तवर्णेभ्यो द्वितीया यतिर्विधेया । परमत्र यदि यतिर्न स्यात् तदा छन्दोऽप्यलीकम् ॥

"वातोर्मी म्भौ तौ ग् चतुःस्वरा" ६ । २० इति पि० सू०

समन्वयः

म० भ० त० गु०गु०
S S S–S | |–S S | |–S–S

+ वातोर्मीयं गदिता म्भौ तगौ गः ॥

वातोर्मीति यदि म्भौ मगण-भगणौ तगौ तगण-गुरू गो गुरुश्च भवति तदा इयं वातोर्मी नाम । ४ । ७ यतिः ॥

समन्वयः

भ० त० न० गु०२
S | |–S S | |–| | |–S S

पञ्चर्तुभिः श्रीर्भतनगगैः स्यात् ॥

पञ्चेति यदि पञ्चर्तुभिः पञ्चभिः षड्भिश्च यतिर्भवति भतनगगैः भगण-तगण-नगणैर्गुरुभ्यां च रचिता भवति तदा श्रीर्नाम छन्दः स्यात् । ५ । ६ यतिः ॥

"भ्रमरविलसितं म्भौ न्लौ ग्" ६ । २१ इति पि० सू०

समन्वयः

म० भ० न० ल०गु०
S S S–S | |–| | |–|–S

म्भौ न्लौ गः स्याद् भ्रमरविलसिता ॥

म्भाविति यदि म्भौ मगण-भगणौ न्लौ नगण-लघू गो गुरुश्चेति भवति तदा भ्रमरविलसिता नाम स्यात् । ४ । ७ यतिः ॥

"रथोद्धता नौ लौ ग्" ६। २२ इति पि० सू०

समन्वयः

S I S-I I I-S I S-I-S

रान्नराविह रथोद्धता लगौ॥

रादिति इह छन्दोजातौ यदि रात् रगणात्परौ नरौ नगण-रगणौ। लगौ लघु-गुरू च भवतस्तदा रथोद्धता नाम। पादे यतिः॥

"स्वागता नौ भगौ ग्" ६। २३ इति पि० सू०

समन्वयः

र० न० भ० गु०२

S I S-I I I-S I I-S S

स्वागतेति रनभाद्गुरुयुग्मम्॥

स्वागतेति यदि रनभात् रगण-नगण-भगणात् गुरुयुग्मं द्वौ गुरू भवतस्तदा स्वागतेति छन्दो भवति। पादे यतिः॥

"वृत्ता नौ स्गौ ग्" ६। २४ इति पि० सू०

समन्वयः

न० न० स० गु०२

I I I-I I I-I I S-S S

ननसगगुरुरचिता वृत्ता॥

नेति ननसगगुरुभिः नगण-नगण-सगण-गुरु-गुरुभी रचिता वृत्ता नाम छन्दः। ४। ७ यतिः॥

"भद्रिका नौ लौ ग्" इति पि० प्रा० सू०॥ १३॥

समन्वयः

न० न० र० ल०गु०

I I I-I I I-I S S-I S

ननरलगुरुभिश्च भद्रिका॥

नेति ननरलगुरुभिः नगण-नगण-रगण-लघु-गुरुभिः कलृप्ता भद्रिका नाम छन्दो भवति। पादे यतिः॥

"श्येनी जौ लौं ग्" ६।२६ "विलासिनी जौ ग्गौ ग्" ६।२७ इति पि० सू०

समन्वयः

र०　ज०　र० ल० गु०
S | S — | S | — S | S — | — S
श्येनिका रजौ रलौ गुरुर्यदा ॥

श्येनिकेति एवं यदा रजौ रगण-जगणौ रलौ-रगण-लघू गुरुश्च तदा श्येनिका नाम छन्दः स्यात् । पादे यतिः ॥ पैङ्गले "विलासिनी जौ ग्गौ ग्" ॥ ६।२७ इत्यधिकमपि दृश्यते

"उपस्थितं ज्सौ त्गौ ग्" इति पि० सू० १५ ॥

समन्वयः

ज०　स०　त०　गु० २
| S | — | | S — S S | — S S
उपस्थितमिदं ज्सौ ताद्गकारौ ॥

यदा ज्सौ जगण-सगणौ ततः तात् तगणात्परौ गकारौ द्वौ गुरू च भवतस्तदा उपस्थितमिदं छन्दः स्यात् । पादे यतिः ॥ मः सो जो गुरुयुग्ममेकरूपम् ॥ वेतिका रजौ गुरुर्यदा ॥ मौक्तिकमाला यदि भतनाद्गौ ॥ उपचित्रमिदं सससा लगौ ॥ कुपुरुषजनिता ननौ गौं गः॥ अनवसिता न्यौ भ्गौ गुयदन्ते॥

चन्द्रवर्त्म गदितन्तु रनभसैः ॥ जतौ तु वंशस्थमुदीरितं जरौ ॥
स्यादिन्द्रवंशा ततजैरसंयुतैः ॥ इह तोटकमम्बुधिसैः प्रथितम् ॥
द्रुतविलम्बितमाह नभौ भरौ ॥ वसुयुगविरतिर्नौ म्यौ पुटोऽयम् ॥
प्रमुदितवदना भवेन्नौ रौं ॥ नयसहितौ न्यौ कुसुमविचित्रा ॥
रसैर्जसजसा जलोद्धतगतिः ॥ भुजंगप्रयातं भवेद्यैश्चतुर्भिः ॥
रैश्चतुर्भिर्युता स्रग्विणी संमता ॥ भुवि भवेन्नभजरैः प्रियंवदा ॥
त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः॥ धीरैरभाणि ललिता तभौ जरौ॥
प्रजाविह मौक्तिकदाम जजौ च ॥ विभावरी तु सा जरौ जरौ यतः॥
प्रमिताक्षरा सजससैरुदिता ॥ ननभरसहिताऽभिहितोज्ज्वला ॥

पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ॥अब्ध्यङ्गैः स्याज्जलधरमाला म्भौ स्मौ ॥ इह नवमालिनी नजभरौ भ्यौ ॥ स्वरशरविरतिर्ननौ रौ प्रभा ॥ भवति नजावथ मालती जरौ ॥ इति वद तामरसं नजजाद्यः ॥

"चन्द्रवर्त्म नौं भ्सौ" इति प्रा० पै० सू० १

समन्वयः

र० न० भ० स०
S | S—| | |—S' | |—| | S

(जगत्याम्)॥ चन्द्रवर्त्म गदितन्तु रनभसैः ॥

[जगत्याम् १२ जातौ] रनभसैः रश्च नश्च भश्च सश्च रनभसा रगण-नगण-भगण-सगणास्तैश्चन्द्रवर्त्मेति नाम छन्दः गदितं कथितम् । ४ । ८ यतिः ॥

"वंशस्था ज्तौ ज्रौ" इति पि० सू० ६ । २६

समन्वयः

ज० त० ज० र०
| S |—S S |—| S |—S | S

जतौ तु वंशस्थमुदीरितं जरौ

जेति यदि जश्च तश्च जतौ जगण-तगणौ तु पुनः जरौ जगण-रगणौ च भवतः।।३। वंशस्थं नाम छन्द उदीरितं कथितम् । पादे यतिः ॥

"इन्द्रवंशा तौ ज्रौ" इति पि० सू० ६ ।

समन्वयः

त० त० ज० र०
S S |—S S |—| S |—S | S

स्यादिन्द्रवंशा ततजै रसंयुतैः ॥

स्यादिवि रसंयुतैः अन्ते रगणेन संयुक्तैः ततजैः तगण-तगण-जगणैः इन्द्रवंशा स्यात् । पादे यतिः ॥

"तोटकं सः" इति पि० सू० ६ । ३२ ॥

समन्वयः

स० स० स० स०
। । ऽ–। । ऽ–। । ऽ– । । ऽ
+ इह तोटकमम्बुधिसैः प्रथितम् ॥

इहेति इह छन्दोजातौ अम्बुधिसैश्चतुर्भिः सगणैः तोटकं प्रथितम् । ६ । ६ यतिः ॥

"द्रुतविलम्बितं न्भौ भ्रौ" इति पि० सू० ६।३१ ॥

समन्वयः

न० भ० भ० र०
। । ।–ऽ । ।–ऽ । ।–ऽ । ऽ
+ द्रुतविलम्बितमाह नभौ भरौ ॥

द्रुतेति यदा नभौ नश्च भश्चेति नगण–भगणौ भरौ भगण–रगणौ च भवतस्तदा द्रुतविलम्बितमाह उक्तवान् मुनिः । (पादे यतिः) तथा च सूत्रं "द्रुतेति ॥

"पुटो नौ म्यौ वसुसमुद्रः" इति पि० सू० ६ । २२ ॥

समन्वयः

न० न० म० य०
। । ।–। ।–ऽ ऽ ऽ–। ऽ ऽ
वसुयुगविरतिर्नौ म्यौ पुटोऽयम् ॥

वस्विति यदि नौ द्वौ नगणौ म्यौ मगण-यगणौ च यत्र । वसवोऽष्टौ युगानि चत्वारि च तैर्यतिर्यत्र सोऽयं पुटो नाम छन्दः ॥

"चञ्चलाक्षिका नौ रौ" इति सू० ६ । ३७ ॥

समन्वयः

न० न० र० र०
। । ।-। । ।-ऽ । ऽ–ऽ । ऽ
प्रमुदितवदना भवेन्नौ रौ ॥

प्रमुदितेति नौ द्वौ नगणौ रौ द्वौ रगणौ च यत्र भवतः सा प्रमुदितवदना नाम भवेत् । पादे यतिः[1] ॥ पैङ्गले तु "चञ्चलाक्षिका इति नाम्नोक्ता ॥

"कुसुमविचित्रा न्यौ न्यौ" ६ । ३६ ॥

(टि०) १ यतिस्थानमित्यर्थः ।

समन्वयः

न० य० न० य०

। । । । S S । । । । S S

नयसहितौ न्यौ कुसुमविचित्रा ॥

न्वेति यत्र न्यौ नगण-यगणौ नयसहितौ नगण—यगणसंयुक्तौ स्यातां सा कुसुमविचित्रा नाम स्यात् । पादे यतिः ॥ "ततं नौ म्रौ ६ । ६ ५ इत्यधिकमुक्तं पैङ्गले ॥

जलोद्धतगतिर्ज्सौ ज्सौ रसर्तवः इति पि० सू० ६ । ३७ ॥

समन्वयः

ज० स० ज० स०

। S । । । S । S । । । S

रसैर्जसजसा जलोद्धतगतिः ॥

रसैरिति यत्र रसैः षड्भिः२ यतिः । तथा जसजसा जगण-सगण-जगण-सगणाः स्युः सा जलोद्धतगतिर्नाम छन्दः ॥

"भुजङ्गप्रयातं यः" इति पि० सू० ६ । ३८ ॥

समन्वयः

य० य० य० य०

। S S । S S । S S । S S

भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः ॥

भुजङ्गेति चतुर्भिः यैः यगणैर्भुजङ्गप्रयातं नाम छन्दो भवेत् । ६ । ६ यतिः ॥

"स्रग्विणी रः" इति पि० सू० ६ । ३९

समन्वयः

र० र० र० र०

S । S S । S S । S S । S

रैश्चतुर्भिर्युता स्रग्विणी संमता ॥

रैरिति चतुर्भी रैः रगणैः युता स्रग्विणी सम्मता अभिमता मुनेः । पादे यतिः ॥ तथाच सूत्रम् ॥ "स्रग्विणी रः" ६ । ३९ इति

(टि०) १ यतिस्थानम् (६।६) इत्यर्थः । २ चत्वार इति भावः ।

"प्रियंवदा न्भौ ज्रौ" प्रा० पै० सू०

समन्वयः

न० भ० ज० र०

| | |-s | |-| s |–s | s

भुवि भवेन्नभजरैः प्रियंवदा ॥

भुवीति नभजरैः नगण-भगण-जगण-रगणैः भुवि पृथिव्यां प्रसिद्धं प्रियंवदेति नाम छन्दो भवेत् । पादे यतिः ॥

"मणिमाला त्यौ त्यौ" इति प्रा० पि०सू०

समन्वयः

त० य० त० य०

s s |–| s s–s s |–| s s

त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः ॥

त्याविति यत्र त्यौ तगण-यगणौ त्यौ पुनः तगण-यगणौ च स्यातां सा मणिमाला नाम । परं गुहवक्त्रैः छिन्ना गुहः कार्तिकेयस्तस्य वक्त्राणि मुखानि षट् तत्संख्यया यतिर्विधेयेत्यर्थः ॥

"ललिता त्भौ ज्रौ" इति प्रा० पै० सू०

समन्वयः

त० भ० ज० र०

s s |–s | |–| s |–s | s

धीरैरभाणि ललिता तभौ जरौ ॥

धीरैरिति यत्र तभौ तगण-भगणौ जरौ जगण-रगणौ च स्यातां सा धीरैर्मनीषिभिः ललिता इति अभाणि उक्ता । पादे यतिः ॥

"मौक्तिकदाम जः[१]" इति प्रा० पै० सू०

समन्वयः

ज० ज० ज० ज०

| s |–| s |–| s,|–| s |

जजाविह मौक्तिकदाम जजौ च ॥

जेति यत्र जजौ जजौ चत्वारो जगणाः तत् मौक्तिकदाम नाम छन्दः इह अस्मिन् शास्त्रे स्यात् । पादे यतिः ॥

(टि०) १ चत्वार इत्यभिप्रायः ॥

समन्वयः

ज० र० ज० र०

। S ।-S । S-। S ।-S । S

विभावरी तु सा जरौ जरौ यतः॥

विभेति यतो यत्र (सार्वविभक्तिकस्तसिः) जरौ जगण-रगणौ तु पुनः जरौ जगण-रगणौ भवतः सा विभावरी नाम। ६। ६ यतिः॥

"प्रमिताक्षरा स्जौ सौ" इति पि० सू० ६। ४०

समन्वयः

स० ज० स० स०

। । S-S S ।-। । S-। । S

प्रमिताक्षरा सजससैरुदिता॥

प्रमितेति सगण-जगण-सगण-सगणैः प्रमिताक्षरा नाम उदिता कथिता॥

"महोज्ज्वला नौ भ्रौ" इति प्रा० पै० सू०

समन्वयः

न० न० भ० र०

। । ।-। । ।-S । ।-S । S

ननभरसहिता ऽभिहितोज्ज्वला॥

नेति नगण-नगण-भगण-रगणैः या सहिता सा उज्ज्वला अभिहिता कथिता मुनिनेति शेषः॥

"वैश्वदेवी मौ याविन्द्रियऋषयः" इति प्रा० पि० सू०

समन्वयः

म० म० य० य०

S S S-S S S-। S S-। S S

पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ॥

पञ्चेति यत्र ममौ द्वौ मगणौ ततो यौ द्वौ यगणौ च स्यातां सा वैश्वदेवी। परन्तु पञ्चाश्वैश्छिन्ना पञ्चाक्षरैः प्रथमा यतिः ततोऽश्वैः सप्तभिर्द्वितीया यतिः कार्या॥

"जलधरमाला म्भौ स्मौ समुद्रवसव" इति प्रा० पि० सू०

समन्वयः

म०　भ०　स०　भ०
S S S–S ।।–।। S–S S S

+ अब्ध्यङ्गैः स्याज्जलधरमाला म्भौ स्मौ ॥

अब्धीति यत्र अब्ध्ययश्चत्वारोऽङ्गान्यष्टौ (अत्राङ्गशब्देन यमनियमासन-प्राणायाम-प्रत्याहार-ध्यान-धारणा-समाधयो योगाङ्गानि गृह्यन्ते) तैर्विरामः तथा म्भौ मगण-भगणौ स्मौ सगण-भगणौ च स्यातां सा जलधरमाला नाम छन्दो भवति। प्रा० पैङ्गले तु गाथाभेदत्वेन "जलधरमाला म्भौ स्मौ समुद्रवसव" इति सू० उक्तम् ॥

"नवमालिनी न्जौ भ्याविति" इति पि० सू० ६। ४४

समन्वयः

न०　ज०　भ०　य०
।। ।–। S ।–S ।।–। S S

इह नवमालिनी नजपरौ भ्यौ ॥

इहेति यदि नजपरौ नगण-जगणाभ्यां परौ भ्यौ भगण-यगणौस्तस्तदा इह जातौ नवमालिनी नाम भवति। ८। ४ यतिः ॥

समन्वयः

न०　न०　र०　र०
।। ।–। ।। ।–S । S–S । S

स्वरशरविरतिर्ननौ रौ प्रभा ॥

स्वरेति यत्र स्वरैः सप्तभिस्ततः शरैः पञ्चभिर्विरतिर्विरामः। तथा ननौ द्वौ नगणौ, रौ द्वौ रगणौ च भवतः सा प्रभा नाम छन्दः॥

"मालती न्जौ ज्रौ" इति प्रा० पि० सू०

समन्वयः

ज०　ज०　ज०　र०
।। ।–। S ।–। S ।–S । S

+ भवति नजावथ मालती जरौ ॥

भवतीति यत्र नजौ नगण-जगणौ अथ जरौ जगण-रगणौ च स्तः सा मालती नाम छन्दो भवति। ५। ७ यतिः ॥

"तामरसं न्जौ ज्यौ" इति प्रा० पि० सू० ६। १३ "कान्तोत्पीडा

म्भौ स्मौ" ६। ४१ "वाहिनी त्यौ म्यावृषिकामशराः" ६। ४२ पि० सू०

समन्वयः

न० ज० ज० य०

| | | – | S | – | S | – | S S

इति वद तामरसं नजजाद्यः॥

इतिति यत्र नजजात् नगण-जगण-जगणात्परो यो यगणः इति स्यात्तदा तामरसं नाम छन्दः त्वं वद कथय। पादे यतिः। पैङ्गलेतु अधिकं सूत्रद्वयं दृश्यते॥ नयुगरयुगलं च गौरी मता॥ पञ्चमुनी म्भौ सात्लयुता ललना॥ ललितमभिहितं नौ म्रौ नामतः॥ द्रुतपदं भवति नभनयश्चेत्॥ यौ त्यावितिनिर्दिष्टा पुष्पविचित्रा॥ *ननररघटिता तु मन्दाकिनी॥ भवति तति नजजैरसं युतैः॥ जरौ जरौ वद स्वमोचचामरम्॥

तुरगरसयतिर्नौ ततौ गः क्षमा॥ म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्॥ चतुर्ग्रहैरिह रुचिरा ज्भौ स्जौ गः॥ वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम्॥ सजसा जगौ भवति मञ्जुभाषिणी॥ ननततगुरुभिश्चन्द्रिकाऽश्वर्तुभिः॥

"क्षमा नौ ततौ ग् तुरगरसयतिः" इति प्रा० पि० सू० १०॥

समन्वयः

न० न० त० त० गु०

| | | – | | | – S S | – S S | – S

(अतिजगत्याम्) तुरगरसयतिर्नौ ततौ गः क्षमा।

[अथातिजगत्यां १३ जातौ] यत्र तुरगरसैः सप्तभिः षड्भिश्च यतिर्विरामः स्यात्तथा नौ द्वौ नगणौ ततौ द्वौ च तगणौ, गो गुरुश्च स्यात् सा क्षमा नाम छन्दः॥

"प्रहर्षिणी म्नौ ज्रौ ग् त्रिकदशकौ" इति पि० सू० ७।१॥

समन्वयः

म० न० ज० र० गु०

S S S – | | | – | S | – S S S – S

म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्।

म्नाविति यत्र म्नौ मगण-नगणौ ज्रौ जगण-रगणौ गो गुरुश्च स्यात् । तथा त्रिदशयतिः त्रिभिरक्षरैस्ततो दशाक्षरैश्च यतिर्विरामः स्यात् इयं प्रहर्षिणी नाम छन्दः॥

"रुचिरा ज्भौ स्जौ ग् चतुर्नवकौ" इति पि० सू० ७।२॥

समन्वयः

ज० भ० स० ज० गु०

। ऽ । - ऽ । । - । । ऽ - ऽ । ऽ - ऽ

चतुर्ग्रहैरिह रुचिरा ज्भौ स्जौ गः ॥

चतुरिति यत्र ज्भौ जगण-भगणौ तथा स्जौ सगण-जगणौ गो गुरुश्च स्यात् । सा रुचिरा नाम छन्दः । इह छन्दसि चतुर्ग्रहैश्चतुर्भिरक्षरैः प्रथमा यतिः ततो ग्रहैर्नवभिरक्षरैर्द्वितीया यतिः कार्या ॥

"मत्तमयूरं म्तौ य्सौ ग् समुद्रनवकौ" इति पि० सू० ७।३॥

समन्वयः

म० त० य० स० गु०

ऽ ऽ ऽ - ऽ ऽ । - । ऽ ऽ - । । ऽ - ऽ

वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम् ॥

वेदैरिति यत्र वेदैश्चतुर्भिरक्षरैः रन्ध्रैर्नवभिश्च यतिः । तथा म्तौ मगण-तगणौ यसगाः यगण-सगण-गुरवश्च स्युः तन्मत्तमयूरं नाम छन्दः ॥

"मञ्जुभाषिणी स्जौ स्जौ ग्" इति प्रा० पि० सू० ।५॥

समन्वयः

स० ज० स० ज० गु०

। । ऽ - । ऽ । - । । ऽ - ऽ ऽ । - ऽ

सजसा जगौ भवति मञ्जुभाषिणी ।

सेति यत्र सजसा सगण-जगण-सगणाः स्युः जगौ जगण-गुरू च स्तः सा मञ्जुभाषिणी नाम । ५।८ यतिः ॥

"चन्द्रिका नौ तौ ग् मुनिरसैः" इति प्रा० पि० सू० ।६॥

समन्वयः

न० न० त० त० गु०

। । । - । । । - ऽ ऽ । - ऽ ऽ । ऽ

ननततगुरुभिश्चन्द्रिकाऽश्वर्तुभिः ॥

नेति ननततगुरुभिः नगण-नगण-तगण-तगण-गुरुभिः रचिता चन्द्रिका नाम छन्दः। परन्तु अश्वैः सप्तभिस्ततः ऋतुभिः षड्भिश्च यतिः कार्या॥उपस्थितमिदं ज्सौ त्सौ स गुरुकं चेत्॥ यमौ रौ विख्याता चञ्चरीकावली गः॥ जसौ स्जगावतिरुचिराऽम्बुधिग्रहैः॥ नसरयुगगैश्चन्द्रलेखर्तुलोकैः॥ ऋतुमुनियति विद्युन्ननौ तौ गुरुः॥ * जतौ सजौ गो भवति मञ्जुहासिनी॥ नवनन्दिनी सजसैसगुंरुयुक्तैः॥ कुटिलगतिर्नजौ सप्तभिस्तौ गुना॥

"गौरी नौ न्सौ ग्" इति पि० सू० ७। ४॥ अधिकं दृश्यते॥

म्तौ न्सौ गावक्षग्रहविरतिरसंबाधा॥ ननरसलघुगैः स्वरैरपराजिता॥
ननभनलगिति प्रहरणकलिका॥ उक्ता वसन्ततिलका तभजा जगौ गः॥
सिंहोन्नतेयमुदिता मुनिकाश्यपेन॥
उद्धर्षिणीति गदिता मुनिसैतवेन॥ रामेण सेयमुदिता मधुमाधवीति॥

"असंबाधा म्तौ न्सौ गाविन्द्रियनवकौ" इति पि० सू० ७। ५

समन्वयः

म० त० न० स० गु०२
S S S—S S I—I I I—I I S—S S

(शक्वर्याम्) म्तौ न्सौ गावक्षग्रहविरतिरसंबाधा॥

(अथ शक्वर्यां (१४) जातौ) यदा म्तौ मगण-तगणौ न्सौ नगण-सगणौ गौ द्वौ गुरू च तदा असंबाधा नाम छन्दो भवति। अत्र अक्षैरिन्द्रियैः पञ्चभिः ग्रहैः नवभिश्च यतिः कार्या॥

"अपराजिता नौ सौ ल्गौ स्वरऋषयः" इति पि० सू० ७। ६

समन्वयः

न० न० र० स० ल०गु०
I I I—I I I—S I S—I I S—I S

ननरसलघुगैः स्वरैरपराजिता॥

नेति ननरसलघुगैः नगण-नगण-रगण-सगण-लघु-गुरुभी रचिताऽपराजिता नाम छन्दः। अत्र स्वरैः स्वराश्च २ इत्येकशोपे सप्तभिः २ यतिः कार्या॥

"प्रहरणकलिता नौ भ्नौ ल्गौ च" इति पि० सू० ७ । ६

समन्वयः

न० न० भ० न० ल०गु०

। । ।–। । ।–ऽ । ।–। । ।–।–ऽ

ननभनलगिति प्रहरणकलिका ॥

नेति भनलगीति नश्च नश्च भश्च नश्च लश्च गश्च तेषां समाहारः ननभनलग् नगण-नगण-भगण-नगण-लघु-गुरव इति यत्र सा प्रहरणकलिका नाम छन्दः ५ । ६ यतिः॥

"वसन्ततिलका त्भौ जौ गौ" ७ । ८ "सिंहोन्नता काश्यपस्य" ७ । ९ "उद्धर्षिणी सैतवस्य" ७ । १० इति पि० सू०

समन्वयः

त० भ० ज० ज० गु०गु०

ऽ ऽ ।–ऽ । ।–। ऽ ।–। ऽ ।–ऽ–ऽ

उक्ता वसन्ततिलका तभजा जगौ गः ॥

सिंहोन्नतेयमुदिता मुनिकाश्यपेन ॥

उद्धर्षिणीति गदिता मुनिसैतवेन ॥

रामेण सेयमुदिता मधुमाधवीति ॥

उक्तेति यत्र तभजा तगण-भगण-जगणा जगौ जगण-गुरू गः पुनः गुरुश्च सा वसन्ततिलका नाम उक्ता यथासम्भवं यतिः । मतान्तरमाह—सिंहेति इयं वसन्ततिलका काश्यपेन मुनिना सिंहोन्नता उक्ता भणिता । तथा सैतवेन मुनिना इयमुद्धर्षिणी निगदिता ॥ नवतजगुरुगैः सप्तयतिर्नदी स्यात् ॥ लक्ष्मीरन्तविरामा म्सौ तमौ गुरुयुग्मम् ॥ त्रिननगगिति वसुयति सुपवित्रम् ॥ मध्यक्षमा युगदशविरामा म्भौ न्यौ गौ ॥ (इदमेव कुटिलमित्यन्ये) नजभजला गुरुश्च भवति प्रमदा ॥ सजसा यलौ गिति शरग्रहैर्मञ्जरी ॥ नजभजगैः गुरुश्च वसुपद्कुमारी ॥ नरनरैर्लगौ च रचितं सुकेशरम् । *सजसायलगाश्च वसुधा सपञ्चग्रहैः ॥ *युगदिग्भिः कुटिलमिति म्नस्थौ न्यौ गौ ॥ * नजभजलग्युता धृतिरियं कथिता ॥ *म्भौ न्यौ गौ चज्जलधिदश च हंसश्येनी ॥ *म्भौ न्यौ लौ चेद्भवति जगति चन्द्रौतसः ॥ *देवरवरतनु भननलघुगैः ॥ *मरतो नो भो गौ यदि गदिता वासन्तीयम् ॥ * ननततगयुगैः सप्तभिर्वै वसन्तः ॥

(टि०) १ नगनीरा २ श्रीपिङ्गलेन कथितानि च पाठान्तरम् ॥

द्विहतहयलघुरथ गिति शशिकला ॥ स्रगिति भवति रसनवकयतिरियम् ॥

वसुमुनियतिरिह मणिगुणनिकरः ॥

मा बाणाः स्युर्यस्यां सा कामक्रीडा संज्ञातव्या ॥

ननमयययुतेऽयं मालिनी भोगिलोकैः ॥

भवति नजौ भजौ रसहितौ प्रभद्रकम् ॥ सजना नयौ शरदशकविरतिरेला॥

म्रौ म्यौ यान्तौ भवेतां सप्ताष्टकैश्चन्द्रलेखा ॥

"चन्द्रावती नौ नौ स्" ७ । १० इति पि० सू०

समन्वयः

ल० १४ गु०

| | | | | | |.| | | | | | | | | |–ऽ

(अतिशक्वर्याम्) द्विहतहयलघुरथ गिति शशिकला ॥

(अथातिशक्वर्यां १५ जातौ) द्विहता द्वाभ्यां गुणिता हयाः सप्त जाताश्चतुर्दश प्रागेव तावन्तो लघवो यत्र अथ तदनु ग् एको गुरुश्च सा शशिकला नाम छन्दो भवति । ७ । ८ यतिः ॥

"मालर्तुनवकौ चेत्" इति पि० सू० ७।१२॥

समन्वयः

गु०

१४ ल० ऽ

स्रगिति भवति रसनवकयतिरियम् ॥

स्रगिति यदि इयं शशिकला रसनवकयतिः रसनवकैः षड्नवभिर्यतिर्यस्याः तादृशी भवति तदेत्यनया रीत्या स्रग्नाम छन्दो भवति ।

"मणिगुणनिकरोऽष्टावृषयः" इति पि० सू० ७।१३॥

समन्वयः

वसुमुनियतिरिह, मणिगुणनिकरः ॥

वस्विति इह अस्यां शशिकलायां यदि वसु-मुनिभिः अष्ट-सप्तभिर्यतिर्यत्र तादृशी तदेयं मणिगुणनिकरो नाम छन्दः स्यात् ॥

(टि०) १ यति (७।१२) स्यात्तदा माला इत्यर्थः । २ यति (८।८) स्रगिति नामेत्यर्थः ।

"सारङ्गिका माः पञ्च" इति प्रा० पि० सू० २ ॥

समन्वयः

म० म० म० म० म०

ऽ ऽ ऽ– ऽ ऽ ऽ– ऽ ऽ ऽ–ऽ ऽ ऽ–ऽ ऽ ऽ

मा बाणाः स्युर्यस्यां सा कामक्रीडा संज्ञातव्या ॥

मेति यस्यां बाणाः पञ्च मा मगणाः स्युः सा कामक्रीडा संज्ञातव्या बोध्या ॥

"मालिनी नौ म्यौ य्" इति पि० सू० ७।१४॥

समन्वयः

न० न० म० य० य०

। । ।–। । ।–ऽ ऽ ऽ–। ऽ ऽ–। ऽ ऽ

ननमयययुतेऽयं मालिनी भोगिलोकैः ॥

नेति या ननमययैः नगण-नगण-मगण-यगणैः युता इयं मालिनी नाम छन्दः।

अस्यां च भोगिलोकैः अष्टभिः सप्तभिश्च यतिर्विधेया ॥

"प्रभद्रकं न्जौ भ्जौ र" इति प्रा० पि० सू० ६॥

समन्वयः

न० ज० भ० ज० र०

। । ।–। ऽ ।–ऽ । ।–। ऽ ।–ऽ । ऽ

भवति नजौ भजौ रसहितौ प्रभद्रकम् ॥

भवतीति यदा नगण जगणौ भजौ भगण-जगणौ अन्ते रेण रगणेन सहितौ

तदा प्रभद्रकं नाम छन्दो भवति ।७।८ यतिः

"एलास्जौ नौ य् शरदशाभिः" इति प्रा० पि० सू० ७॥

समन्वयः

स० ज० न० न० य०

। । ऽ– । ऽ ।–। । ।–। । ।–। ऽ ऽ

सजना नयौ शरदशकविरतिरेला ॥

सेति यत्र सजना सगण-जगण-नगणाः नयौ नगण-यगणौ च भवतः तथा

शरदशकविरतिः पञ्चभिस्ततो दशभिर्वर्णैर्विरतिर्यतिर्यत्र सा एला नाम छन्दः ।

---

१ इदं प्राकृतपैङ्गले नामान्तरेणोक्तम् ।

चन्द्रलेखा म्रौ म्यौ य् स्वराष्टभिः इति प्रा० पि० सू० ७॥

समन्वयः

म० र० म० य० य०
S S S—S | S-S—S S-| S S—| S S

म्रौ म्यौ यान्तौ भवेतां सप्ताष्टकैश्चन्द्रलेखा ॥ १५ ॥

म्राविति यदि म्रौ मगण-रगणौ म्यौ मगण-यगणौ च यान्तौ यगणान्तौ भवेतां । यतिश्च सप्तभिरष्टाभिश्चाऽक्षरैर्भवेत्सा चन्द्रलेखासंज्ञा स्यात् ॥ नजभजरैर्विराजितमिदं सुकेसरम् ॥ चन्द्रलेखाभिधा रौ म्यौ यो विरामः स्वराष्टौ ॥ ननततमर-कृताङ्कैः स्वरैरुपमालिनी ॥ * भवतः सजौ ससयुतौ वृषभस्ततो यः ॥ राज्ञमद्वितयैरुदितं रमणीयकम् ॥

—o—

भ्रत्रिनगैः स्वरात्व मृषभगजविलसितम् ॥

नजभजरैः सदा भवति वाणिनी गयुक्तैः ॥

जरौ जरौ जगाविदं वदन्ति पञ्चचामरम् ॥

—o—

"ऋषभगजविलसितं भ्रौ नौ न्गौ स्वरनवकौ" इति पि०सू०७ १५

समन्वयः

भ० र० न० न० न० गु०
S | |-S | S—| | |-| | |—| | |—S

(अष्टयाम्) भ्रत्रिनगैः स्वरात्स्वमृषभगजविलसितम् ॥

अथ (अष्टयाम् १६ जातौ) भ्री भगण-रगणौ त्रिना नगणत्रितयं ततो गो गुरुरेकः एभिः ऋषभगजविलसितं नाम छन्दोऽत्र स्वरात्सप्तम्यः स्वं यतिः । ऋषभ गजविलसितम् ॥

वाणिनी न्जौ भ्जौ गौं इति प्रा० पि० सू०

समन्वयः

न० ज० भ० ज० र० गु०
| | |—| S |—S | |—| S |—S | S—S

नजभजरैः सदा भवति वाणिनी गयुक्तः ॥

नेति नजभजरैः नगण-जगण-भगण-जगण-रगणैर्गुरुणैर्गुरुसहितैः रचिता वाणिनी नाम छन्दो भवति । यथा सम्भवं यतिः ॥

समन्वयः

ज० र० ज० र० ज० गु०

| S | -S | S -| S | -S | S -| S | -S

जरौ जरौ जगाविदं वदन्ति पञ्चचामरम् ॥१६॥

जेति यत्र जरौ जगण-रगणौ पुनः जरौ जगण-रगणौ जगौ जगण-गुरू च इदं छन्दः पञ्चचामरं नाम छन्दोविद्वांसो वदन्ति कथयन्ति २ । २ यतिर्थेयष्टम्वा ॥ चित्रसंज्ञमीरितं रजौ रजौ रगौ च वृत्तम् ॥ जरौ जरौ ततो जगौ च पञ्च चामरं वदेत् ॥ संकथिना भरौ नरनगाश्च धीरललिता ॥ पञ्चभकारयुता-ऽश्वगतिर्यदि चान्त्यगुरुः ॥ * नजभभेन गेन च स्यान्मणिकल्पलता ॥

—०—

रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी ॥

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥

दिङ्मुनिवंशपत्रपतितं भरनभनलगैः ॥

रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा ॥

मदक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत् ॥

यदि भवतो नजौ भजजला गुरुर्नर्कुटकम् ॥

मुनिगुरुगुहकार्णवैः कृतयतिं वदकोकिलकम् ॥

—०—

"शिखरिणी य्मौ न्सौ भ्लौ गृतुरुद्राः" इति पि० सू० ७।२०॥

समन्वयः

य० म० न० स० भ० ल०गु०

| S S -S S S - | | | -| | S -S | | | -| -S

(अत्यष्टयाम्) रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।

(अथ अत्यष्टयां १७ जातौ) यत्र यमनसभलाः यगण-मगण-नगण-सगण भगण-लघवो गो गुरुश्च स्युः सा रसैः षड्भिः रुद्रैरेकादशभिश्च छिन्ना कृतविरुतिः शिखरिणी नाम छन्दः स्यात् ॥

"पृथ्वी जसौ जसौ यलौ ग्वसुनवकौ" इति पि० सू० ७।१७॥

समन्वयः

ज० स० ज० स० य० ल०गु०
। ऽ ।–। । ऽ– । ऽ ।–। । ऽ–। ऽ ऽ– ।–ऽ

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥

जेति यत्र जसौ जगण-सगणौ-जसयलाः जगण-सगण-जगण-लघवो गुरुश्च सा वसुभिः अष्टभिस्ततो ग्रहैः नवभिश्च यतिर्यस्याः सा पृथ्वी नाम छन्दः ॥

"वंशपत्रपतितं भ्रौ भ्नौ न्लौ ग् दिग्मुपयः" इति पि० सू० ७।८॥

समन्वयः

भ० र० न० भ० न० ल०गु०
ऽ । ।– ऽ । ऽ। । ।–ऽ । ।–। । ।–।–ऽ

दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ॥

दिगिति भरनभनलगैः भगण-रगण-नगण-भगण-नगण-लघु-गुरुभिः रचितं दिङ्मुनि दिशो दश मुनयः सप्त यतेः स्थानत्वेन यत्र तत् वंशपत्रपतितं नाम छन्दः यद्वा दिङ्मुनियाति वंशपत्रपतितमिति मध्यमपदलोपि एकं पदम् ॥

"हरिणी न्सौ म्रौ स्लौ ग् रसमुद्रऋषयः" इति पि० सू० ७।१६

समन्वयः

न० स० म० र० स० ल०गु०
। । ।–। । ऽ– ऽ ऽ ऽ– ऽ । ऽ–। । ऽ–।–ऽ

रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा ॥

रसेति यत्र रसैः षड्भिस्ततो युगैश्चतुर्भिस्ततो हयैः सप्तभिर्यतिः तथा नसौ नगण-सगणौ म्रौ मगण-रगणौ स्लौ सगण-लघू गो गुरुश्च तदा हरिणी नाम छन्दः स्यात् ॥

"मन्दाक्रान्ता म्भौ न्तौ तगौ ग समुद्रर्तुस्वराः" इति पि०सू० ७।१७

समन्वयः

म० भ० न० त० त० गु०२
ऽ ऽ ऽ– ऽ । ।–। । ।–ऽ ।–ऽ ऽ ।–ऽ –ऽ

मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत् ॥

मन्देति चेद्यदि जलधिभिश्चतुर्भिः षड्भिः अगैः सप्तभिश्च यतिः तथा म्भौ

मगण-भगणौ म्भौ नगण-तगणौ ततः तात् तगणात् गुरू च द्वौ स्यातां तदा मन्दाक्रान्ता नाम छन्दः ॥

"अवितथं न्जौ भ्जौ ज्लौ ग्" इति पिं० सू० ८ । १४

समन्वयः

न० ज० भ० ज० ज०ल०गु०

| | |-| S |-S | |-| S |-S S |-|-S

यदि भवतो नजौ भजजला गुरुर्नर्कुटकम् ॥

यदीति यदि नजौ नगण-जगणौ भवतः ततो भजजलाः भगण-जगण-जगण-लघवः ततो गुरुश्च स्यात्तदा नर्कुटकं नाम छन्दः । पैङ्गले तु गाथाभेदत्वेन "अवितथं न्जौ भ्जौ ज्लौ ग्" इत्युक्तम् ॥

"वस्विन्द्रियसमुद्राश्चेत्कोकिलकम्" इति पिं० सू० ८ । १४

समन्वयः

मुनिगुहकार्णवैः कृतयति वद कोकिलकम् ॥

मुनीति इदं नर्कुटकं मुनिगुहकार्णवैः मुनिभिः सप्तभिः गुहकैरिति गुहः कार्तिकेयस्तस्य कानि मुखानि षट् तैर्गुहकैः षड्भिः अर्णवैश्चतुर्भिश्च कृता यतिर्यत्र तत् मुनिगुहकार्णवैः कृतयति तत् तदा त्वं कोकिलकं नाम छन्दः कथय"कं शिरोम्बुनोः"। इत्यमरः । पैङ्गले तु गाथाप्रकरणे "वस्विन्द्रियसमुद्राश्चेत्कोकिलकम्" इत्युक्तम् ॥

रसयुगहयैर्युङ्नौ म्रौ स्लौ लगौ हि यदा हरिः ॥ भवेत्कान्ता युगरसहयैर्यभौ नरसा लगौ ॥ ससजा भजगा गु दिक्स्वरैर्भवति चित्रलेखा॥ *ससजैरतिशायिनी मता भजपरैर्गुरुभ्याम् ॥

---0---

स्याद्भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ ॥

---0---

"कुसुमितलता वेल्लिता म्तौ न्यौ यावन्द्रियर्तुस्वराः"(७।७इति पिं०सू०)

समन्वयः

म० त० न० य० य० य०

S S S-S S | |-| | |-| S S-| S S-| S S

(धृतौ) स्याद्भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्ता नयौ यौ ॥

(छन्दां १८ जातौ) यत्र भूतर्त्वश्वैः पञ्च-षट्-सप्तभिर्यतिः म्तौ मगण-तगणौ

नयौ नगण-यगणौ यौ द्वौ यगणौ च स्यातां सा कुसुमितलतावेल्लिता नाम स्यात् ॥ मात्सो जौ, भरसंयुतौ करि (८) बाणं(५)कै(५)र्हरिणप्लुतम् ॥ यदिह नयुगलं ततो वेदरेफैर्महामालिका ॥ पञ्चभकारकृताश्वगतिर्यदि चान्तसरचिता ॥ सुधा तर्कैस्तर्कै (६) र्भवति ऋतुभिर्यो मोनसततगाः ॥ वर्णाश्वैर्मनततमकैः कीर्तिता चित्रलेखेयम् ॥ भाद्रनना नसौ भ्रमरपदकमिदमभिहितम् ॥ शार्दूलं वद मास (१२) षट्कयति मः सौ जसौ रो मश्चेत् ॥ अर्थाश्चाश्वैर्मभनयरयुगैर्वृत्तं मतं केशरम् ॥ म्भौ न्जौ भ्रौ चेच्चलमिदमुदितं युगैर्मुनिभिः स्वरैः॥ *दशवसुविरतिर्ननौ रैश्चतुर्भिर्युता सालसा॥ *अधिकं दर्शयति ॥ ननौ रौ भवेतां रसौ तारका॥ *स्याद्भूतर्त्वश्वैर्मौ म्भौ विरतिश्चरिंसहविस्फूर्जितं यौ ॥ सौ जौ भरसंयुतौ करिवाणाख्यं हरनर्तनम् ॥

——०——

रसर्त्वश्वैर्यमौ न्सौ ररगुरुयुता मेघविस्फूर्जिता स्यात् ॥
सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ॥

——०——

" मेघविस्फूर्जिता य्मौ न्सौ रौ ग् रसर्त्वश्वैर्यतिः" इति प्रा०पि०सू

समन्वयः

य० म० न० स० र० र० गु०

। ऽ ऽ-ऽ ऽ ऽ-। । ।-। । ऽ-ऽ । ऽ-ऽ । ऽ- ऽ

(अतिधृतौ) रसर्त्वश्वैर्यमौ न्सौ ररगुरुयुता मेघविस्फूर्जिता स्यात् ॥

अथ (अतिधृत्यां १९ जातौ) यत्र न्सौ नगण-सगणौ स्यातां सा ररगुरुभिः रगण-रगण-गुरुभिर्युता रसैः षड्भिः ऋतुभिः पुनः षड्भिः अश्वैः सप्तभिश्च कृतविरामा मेघविस्फूर्जिता स्यात् ॥

"शार्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्यऋषयः" इति पि० सू०७।२२

समन्वयः

म० स० ज० स० त० त० गु०

ऽ ऽ ऽ-। । ऽ-। ऽ ।-। । ऽ-ऽ ऽ ।-ऽ ऽ ।-ऽ

सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ॥

सूर्येति यत्र मसजस्तताः मगण-सगण-जगण-सगण-तगण-तगणाः सगुरवः गुरुसहिताः तत् सूर्याश्वैः द्वादश-सप्तभिः कृतविरामं शार्दूलविक्रीडितं नाम छन्दः

स्यात् ॥ नयुगलजलगुरु निरन्तरं यदा स चामरः ॥ भूताश्वाश्वान्तं मतनसररगैः कीर्तितं पुष्पदाम ॥ वृत्तं बिम्बाख्यं शरमुनितुरगैर्म्भौ न्सौ ततौ चेद्गुरुः॥ इयं छाया ख्याता ऋतुरसहयैर्यो मनसा भ्तौ गुरुः॥ रसैः षड्भिर्लोकैर्यमनसजजा गुरुर्मकरन्दिका ॥ युगाश्वैः स्याद्यमनयजजगाः कीर्तिता मणिमञ्जरी ॥ गजाब्धितुरगैर्जसौ जसतभा गश्चेत्समुद्रततोः ॥ * नजभयसा जगौ च रचना शूलिककुञ्जिते सा ॥ * भौ जतौ तौ सगुरुकौ यदा दिग्ग्रहच्छेदभाग्भवति ॥

ज्ञेया सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः सुवदना ॥
त्री रजौ लगौ भवेदिहेदृशेन लक्षणेन वृत्तनाम ॥

"सुवदना म्रौ भ्नौ य्भौ ल्गावष्टर्षिस्वरसंवः" इति पि० सू० ७।१२॥

समन्वयः

म० र० भ० न० य० भ० ल० गु०
S S S-S । S-S । ।-। । ।-। S S-S । ।-।-S
+(कृतौ) ज्ञेया सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः सुवदना ॥

अथ (कृत्यां २० जातौ) मरभनयैर्युता मगण-रगण-भगण-नगण-यगणैः सहिता ततो भ्लौ भगण-लघू गो गुरुश्च स्यात् यत्र सप्ताश्वषड्भिः सप्तभिः अश्वैः सप्तभिः षड्भिश्च यतिः सा सुवदना ज्ञेया ।

"ग्लिति वृत्तम्" इति पि० सू० ७।२४॥

समन्वयः

र० ज० र० ज० र० ज० गु० ल०
S । S-। S ।-S । S-। S ।-S । S-। S ।-S-।
त्री रजौ गलौ भवेदिहेदृशेन लक्षणेन वृत्तनाम ॥

त्रिरिति यत्र त्रिवारं रजौ रगण-जगणौ ततो गलौ गुरु-लघू च स्याताम् इह शास्त्रे ईदृशेन लक्षणेन वृत्तनाम छन्दो भवेत् । पादान्ते यतिः ॥ रसैरश्वैरश्वैर्यमन

(टि०) १ यावद्भिर्वर्णैर्वृत्तं पूर्यते तावन्ति गुरुलघ्वक्षराणि यत्र तद् वृत्तं नाम छन्दः इत्यर्थः ।

नततगैर्गेन शोभेयमुक्ता ॥ * ख्याता पूर्वैः सुवंशायदिमरभनास्तद्वयं गौ गुरुश्च ॥

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥

"स्रग्धरा म्रौ भ्नौ यौ य् त्रिःसप्तकाः" इति पिं० सू० ७।२५॥

समन्वयः

म० र० भ० न० य० य० य०

S S S–S । S–S । ।–। । ।–। S S–। S S–। S S

(प्रकृतौ) म्रभ्नैर्यानां त्रयेण त्रिमुनि यतियुता स्रग्धरा कीर्तितेयम् ॥२१॥

अथ (प्रकृत्यां २१ जातौ) या म्रभ्नैः मगण-रगण-भगण-नगणैस्ततो यानां त्रयेण यगणत्रयेण रचिता त्रिमुनियति युता त्रयश्च ते मुनयः सप्त तैर्या यतिर्विरतिः तया युता त्रिभिस्ततः सप्तभिर्विरामसहितेति यावत् इयं स्रग्धरा कीर्तिता उक्ता ॥ सलिलनिधिर्मवेदिह नजौ भगणो जगणास्त्रयश्च रः ॥ भवति नजौ हि सिद्धिरिति भाज्जजजा यदि रो भविता ॥

भ्रौ नरना रनावथ गुरुर्दिगर्कविरमं हि भद्रकमिदम् ॥

"भद्रकं भ्रौ नौ नौ न्गौ दिगादित्याः" इति पिं० सू० ७।२६॥

समन्वयः

भ० र० न० र० न० र० न० गु०

S । ।– S । S–। । ।–S । S–। । ।–S । S–। । ।–।

(आकृतौ) भ्रौ नरना रनावथ गुरुर्दिगर्कविरमं हि भद्रकमिदम् ॥२२॥

(अथ आकृत्यां २२ जातौ) यत्र भ्रौ भगण-रगणौ ततो नरना नगण-रगण-नगणा रनौ रगण-नगणौ अथ अनन्तरं गुरु । इदं दिगर्कविरमं दिगर्कैः दशभिर्द्वादश-भिश्च विरमो यतिः यत्र तत् भद्रकं नाम छन्दः । अत्र हि इति पदं पादपूरणे ॥ सरभकाः ककनावसितौ सगुरुः कविभिः कथिता मदिरा ॥ * ललितं

भुजगेन्द्रेण भाषितमेतच्छन्मसरस्तजनगुभिः ॥ * सजता नसौ ररौ गः फणितुरगहयैः स्यान्महास्रग्धराख्या ॥ २२ ॥

यदिह नजौ भजौ भ्जभलगास्तदाऽश्वललितं हरार्कयति तत् ॥
मत्ताक्रीडा मौ त्नौ नौ न्लौ गिति भवति वसुशरदशयतियुता ॥

अश्वललितं न्जौ भ्जौ भ्जौ भ्लौ गुद्रादित्याः इति पि० सू० ७।२७॥

समन्वयः

न० ज० भ० ज० भ० ज० भ० ल०गु०
| | |–| S |–S | |–| S |-S | | –| S |-S | |–|–S
(विकृतौ) यदिह नजौ भजौ भ्जभजगास्तदाःश्वललितं हरार्कयति तत् ॥

(विकृत्यां २३ जातौ) यदिह शास्त्रे नजौ नगण-जगणौ ततो भजौ भगण-जगणौ भ्जभलगा भगण-जगण-भगण-लघु-गुरवश्च स्युस्तत् हरार्कयति हरैरेकादश-भिरर्कैद्वादशभिर्यतिर्विरामो यत्र तत् अश्वललितं नाम छन्दः स्यात् ॥

"मत्ताक्रीडा मौ त्नौ नौ न्लौ ग् वसुपञ्चदशकौ" इति पि०सू० ७।२८६

समन्वयः

म० म० त० न० न० न० न० ल०गु०
S S S–S S S–S S |–| | |–| | |–| | |-| | |–|–S
मत्ताक्रीडा मौ त्नौ नौ न्लौगिति भवति वसुशरदशयतियुता ॥

मत्तेति यत्र मौ द्वौ मगणौ त्नौ तगण-नगणौ नौ द्वौ नगणौ न्लौ नगण-लघू ग् गुरुश्च इति लक्षणेन वसुशरदशयतियुताऽष्टपञ्चदशभिर्यतिस्तया सहिता मत्ताक्रीडा नाम छन्दः ॥

भूतमुनीनैर्यतिरिह भतना स्भौ भनयाश्च यदि भवति तन्वी ॥

(संकृतौ) "तन्वी भ्तौ न्सौ भौ न्यावि्द्रियस्वरमासाः" इति पि०सू०७।२५

समन्वयः

भ० त० न० स० भ० भ० न० य०

S । ।-S S ।-। । ।-। । S- S । ।-S । ।-। । ।-। S S

भूतमुनीनैर्यतिरिह भतनाः स्भौ भनयाश्च यदि भवति तन्वी ॥

अथ (सङ्कृत्यां २४ जातौ) इह छन्दोजातौ यदि भतना भगण-तगण-नगणाः स्भौ सगण-भगणौ भनयाश्च भगण-नगण-यगणाश्च भवेयुस्तदा तन्वी नाम छन्दो भवति। इह भूतमुनीनैः भूतानि पञ्च मुनयः सप्त इनाः सूर्या द्वादश तैर्यतिः कार्या॥

——0——

क्रौञ्चपदा भ्मौ स्भौ ननना न्गाविषुशरवसुमुनिविरतिरिह भवेत् ॥

——0——

"क्रौञ्चपदा भ्मौ स्भौ नौ नौ ग् भूतेन्द्रियवस्वृषयः" इति पिं०सू० ७।३०

समन्वयः

(अभिकृतौ)

भ० म० स० भ० न० न० न० न० गु०

S । ।-S S S- । । S-S । ।-। । ।-। । ।-। । ।-। । ।-S

क्रौञ्चपदा भ्मौ स्भा ननना न्गाविषुशरवसुमुनिविरतिरिह भवेत् ॥

अथ (अभिकृत्यां २५ जातौ) इह शास्त्रे यदि भ्मौ भगण-मगणौ स्भौ सगण-भगणौ ननना: त्रयो नगणा न्गौ नगण-गुरू च स्याताम्। इषुभिः शरैः पञ्चभिः २ वसुभिरष्टभिर्मुनिभिः सप्तभिश्च विरतिर्यस्यां सा क्रौञ्चपदा नाम छन्दो भवेत् ॥

————

वस्वीशाश्वच्छेदोपेतं ममतनयुगनरसलगैर्भुजङ्गविजृम्भितम् ॥

मोनाः षट् सगगिति यदि नवरसरसशरयतियुतमपवाहाख्यम् ॥

————

"भुजङ्गविजृम्भितं मौ नौ सौ ल्गौ वसुरुद्रऋषयः" इति पिं०सू० ७।३१

समन्वयः

(उत्कृतौ)

म० म० त० न० न० न० र० स० ल०गु०

S S S-S S S-S S ।-। । ।-। । ।-। । ।-S । S-। । S-।-S

वस्वीशाश्वच्छेदोपेतं ममतनयुगनरसलगैर्भुजङ्गविजृम्भितम् ॥

अथ (उत्कृत्यां २६ जातौ) ममतैर्मगण-मगण-तगणैस्ततो नयुगनं नगण

युगलेन ततो नरसलगैर्नगण-रगण-सगण-लघु-गुरुभी रचितं तथा वस्वीशाश्वैः अष्टैकादशसप्तभिश्छेदो विरामस्तेनोपेतं युक्तं भुजङ्गविजृम्भितं नाम छन्दो भवति ॥

"अपवाहको म्नौ नौ नौ न्सौ गौ नवर्तुरसेन्द्रियाणि" इति पि० सू० ७।३१

समन्वयः

म० न० न० न० न० न० न० न० गु० गु०

S S S– | | |–| | |–| | |–| | |–| | |–| | |–| | S–S–S

मोनाः षट् सगगिति यदि नवरस रस शरयति युतमपवाहाख्यम् ॥२६॥

स इति यदि एको मगणस्ततो ना नगणाः षट् ततः सगग् सगणो गुरुद्वयमित्यमुना प्रकारेण नवरसरसशरैः नवषट्षट्पञ्चभिर्या यतिस्तया युतमुपेतम् अपवाहाख्यम् अपवाह आख्या नाम यस्य तत् छन्दः स्यात् ॥ २६ ॥ इति समवृत्तप्रकरणम् ।

अथ दण्डकाः ।

यदिह नयुगलं ततः सप्तरेफास्तदा चण्डवृष्टिप्रपातो भवेद्दण्डकः ॥
प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयः ।
प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः सप्तभिर्यैः ॥

"दण्डको नौ रः[1]" ७ । ३३ "प्रथमश्चण्डवृष्टिप्रपातः" ७ । ३४

"अन्यत्र रातमाण्डव्याभ्याम्" इति पि० सू० ७ । ३५

समन्वयः

न० न० र० र० र० र० र० र० र०

| | |–| | |–S | S– S | S–S | S–S | S–S | S–S | S–S | S

यदिह नयुगलं ततः सप्तरेफास्तदा चण्डवृष्टिप्रपातो भवेद्दण्डकः ॥१॥

अथ चण्डवृष्ट्यादिकदण्डकानाह—यदिहेति । यदिति यदेत्यर्थेऽव्ययम् इह दण्डकजातौ आदौ नयुगलं नगणद्वयम् ततः सप्तरेफाः सप्त रगणास्तदा चण्डवृष्टि

(टि०) १ यत्र पादे द्वौ नगणौ ततः सप्त रगणाः (पूर्वतो यथाक्रमैकैकाक्षरवृद्धितो लब्धमिदम्) रः इति बहुवचनेन इतोऽग्रेऽपि एकैकरगणवृद्ध्या प्रस्तारः ॥ २ तत्र प्रथमस्य नाम चण्डवृष्टिप्रपात इति अन्येषां तु यथाभिमतनाम

प्रपातो नाम दण्डको भवेत्। चत्वारोऽपि पादा ईदृशेन लक्षणेन कर्तव्या । इयं च संज्ञारात माण्डव्यग्रन्थातिरिक्तपिङ्गलादिमतेन तदुक्तं तत्र ॥

समन्वयः

न० न० र० र० र० र० र० र० र० र०

। । ।-। । ।-S । S–S । S–S । S– S । S–S । S–S । S–S । S–S । S

प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्याल-जीमूत-लीलाकरोद्दामशङ्खादयः॥२॥

प्रतीति तथात्र प्रतिचरणं विवृद्धरेफा इति । यदा दण्डकं दण्डकं प्रति पादे पादे एकैकरगणवृद्धिः क्रियते तदा अमूनि नामानि दण्डकानां पृथक् २ स्युः । आदौ सर्वत्र नगणद्वयमेव कार्यम् । ततश्चादौ द्वौ नगणौ ततः अष्टौ रगणास्तदा अर्णो नाम दण्डकः स्यात् । एवं प्रतिचरणं रगणवृद्धौ नवभिरर्णवो नाम दशभिः रगणैर्व्यालः एकादशभिः रगणैर्जीमूतो नाम द्वादशभिः रगणैर्लीलाकरः त्रयोदशभिः रगणैरुद्दामः तथा पादे पादे आदौ द्वौ नगणौ ततश्चतुर्दश रगणास्तदा शङ्खो नाम दण्डको भवति । आदिशब्दात्तथ(?) गगनसमुद्रादयोऽपि शिष्टकृतनामानो गृह्यन्ते रगणवृद्धिरपि कर्तव्या । सिंहसमुद्रभुजङ्गादय इति रामचन्द्रबुधः । आराम-संग्राम-सुराम-वैकुण्ठ-सोत्कण्ठ-सार-कासार-विस्तारादय एकोनसहस्राक्षरपादपर्यन्तमिति नारायणभट्टः । तदुक्तम् :—

एकोनसहस्राक्षरपर्यन्ता दण्डकाह्वयः प्रोक्ताः । वर्णत्रिकगणवृद्ध्या नद्वितयाद्या महामातीभिः॥

"शेषः[2] प्रचितकः" इति पि० सू० ७ । ३६

समन्वयः

न० न० य० य० य० य० य० य० य०

। । ।–। । ।–। S S-। S S– । S S-। S S–। S S-। S S-S । S

प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः सप्तभिर्यैः ॥३॥

इति भट्टकेदारविरचिते वृत्तरत्नाकराख्ये छन्दसि समवृत्ताध्यायस्तृतीयः समाप्तः ॥३॥

प्रचितकेति तथा नगणद्वयादुत्तरैः अग्रेतनैः सप्तभिर्यैर्यगणै रचितो धीरधीभिः पण्डितैः प्रचितकसमभिधो नाम दण्डकः कथितः । अत्रापि पूर्ववदेव एकैकयगणवृद्ध्या

१ ग्रन्थान्तराविरोधाय प्रतिचरणेत्यस्यार्थः कार्यः ननु प्रतिचरणं विवृद्धा रेफा इति । यत्र रगणोपलक्षितगणमात्रवृद्धिरिति भावः ॥

२ चण्डवृष्टिप्रपातादयः

दण्डकाः । कार्याः यैरित्युपलक्षणं गणमात्रस्य कविप्रयोगानुरोधात् वृत्त्यानुकूल्यमत्र विचार्यम् ।

इति वृत्तरत्नाकराख्यच्छन्दोग्रन्थस्य संग्रहव्याख्यायां समवृत्ताध्यायस्तृतीयः समाप्तः ॥३॥

—o—

विषमे यदि सौ सलगा दले । भौ युजि भाद्गुरुकावुपचित्रम् ॥

भत्रयमोजगतं गुरुणी चेत् । युजि च नजौ ज्यौ युतौ द्रुतमध्या ॥

सयुगात्सगुरू विषमे चेद् । भाविह वेगवती युजि भाद्गौ ॥

ओजे तपरौ जरौ गुरुश्चेद् । म्सौ ज्गौ भद्रविराड्भवेदनोजे ॥

असमे सजौ सगुरुयुक्तौ । केतुमती समे भरनगाद् गः ॥

आख्यानकी तौ जगुरू ग ओजे । जतावनोजे जगुरू गुरुश्चेत् ॥

जतौ जगौ गौ विषमे समे स्यात् । तौ ज्गौ ग एषा विपरीतपूर्वा ॥

सयुगात्सलघू विषमे गुरुः । युजि नभौ च भरौ हरिणप्लुता ॥

अयुजि ननरला गुरुः समे । नजमपरवक्त्रमिदं ततो जरौ ॥

अयुजि नयुगरेफतो यकारो । युजि च नजौ जरगाश्च पुष्पिताग्रा ॥

वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः ।

पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं परे ॥

स्यादयुग्मके रजौ रजौ समे तु । जरौ जरौ गुरुर्यदा यवान्मतीयम् ॥

—o—

अर्द्धे ५।३१ इत्यधिकृत्य "[१]उपचित्रकं सौ स्लौ ग्, भौ भ्गौ ग्" इति पि० सू० ५।३२

समन्वयः

स० स० स० ल०गु० भ० भ० भ० गु०

। । S—। । S— । । S—।-S— S । ।—S । ।—S । ।—S-S

विषमे यदि सा सलगा दले । भौ युजि भाद्गुरुकावुपचित्रम् ॥१॥

इदानीमर्धसमवृत्ताध्यायो व्याख्यायते विषमेति यदि विषमे दले प्रथमे

(टि०) १ प्रथमे पादे सगणत्रयं लघुगुरू च । द्वितीये भगणत्रयं गुरुद्वयञ्च ।

एवमग्रेऽपि पादद्वयलक्षणं बोध्यं तत्र श्लोकव्याख्यासु स्पष्टीकृतं तत्र तत्र ॥

तृतीये च पादे सौ द्वौ सगणौ ततः सगण-लघु-गुरवो भवन्ति ॥ पुनर्यदा युजि समे दले द्वितीये चतुर्थे च पादे भौ द्वौ भगणौ ततो भाद् भगणात् गुरू ग्गौ द्वौ गुरू (स्वार्थे कः) भवतस्तदा उपचित्रं नाम छन्दः। अत्र तृतीयपादः प्रथमपादसदृशः। चतुर्थपादो द्वितीयपादसदृशः। एवं सर्वत्रार्धसमच्छन्दसि ज्ञेयम्। अर्धसमत्वाद्द्वितीयार्द्धमप्येवमेवोदाहर्य्यम्। एवमन्येपि। अत्रानुक्ते यथासम्भवं यतिः।

"द्रुतमध्या भौ भौ ग्, न्जौ ज्यौ" इति पिं० सू० ५।३३॥

समन्वयः

भ० भ० भ० गु०२ न० ज० ज० य०

S I I—S I I—S I I—S S——I I I—I S I—I S I—I S S

भत्रयमोजगतं गुरुणी चेत्। युजि च नजौ ज्ययुतौ द्रुतमध्या ॥२॥

भेति चेद्यदि ओजगतं विषमपादे स्थितं भत्रयं भगणत्रयं प्रथमं, ततो गुरुणी गुरुद्वयं च। पुनः युजि समे पादे न्जौ नगण-जगणौ ज्ययुतौ जगण-यगणाभ्यां सहितौ भवेतां तदा द्रुतमध्या नाम छन्दो भवति ॥२॥

"वेगवती सौ स्गौ, भौ भ्गौ ग्" इति पिं० सू० ५।३४।

समन्वयः

स० स० स० गु० भ० भ० भ० गु०२

I I S—I I S—I I S—S S I I—S I I—S I I—S S

सयुगात्सगुरू विषमे चेत्। भाविह वेगवती युजि भाद्गौ ॥३॥

स्वेति चेद्यदि विषमे पादे सयुगात् सगणयुग्मात् सगुरू सगण-गुरू भवतः ॥ इह युजि समे पादे भौ द्वौ भगणौ ततः पुनर्भात् भगणात् ग्गौ द्वौ गुरू भवतस्तदा वेगवती नाम छन्दो भवति ॥३॥

"भद्रविराट् त्जौ र्गौ, म्सौ ज्गौ ग्" इति पिं० सू० ५।३५

समन्वयः

त० ज० र० गु० म० स० ज०गु०२

S S I—I S I—S I S S S S S—I I S—I S I—S S

ओजे तपरौ जरौ गुरुश्चेत्। म्सौ ज्गौ भद्रविराड् भवेदनोजे ॥४॥

ओजेति चेद्यदि ओजे विषमे पादे तपरौ तगणात्परौ जरौ जगण-रगणौ गुरुश्च

भवति । अनोजे समे पादे म्सौ मगण-सगणौ ज्गौ जगण-गुरू च भवतः तदा भद्र-
-विराड् नाम छन्दो भवेत् ॥४॥

"केतुमती स्जौ स्गौ, भ्रौ न्गौ ग्" इति पि० सू० ५ । ३६

समन्वयः

स० ज० स० गु० भ० र० न० गु० गु०
। । S–। S ।–। । S–S–S । ।–S । S–। । ।–S S

असमे सजौ सगुरुयुक्तौ । केतुमती समे भरनगाद्गः ॥ ५ ॥

असम इति यदि असमे विषमे पादे सजौ सगण-जगणौ सगुरू सगण-गुरू ताभ्यां युक्तौ अन्ते भवेताम् । समे पादे भरनगात् भगण-रगण-नगण-गुरुतः परः ग एकः पुनर्गुरुः भवति तदा केतुमती नाम छन्दः स्यात् ॥

"आख्यानकी तौ ज्गौ ग्, ज्तौ ज्गौ ग्" इति पि० सू० ५।३७

समन्वयः

त० त० ज० गु०गु० ज० त० ज० गु०गु०
S S ।–S S ।–। S ।–S–S– । S ।–S S ।–। S ।–S–S

आख्यानकी तौ जगुरू ग ओजे । जतावनोजे जगुरू गुरुश्चेत् ॥६॥

आख्यानकीति ओजे पादे तौ द्वौ तगणौ जगुरू जगण-गुरू गः पुनः गुरुश्च भवति॥ पुनरनोजे समे पादे जतौ रजगण-तगणौ तत्रो जगरू जगण-गुरू पुनरेको गुरुश्चेत्तदा आख्यानकी नाम छन्दो भवति ॥

"विपरीताख्यानकी ज्तौ ज्गौ ग्, तौ ज्गौ ग्" इति पि० सू० ५।३८

समन्वयः

ज० त० ज० गु०गु० त० त० ज० गु० गु०
। S ।–S S ।–। S ।–S–S– S S ।–S S ।–। S ।–S–S

जतौ जगौ गो विषमे समे स्यात् । तौ ज्गौ ग एषा विपरीतपूर्वा ॥७॥

जताविति यदि विषमे पादे जतौ जगण-तगणौ जगौ जगण-गुरू गो गुरुश्च भूय एकः गुरुश्च । पुनः समे पादे तौ द्वौ तगणौ जगौ जगण-गुरू ग गुरुश्च स्यात् तदा एषा विपरीत पूर्वा विपरीतं इति शब्दः पूर्वो यस्याः सा आख्यानकी अर्थात् विपरीताख्यानकी भवति ॥

"हरिणप्लुता सौ स्लौ ग, न्भौ भ्रौ" इति पि० सू० ५ । ३९

समन्वयः

स० स० स० ल०गु० न० भ० र०

| | S– | | S– | | S–| –S– | | | –S | | –S | | –S | S

सयुगात्सलघू विषमे गुरुः। युजि नभौ च भरौ हरिणप्लुता ॥८॥

सेति विषमे पादे सयुगात् सगणयुग्मात् सलघू सगण-लघू गुरुश्च ॥ पुनर्युजि समे पादे नभौ नगण-भगणौ भरौ भगण-रगणौ च तदा हरिणप्लुता नाम छन्दो भवति ॥

"अपरवक्त्रं नौ लौं ग्, न्जौ ज्रौ" इति पि० सू० ५। ४०

समन्वयः

न० न० र० ल०गु० न० ज० ज० र०

| | | – | | | –S | S– | –S– | | | –| S | –| S | –S | S

अयुजि ननरला गुरुः समे। न्जमपरवक्त्रमिदं ततो जरौ ॥ ९ ॥

अयुजीति अयुजि विषमे पादे ननरलाः द्वौ नगणौ ततो रगण-लघू ततो गुरुश्च ॥ समे पादे न्जं न् च ज्च तयोः समाहारः नगण-जगणौ ततोऽनन्तरं जरौ जगण-रगणौ इदमपरवक्त्रं नाम छन्दः।

"पुष्पिताग्रा नौ यौं, न्जौ ज्रौ ग्" इति पि० सू० ५।४१

समन्वयः

न० न० र० य० न० ज० ज० र० गु०

| | | – | | | –S | S– | S S | | | –| S | –| S | S | S S

अयुजि नयुगरेफतो यकारो। युजि च नजौ जरगाश्च पुष्पिताऽग्रा ॥१०॥

अयुजीति अयुजि विषमे पादे नयुगं रेफश्च तौ ताभ्यां नगण-नगण-रगणेभ्यः परो यकारो यगणो भवति ॥ च पुनः युजि समे पादे नजौ नगण-जगणौ ततो जरगा जगण-रगण-गुरवश्च तदा पुष्पिताग्रा नाम छन्दो भवेत्।

वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः।
पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं परे ॥ ११ ॥

यदिदमपरवक्त्राख्यं नाम छन्दस्तद्विपश्चितः पण्डिता वैतालीयं वदन्ति कथयन्ति। केचिदाचार्याः ततः पश्चात्याः पुष्पिताग्राभिधं छन्दः परे विद्वांसः औपच्छन्दसिकं वदन्ति ॥११॥

"यवमती जौं जौं, ज्रौ ज्रौ ग्" इति पि० सू० ५।४२।

समन्वयः

र० ज० र० ज० ज० र० ज० र० गु०

S I S I S I S I S I S I S I S I S I S I S I S I S I S S

स्यादयुग्मके रजौ रजौ समे तु। जरौ जरौ गुरुर्यदा यवान्मतीयम् ॥१२॥

इति वृत्तरत्नाकराख्ये छन्दसि अर्धसमवृत्तरूपश्चतुर्थोऽध्यायः ॥४॥

स्यादिति अयुग्मके विषमे पादे रजौ रगण-जगणौ ततोऽग्रे पुनः रजौ रगण-जगणौ ॥ तु पुनः समे पादे जरौ जगण-रगणौ ततोऽग्रे पुनः जरौ जगण-रगणौ गुरुश्च तदा इयं यवात् यवशब्दात्परा मती यवमतीत्यर्थः तदाख्यं छन्दः स्यात्। ओजपरौ भरौ जरौ गुरू समे जौ यौ, कीर्तिता बुधैरियं तु षट्पदाख्या ॥ रौ जरौ, जसंयुतौ पदे पदेऽथ, युग्मे तरौ जरौ गुरुर्भृंगी यवानी ॥ अयुजि ननभभा समेऽपि तु, नयुगरयुगलं तदा कौमुदी ॥ यदि विषमे भवतो नजौ जरौ, सजयाः समे जगरू मञ्जुसौरभम् ॥ तथाष्टाविंशतिर्लघव एको गुरुरिति विषमः पादः, त्रिंशल्लघव एको गुरुश्चेति समः सा शिखान्ता ॥ (इयमेव विपर्यस्तार्द्धा खञ्जा नाम) * विषमे यदि सौ जगौ समे, स्तरला गो ऽपरवक्त्रमीरितम् ॥ * विषमे सजसा गुरू अनोजे, सभरा यश्च तु मालभारिणीयम् ॥ * विषमे सजसा गुरू अनोजे, स्मरयाश्छन्दसिकं तदौपपूर्वम् ॥

इति वृत्तरत्नाकराख्यच्छन्दोग्रन्थस्यसंग्रहव्याख्यायामर्द्धसमवृत्ता-ध्यायश्चतुर्थः समाप्तः ॥ ४ ॥

———०———

मुखपादोऽष्टभिर्वर्णैः। परेऽस्मान्मकरालयैः क्रमाद्वृद्धाः ॥

सततं यस्य विचित्रैः पादैः सम्पन्नसौन्दर्यं।

तदभिहितममलधीभिः पदचतुरूर्ध्वाभिधं वृत्तम् ॥

प्रथममुदितवृत्ते। विरचितविषमचरणभाजि ॥

गुरुकयुगलनिधन इह कलितं आकुर ॥

विधृतरुचिरपदपङ्क्तिममितिविदितिः भवति पीडः ॥

प्रथममितरचरणसमुत्थं । श्रयति जगतिं लक्ष्म ॥
इतरदितरजनितमपि यदि च तुर्यं ।
चरणयुगलकमविकृतमपरमिति कलिका सा ॥
द्विगुरुयुतसकलचरणान्ता । मुखचरणरचितमनुभवति तृतीयः ।
चरण इह हि लक्ष्म । प्रकृतमपरमपि यदि भजति लवली सा ॥
प्रथममधिवसति यदि तुर्यं । चरमचरणपदमवसितगुरुयुग्मा ॥
निखिलमपरमुपरितनसममिह ललितपादा । त्रितयममृतधारा ॥

—०—

"प्रतिपादचतुर्वृद्ध्या पदचतुरूर्ध्वम्" इति पि० सू० ५।२०॥

समन्वयः

१ २ ३ ४ ५ ६ ७ ८
मुखपादोऽष्टभिर्वर्णैः ।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२
परस्मान्मकराक्षरैः क्रमाद् वृद्धाः ॥
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
सततं यस्य विचित्रैः पादैः सम्पन्नसौन्दर्यं ।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०
तदभिहितममलधीभिः पदचतुरूर्ध्वाभिधं वृत्तम् ॥१॥

अथ विषमवृत्ताध्यायो व्याख्यायते मुखपाद इति यस्य वृत्तस्य मुखपाद आदिपादोऽष्टभिर्वर्णैः अस्मात् मुखपदात्परे अग्रेभवास्त्रयः पादा मकराक्षरैश्चतुर्भिरक्षरैः क्रमात् क्रमेण वृद्धा भवन्ति (द्वितीयपादो द्वादशभिरक्षरैस्तृतीयः पादः षोडशाक्षरैश्चतुर्थो विंशत्यक्षरैः) तदा अमलधीभिः पण्डितैः सततमनवरतं यस्य वृत्तस्य विचित्रैः नानाविधैः पादैः सम्पन्नसौन्दर्यं जातचारुत्वम् तत् पदचतुरूर्ध्वाभिधं वृत्तम् अभिहितं भणितम् ॥ अत्र वर्णैरिति सम्पन्नसौन्दर्यमिति च वदता गुरुलघुनिवेश नियमो नास्ति किन्तु श्रोत्रसौभाग्यार्थं वर्णवैचित्र्यं विधेयमिति सूचितम् ।

---

१ प्रतिपादं चतुर्णामक्षराणां वृद्ध्या आधिक्येनेत्यर्थः ॥

"गावन्त[1] आपीडः" ५।२१॥ "आदौ चेत्प्रत्यापीडः" ५।२२

"प्रत्यापीडो गावादौ च" ५।२३ इति पि० सू०

समन्वयः

गु०२
१ २ ३ ४ ५ ६ ७ ८
प्रथम मुदित वृत्ते।

गु०२
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२
विरचित विषम चर णा भा जि॥

गु०२
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
गुरुक युगल निधन इ ह क लि त आ ङ्गा॥

गु०२
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०
विधृत रुचिर पद वि त ति य ति रि ति भ व ति पी डः॥२॥

प्रथममिति। इह शास्त्रे विरचितान् विषमान् प्रतिपादं वृद्ध्या विषमाक्षरान् चरणान् पादान् भजतीत्येवंशीलं तत् तथा तस्मिन् प्रथममुदितवृत्ते पूर्वं प्रतिपादिते पदचतुरूर्ध्वाभिधे वृत्ते गुरुयुगलं निधनेऽवसाने यस्य तत् तस्मिन्सति विधृता रुचिरा शोभना पदवितती पदसमूहे यतिर्येन स तथा अङ्गा कलितो युक्तः पीड आपीड इत्यर्थः तदाख्यं छन्दो भवतीति शेषः। भावार्थस्त्वयम् आपीडछन्दसि सर्वलक्षणं पदचतुरूर्ध्वाभिधसमं किन्तु पादे पादे प्रान्ते गुरुद्वयं कार्यमिति॥ पैङ्गले तु विशेष उक्तः॥

"प्रथमस्य[2] विपर्यासे मञ्जरीलवल्यमृतधाराः" इति पि० सू० ५।२४

एता उत्तरश्लोकत्रये यथाक्रमं बोध्याः।

(टि०) १ पूर्वोक्तस्यैवान्ते चेत् गौ प्रतिपादं गुरुद्वयं तदाऽऽपीडनामेति। आदौ चेद् गुरुद्वयं तदा प्रत्यापीडो नाम। यदि गौ आदौ चात् अन्तेऽपि भवतस्तदाऽपि प्रत्यापीड एवेति सूत्रत्रयार्थः। २ प्रथमस्य पादस्य द्वितीयेन विपर्यये मञ्जरी। तृतीयेन लवली। चतुर्थेन अमृतधारेति निष्कृष्टोऽर्थः॥

समन्वयः

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२
प्रथम मितर चरण स मु त्थं।

१ २ ३ ४ ५ ६ ७ ८
श्रयति जगति लक्ष्म॥

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
इतर द्वितर जनित म पि य दि च तु र्थे।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०
चरण युगलक मधि कृ त म प र मि ति क लि का सा॥३॥

प्रथममिति तुर्यं श्लोकचतुर्थोऽशः पाद इत्यर्थः यदि प्रथमं तुर्यं प्रथमपादः इतरचरणसमुत्थं द्वितीयचरणभवं द्वादशाक्षररूपं लक्ष्म लक्षणं श्रयति। इतरत् तुर्यं द्वितीयपाद इतरजनितमपि प्रथमपादजनितमष्टाक्षररूपं श्रयति॥ अपरं चरण युगलं तृतीयचतुर्थरूपमधिकृतम् अधिकारप्राप्तं पूर्वोक्तं क्रमेण षोडशविंशत्यक्षरं लक्ष्म लक्षणं श्रयति। तदा सा इत्यनेन प्रकारेण जगति लोके कलिका नाम छन्दो भवति। प्रथमः पादो द्वादशाक्षरः (१२) द्वितीयः अष्टाक्षरः (८) तृतीयः षोडशाक्षरः (१६) चतुर्थो विंशत्यक्षरः (२०) इति तत्त्वम्॥३॥ पैङ्गलेऽस्या मञ्जरीति नाम ५।२४॥

समन्वयः

गु०२
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२
द्विगुरु युत सकल च र णा न्ता।

गु०२
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
मुख चरण रचित म नु भ व ति तृ ता यः॥

गु०२
१ २ ३ ४ ५ ६ ७ ८
चरण इह हि लक्ष्म।

गु०२
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०
प्रकृतम परम खि ल म पि य दि भ ज ति ल व ली सा॥४॥

द्वीति द्वाभ्यां गुरुभ्यां युतः युक्तः सकलचरणानां मन्तोऽवसानं २ यस्याः तथा सा लवली नाम छन्दो भवति। इहाऽस्यां लवल्यां हि निश्चितं तृतीयः चरणो मुख चरणरचितं प्रथमपादरूपं लक्ष्म लक्षणम् अनुभवति प्राप्नोति अपरमन्यदखिल-

मपि चरणं प्रकृतं प्रस्तुतं आर्द्वोक्तत्रयं भजति । प्रथमो द्वादशाक्षरः (१२) द्वितीयः षोडशाक्षरः (१६) तृतीयः अष्टाक्षरः (८) चतुर्थो विंशत्यक्षरः (२०) इति तत्त्वम् ॥

समन्वयः

गु०२
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२
प्र थ म म धि व स ति य दि तु र्थं ।

गु०२
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
च र म च र ण प द म व सि त गु रु यु ग्मा ॥

गु०२
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०
निखिल म प र मु प रि त न स म मि ह ल लि त पा दा।

गु०२
१ २ ३ ४ ५ ६ ७ ८
त्रि त य म मृ तधारा ॥ ५ ॥

प्रथममिति यदि प्रथमं तुर्यं प्रथमपादोऽष्टाक्षररूपः (कर्ता) चरमचरणपदं चतुर्थपादस्य पदं स्थानमधिवसति प्राप्नोति चतुर्थो भवतीत्यर्थः अर्थात् चतुर्थः पादः अष्टाक्षरो भवति । निखिलं समस्तममरमन्यत्, त्रितयं पादत्रयम् उपरितनसमम् आपी-डद्वितीयपादादिसमानं तदा ललितपादा कोमलपदघटितचरणेत्यर्थः अवसिते सर्वपादा-नाम् अवसाने २ गुरुयुग्मं यस्याः सा अवसितगुरुयुग्मा इह शास्त्रे अमृतधारा नाम छन्दो भवति । प्रथमो द्वादशाक्षरः (१२) द्वितीयः षोडशाक्षरः (१६) तृतीयो विंशत्यक्षरः (२०) चतुर्थोऽष्टाक्षरः (८). इति तत्त्वम् ॥५॥ इति पादचतुरूर्ध्वप्रकरणं समाप्तम् ।

——o——

सजसादिमे सलघुकौ च । नसजगुरुकेष्वथोद्गता ॥
त्र्यङ्घ्रिगतभनजला गयुताः । सजसा जगौ चरम एकतः पठेत् ॥
चरणत्रयं भजति लक्ष्म । यदि सकलमुद्गतागतम् ॥
गौ भगौ भवति सौरभकं । चरणे यदीह भवतस्तृतीयके ॥
न्युगं सकारयुगलं च । भजति चरणं तृतीयकम् ॥
तदुदितमुरुमतिभिर्ललितं । यदि शेषमस्य खलु पूर्वतुल्यकम् ॥

"उद्गतमेकतः सजौ सलौ, न्सौ ज्गौ, भ्नौ ज्लौ ग्, सजौ सजौ ग्" इति पि० सू० ५ । २५

समन्वयः

स० ज० स० ल० न० स० ज० गु०

| | S | S | | | S | | | | | S | S | | S

सजमादिमे सलघुकौ च । नसजगुरुकेष्वथोद्गता ॥

भ० न० ज० ल० गु० स० ज० स० ज० गु०

S | | | | | S | | S | | S | S | | | S | S | S

त्र्यङ्घ्रिगतभनजला गयुताः । सजसा जगौ चरणमेकतः पठेत् ॥१॥

सजमिति यदि आदिमे प्रथमे पादे सजं (सश्च जश्च तयोः समाहारः) सगण-जगणौ पुनः सलघुकौ सगण-लघू च भवतः । अथ द्वितीये पादे नसजगुरुकेषु नगण-सगण-जगण-गुरुषु सत्सु । त्रिशब्दस्तृतीयेत्यर्थे वर्तते एवं च त्र्यङ्घ्रौ तृतीये पादे इत्यर्थस्तत्र गता ये भनजला भगण-नगण-जगण-लघवस्ते गयुता गेन गुरुणा युक्ताः स्युः ॥ चरमे पादे सजसा सगण-जगण-सगणा जगौ जगण-गुरू च एवं यदि चरणम् एकतः पठेत् । अर्थात् प्रथमं पादं द्वितीयेनैकीकृत्योच्चारयेदित्यर्थः तत्रात्यन्तयतिं न कुर्यादिति यावत् (ल्यब्लोपे पञ्चमी) तदा उद्गता नाम छन्दो भवति ॥ १ ॥

"तृतीयस्य सौरभकं, र्नौ भ्गौ" इति पि० सू० ५ । २६[1]

समन्वयः

स० ज० स० ल० न० स० ज० गु०

| | S | S | | | S | | | | | | S | S | | S

चरणत्रयं भजति लक्ष्म । यदि सकलमुद्गतागतम् ॥

र० न० भ० गु० स० ज० स० ज० गु०

S | S | | | S | | S | | S | S | | | S | S | S

र्नौ भगौ भवति सौरभकं । चरणो यदीह भवतस्तृतीयके ॥ २ ॥

चरणत्रयमिति । यदि इह छन्दसि तृतीयके तृतीये (स्वार्थे कः) चरणे र्नौ रगण-

---

(टि०) १ समन्वये तृतीया तृतीये पादे यदि रगण-नगणौ भगण-गुरू च भवतस्तदा सौरभकं तृतीयस्थेऽयुक्तया शेषमुद्गतावदिति सूचितम् ॥

नगणौ भगौ भगण-गुरू च भवतः । अपरं तृतीयवर्जं सकलं दलं चरणत्रयं यदि उद्गतागतं लक्ष्म लक्षणं भजति तदा सौरभकं नाम छन्दो भवति ॥

"ललितं नौ सौ" इति पि० सू० ५ । २७

समन्वयः

स० ज० स० ल० न० स० ज० गु०

| | S—| S |—| | S— |— | | |—| | S—| S |—S

नयुगं सकारयुगलं च । भजति चरणं तृतीयकम् ॥

न० न० स० स० स० ज० स० ज० गु०

| | |—| | |-| | S—| | S— | | S-| S |—| | S—| S |—S

तदुदितमुरुमतिभिर्ललितं । यदि शेषमस्य खलु पूर्वतुल्यकम् ॥ ३ ॥

नयुगामति यदि तृतीयकं चरणं तृतीयः (स्वार्थे कः) पादः नयुगं नगणद्वयं सकारयुगलं सगणद्वयं च भजति शेषमपरञ्च पादत्रयं खलु निश्चितं पूर्वतुल्यकमुद्गतागतं लक्षणं भजति आश्रयति । तदा उरुमतिभिः प्रचुरबुद्धिभिः पण्डितैस्तद्वृत्तं ललितं नाम उदितमुक्तम् ॥ इति उद्गताप्रकरणं समाप्तम् ॥

म्सौ ज्भौ गौ प्रथमाङ्घ्रिरेकतः पृथगन्यत् ।

त्रितयं सनजरगास्तथा ननौ सः ॥

त्रिनपरिकलित जयौ । प्रचुपितमिदमुदितमुपस्थितपूर्वम् ॥

नौ पादेथ तृतीयके सनौ नसयुक्तौ । प्रथमाङ्घ्रियाति यदि प्रवर्धमानम् ॥

त्रितयमपरमपि पूर्वसदृशमिह भवति । प्रततमतिभिरिति गदितं खलु वृत्तम्

अस्मिन्नेव तृतीयपादके तजराः स्युः । प्रथमे च विरातिरार्षभं वदन्ति ॥

तच्छुद्धविराट्पुरःस्थितं त्रितयमपरमपि यदि पूर्वसमं स्यात् ॥

"उपस्थितप्रचुपितं पृथगाद्यं स्मौ ज्भौ गौ, स्नौ ज्रौ ग्, नौ स्, नौ न्जयौ" इति पि० सू० ५ । २८

(टि०) १ माद्यं चरणं पादत्रयात् पृथक् पठनीयमित्याशयः ॥

समन्वयः

म० स० ज० भ० गु०२

S S S- | | S- | S |-S | |-S S

म्सौ ज्भौ गा प्रथमाङ्घ्रिरेकतः पृथगन्यत् ।

स० न० ज० र० गु०

| | S-| | |-| S |-S | S-S

त्रितयं सनजरगास्तथा ननौ सः ॥

न० न० स०

| | |-| | | |-| | S

त्रिनपरिकलित जयौ ।

न० न० न० ज० य०

| | |-| | | |-| | |-| S |-| S S

प्रचुपितमिदमुदितमुपस्थितपूर्वम् ॥ १ ॥

म्साविति म्सौ मगण-सगणौ ज्भौ जगण-भगणौ गौ द्वौ गुरू चेत्येषः प्रथमोऽङ्घ्रिश्चरणः एकतः एकः (प्रथमार्थे तसिल्) पृथक् द्वितीयादि पादत्रयात् पृथक्कृत्य पठनीयः इतोऽन्यत् अग्रेभवं पादत्रितयं तु एकीकृत्यैव पृथक् पठनीयं तत्र विरामो न कार्य इत्यर्थः ततः "श्लोकार्द्धं तु विशेषतः" इत्यस्यापवादोऽयमिति भावः । अधुना चरणत्रय-लक्षणमुच्यते सेति सनजरगा सगण-नगण-जगण-रगण-गुरवो द्वितीये पादे । तथा ननौ द्वौ नगणौ सः सगणश्च तृतीये पादे । त्रयश्च ते नास्त्रिनास्तैः त्रिनैः परिकलितौ युक्तौ च तौ जयौ जगण-यगणौ चतुर्थे पादे यदि भवतस्तदोपस्थितपूर्वं प्रचुपितम् उपस्थितप्रचुपितं नाम छन्दः इदमुदितं कथितं छन्दोविद्भिरिति शेषः ॥

"वर्धमानं नौ स्नौ न्सौ" इति पि० सू० ५।२६

समन्वयः

म० स० ज० भ० गु०२ स० न० ज० र० गु०

S S S-| | S-| S |-S | |-S S- | |S- | | |-| S |-S | S-S

नौ पादेथ तृतीयकं सनौ नसयुक्तौ । प्रथमाङ्घ्रियति यदि प्रवर्धमानम् ।

न० न० स० न० न० स० न० न० न० ज० य०

| | | | | | | S-| | |-| | |-| | S- | | |-| | |-| | |-| S |-| | S

त्रितयमपरमपि पूर्वसदृशमिह भवति । प्रततमतिभिरिति गदितं खलु वृत्तम्

नौ इति अथानन्तरं तृतीयके पादे यदि नौ द्वौ नगणौ पुनः सनौ सगण-

नगणौ नसंयुक्तौ नगण-सगणयुतौ स्तः । अपरमन्यत् पादत्रितयमिह शास्त्रे पूर्वसदृशं उपस्थितप्रचुपितसमानमपि निश्चितं भवेत् यदि प्रथमाङ्घ्रौ यतिर्यस्मिं स्तत्प्रथमाङ्घ्रियति । तत् प्रततमतिभिर्विस्तीर्णबुद्धिभिर्नरैः खलु निश्चितमित्येवंभूतं प्रवर्धमानं छन्दो गदितं कथितम् ॥

"शुद्धविराडार्षभं तत् ज्ञा" इति पि० सू० ५।३०॥

समन्वयः

म० स० ज० भ० गु०२ स० न० ज० र० गु०

S S S-| | S-| S |-S | |-S S- | | S-| | |-| S S-S | S-S

अस्मिन्नेव तृतीयपादके तजराः स्युः । प्रथमे च विरतिरार्षभं वदन्ति ।

त० ज० र० न० न० न० ज० य०

S S |-| S |-S | S- | | |-| | |-| | |-| S |-| S S

तच्छुद्धविराट्पुरःस्थितं त्रितयमपरमपि यदि पूर्वसमं स्यात् ॥३॥

अस्मिन्निति—अस्मिन्नेव प्रवर्द्धमानसंज्ञके छन्दसि तृतीयपादके तजराः तगण-जगण-रगणाः स्युः । प्रथमे च पादे विरतिर्यतिः स्यात् । अपरं पादत्रितयं पूर्वसमम् उपस्थितप्रचुपितसदृशं स्यात् तदा बुधास्तद् शुद्धविराट्पुरःस्थितं शुद्धविराडितिपदं पुरः पूर्वं स्थितं यस्य तत् आर्षभं छन्दो वदन्ति शुद्धविराडार्षभमित्यर्थः ॥ ३ ॥

"अत्रानुक्तं गाथा" इति पि० सू० ८ । १

विषमाक्षरपादं वा पादैरसमं दशधर्मवत् ।
यच्छन्दो नोक्तमत्र गाथेति तत्सूरिभिः प्रोक्तम् ॥

इति वृत्तरत्नाकराख्ये छन्दसि पञ्चमोऽध्यायः ।

विषमाक्षरेति—विषमाक्षराः पादा यस्मिंस्तद्विषमाक्षरपादं छन्दः । (वैषम्यं च गुरुलघुक्रमसंख्यासाम्याभावात्) यथेदमेव अष्ट-दश-सप्त-नवाक्षरपादं वृत्तं तथा पादैरसमं त्रिपादं षट्पादं चेत्यादि दशधर्मवत् भारतोक्त "दशधर्म" शब्दो लक्षितगाथावत् तद्यथा :—

दशधर्मं न जानन्ति धृतराष्ट्र ! निबोध तान् ॥
मत्तः प्रमत्तः उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।
त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश ॥ इति

इयं खलु षट्पदी गाथा । इत्येवमादि यच्छन्दोऽत्र विशेषेण नोक्तं तत्पूर्वसूरिभिः गाथेति नाम्ना प्रोक्तम् । इदं चावृत्या स्वातन्त्र्येणाऽपि योज्यम् । तेन समाद्धरपादानां समपादानां च कुड्मलदन्त्यादीनामपि गाथात्वं सिद्ध्यति । तेन गीतिका-कलिका-नेल्लितका-द्विपदी-ध्रुवकौत्साह-चत्वरी-पद्धुलिका-प्रभृति तत्सर्वं गाथासंज्ञकम् इति कश्चित् । पिङ्गलमुनिना काश्चिद्गाथा नामलक्षणाभ्यामेव पठिताः सामान्यसूत्रश्चादावुक्तं तथाहि —

"अत्रानुक्तं गाथा" सू० ८ । १

(वृत्तिः) अत्र शास्त्रे नामोद्देशेन यन्नोक्तं प्रयोगे च दृश्यते तद्गाथेति मन्तव्यम् ॥

तत्र त्रिष्टुभि "कुड्मलदन्ती भ्तौ न्गौ गिन्द्रियरसाः" सू० ८ । २

अथाऽतिजगत्याम् कनकप्रभा स्जौ स्जौ ग् ॥ सू० ८ । ७

(वृत्तिः) यस्य पादे सगण-जगणौ पुनश्च सगण-जगणौ गकारश्च तद्वृत्तं कनकप्रभा नाम गाथा । पादान्ते यतिः ॥

कुटिलगतिर्नौ तौ ग् स्वरर्तवः ॥ सू० ८ । ८

(वृत्तिः) यस्य पादे नगणौ तगणौ गकारश्च भवति तद्वृत्तं कुटिलगतिर्नाम गाथा सप्तभिः षड्भिश्च यतिः ॥

शक्वर्याम् वरसुन्दरी भ्जौ स्नौ गौ सू० ८ । ९

(वृत्तिः) यस्य पादे भगण-जगण-सगण-नगणाः गकारौ च भवतः तद्वृत्तं वरसुन्दरी नाम गाथा । पादान्ते यतिः ॥

कुटिला म्भौ न्यौ गौ वेदरससमुद्राः ॥ सू० ८ । १०

(वृत्तिः) यस्य पादे मगण-भगण-नगण-यगणाः गकारौ च भवतः तद्वृत्तं कुटिला नाम गाथा । पञ्चभिः षड्भिः चतुर्भिश्च यतिः ॥

अथ शैलशिखा भ्रौ न्भौ भ्गौ भूतरसेन्द्रियाः ॥ सू० ८ । ११

(वृत्तिः) यस्य पादे भगण-रगणौ नगण-भगणौ भगणः गकारश्च तद्वृत्तं शैलशिखा नाम । पञ्चभिः षड्भिः पञ्चभिश्च यतिः । क्वचित्पादान्ते यतिं पठन्ति ॥

वरयुवती भ्रौ य्नौ न्गौ ॥ सू० ८ । १२

(वृत्तिः) यस्य पादे भगण-रगणौ यगण-नगणौ नगणः गकारश्च भवति तद्वृत्तं वरयुवती नाम गाथा । पादान्ते यतिः ॥

अत्यष्टौ अतिशायिनी ज्भौ ज्गौ ग् दिक्स्वराः ॥ सू० ८ । १३

(वृत्तिः) यस्य पादे जगण-भगणौ जगणः गकारौ च भवतः तद्वृत्तम् अतिशायिनी नाम गाथा । दशभिः सप्तभिश्च यतिः ॥

अवितथं न्जौ भ्जौ ज्लौ ग् ॥ सू० ८ । १४

(वृत्तिः) यस्य पादे नगण-जगणौ-भगण-जगणौ जगण-लघू ग् गुरुश्च भवति । तद्वृत्तम् अवितथं नाम गाथा भवति यतिः पादान्ते ॥

वस्विन्द्रियसमुद्राश्चेत्कोकिलकम् ॥ सू० ८ । १५

(वृत्तिः) यस्य पादे पूर्वोक्ता गणा भवन्ति अष्टाभिः पञ्चभिः चतुर्भिश्च यतिर्भवति तद्वृत्तं कोकिलकम् इति नाम्ना गाथा ॥

(धृतौ) विबुधप्रिया र्सौ जौ भ्रौ वसुदिशः ॥ सू० ८ । १६

(वृत्तिः) यस्य पादे रगण-सगणौ जगणौ भगण-रगणौ च भवतः तद्वृत्तं विबुधप्रिया नाम गाथा भवति । अष्टाभिः दशभिश्च यतिः ॥

नाराचकं नौ रौ रौ ॥ सू० ८ । १७

(वृत्तिः) यस्य पादे नगणौ रगणाश्च चत्वारो भवन्ति तद्वृत्तं नाराचकं नाम गाथा भवति । दशभिः अष्टभिश्च यतिः ॥

विस्मिता य्मौ न्सौ रौ ग्रसर्तुस्वराः ॥ सू० ८ । १८

(वृत्तिः) यस्य पादे यगण-मगणौ नगण-सगणौ रौ द्वौ रगणौ गकारश्च भवति तद्वृत्तं विस्मिता नाम गाथा । षड्भिः षड्भिः सप्तभिश्च यतिः ॥

शशिवदना न्जौ भ्जौ ज् ज्रौ रुद्रदिशः ॥ सू० ८ । १९

(वृत्तिः) यस्य पादे नगण-जगणौ भगणः जगणाः त्रयः रगणश्च भवति तद्वृत्तं शशिवदना नाम गाथा । एकादशभिः दशभिश्च यतिः । पञ्चकावलीति केचित् ॥ एवमादीनि कोटिशः प्रस्तारेषु महाकविप्रयोगेषु च दृश्यन्ते विशेषसंज्ञाभावात्तानि शास्त्रकारेण नामनिर्देशं कृत्वा नोक्तानि तानि च गाथाशब्देन कथ्यन्ते ॥

* इति वृत्तरत्नाकराख्यछन्दोग्रन्थस्य रत्नसंग्रहनामकव्याख्यायां पञ्चमोऽध्यायः *

एवं प्रतिश्रुतं मात्रावृत्तानुपूर्वकं समादिवृत्तत्रयं तत्प्रसङ्गतोऽन्यच्च तदुपयोगि यत्किञ्चिदभिधाय तेषामुत्पत्तिप्रदर्शनार्थं पिङ्गलेऽत्र चानुक्तानां कविप्रयोगेषु दृश्यमानानां सद्भावोपपत्तये स्वग्रन्थस्य न्यूनतापरिहृतये शिष्याणां कौशल्यचमत्कृतिदिव्यदृष्टित्वप्राप्तये च षष्ठाध्यायमुपक्रमते वक्तुम्।

प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया।
संख्या चैवाध्वयोगश्च षडेते प्रत्ययाः स्मृताः॥ १॥

प्रस्तार इति प्रस्तारः १ नष्टम् २ उद्दिष्टम् ३ एकद्व्यादिलगक्रिया ४ सङ्ख्या ५ चैव अध्वयोगश्च ६ एते षट् प्रत्ययाः प्रतीयन्ते ज्ञायन्ते प्रस्तारादयोऽर्था एभिरिति ते प्रस्तारादिबोधकरणानीत्यर्थः "प्रत्ययोऽधीनशपथज्ञानाविश्वासहेतुष्वित्यमरः"। स्मृताः पिङ्गलाद्याचार्यैः उद्घाटिताः॥ मञ्जर्यां गङ्गादासेन तु "प्रस्तारादि पुनर्नोक्तं केवलं कौतुकं हि तत्" इत्युक्तं किन्तु अत्र उक्तान्यभेदज्ञानार्थं स्वग्रन्थस्य न्यूनतादोषपरिहारार्थं च प्रस्तारस्यावश्यकतया तदनुषङ्गेनान्येषां चोपयोगात् पिङ्गलमुन्युक्तेर्थाऽस्य पथः, तदुक्तिः समीचीना नवेति विपश्चित एव विचारयन्तु॥१॥

तथाहि पिङ्गलमुनिनैवैष मार्ग उपलक्षणत्वेन प्रदर्शितः तत्सूत्राणि यथा प्रस्तारविषये "द्विकौ ग्लौ"[1] ८।२० "मिश्रौ च"[2] ८।२१ "पृथग्ला मिश्राः"[3] ८।२२

(टि०) १ उपरिष्ठाद् गुरुं लिखित्वा तदधो लघुं विन्यसेत् इत्येकाक्षरप्रस्तारः। अत्र औत्तराधर्यतो द्वौ ग्लौ (गुरुलघू) द्विकौ द्विप्रमाणौ विन्यस्तौ भवतः (संख्याया अतिशदन्तायाः इति कन्)। २ अनेन द्वितीयाक्षरप्रकारं दर्शयति चकारः पूर्वप्रस्तारसमुच्चयार्थः द्विकौ ग्लौ स्थापयित्वा अनन्तरं द्वितीयस्थानेषु मिश्रौ ग्लौ विन्यसेत् गुरुः गुरुणा संश्लिष्टः मिश्र उच्यते लघुश्च लघुना। मिश्रौ इति गकारलकाराभ्यां प्रत्येकमभिसंबध्यते। द्वन्द्वात्परो यः श्रूयते इति न्यायात्। ततश्च प्रथमायामावृत्तौ गकारौ मिश्रौ स्थापयेत्। द्वितीयायां लकाराविति। ततो मध्ये लेखाम् अपनयेत्। एवं चतुःप्रकारो द्व्यक्षरप्रस्तारो भवति। तद्यथा "गौ ल्गौ ग्लौ लौ" इति॥ ३ इदानीं द्व्यक्षरप्रस्तारपूर्वकत्वन् एकैकाक्षरवृद्ध्या त्र्यक्षरादिप्रस्तारं दर्शयितुमाह पृथगिति द्व्यक्षरप्रस्तारस्य पूर्वन्यायेन द्विकं लेखाविभक्तं स्थापयित्वा तृतीयाक्षरस्थानेषु प्रथमावृत्तौ गकारा मिश्रा दातव्याः। द्वितीयावृत्तौ लकारा मिश्राः ततो मध्ये लेखामपनयेत्। एवं त्रिकः प्रस्तारः सिद्ध्यति पृथगिति विजातीय-

"वसवस्त्रिका:"[1] ८।२३ ॥३॥

नष्टोद्दिष्टादीनां प्रस्तारज्ञानाधीनत्वात्प्रस्तारं तावदाह (उक्तात्युक्तादिजातावेकै-कस्याः कति किम्विधानि च रूपाणि सन्तीति प्रत्ययतो यथास्वरूपं प्रकटीकृत्य प्रदर्श-नार्थं प्रस्तार उच्यते । प्रस्तारप्रत्ययो नाम समस्तवृत्तसंख्याभेदप्रकाशकाशील्प विशेषज्ञानं तदाह) ।

पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः ।
यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम् ॥ २ ॥

पादे इति सर्वत्र प्रथमाकृतिः सर्वगुरुरेव सर्वभेदनिदानं प्रादुर्भूतं मुनेः तावत्तदुपक्रमं भेदसाकल्यमित्यत आह सर्वेति सर्वगुरौ सर्वे गुरवो यत्र एवंविधे पादे लिखिते सति तेषु आद्यात्प्रथमात् गुरोः वर्णात् (ऽ) ईदृशाकारचिन्हाद्वा अधः अधस्तात्स्थाने लघुं वर्णं (।) ईदृशचिन्हं वा न्यस्य स्थापयित्वा ततोऽग्रे च यथोपरि ऊर्ध्वपङ्क्तौ गुरुर्लघुः तच्चिन्हं वा तथा तेनैव प्रकारेण शेषम् आद्यावशिष्टं यावत्पाद-वर्णान्तं लिखेत् इति शेषः। भूयः पुनः द्वितीयादिपङ्क्तीनामधस्तात् तृतीयादिपङ्क्तावपि अमुमुक्तम् "आद्याद्गुरोरधो लघुं यथोपरि तथा शेषम्" इति विधिं विधानं कुर्यात् ॥२॥

ननु एवं कृते तृतीये भेदे उपरिस्थितद्वितीयगुरोरधो लघौ लिखिते आद्यस्था-नस्य रिक्तत्वात्तत्र किं लेख्यमित्यत आह ।

ऊने दद्याद्गुरूनेव यावत्सर्वलघुर्भवेत् ।
प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः ॥ ३ ॥

ऊने इति ऊने न्यूने स्थाने गुरून् वर्णान् (ऽ) ईदृशतच्चिन्हानि वा दद्यात् स्थापयेत् बहु-वचनमुत्तरोत्तरपङ्क्तावपि न्यूने गुरूणां प्रत्यर्थं ततश्च "भूयः कुर्यादमुं विधिमि"त्युक्तं कियत्पर्यन्तं कर्तव्यमित्यपेक्षायामवधिमाह यावदिति सर्वलघुः सर्वे लघवो यत्र स

संसर्गमाह तेन प्रथमायामावृत्तौ न लकारप्रवेशः। द्वितीयायां न गकारस्य। एवं त्रिकप्रस्तारं द्विःस्थापयित्वा पृथक् गला मिथ्या दातव्याः। इति चतुरक्षरप्रस्तारः। एवं तत्तत्पूर्वकः पञ्चा-क्षरादिप्रस्तारः कार्यः ।

१ एवं पूर्वोक्ते त्र्यक्षरप्रस्तारेऽष्टौ त्रिका जायन्ते । तत्तद्द्विगुण २ वृद्धया विस्पष्टं संख्याप्रदर्शनार्थमिदमुपलक्षणं मतम् ॥

सर्वलघुः पादो यावद्भवेत् तावदेव कुर्यात् । छन्दोविचितिः छन्दःशास्त्रं तं विदन्ति जानन्तीति ते छन्दोविचितिवेदिनः आचार्याः तैः अयमेव प्रस्तारः समाख्यातः कथितः। यथा उक्तायां जातौ प्रथमो गुरुरेकः (ऽ) तदधः लघौ न्यस्ते (।) सर्वगुरुपादस्याऽऽद्यातत्वाद् विरतौ भेदद्वयम् । अत्युक्तायां द्विगुरुः प्रथमः (ऽऽ) । तत्रादिगुरोरधो लघौ दत्ते ल्गरूपः (।ऽ) द्वितीयो भेदः । ततो द्वितीयस्थानस्थगुरोरधो लघौ न्यस्ते आदिलघोरधः स्थानं रिक्तं सञ्जातं तत्र गुरौ न्यस्ते गलरूपः (ऽ।) तृतीयो भेदः । तत आदि गुरोरधो लघौ लिखिते तदग्रे उपरिस्थलघुसदृशे लघौ स्थापिते द्विलघुः (।।) चतुर्थो भेदः सर्वलघुपादरूपत्वात्तस्य तत्रावधेः चत्वार एव भेदाः ॥

तत्रायं प्रस्तारस्य स्थापनप्रकारः ।

तत्र उक्तायां भेदद्वयम् यथा			अत्युक्तायां भेदचतुष्टयम् यथा			मध्यायां भेदाष्टकम् यथा			एवमग्रेऽपि यथायथं योज्यम्
१	ऽ	एकगुरुः	१	ऽऽ	द्विगुरुः	१	ऽऽऽ	मगणः	
२	।	एकलघुः	२	।ऽ	एकलघ्वेकगुरुः	२	।ऽऽ	यगणः	
			३	ऽ।	एकगुर्वेकलघुः	३	ऽ।ऽ	रगणः	
			४	।।	द्विलघुः	४	।।ऽ	सगणः	
						५	ऽऽ।	तगणः	
						६	।ऽ।	जगणः	
						७	ऽ।।	भगणः	
						८	।।।	नगणः	

अक्षरेषु मेरुप्रस्तारो यथा

१													
१	१												
१	२	१											
१	३	३	१										
१	४	६	४	१									
१	५	१०	१०	५	१								
१	६	१५	२०	१५	६	१							
१	७	२१	३५	३५	२१	७	१						
१	८	२८	५६	७०	५६	२८	८	१					
१	९	३६	८४	१२६	१२६	८४	३६	९	१				
१	१०	४५	१२०	२१०	२५२	२१०	१२०	४५	१०	१			
१	११	५५	१६५	३३०	४६२	४६२	३३०	१६५	५५	११	१		
१	१२	६६	२२०	४९५	७९२	९२४	७९२	४९५	२२०	६६	१२	१	
१	१३	७८	२८६	७१५	१२८७	१७१६	१७१६	१२८७	७१५	२८६	७८	१३	१

(एवं षड्विंशत्यक्षरं यावत्पूरणीयम्)

अयमपि मार्गो मेरुप्रस्तारद्योतकत्वेन मुन्युपज्ञ एव तथा च सूत्रं "परे पूर्णम्" इति पि० सू० ८। ३४ अथैतदनुसारं मेरुप्रस्तारः उक्तादिषड्विंशतिवृत्तस्थैकद्व्यादिलगक्रियाविज्ञानार्थो लिख्यते। तस्य चायमुद्धारप्रकारः॥

तत्र प्रथममेकं चतुरस्रं कोष्ठं लिखित्वा तदध उभयतोऽर्द्धनिष्क्रान्तं कोष्ठद्वयं तदधः कोष्ठत्रयमर्द्धनिष्क्रान्तं तदधस्तथैव चतुष्टयम्। इत्येवं षड्विंशतिं यावत्कोष्ठानि लिखेत्। उपरिकोष्ठे एकाङ्को देयः। तथा प्रतिपङ्क्ति आद्यन्तकोष्ठेषु एकाङ्क एव। तृतीयपङ्क्तौ मध्यमकोष्ठे शून्ये तदुपरिगतौ एकाङ्कावेकीकृत्य द्व्यङ्कं न्यस्येत्। एवं चतुर्थपङ्क्तौ मध्यकोष्ठोपरिगतकोष्ठद्वयाङ्कमेकीकृत्य त्र्यङ्कौ। एवं सर्वत्रोपरिगतकोष्ठद्वयाङ्कमेकीकृत्याधस्तनकोष्ठे दद्यात्। षड्विंशतिकोष्ठरूपपङ्क्ति यावत्कार्यम्। तदुक्तं पद्यैः॥

आदावेकं लिखेत्कोष्ठं तदधो द्वे च संलिखेत्॥
तदधस्त्रीणि कोष्ठानि चैवं रूपेण वर्द्धयेत्॥ १॥
आदावेकं लिखेत्कोष्ठमेकं मध्यं च पूरयेत्॥
लेख्यकोष्ठोपरिप्राप्तैरग्रिमाङ्केन संयुतैः॥ २॥

अथ फलम्।

अथ द्विकोष्ठायां द्वितीयपङ्क्तौ एकाक्षरपादाया उक्तालगक्रिया। त्रिकोष्ठायां तृतीयपङ्क्तौ अत्युक्ताया एव। इत्येवं क्रमेण षड्विंशतिजातीनां विशेषनिवेशः। स चैकाङ्कोपरिगतप्रतिपङ्क्तिगतद्वितीयकोष्ठस्थाङ्केन ज्ञेयः। तत्र द्वितीयपङ्क्तावेकं सर्वगुरु एकं सर्वलघु उक्तायाम्॥

इति प्रस्तारः

" ल[1]ऽर्द्धे " ८।२४ " सैके[2] ग् " ८।२५ इति।४॥

अथ प्रस्तारशोधनोपयोगिनष्टप्रत्ययमाह—(यदि कस्यचित् पुस्तके प्रस्तारस्य कश्चिद्भेदः कीटादिभक्षणेन नष्टः तेन छान्दसत आगत्य पृष्टं यदमुको मे भेदो नष्टः स कीदृगासीदिति तत्परिज्ञानायेदमारभ्यते)॥ नष्टप्रत्ययो नाम यस्य कस्यचिच्छन्दसो यत्किञ्चिद् द्वितीयं तृतीयं वा वृत्तं नष्टं तस्य प्रस्तारमन्तरेण पुनर्दर्शनज्ञानम्।

नष्टस्य यो भवेदङ्कस्तस्याऽर्द्धेऽर्द्धे समे च लः।
विषमे चैकमाधाय तस्याऽर्द्धेऽर्द्धे गुरुर्भवेत्॥ ४॥

नष्टस्येति अङ्क इत्यतः परं तत्रेत्यध्याहार्यं। ततश्च नष्टस्य वृत्तस्य योऽङ्कस्तत्र समे सति लो लघुर्लेख्यः तस्मिन्नष्टाङ्के विषमे तु गुरुरित्यर्थादायातम्।(पैङ्गले तयोक्तेः)तस्य चार्द्धे कृते सति अर्द्धे च समे सति लो लघुर्लेख्यः विषमे त्वर्द्धीकरणाऽशक्तेः एकमधिकं तन्मध्ये आधाय क्षिप्त्वाऽर्द्धयेत् नष्टाङ्के विषमे तु गुरुर्भवेत् लेख्य इत्यर्थः। अर्द्धेऽर्द्धे इति वीप्सायां द्विरुक्तिः तेन यावद्विवक्षितनष्टवृत्ताक्षरसंख्यापूरणं तावत्कुर्यात्। ततश्च अर्द्धे समे लघुः

(टि०) १ यदा एवं विजिज्ञासेत। गायत्र्यां समवृत्तं षष्ठं कीदृशमिति। तदा तमेव षष्ठसंख्याविशेषम् अर्द्धयेत्। तस्मिन् अर्द्धीकृते लघुः एको लभ्यते। ते भूमौ विन्यस्याः। २ इदानीम् अवशिष्टात् त्रिः इति संख्याविषयत्वात् अर्द्धयितुं न शक्यते। तत्र किं प्रतिपत्तव्यम् इत्याह सैके इति अर्द्धे इत्यनुवर्तते। विषमसंख्यायाम् एकम् अधिकं निक्षिप्य ततः अर्द्धयेत्, तत्र एको गकारो लभ्यते तं पूर्वलब्धात् लकारात्परतः स्थापयेत् ततो द्विसंख्या अवशिष्यते तत्र तावत् सैके।गीति लक्षणमावर्तनीयं यावत् वृत्ताक्षराणि षट् पूर्यन्ते एवं संख्यान्तरेऽपि योज्यम्॥

विषमे गुरुः पुनस्तथैव यत्र यत्र विषमता स्यात्तत्रैकमाधायैवार्द्धयेत् यावद्वर्णान्तरं प्राप्तमिति पर्यवसितम्। यथा कस्यचित्त्र्यक्षरप्रस्तारस्य चतुर्थो भेदो नष्टः तस्य समत्वात् लघुर्लेख्यः(।)पुनरर्द्धेऽवशिष्टौ द्वौ तयोरपि समत्वात् लघुर्लेख्यः (।) पुनरर्द्धेऽवशिष्ट एकः तस्य विषमत्वात् गुरुर्लेख्यः(ऽ इत्येवं सङ्कलय्य(।।ऽ)सगणो जातः स नष्ट इति छान्दसोक्तं सम्पन्नं विषमस्थले तु पञ्चमे नष्टे पञ्चमस्य विषमत्वाद्गुरुर्लेख्यः (ऽ) तस्यार्द्धीकर्तुमशक्यत्वात् एकं प्रक्षिप्यार्द्धेऽवशिष्टाः त्रयः तत्संख्याया विषमत्वात् पुनर्गुरुर्लेख्यः (ऽ) तत्राप्येकं प्रक्षिप्यार्द्धे कृतेऽवशिष्टौ द्वौ तत्संख्यायाः समत्वात् लघुर्लेख्यः (।) संकलिते (ऽऽ।) तगणः संम्पन्नः षष्ठे नष्टे तस्य समत्वात् लघुर्लेख्यः (।) तस्यार्द्धे कृते त्रयो जाताः तेषां विषमत्वात् गुरुर्लेख्यः (ऽ) पुनः एकं प्रक्षिप्यार्द्धे कृते द्वौ अवशिष्टौ तयोः समत्वात् लघुर्लेख्यः (।)एवञ्च संकलने(।ऽ।)जगणो जातः स एव तदुत्तरम्। अयमपि पन्थाः पिङ्गलमुन्युपज्ञः तथा च सूत्रे उपर्युक्ते॥

इति नष्टप्रत्ययः।

"प्रतिलोमगणं द्विर्लाद्यं"[१] ८।२६ "ततोऽप्येकं जह्यात्"[२] ८.२७इति पि०सू०॥५॥

अथोद्दिष्टप्रत्ययमाह (यदि केनचिच्छान्दसस्य परीक्षार्थं प्रस्तारस्य यं कंचिद्भेदं भूमौ समुल्लिख्य पृष्टं कतमोऽयं भेद इति तज्ज्ञानायोद्दिष्टप्रत्ययः। स च यस्य कस्यचिच्छन्दसः किमपि वृत्तं पठित्वा इदं वृत्तं प्रस्तारे कतितममिति केनचित् पृष्टे सति तत्कथनोपाय ज्ञानम्)॥

(टि०) १ उद्दिष्टवृत्तसंख्यापरिज्ञानार्थमिदमाह प्रतीत यस्य वृत्तस्य संख्या जिज्ञासेत तत् भूमौ प्रस्तारयेत्। ततः तस्यान्ते यो लकारः सजातीयापेक्षया तमादौ कृत्वा प्रातिलोम्येन द्विरावर्तयेत् तत्र निराकाराया आवृत्तेरसम्भवात् प्रथमातिक्रमे कारणाभावात् एकसंख्या लभ्यते ततश्च एकसंख्याकम् अन्त्यलकारस्य अधस्तात् स्थापयित्वा द्विगुणयेत्। पुनस्तदपि पूर्वस्यैव यावन्ति वृत्ताक्षराणि प्रतिलोम्येन समाप्यन्ते, तत्र याः संख्या निष्पद्यन्ते तावतिथं तद्वृत्तम् इति॥ २ तत्र विशेषमाह तत इति पूर्वोक्ते कर्मणि क्रियमाणे यदि सा संख्या गकारस्थानम् आपद्यते तदा तां द्विगुणयित्वा ततः संख्यासमुदायात् एकं त्यजेत् ततः पूर्वोक्तं कर्म कुर्यात्। ततः परिपूर्णत्वात् तत् वृत्तसंख्या सिद्ध्यति॥

उद्दिष्टं द्विगुणानाद्यादुपर्यङ्कान्समालिखेत् ।
लघुस्था ये तु तत्राङ्कास्तैः सैकैर्मिश्रितैर्भवेत् ॥ ५ ॥

उद्दिष्टमिति यो भेदः पृष्टः तस्य आद्याद्वर्णादारभ्य अन्तिमपर्यन्तम् उपरि द्विगुणान् अङ्कान् समालिखेत् आद्यवर्णशिरसि एककं दत्त्वा तदग्रे द्विगुणानित्यर्थः । ये तु तत्र तेषूपरिस्थितेषु लघुस्था लघुवर्णशिरःस्थाः अङ्काः तैः सैकैः एकेनाधिकेन सहितैः मिश्रितैः संयोजितैः पिण्डीकृतैरिति यावत् सद्भिः उद्दिष्टं नाम प्रत्ययो भवेत् । यथा केनचित्पृष्टं "रो मृगी" (S । S) इति कतमो भेदः त्र्यक्षरप्रस्तारे ?, तत्र आद्योपरि एककं दत्त्वा द्वितीयोपरि द्विकं तृतीयोपरि चतुष्कं न्यस्येत् यथा [१ २ ४ / S । S] अत्र लघुस्थो ह्यङ्कः एकेन मिश्रये संजाताः त्रयः इत्ययं तृतीयो भेद इति सम्पन्नमुत्तरम् । चतुरक्षरप्रस्तारे केनचित्पृष्टं यत् (। S । ।) इत्ययं कतमो भेद इति तत्र प्रथमोपरि एककं द्वितीयोपरि द्विकं तृतीयोपरि चतुष्कं चतुर्थोपरि अष्टकं न्यस्येत् यथा { १ २ ४ ८ / । S । । } अत्र लघूपरिस्थिता अङ्काः (१ । ४ । ८) एककाद्विकचतुष्काष्टकाः तन्मिश्रये संजाताः त्रयोदश एकेन मेलने चतुर्दश ततश्चायं चतुर्दशो भेद इत्युत्तरं समजनि ॥ अयमपि मार्गः पिङ्गलमुनिनैवोद्घाटि । तथाहि तत्सूत्रे उपर्युक्ते ॥

इति उद्दिष्टप्रत्ययः ।

"परे पूर्णम्"[1] ८ । ३४ इति पि० सू०

---

१ अतः अनेकद्वित्रिलघुक्रियासिद्ध्यर्थं यावत् अभिमतं प्रथमप्रस्तारवत् मेरुप्रस्तारं दर्शयति, उपरिष्टात् एकं चतुरस्रकोष्ठं लिखित्वा तस्य अधस्तात् उभयतः अर्द्धनिष्क्रान्तं कोष्ठकद्वयं लिखेत्, तस्य अपि अधस्तात् त्रयं तस्य अपि अधस्तात् चतुष्टयं यावदभिमतं स्थानम् इति प्रथममेरुप्रस्तारः । तस्य प्रथमे कोष्ठे एकसंख्यां व्यवस्थाप्य लक्षणम् इदं प्रवर्त्तयेत् । तत्र परे कोष्ठे यत् वृत्तसंख्याजातं तत् पूर्वकोष्ठयोः पूर्णं निवेशयेत् । तत्र उभयोः कोष्ठयोः एकैकम् अङ्कं दद्यात् । ततः तृतीयायां पङ्क्तौ पर्यन्तकोष्ठयोः परकोष्ठगतम् एकैकम् अङ्कं दद्यात् मध्यकोष्ठे तु परकोष्ठद्वयाङ्कम् एकीकृत्य पूर्णं निवेशयेत् इति पूर्णशब्दार्थः । चतुर्थ्यां पङ्क्तौ अपि पर्यन्तकोष्ठयोः एकैकम् एव स्थापयेत् । मध्यमकोष्ठयोस्तु परकोष्ठद्वयाङ्कम् एकीकृत्य पूर्णं त्रिसंख्यारूपं स्थापयेत् । उत्तरत्रापि अयमेव न्यासः । तत्र द्विकोष्ठायां पङ्क्तौ एकान्तरस्य विन्यासः ।

अथोक्तादिषु सर्वकृत्यङ्गादिगुरुलघ्वादिपादकवृत्तकथनद्वारा प्रस्तारशोधनार्थेकद्व्यादिलगक्रियामाह—(एकद्व्यादिलगक्रियाप्रत्ययो नाम अस्मिंश्छन्दसि सर्वगुरूणि वृत्तानि कति ? द्विगुरूणि त्रिगुरूणि वा कति ? तथा सर्वलघूनि द्विलघूनि त्रिलघूनि वा कतीत्यादिशङ्कायामियन्तीति ज्ञानम्—) ।

वर्णान्वृत्तभवान्सैकानौत्तराधर्यतः स्थितान् ।
एकादिक्रमतश्चैतानुपर्युपरि निक्षिपेत् ॥ ६ ॥
उपान्त्यतो निवर्तेत त्यजेदेकैकमूर्ध्वतः ।
उपर्याद्याद्गुरोरेवमेकद्व्यादिलगक्रिया ॥ ७ ॥

वर्णानिति वृत्तभवान् उक्तादिवृत्तनिष्ठान् वर्णान् वर्णसंख्याकान् एककान् अङ्कानित्यर्थः सैकान् एकेन अधिकेन एककेन सहितान् औत्तराधर्यतः उत्तराधरभावेन स्थितान् कुर्यादिति शेषः । एतान् पूर्वमुत्तराधरभावेन स्थापितानङ्कान् एकद्वित्र्यादिक्रमेण उपर्युपर्यङ्के निक्षिपेत् मेलयेत् । मेल्यमानसमसंख्यया उपरिक्षेपो मेलनं नतु स्वस्यैव स्वरूपः तत्स्थाने शून्यताप्रसक्त्या द्वितीयादिमेलनावृत्त्यभावापत्तेः ॥ उपान्त्यत इति उपान्त्यम् अन्त्यसमीपं अधःस्थस्य पूर्वमुपरि २ मेलने सर्वोपरिस्थोऽन्त्यो ज्ञेयस्तदधोभावी चोपान्त्योऽङ्कः तत उपान्त्यपर्यन्तमेलनं कृत्वेत्यर्थः तमन्त्येऽमेलयित्वा ऊर्ध्वतः ऊर्ध्वप्रत्यावृत्त्यैकैकं त्यजन् निवर्तेत विरमेत । एवं कृते आद्यात् प्रथमाद् गुरोः भेदात् उपरि अनन्तरम् एकद्व्यादिलगक्रिया अयम् एकलघुः भेदः अयं द्विलघुः भेदः अयं त्रिलघुः भेदः तथाऽयमेकगुरुरयं द्विगुरुः भेदः इत्यादि क्रिया ज्ञेयेति शेषः । सर्वोपरिस्थः सर्वगुरुः सर्वाधःस्थः सर्वलघुरिति संप्रदायः ॥ यथा त्र्यक्षरे वर्णसमसंख्याकान् त्रीन् एकेनाधिक्ये च चतुरः एककान् लिखेत् तद्यथा { १ १ १ १ } ततोऽधस्तनम् एकाङ्कं तदुपरिस्थैकाङ्के संयोज्य द्व्यङ्कं कुर्यात् तद्यथा { १ १ २ १ १ १ } ततो द्व्यङ्कं तृतीयैकके

तत्र एकगुर्वेकलघुवृत्तं भवति । तृतीयायां पङ्क्तौ द्व्यक्षरस्य प्रस्तारः । तत्र एकं सर्वगुरु द्वे एकलघुनी एकं सर्वलघु इति कोष्ठक्रमेण वृत्तानि भवन्ति । चतुर्थ्यां पङ्क्तौ त्र्यक्षरस्य प्रस्तारः। तत्र एकं सर्वगुरु त्रीणि एकलघूनि त्रीणि द्विलघूनि एकं सर्वलघु । तथा पञ्चमादिपङ्क्तौ अपि सर्वगुर्वादि सर्वलघ्वन्तम् एकद्व्यादिलघु द्रष्टव्यम् इति ॥

मेलयेत् तद्यथा { ३ १ १ / १ १ } त्र्यङ्कन्तु न मेलयेत् 'उपान्त्यतो निवर्तते'त्युक्तेः पुनरधस्तनं द्वितीये मेलयेत् इति संप्रदायः। तद्यथा { ३ १ ३ १ / १ १ १ १ } एवमेकः सर्वगुरुः उपरिस्थः ततश्च सोपानद्वितीयपादन्यासस्थाने स्थितस्त्र्यङ्क इति त्रय एकगुरुकाः पुनः तदधःपादन्यासस्थानेपि त्र्यङ्क इति त्रय एव द्विगुरुकाः। एवं सर्वाधःस्थे सोपानस्य पादन्यासस्थाने एकाङ्क इति एकः सर्वलघुः तत उपरिस्थत्र्यङ्केन एकलघुकाः त्रयः पुनरुपरिस्थत्र्यङ्केन द्विलघुका अपि त्रय एवेति सर्वत्रैवं ज्ञेयम्॥

चतुरक्षरजातिसोपानम्।

१				
१	४			
१	३	६		
१	२	३	४	
१	१	१	१	१

पञ्चाक्षरजातिसोपानम्।

१					
१	५				
१	४	१०			
१	३	६	१०		
१	२	३	४	५	
१	१	१	१	१	१

नवाक्षरजातिसोपानम्।

१	सर्वगुरुः									
१	९	एकगुरुः अष्टलघुः								
१	८	३६	द्विगुरुः सप्तलघुः							
१	७	२८	८४	त्रिगुरुः षड्लघुः						
१	६	२१	५६	१२६	चतुर्गुरुः पञ्चलघुः					
१	५	१५	३५	७०	१२६	पञ्चगुरुः चतुर्लघुः				
१	४	१०	२०	३५	५६	८४	षड्गुरुः त्रिलघुः			
१	३	६	१०	१५	२१	२८	३६	सप्तगुरुः द्विलघुः		
१	२	३	४	५	६	७	८	९	अष्टगुरुः एकलघुः	
१	१	१	१	१	१	१	१	१	१	सर्वलघुः

सोपानफलानि पृथक्कृत्य लिख्यन्ते ।

तत्र त्र्यक्षरजातेः सोपानफलम्		
	१	सर्वगुरुकः
द्विलघुकाः	३	एकगुरुकाः
एकलघुकाः	३	द्विगुरुकाः
सर्वलघुः	१	

चतुरक्षरजातेः सोपानफलम्		
	१	सर्वगुरुकः
त्रिलघुकाः	४	एकगुरुकाः
द्विलघुकाः	६	द्विगुरुकाः
एकलघुकाः	४	त्रिगुरुकाः
सर्वलघुः	५	

पञ्चाक्षरजातेः सोपानफलम्		
	१	सर्वगुरुकः
चतुर्लघुकाः	५	एकगुरुकाः
त्रिलघुकाः	१०	द्विगुरुकाः
द्विलघुकाः	१०	त्रिगुरुकाः
एकलघुकाः	५	चतुर्गुरुकाः
सर्वलघुः	१	

नवाक्षरजातिसोपानफलम् ।

	१	भेदः	सर्वगुरुकः
अष्टलघुकाः	९	भेदा	एकगुरुकाः
सप्तलघुकाः	३६	भेदा	द्विगुरुकाः
षड्लघुकाः	८४	,,	त्रिगुरुकाः
पञ्चलघुकाः	१२६	,,	चतुर्गुरुकाः
चतुर्लघुकाः	१२६	,,	पञ्चगुरुकाः
त्रिलघुकाः	८४	,,	षड्गुरुकाः
द्विलघुकाः	३६	,,	सप्तगुरुकाः
एकलघुकाः	९	,,	अष्टगुरुकाः
सर्वलघुः	१	भेदः	

तत्र तृतीयपङ्क्तावेकं सर्वगुरु सर्वलघु च द्वे एकगुरुके एकलघुके च भवतः चतुर्थपङ्क्तावेकं सर्वगुरु सर्वलघु च त्रीण्येकगुरुकाणि त्रिलघुकानि च । त्रीण्येव द्विगुरुकाणि द्विलघुकानि च । एवं सर्वत्र एकद्वित्रिचतुर्लगक्रिया ज्ञेयेति ।

"द्विरर्द्धे"[1] ८।२८ "रूपे शून्यम्"[2] ८।२९ "द्विः शून्ये"[3] ८।३० "तावदर्द्धे तद्गुणितम्"[4] ८।३१ "द्विर्यूनं तदन्तानाम्"[5] ८।३२

(टि०) १ प्रस्तारात् विना वृत्तसंख्या परिज्ञानार्थमाह। द्विरिति अपनीते इति अध्याहारः यदा जिज्ञासेत षडक्षरे छन्दसि कति वृत्तानि भवन्ति। तदा तां छन्दोऽक्षर-संख्यां भूमौ स्थापयित्वा ततः अर्द्धमपनयेत्। तस्मिन् अपनीते द्वौ लभ्येते। ततस्तां द्विसंख्यां भूमौ पृथक् प्रस्तारयेत्। ततः शेषास्त्रयः अक्षरसंख्यायां भवन्ति। तेषामर्द्धयितुं अशक्यत्वात् किं कर्तव्यम् इत्याह २ रूपे इति विषमसंख्यातः रूपम् अपनीय तस्मिन् अपनीते शून्यं लभ्यते। तत् पूर्वलब्धायाः द्विसंख्यायाः अधस्तात् स्थापयेत् ततः द्विसं-ख्या अवशिष्यते ततः अर्द्धे अपनीते पुनः द्विसंख्या लभ्यते 'तां शून्याधस्तात् स्था-पयेत् ततः रूपे शून्यं लभ्यते (२) तत् द्विसंख्यायाः अधस्तात् स्थापयेत् ततः किं कर्त-व्यम् इत्याह ३ द्विरिति शून्यस्थाने द्विरावृत्तिं कुर्यात् तत्र निराकारायाः आवृत्तेः असंभवात् प्रथमातिक्रमे कारणाभावात् एकसंख्या लभ्यते तां शून्ये स्थापयित्वाद्विगुणयेत्। ततः द्वौ भवतः तस्य उपरिष्टात् अर्द्धस्थानं द्विसङ्ख्याङ्कं तत् अपनीय तस्य स्थाने तं द्विसङ्ख्याङ्कं स्थापयेत्। अनन्तरम् इदं कार्यम् इत्याह ४ तावदिति यत् अर्द्धस्थाने स्थितं सङ्ख्याजातं तत्तावद्गुणितं कुर्यात् एतत् उक्तं भवति स्वसङ्ख्याया एव गुणयितव्यम् इति। ततः द्वौ द्वाभ्यां गुणितौ चत्वारः भवन्ति तेषाम् उपरिष्टात् शून्यस्थानं तत्र तान् आरोपयेत्। अनन्तरं द्विःशून्ये इति द्विगुणिता अष्टौ भवन्ति, तान् अपि अर्द्धस्थाने निधाय तावद् गुणान् कुर्यात्। ततः अष्टौ अष्टाभिः गुणिताः चतुःषष्टिः भवन्ति गायत्री-समवृत्तानि। अनेन एव न्यायेन अष्टाविंशत्यधिकशतम् उष्णिहः। षट्पञ्चाशदधिके द्वे शते अनुष्टुभः। द्वादशोत्तराणि पञ्चशतानि बृहत्याः। चतुर्विंशत्यधिकं सहस्रं पङ्क्तेः अष्टचत्वारिंशदधिके द्वे सहस्रे त्रिष्टुभः। षण्णवत्यधिकानि चत्वारि सहस्राणि जगत्याः। एवम् अतिछन्दसां कृतीनां च द्रष्टव्यम्। ५ द्विर्द्व्यूनमिति गायत्र्यादिवृत्तसंख्याजातं द्विगुणीकृत्य द्वाभ्याम् ऊनं कुर्यात्। तत्तदन्तानां परिमाणं भवति, यस्य छन्दसः सङ्ख्या द्विगुणिता तत्पर्यन्तानां पूर्वेषामेकाक्षरप्रभृतीनां सङ्ख्या भवति इत्यर्थः ॥३२॥

"परेण पूर्णम्" ८। ३३ इति पि० सू०

अथावसरप्राप्तां संख्यामाह (संख्याप्रत्ययो नाम प्रस्तारं विनापि तत्तच्छन्दसामेतावन्ति २ वृत्तानीति वृत्तसंख्यापरिज्ञानम्) ॥

लगक्रियाङ्कसन्दोहे भवेत्संख्या विमिश्रिते ॥

(प्रकारान्तरमाह)

उद्दिष्टाङ्कसमाहारः सैको वा जनयेदिमाम् ॥ ८ ॥

* इति वृत्तरत्नाख्ये छन्दोग्रन्थे षष्ठोऽध्यायः *

लगेति लगक्रियायां पूर्वोक्तायां येऽङ्काः तेषां सन्दोहे समूहे विमिश्रिते परस्परं योजिते सति संख्या भवेत्। यस्य वृत्तस्य संख्यां जिज्ञासेत तस्यैव लगक्रियायां यावन्तोऽङ्काः फलिताः तानन्योन्यं संयोज्य संख्यासिद्धिरित्यर्थः। यथा त्र्यक्षरस्य लगक्रियाफलिताङ्काः (१–३–३–१) एकत्रित्र्येकास्तेषां मेलने सञ्जाता अष्टौ इति सा भेद(प्रस्तार) संख्या चतुरक्षरे च (१–४–६–४–१) एकचतुःषट्चतुरेकाः तेषां मेलने च षोडशेति सैवात्र संख्या प्रकारान्तरेण संख्यामाह उद्दिष्टेति सैक एकेनाधिकेन सहितः उद्दिष्टाङ्कानां पूर्वोक्तानां यः समाहारः मेलनं वाऽथवा इमां संख्यां जनयेत् उत्पादयेत्। यथा त्र्यक्षरे एकद्विचतूरूपा उद्दिष्टाङ्काः मेलने सप्त एकेन योजने अष्टाविति सा तस्य संख्या। चतुरक्षरे एकद्विचतुरष्टाङ्कमेलने एकयोजने षोडशेति सा तस्य सङ्ख्या इदं चोपलक्षणं प्रस्तारगणनयापि संख्याज्ञानसिद्धेः सूत्रेषु तथाप्युक्तेश्च। प्रकारद्वयमपि पैङ्गले यथोक्तम्।

अथाऽध्वयोगप्रत्ययः। यदि केनचिच्छान्दसस्य पृष्टं यदमुकवृत्तस्य प्रस्तारलेखनार्थे कियन्मितं पत्रमपेक्षितमिति तज्ज्ञानायाध्वयोगप्रत्ययः सः च वृत्तप्रस्तारलेखार्थं पत्रादिस्थानेयत्तावोधनं नाम ॥

अत्र स्फुटप्रत्ययत्वात् पिङ्गलमुनिर्न सूत्रयाञ्चकार।

---

१ परे इति तत् एतत् छन्दोवृत्तसङ्ख्याजातं द्विगुणितं पूर्णमेव स्थापयितव्यं न न्यूनम्। परे छन्दसि जिज्ञासिते तत् सङ्ख्याजातं द्विगुणितं परस्य छन्दसः वृत्तानां सङ्ख्या भवति। तद् यथा। चतुःषष्टिः गायत्रीसमवृत्तानां सङ्ख्या द्विगुणिता सती परस्य उष्णिहः समवृत्तसङ्ख्या अष्टाविंशशतं भवति ॥३३॥

संख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तितः ॥
वृत्तस्याङ्गुलिकी व्याप्तिरधः कुर्यात्तथाङ्गुलिम् ॥ ६ ॥

संख्येति पूर्वप्रश्नज्ञाततत्तत्संख्या तदङ्का द्विगुणा द्वौ गुणौ आवृती यस्याः सा तथा एकेन संख्यया ऊना रहिता सती सद्भिः सुधीभिः अध्वामार्गः लेखनस्थानेयत्ता प्रकीर्तितः उक्तः । अत्रोपपत्तिमाह वृत्तस्येति वृत्तस्य वृत्तप्रस्तारस्य व्याप्तिः व्यासतो व्यापनम् (स्थानम्) आङ्गुलिकी एकाङ्गुलिमिता भवति। आङ्गुलिकीं व्याप्तिमिति पाठे मुक्त्वेति शेषः । एतच्चोपलक्षणं तेन लेखकप्रक्रियामानमात्रं गृह्यते । तथा अधः गुरुलघुसंकेतलेखन्यासेः निम्नस्थाने अङ्गुलिं अङ्गुलीमितस्थानमित्यर्थः रिक्तामिति शेषः कुर्यात् अन्यथा स्पष्टतयाऽप्रतीतेः अरस्यतापातेन अचाक्षुष्यत्वप्रसङ्गः । यथा त्र्यक्षरप्रस्तार लेखनार्थं कियत्परिमितं पत्रमानयामीति शिष्यादिप्रश्ने त्र्यक्षरप्रस्तारीयाम् अष्टसंख्यां द्विगुणीकृत्य सञ्जातां षोडशसंख्याम् एकेन ऊनयेत् ततो जाता पञ्चदशेति पञ्चदशाङ्गुलिपरिमितस्थानमपेक्षितमित्युत्तरं सम्पन्नम् इदं च लेखनयोग्यस्थानस्योपलक्षणम् ॥

अत्र च अङ्गुल्यष्टकमितस्थानं गुरुलघुरूपप्रस्तारलेखार्थम् अङ्गुलिसप्तकमितं च रिक्तं श्वेतिमाख्यम् यथा :—

१	ऽ ऽ ऽ	प्रस्तारस्थानम्
२		रिक्तस्थानम्
३	। ऽ ऽ	प्रस्तार०
४		रिक्त०
५	ऽ । ऽ	प्रस्तार०
६		रिक्त०
७	। । ऽ	प्रस्तार०
८		रिक्त०
९	ऽ ऽ ।	प्रस्तार०
१०		रिक्त०
११	। ऽ ।	प्रस्तार०
१२		रिक्त०
१३	ऽ । ।	प्रस्तार०
१४		रिक्त०
१५	। । ।	प्रस्तार०

एष प्रत्ययो मुनिना नोक्तः साधारणत्वात् स्फुटं विज्ञेयत्वाच्च "षष्ठः प्रत्ययोऽध्वयोगपरिच्छित्तिः" इति कस्यचिद्वाक्यमत्र प्रामाणिकत्वेन नारायणभट्टेनोक्तं दृश्यते ॥ ६ ॥

अधुनाऽवसितप्रतिज्ञाभरो ग्रन्थकारः श्रोतृप्रवृत्तिसाधनं स्ववंशं कीर्तयन्नुपसंहरति ॥

वंशेऽभूत्कश्यपस्य प्रकटगुणगणः शैवसिद्धान्तवेत्ता
विप्रः पव्येकनामा विमलतरमतिर्वेदतत्त्वार्थबोधे ।
केदारस्तस्य सूनुः शिवचरणयुगाराधनैकाग्रचित्तः
छन्दस्तेनाभिरामं प्रविरचितमिदं वृत्तरत्नाकराख्यम् ॥१०॥

वंशेति कश्यपस्य ऋषेः वंशेऽन्वये प्रकटो गुणानां दयादाक्षिण्यादीनां गणः समुदायो यत्र स तथा शैवसिद्धान्तानां शैवागमानां शिवसूत्रादीनां वेत्ता ज्ञाता (शेषषष्ठया समासः) तथा वेदानां चतुर्णां तत्त्वार्थस्य दुर्बोधार्थस्य बोधे ज्ञाने विमलतराऽतिशयेन विमला स्फटिकवद्यथार्थबोधकरी मतिर्मननशालिनी बुद्धिर्यस्य सः एवंभूतः पव्येक इति नाम यस्य स विप्रः कश्चिद् ब्राह्मणोऽभूत् । तस्य पव्येकनाम्नो विप्रस्य सूनुः पुत्रः शिवचरणयुगस्य महादेवपादपद्मद्वन्द्वस्य आराधने सेवायाम् एकाग्रं समाहितं चित्तं चिन्तनशीलं मनो यस्य सः केदारो नाम अभूत् । तेन केदारेण अभिरामम् अभिनलक्ष्यलक्षणयुतत्वेन प्रस्तारादिस्वच्छप्रक्रियादिगुणवत्त्वेन च मनोज्ञम् इदं पूर्वोक्तं वृत्तरत्नाकराख्यं तदभिधं छन्दःशास्त्रं प्रविरचितं प्रकर्षेण कृतम् ॥ इति शिवम् ॥

श्रीजज्जोंमधुदापुरीयविबुधः श्रीकेशवोऽभूदिदम् ।
यच्छिष्यादिपरम्परावृतमहीचक्रं सुविद्यागृहम् ॥
पौत्रस्तस्य मुकुन्दलाल इति तत्पौत्रश्च खेदाद् गृहाद् ।
जन्मभूमेत्य सुपाठनेन सुमती रामप्रपन्नोऽवसत् ॥
संवस्येह गिरोऽङ्घ्रिपद्मयुगलं संसेव्य देव्याश्चिरं
स्वायासेन च शास्त्रदुर्गमहतो विद्यापुरस्यान्तरम् ॥
निर्विश्य प्रविविच्य काव्यसुषमारामे परिश्राम्यति
काव्यव्याकृतितीर्थशास्त्रिपदवीं प्राप्तोऽपि कालं नयन् ॥
योऽयं पाठं पाठयावां सुविद्यां ग्रामे ग्रामे छात्रवर्गेण साकम् ॥
स्वीयां कीर्तिं चन्द्रिकां विप्रकीर्य कान्त्या वृद्धयोदेति शुक्ले व चन्द्रः ॥

रघुपातिनिलयेसौ पाठशालाध्यपाठी हरिपदकमलाग्रे वृत्तरत्नाकरीयम् ॥
शुभमुपनयतीमं संग्रहं संप्रपूर्णं भवतु विबुधगेहेष्वास्थितस्तन्मुदेयम् ॥
कश्मीरादिकलीवृत्तां म.शिनिभे धर्मावतारे प्रभौ ।
श्रीमच्छ्रील–प्रतापसिंहनृपतिश्रेष्ठे प्रजाः शासति ॥
खर्ष्यङ्केन्दुमिते शुचावहितिथौ श्रीवैक्रमे वत्सरे ।
टीका संग्रहनामिकान्तमगमच्छ्रीवृत्तरत्नाकरे ॥

इति वृत्तरत्नाकराख्यच्छन्दोग्रन्थस्य रत्नसंग्रहव्याख्यायां षष्ठोऽध्यायः

* समाप्तश्चायं सव्याख्यो ग्रन्थः *

॥ शुभमस्तु ॥

सर्वसाधारणविज्ञप्तिः ।

श्रीमन्तो विद्वांसोऽन्तेवासिनश्च विदाङ्कुर्वन्तु सज्जनाः यत् पं० रामप्रपन्नशास्त्रिणा ऽस्मत्सविधे कतिपय एव ग्रन्था मुद्रणार्थं प्रहितास्ते त्वस्माभिर्यथावकाशं मुद्रिता मुद्राप्यन्ते च सज्जनैश्च तेषां मानोपि व्यधायि (परन्तु धनिकैः पुस्तकालयाध्यत्तैश्चेतो दृष्टिपातोऽपि नाकारि। येन कर्तुरायासस्साफल्यमाप्नुयात् । इदानींपर्यन्तं कियानेव व्ययः समजनि यतोंऽशेनापि प्रत्यावृत्तिर्नाभूत् । आयासस्य तु कैव वार्ता अतस्तेषामुचितमस्ति यदितो दृशं विदध्युः । इमां पञ्चनदीयविश्वविद्यालयाध्यत्तानां (रजिप्फ़ूर साहब)महोदयानां दयां स्मारं स्मारं वारं वारं धन्यवादान् विदध्मः । यैर्वासुदेवविजयस्य पुनः पाठ्यश्रेण्यां स्थानं प्रदत्तम्, येन पञ्चनदादिषु प्रतिपाठशालं वासुदेवविजयस्यादरेणा प्रवृत्तिरवलोक्यते ।

अस्यापि । ॥) मूल्यक वृत्तरत्नाकर—

ग्रन्थस्य तेषां महामान्यानां के० सी० बूल्नर साहबमहोदयानां सम्मत्यैव मुद्रणं प्रारब्धमासीत् कार्यवशतः सत्वरता नाशक्यत कर्तुं । तथापि तस्य हरेर्भगवतोऽपार करुणाऽस्ति यदेतस्मिन्नपि महादुर्घटे पत्रादिमहर्घके समरसमये यथा कथञ्चित्संमुद्रणं समपद्यत । इदमेकं पुस्तकरत्नं यथासीत्तथैव मुद्रणमपि हिरण्मयकोशाधानमिवाभूत्, यस्य प्रशंसा करगतकङ्कणस्येव वृथास्ति भूमिकाद्वयेन चाविरक्रियत । किञ्च—

निरुक्तम्

प्रपन्नालोकव्याख्योपेतं पञ्चाध्यायात्मकम् ॥ २।) मूल्यकम्

अस्य विदुषो दर्शनयोग्यमस्ति । यत्परीक्षापाथोधेस्तु अग्निपोतोऽस्त्येव । परन्तु विदुषामपि साहाय्यप्रदानकुशलः । किञ्च—

विदग्धमुखमण्डनकाव्यम् । ।॥) अग्रिममूल्यकम्

अपि कुञ्चिकाटीकायुतम् अतीव मनोहरं समस्तप्रशस्तगुणनिकरं सम्प्रत्यङ्क्यते यदन्तराऽस्य लग्नता विपश्चितामपि दुःसम्पादा । तत्त्वञ्चास्य दर्शनेन स्वयं ज्ञातं भविष्यति तथा पूर्वमुद्रितपुस्तकानामन्तः सारासारता दर्पणे मुखस्य सुन्दरासुन्दरतेव प्रकटीभविता । आशासे च विश्वविद्यालयकार्याध्यक्षा अपि परीक्ष्येममेव ग्रन्थं पाठ्यश्रेण्यन्तःपातिनं विधाय कर्तुरायासादिकं सफलयिष्यन्तीति किम्बहुना विज्ञेष्विति शिवम् ॥

पंजाब प्रिंटिंग वर्क्स बुक डिपो,

गणपत रोड अनारकली, लाहौर ।

THE MEGHADUTA

BY

KALIDASA

WITH THE

COMMENTARY OF MALLINATHA

EDITED AND PUBLISHED

BY

PANDIT JIBANANDA VIDYASAGARA, B. A.

Superintendent Free Sanskrit College, Calcutta.

SECOND EDITION.

CALCUTTA.

PRINTED AT THE SARASWATI PRESS.

1889.

To be had from Pandit Jibananda Vidyasagara, B. A.
Superintendent Free Sanskrit College,
No. 2 Ramnatha Mozumdar's Street, Calcutta.

१ व्याशुबोधव्याकरणम्	२
२ धातुरूपादर्शः	१॥
३ शब्दस्तोममहानिधिः	८
४ सिद्धान्तकौमुदी सरलासहिता	१०
५ सिद्धान्तबिन्दुसारः (वेदान्त)	॥
६ तत्त्वज्ञानादिपद्धतिः (बङ्गाक्षरैः	४
७ गयाश्राद्धादिपद्धतिः	३
८ शब्दार्थरत्नम्	॥
९ वाक्यमञ्जरी (बङ्गाक्षरैः)	।०
१० छन्दोमञ्जरी तथा वृत्तरत्नाकर सटीक	॥०
११ वेणीसंहार नाटक सटीक	॥०
१२ मुद्राराक्षस नाटक सटीक	॥
१३ रत्नावली नाटिका सटीक	॥
१४ मालविकाग्निमित्र सटीक	१
१५ धनञ्जय विजय सटीक	।०
१६ महावीरचरितनाटक	।०
१७ साङ्ख्यतत्त्वकौमुदी सटीक	१
१८ वैयाकरणभूषणसार	॥
१९ लीलावती	॥०
२० बीजगणित	॥
२१ शिशुपालवध सटीक (माघ)	२
२२ किरातार्जुनीय सटीक	१॥०
२३ कुमारसम्भव पूर्वखण्ड सटीक	॥०
२४ कुमारसम्भव उत्तरखण्ड सटीक	॥
२५ वररुचिम् पाणिनीयम्	॥०
२६ वाचस्पत्यम्(बृहदभिधान)	१००
२७ कादम्बरी सटीक	१॥०
२८ राजप्रशस्ति सटीक	।
२९ अलङ्कारचिन्तामणि तथा कुवलयानन्द[illegible]	
३० सर्वदर्शनसंग्रहः	१
३१ भामिनीविलास सटीक	।
३२ हितोपदेश सटीक	॥
३३ भाषापरिच्छेदमुक्तावलीसहित	॥
३४ षड्विंशाद्याद	।०
३५ दशकुमारचरित सटीक	१
३६ परिभाषेन्दुशेखर	॥०
३७ कविकल्पद्रुम धातुपाठः	।०
३८ चक्रदत्त (वैद्यक)	१॥०
३९ उणादिसूत्र सटीक	२
४० मेदिनीकोष	१
४१ पञ्चतन्त्रम् सटीक	१
४२ विद्वन्मोदतरङ्गिणी(चम्पूकाव्य)	॥
४३ माधवचम्पू	।०
४४ तर्कसंग्रह व अनुवाद सहित	॥
४५ प्रसन्नराघव नाटक	१
४६ विवेकचूडामणि	।
४७ काव्यसंग्रह सटी[illegible] (पूर्व)	७
४८ लिङ्गानुशासन स[illegible]	१
४९ ऋतुसंहार सटीक प्रभि[illegible]	।
५० विक्रमोर्वशी (सटीक)	१
५१ वसन्ततिलक भाण	।
५२ मञ्जरी व्याख्या	॥०
५३ साङ्ख्यदर्शन (भाष्यसहित)	२
५४ भोजप्रबन्ध	॥
५५ नलोदय सटीक	।
५६ ईश केन कठ प्रश्न मुण्ड माण्डूक्य (सटीक सभाष्य)	५
५७ छान्दोग्य सटीक सभाष्य	५
५८ तैत्तिरीय ऐतरेय श्वेताश्वतर (नृसिंह) सटीक	५

मेघदूतम्

महाकविकालिदासविरचितम्।

मल्लिनाथसूरिविरचितसञ्जीवनीटीकासमेतम्।

बि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

संस्कृत्य प्रकाशितम्।

द्वितीयसंस्करणम्।

कलिकातानगरे

सरस्वतीयन्त्रे

मुद्रितम्।

खृं १८८९।

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি, এ,
২নং রমানাথমজুমদারের ষ্ট্রীট্,
কলিকাতা।

প্রিণ্টর—শ্রীক্ষেত্রমোহন মুখোপাধ্যায়
৫৬ নং আমহার্ষ্ট ষ্ট্রীট্,
কলিকাতা।

।। श्री वैद्यनाथ झा - मु॰ रन्दूपुर
पो॰ बड़हिया - जि॰ मुंगेर

मेघदूतम् ।

पूर्वमेघः ।

कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।

मातापितृभ्यां जगतो नमो वामार्धजानये ।
सद्यो दक्षिणदृक्पातसंकुचद्वामदृष्टये ॥१॥

अन्तराय तिमिरोपशान्तये
शान्तपावनमचिन्त्यवैभवम् ।
तन्नरं वपुषि कुञ्जरं मुखे
मन्महे किमपि तुन्दिलं महः ॥ २ ॥

शरणं करवाणि शर्मदं ते
चरणं वाणि ! चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः
कुरु मामम्ब ! कृतार्थसार्थवाहम् ॥३॥

इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥४॥

आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति शास्त्रात् काव्यादौ वस्तुनिर्देशात् कथां प्रस्तौति कश्चिदिति । स्वाधिकारात् स्वनियोगात् प्रमत्तोऽनवहितः

यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥१॥

प्रमादोऽनवधानतेत्यमरः। जुगुप्साविरामप्रमादार्थानामुपसंख्यानमित्यपादानत्वात् पञ्चमी। अतएवापराधाद्धेतोः कान्ताविरहेण गुरुणा दुर्भरेण दुस्तरेणेत्यर्थः गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे इति विश्वः। वर्षं संवत्सरं भोग्येन कालाध्वनोरत्यन्तसंयोग इति द्वितीया। अत्यन्तसंयोगे चेति समासः। कुमति चेति णत्वम्। भर्तुः स्वामिनः शापेन अस्तङ्गमितो महिमा सामर्थ्यं यस्य सोऽस्तङ्गमितमहिमा अस्तमिति मकारान्तमव्ययम् तस्य द्वितीयेति योगविभागात् समासः। कश्चित् अनिर्दिष्टनामा यक्षो देवयोनिविशेषः विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः इत्यमरः। जनकतनयायाः सीतायाः स्नानैः अवगाहैः पुण्यानि पवित्राणि उदकानि येषु तेषु पावनेषु इत्यर्थः। छायाप्रधानास्तरवः छायातरवः शाकपार्थिवादित्वात् समासः। स्निग्धाः सान्द्राः छायातरवो नमेरुवृक्षा येषु तेषु वसतियोग्येषु इत्यर्थः स्निग्धन्तु मसृणे सान्द्रे इति छायावृक्षो नमेरुः स्यादिति च शब्दार्णवे। रामगिरेः चित्रकूटस्याश्रमेषु वसतिम् वहिवसत्तिभ्यश्चेत्यौणादिकोऽतिप्रत्ययः चक्रे कृतवान्। अत्र रसो विप्रलम्भाख्यः शृङ्गारः तत्रापि उन्मादावस्था अतएव एकत्रानवस्थानं सूचितम्। आश्रमेष्विति बहुवचनेन सीतां प्रति रामस्य हनुमत्स-

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥२॥

न्देशं मनसि निधाय मेघसन्देशं कविः कृतवान् इत्याहुः। अत्र काव्ये सर्वत्र मन्दाक्रान्तावृत्तम्। मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेदिति ॥१॥

तस्मिन्निति। तस्मिन् अद्रौ चित्रकूटाद्रौ अबलाविप्रयुक्तः कान्ताविरही कनकस्य वलयः कटकं कटकं वलयोऽस्त्रियामित्यमरः। तस्य भ्रंशेन पातेन रिक्तः शून्यः प्रकोष्ठः कूर्परात् अधःप्रदेशो यस्य सः तथोक्तः कक्षान्तरे प्रकोष्ठः स्यात् प्रकोष्ठः कूर्परादध इति शाश्वतः। विरहदुःखात् कृश इत्यर्थः। कामुकः स यक्षः कतिचित् मासान् अष्टौ मासान् इत्यर्थः मासानन्यान् गमय चतुर इति वक्ष्यमाणत्वात् नीत्वा यापयित्वा आषाढ़ानक्षत्रेण युक्ता पौर्णमासी आषाढ़ी नक्षत्रेण युक्तः काल इत्यण्। टिड्ढाणञित्यादिना ङीप्। सा आषाढ़ी यस्मिन् पौर्णमासीति आषाढ़ो मासः सास्मिन् पौर्णमासीति संज्ञायामित्यण्। तस्य प्रथमदिवसे आश्लिष्टसानुम् आक्रान्ततटम् वप्रक्रीड़ा उत्खातकेलयः उत्खातकेलिः क्रीड़ायैवंप्रक्रीड़ा निगद्यते इति शब्दार्णवे। तासु परिणतः तिर्य्यग्दन्तप्रहारः तिर्य्यग्दन्तप्रहारस्तु गजः परिणतो मत इति हलायुधः। स चासौ गजश्च स इव प्रेक्षणीयो दर्शनीयः तं मेघं ददर्श। गजप्रेक्षणीयमित्यत्र इवलो-

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-
रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।

पात् लुप्तोपमा। केचित् आषाढस्य प्रथमदिवसे इत्यत्र प्रत्यासन्ने नभसीति वक्ष्यमाणनभोमासप्रत्यासत्त्यर्थं प्रथमदिवसे इति पाठं कल्पयन्ति तदसङ्गतम प्रथमातिरेके कारणाभावात् नभोमासस्य प्रत्यासत्त्यर्थमिति चेत् न प्रत्यासत्तिमात्रस्य मासप्रत्यासत्त्यैव प्रथमदिवसस्याप्युपपत्तेः अत्यन्तप्रत्यासत्तेरुपयोगाभावेन अविवक्षितत्वात् विवक्षितत्वे वा स्वपक्षेऽपि प्रथमदिवसातिक्रमेण मेघदर्शनकल्पनायां प्रमाणाभावेन तदसम्भवात् प्रत्युत अस्मत्पक्षे एव कुशलसन्देशस्य भाव्यनर्थप्रतीकारार्थस्य पुरत एव अनुमानयुक्तं भवतीति उपयोगसिद्धिः। ननु उन्मत्तस्य नायं विवेक इति चेत् न उन्मत्तस्य न अनर्थस्य प्रतीकारार्थं प्रवृत्तिरपीति सन्देश एव मा भूत् तथाच काव्यारम्भ एव अप्रसिद्धः स्यात् इत्यहो मूलच्छेदो पाण्डित्यप्रकर्षः। कथं तर्हि शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणावित्यादिना भगवत्प्रबोधावधिकस्य शापस्य मासचतुष्टयावशिष्टस्योक्तिः दशदिवसाधिक्यादिति चेत् स्वपक्षेऽपि कथं सा विंशतिदिवसैर्न्यूनत्वादिति सन्तोष्टव्यम्। तस्मात् ईषद्वैषम्यमविवक्षितमिति सुष्ठूक्तं प्रथमदिवसे इति ॥२॥

तस्येति। राजानो यक्षाः राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोरिति विश्वः। राज्ञां राजा राजराजः कुबेरः राजराजो धनाधिप इत्यमरः। राजाहःसखि-

मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥३॥
प्रत्यासन्ने नभसि दयिताजीविताालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।

ष्यष्टचिति टच्प्रत्ययः । तस्यानुचरो यक्षः अन्तर्वाष्पो धीरोदात्तत्वात् अन्तस्तम्भिताश्रुः सन् कौतुकाधानहेतोः अभिलाषोत्पादकारणस्य कौतुकञ्चाभिलाषे स्यादुत्सवे नर्महर्षयोरिति विश्वः । तस्य मेघस्य अग्रे कथमपि गरीयसा प्रयत्नेनेत्यर्थः । ज्ञानहेतुविवक्षायामप्यादि कथमव्ययम् । कथमादि तथाप्यन्तं यत्नगौरवबाढयोरित्युज्ज्वलः । स्थित्वा चिरं दध्यौ चिन्तयामास । ध्यै चिन्तायामिति धातोर्लिट् । मनोविकारोपशमनपर्यन्तमिति शेषः । विकारहेतुमाह मेघालोके इति मेघालोके मेघदर्शने सति सुखिनोऽपि प्रियादिजनसङ्गतस्यापि चेतः चित्तम् अन्यथाभूता वृत्तिः व्यापारो यस्य तत् अन्यथावृत्ति भवति विकृतिमापद्यते इत्यर्थः कण्ठाश्लेषप्रणयिनि कण्ठालिङ्गनार्थिनि जने दूरे संस्था स्थितिर्यस्य तस्मिन् दूरसंस्थे सति किं पुनः विरहिणः किमुत वक्तव्यमित्यर्थः विरहिणां मेघसन्दर्शनम् उद्दीपनं भवतीति भावः । अर्थान्तरन्यासोऽलङ्कारः । तदुक्तं दण्डिना, ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन । यत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुन इति ॥३॥

अथ समाहितान्तःकरणः सन् किं कृतवान् इत्याह प्रत्यासन्ने इति । स यक्षो यदिदं दध्यौ स इत्यर्थः नभसि

स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥४॥

श्रावणे नभाः श्रावणिकश्च स इत्यमरः । प्रत्यासन्ने आषाढस्य अनन्तरं सन्निकृष्टे प्राप्ते सतीत्यर्थः दयिताजीवितालम्बनार्थी सन् वर्षाकालस्य विरहदुःखजनकत्वादुत्पन्नार्थप्रतीकारादनर्थोत्पत्तिप्रतिबन्ध एव वरमिति न्यायेन प्रागेव प्रियाप्राणधारणोपायं चिकीर्षुरित्यर्थः जीवनस्य उदकस्य मूतः पटबन्धो जीमूतः, पृषोदरादित्वात् साधुः । मूतः स्यात्पटबन्धेऽपीति रुद्रः । तेन जीमूतेन जलधरेण प्रयोज्येन स्वकुशलमयीं स्वक्षेमप्रधानां प्रवृत्तिं वार्तां वार्ता प्रवृत्तिर्वृत्तान्त इत्यमरः । हारयिष्यन् प्रापयिष्यन् लृट् शेषे चेति चकारात् क्रियार्थक्रियोपपदात् लृट्प्रत्ययः । जीवनार्थं कर्म जीवनप्रदेनैव कर्त्तव्यमिति भावः हृक्रोरन्यतरस्यामिति कर्मसंज्ञया विकल्पात् पक्षे कर्त्तरि तृतीया । प्रत्यग्रैरभिनवैः कुटजकुसुमैः गिरिमल्लिकाभिः कुटजो गिरिमल्लिकेति हलायुधः । कल्पितार्घाय कल्पितः अनुष्ठितः अर्घः पूजाविधिर्यस्य तस्मै मूल्ये पूजाविधावर्घ इत्यमरः । तस्मै जीमूताय क्रियाग्रहणमपि कर्त्तव्यमिति सम्प्रदानत्वाच्चतुर्थी । प्रीतिप्रमुखानि प्रीतिपूर्वकानि वचनानि यस्मिन् कर्मणि तत् प्रीतिप्रमुखवचनं यथा तथा शोभनम् आगतं स्वागतं स्वागतवचनं प्रीतः सन् व्याजहार कुशलागमनं पप्रच्छ इत्यर्थः ॥४॥

धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥५॥
जातं वंशे भुवनविदिते पुष्करावर्त्तकानां

ननु चेतनसाध्यमर्थं कथमचेतनेन कारयितुं प्रवृत्त इत्यपेक्षायां कविः समाधत्ते, धूमेति । धूमश्च ज्योतिश्च सलिलञ्च मरुत् वायुश्च तेषां सन्निपातः सङ्घातो मेघः क्व अचेतनत्वात् सन्देशानर्ह इत्यर्थः । पटुकरणैः समर्थेन्द्रियैः करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपीत्यमरः । प्राणिभिः चेतनैः प्राणी तु चेतनो जन्मीत्यमरः । प्रापणीयाः प्रापयितव्याः सन्दिश्यन्ते इति सन्देशाः ते एव अर्थाः क्व इत्येवम् औत्सुक्यात् इष्टार्थोद्युक्तत्वात् इष्टार्थोद्युक्त उत्सुक इत्यमरः । अपरिगणयन् अविचारयन् गुह्यको यक्षः तं मेघं ययाचे याचितवान् । तथाहि कामार्त्ताः मदनातुराः चेतनाश्चाचेतनाश्च तेषु विषये प्रकृतिकृपणाः स्वभावदीनाः कामान्धानां युक्तायुक्तविवेकशून्यत्वात् अचेतनयाञ्चा न विरुध्यते इत्यर्थः । अत्र मेघसन्देशयोर्विरूपयोर्घटनात् विषमालङ्कारः । तदुक्तं, विरुद्धकार्य्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् । विरूपघटना वासौ विषमालङ्कृतिस्त्रिधेति । सा च अर्थान्तरन्यासानुप्राणिता तत्समर्थकत्वेनैव चतुर्थपादे तस्योपन्यासात् ॥५॥

सम्प्रति याञ्चाप्रकारमाह, जातमिति । हे मेघ !

जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा॥ ६॥

त्वां भुवनेषु विदिते भुवनविदिते निष्ठेति भूतार्थे क्तः गतिबुद्धीत्यादिना वर्त्तमानार्थत्वेऽपि क्तस्य च वर्त्तमाने इति भुवनशब्दस्य षष्ठ्यन्तत्वानियमात् समासो न स्यात् क्तेन च पूजायामिति निषेधात्। पुष्करावर्त्तकाश्च केचित् मेघानां श्रेष्ठाः तेषां वंशे जातं महाकुलप्रसूतमित्यर्थः कामरूपम् इच्छाधीनविग्रहं दुर्गादिसञ्चारचममित्यर्थः मघोनः इन्द्रस्य प्रकृतिपुरुषं प्रधानपुरुषं जानामि तेन तत्प्रभुत्वादि ज्जानामीत्यादिगुणयोगित्वेन हेतुना विधिवशात् दैवायत्तत्वात् विधिर्विधाने दैवे चेत्यमरः। वशमायत्ते वशमिच्छाप्रभेदयोरिति विश्वः। दूरे बन्धुर्यस्य स दूरबन्धुः वियुक्तभार्य्योऽहं त्वयि अर्थित्वं गतः। ननु याचकस्य याञ्चायां याच्यगुणोत्कर्षः कुत्र उपयुज्यते इत्याशङ्क्य दैवात् याञ्चाभङ्गेऽपि लाघवदोषाभाव एव उपयोग इत्याह याञ्चेति अधिगुणे अधिकगुणे पुंसि विषये याञ्चा मोघा निष्फलापि वरम् ईषत् प्रियं दातृगुणाव्यत्वात् प्रियत्वं याञ्चादैन्यात् ईषत् प्रियमिति भावः अधमे निर्गुणे याञ्चा लब्धकामापि सफलापि न वरम् ईषत् प्रियमपि न भवतीत्यर्थः दैवात् वृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक्प्रिये इत्यमरः। अर्थान्तरन्यासानुप्राणितः प्रेयोऽलङ्कारः। तदुक्तं दण्डिना, प्रेयः प्रियतराख्यानमिति। एतत्

सन्तप्तानां त्वमसि शरणं तत् पयोद ! प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
वाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥७

आद्यपादत्रये चतुर्थपादस्थेन अर्थान्तरन्यासेन उपजीवि- त्वमिति सुव्यक्तमेतत् ॥६॥

सन्तप्तानामिति। हे पयोद ! त्वं सन्तप्तानामातपेन वा प्रवासविरहेण वा संज्वरितानां सन्तापः संज्वरः समा- वित्यमरः। शरणं पयोदानेन आतपखिन्नानां प्रोषितानां स्वस्थानप्रेरणया च रक्षकोऽसि शरणं गृहरक्षित्रोरित्यमरः। तत् तस्मात् कारणात् धनपतेः कुबेरस्य क्रोधेन विश्लेषि- तस्य प्रियया वियोजितस्य मे मम सन्देशं वार्त्तां प्रियायाः हर प्रियां प्रति नय इत्यर्थः। सम्बन्धसामान्ये षष्ठी। सन्देशहरणेन आवयोः सन्तापं नुद इत्यर्थः। कुत्र स्थाने सा स्थिता तत्स्थानस्य वा किं व्यावर्त्तकं तत्राह गन्त- व्येति वहिर्भवं वाह्यं वहिर्देवपञ्चजनेभ्यश्चेत्यण्। वाह्ये उद्याने स्थितस्य हरस्य शिरसि या चन्द्रिका तया धौतानि निर्मलानि हर्म्याणि धनिकभवनानि यस्यां सा तथोक्ता हर्म्यादि धनिनां वास इत्यमरः। अनेन व्यावर्त्तकमुक्तम्। अलका नाम अलका इति प्रसिद्धा यक्षेश्वराणां वसतिः स्थानं ते तव गन्तव्या त्वया गन्तव्या इत्यर्थः कृत्यानां कर्त्तरि वेति षष्ठी ॥७॥

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः ।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥८॥
मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।

मदर्थं प्रस्थितस्य ते पथिकाङ्गनाजनाश्वासनम् आनुषङ्गिकं फलम् इत्याह त्वामिति । पवनपदवीम् आकाशम् आरूढं त्वां पन्थानं गच्छन्ति ते पथिकाः पथः ष्कन्निति ष्कन्प्रत्ययः । तेषां वनिताः प्रोषितभर्तृकाः प्रत्ययात् प्रियागमनविश्वासात् प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुष्वित्यमरः । आश्वसत्यो विश्वसिताः श्वसिधातोः शत्रन्तात् उगितश्चेति ङीप् तथा उद्गृहीतालकान्ताः दृष्टिप्रसारार्थम् उन्नमय्य धृतालकाग्राः सत्यः प्रेक्षिष्यन्ते अत्युत्कण्ठतया द्रक्ष्यन्ति इत्यर्थः । तथाहि त्वयि सन्नद्धे व्यापृते सति विरहेण विधुरां विवशां जायां कः उपेक्षेत न कोऽपि इत्यर्थः अन्योऽपि मद्व्यतिरिक्तोऽपि यो जनः अहमिव पराधीनवृत्तिः परायत्तजीवको न स्यात् स्वतन्त्रस्तु न कोऽपि उपेक्षेत इति भावः । अर्थान्तरन्यासः ॥८॥

निमित्तान्यपि ते शुभानि दृश्यन्ते इत्याह मन्दं मन्दमिति । अनुकूलः पवनो वायुः त्वां मन्दं मन्दम् अतिमन्दमित्यर्थः अत्र कथञ्चित् वीप्सायामेव द्विरुक्तिर्निर्वाह्या

गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥९॥

प्रकारे गुणवचनस्य इत्येतदाश्रयणे तु कर्मधारयवद्भावे सुब्लुकि मन्दमन्दमिति स्यात् तदेवाह वामनः । मन्दं मन्दमित्यत्राप्रकारार्थे द्विर्भाव इति । यथा सद्यं भाविफलानुरूपम् इत्यर्थः यथा सादृश्ययोग्यत्ववीप्सास्वार्थानतिक्रमे इति यादवः । नुदति प्रेरयति अयं सगन्धः सगर्वः सम्बन्धी इति केचित् गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोरिति विश्वः । ते तव वामो वामभागस्थः वामस्तु वक्रे रम्ये स्यात् सव्ये वामगतेऽपि चेति शब्दार्णवे । चातकः पक्षिविशेषश्च मधुरं श्राव्यं नदति व्याहरति इदं निमित्तद्वयं वर्त्तते वर्त्तिष्यते च अपरं निमित्तम् इत्याह गर्भेति गर्भः कुक्षिस्थो जन्तुः गर्भोऽपवारके ह्यग्नौ सुते पनसकण्टके । कुक्षौ कुक्षिस्थजन्तौ चेति यादवः । तस्य आधानम् उत्पादनं तदेव क्षणः उत्सवः सुखहेतुत्वादिति भावः निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षण इत्यमरः । तस्मिन् परिचयात् अभ्यासात् हेतोः खे व्योम्नि आबद्धमाला गर्भाधानसुखार्थं त्वत्समीपे बद्धपंक्तयः इत्यर्थः उक्तञ्च कर्णोदये, गर्भं बलाका दधतेऽभ्रयोगान्नाके निबद्धावलयः समन्तादिति । बलाकाः बकाङ्गनाः नयनसुभगं दृष्टिप्रियं भवन्तं नूनं सत्यं सेविष्यन्ते । अनुकूलमारुतचातकशब्दितबलाकादर्शनानां शुभसूचकत्वं शकुनशास्त्रे दृष्टं तत् विस्तरभयान्न लेखि ॥९॥

तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥१०॥
कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः।

न च तस्या नाशात् व्रतस्खलनाद्वा निरर्थकस्त्वत्-प्रयास इत्याह तां चेति। हे मेघ! दिवसानाम् अवशिष्ट-दिनानां गणनायां संख्याने तत्पराम् आसक्तां तत्परे प्रसि-तासक्तावित्यमरः। अतएव अव्यापन्नाम् अमृतां शापा-वसाने मदागमनप्रत्याशया जीवन्तीम् इत्यर्थः एकः पति-र्यस्याः सा एकपत्नी तां पतिव्रताम् इत्यर्थः नित्यं सपत्न्या-दिष्विति ङीप् नकारश्च। भ्रातुः मे जायां भ्रातृजायां मातृवत् निःशङ्कं दर्शनीयाम् इत्याशयः तां मत्प्रियाम् अविहतगतिः अविच्छिन्नगतिः सन् अवश्यं द्रक्ष्यसि च आलोकयिष्यसे च। तथाहि आशातितृष्णा आशा दिग-तितृष्णयोरिति यादवः। बध्यतेऽनेन इति बन्धः बन्धनं वृन्तमिति यावत् आशा एव बन्धः आशाबन्धः कर्त्ता प्रणयि प्रेमयुक्तम् अतएव कुसुमसदृशं सुकुमारमित्यर्थः अतएव विप्रयोगे विरहे सद्यःपाति सद्योभ्रंशनशीलमङ्गनानां हृदयं जीवितं हृदयं जीविते चित्ते इति शब्दार्णवे। प्रायशः प्रायेण रुणद्धि प्रतिबध्नाति। अर्थान्तरन्यासः ॥१०॥

सम्प्रति सहायसम्पत्तिरस्ति इत्याह कर्तुमिति।

आ कैलासाद्बिसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥११॥

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।

यत् गर्जितं कर्तृ महीम् उच्छिलीन्ध्राम् उद्भूतकन्दलिकाम्, कन्दल्याञ्च शिलीन्ध्रः स्यादिति शब्दार्णवे। अतएव अवन्ध्यां सफलां कर्तुं प्रभवति शक्नोति शिलीन्ध्राणां भाविशस्यसम्पत्तिसूचकत्वात् इति भावः। तदुक्तं निमित्तनिदाने, कालाभ्रयोगादुदिताः शिलीन्ध्राः सम्पन्नशस्यां कथयन्ति धात्रीमिति। तत् श्रवणसुभगं श्रोत्रसुखं लोकस्येति शेषः ते तव गर्जितं श्रुत्वा मानसोत्काः मानसे सरसि उत्मनसः उत्सुकाः इति यावत्, उत्क उन्मना इति निपातात्साधु। कालान्तरे मानसस्य हिमदुष्टत्वात् हिमस्य च हंसानां रोगहेतुत्वात् अन्यत्र गता हंसाः पुनर्वर्षासु मानसमेव गच्छन्तीति प्रसिद्धिः। बिसकिसलयानां मृणालाग्राणां छेदैः शकलैः पाथेयवन्तः पथि साधु पाथेयं पथि सौम्यं, पथ्यतिथिवसतिस्वपतेर्ढञ्। तद्वन्तः मृणालाग्रशकलसम्बलवन्तः इत्यर्थः राजहंसाः हंसविशेषाः, राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिता इत्यमरः। नभसि व्योम्नि भवतः तव आ कैलासात् कैलासपर्य्यन्तं पदद्वयञ्चैतत् सहायाः सयात्राः, सहायस्तु सयात्रः स्यादिति शब्दार्णवे। सम्पत्स्यन्ते भविष्यन्ति ॥११॥

आपृच्छस्वेति। मित्रं द्रष्टारं प्रियसखं, रामाद्यैःसम्बि-

काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम् ॥१२

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद! श्रोष्यसि श्रोत्रपेयम्।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसाञ्चोपयुज्य॥१३

श्चष्टजिति समासान्तः। तुङ्गम् उन्नतं पुंसां वन्द्यैः सुराराध-नीयैः रघुपतिपदैः रामपादन्यासैः मेखलासु कटकेषु, अथ मेखला श्रोणिस्थानेऽद्रिकटके कटिबन्धेभबन्धने इति यादवः। अङ्कितं चिह्नितम् इत्थं सखित्वात् महत्त्वात् पवित्रत्वाच्च सम्भावनार्हम् अमुं शैलं चित्रकूटाद्रिमालिङ्ग्या-पृच्छस्व साधो यामीति आमन्त्रणेन सभाजय, आमन्त्रण-सभाजने आप्रच्छनमित्यमरः। आङि नुप्रच्छोरित्यात्मने-पदम्। सखित्वं निर्वाहयति काले इति। काले काले प्रतिप्रावृट्कालं सुहृत्समागमनकालश्च कालशब्देन उच्यते। वीप्सायां द्विरुक्तिः। भवतः संयोगं सम्पर्कम् एत्य चिरविरह-जम् उष्णं वाष्पम् उष्मायं नेत्रजलञ्च, वाष्पो नेत्रजलोष्मणो-रिति विश्वः। मुञ्चतो यस्य शैलस्य स्नेहव्यक्तिः प्रेमावि-र्भावो भवति स्निग्धानां हि चिरविरहसङ्गतानां वाष्प-पातो भवति इति भावः ॥१२॥

सम्प्रति मार्गं कथयति, मार्गमिति। हे जलद! तावत् इदानीं कथयतो मत्तः इति शेषः त्वत्प्रयाणस्य अनुरूपम् अनुकूलं मार्गम् अध्वानं, मार्गो मृगपदे मार्गि

अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः।

सौम्यच्चेऽन्वयोऽध्वनीति यादवः। शृणु। तदनु मार्गश्रवणानन्तरं श्रोत्राभ्यां पेयं पानार्हम् प्रतिलक्षणया श्रोतव्यम् इत्यर्थः पेयग्रहणात् सन्देशस्य अमृतसाम्यं गम्यते। मे सन्देशं वाचिकं, सन्देशवाक् वाचिकं स्यादित्यमरः। श्रोष्यसि। यत्र मार्गे खिन्नः खिन्नः अभीक्ष्णं क्षीणबलः सन्, नित्यवीप्सयोरिति नित्यार्थे द्विर्भावः। शिखरिषु पर्वतेषु पदं न्यस्य निक्षिप्य पुनर्बललाभार्थं क्वचित् विश्रम्य इत्यर्थः क्षीणः क्षीणः अभीक्ष्णं क्षामाङ्गः सन्, अत्रापि तद्वत्त्वात् पूर्ववत् द्विरुक्तिः। स्रोतसां परिलघु गुरुत्वदोषरहितम् उपलास्फालनखेदितत्वात् पथ्यम् इत्यर्थः तथा च वाग्भटः, उपलास्फालनक्षेपविच्छेदैः खेदितोदकाः। हिमवन्मलयोद्भूताः पथ्या नद्यो भवन्त्यमूरिति। पयः पानीयम् उपयुज्य शरीरपोषणार्थम् अभ्यवहृत्य च यास्यसि गमिष्यसि, गमेर्लुट्॥१३॥

अद्रेरिति। पवनो वायुः अद्रेः चित्रकूटस्य शृङ्गं हरति किंस्वित् [किंस्विच्छब्दो वितर्कार्थे चादिषु पठितः]। इति शङ्कया उन्मुखीभिः उन्नतमुखीभिः [स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति ङीप्]। मुग्धाभिः मूढाभिः [मुग्धः सुन्दरमूढयोरित्यमरः]। सिद्धानां देवयोनिविशेषाणाम् अङ्गनाभिः चकितचकितं चकितप्रकारं यथा तथा [प्रकारे गुणवचनस्येति द्विर्भावः]।

स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्॥१४

हृष्टोत्साहः हृष्टोद्योगः सन् सरसाः आर्द्राः निचुलाः स्थल-वेतसाः यस्मिन् तस्मात् (वानीरे कविभेदे स्यान्निचुलः स्थलवेतसे इति शब्दार्णवे)। अस्मात् स्थानात् आश्रमात् पथि नभोमार्गे दिङ्नागानां दिग्गजानां स्थूलाः ये हस्ताः कराः तेषाम् अवलेपान् आक्षेपान् परिहरन् [हस्तो नक्ष-त्रभेदे स्यात्करेभकरयोरपीति विश्वः]। उदङ्मुखः सन् अल-कायाः उदीच्यत्वात् इत्याशयः। खम् आकाशम् उत्पत उद्गच्छ। अत्र इदमपि अर्थान्तरं ध्वनयति, रसिको निचुलो नाम महाकविः कालिदासस्य सहाध्यायः परापादितानां कालिदासप्रबन्धदूषणानां परिहर्त्ता यस्मिन् स्थाने तस्मात् स्थानात् उदङ्मुखो निर्दोषत्वात् उन्नतमुखः सन् पथि सारस्वतमार्गे दिङ्नागानां पूजायां बहुवचनं दिङ्नागा-चार्य्यस्य कालिदासप्रतिपक्षस्य हस्तावलेपान् हस्तविन्या-सपूर्वकाणि दूषणानि परिहरन् [अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि चेति विश्वः]। अद्रेः अद्रिकल्पस्य दिङ्नागा-चार्य्यस्य शृङ्गं प्राधान्यम्। [शृङ्गं प्राधान्यसान्वोश्चेत्यमरः]। हरतीति हेतुना सिद्धैः सारस्वतसिद्धैः महाकविभिः अङ्गना-भिश्च हृष्टोत्साहः सन् खम् उत्पत उच्चैर्भव इति स्वप्रबन्धम् आत्मानं वा प्रति कवेरुक्तिरिति। संसर्गतो दोषगुणा भवन्तीत्येतन्मृषा येन जलाशयेऽपि। स्थित्वानुकूलं निचुल-

रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत् पुरस्ता-
द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेशस्य विष्णोः ॥१५॥

त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः।
सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥१६॥

खलन्तमालानमसारयति सिन्धुवेगात् इत्येतत् स्तोत्रनिर्माणात् तस्य कवेर्निचुलसंज्ञेति ॥१४॥

रत्नेति। रत्नच्छायानां पद्मरागादिमणिप्रभाणां व्यतिकरो मिश्रणम् इव प्रेक्ष्यं दर्शनीयम् आखण्डलस्य इन्द्रस्य एतत् धनुःखण्डम् एतदिति हस्तेन निर्देशः। पुरस्तात् अग्रे वल्मीकाग्रात् वामलूरविवरात् [वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकमित्यमरः] प्रभवति आविर्भवति येन धनुःखण्डेन ते तव श्यामं वपुः स्फुरितरुचिना उज्ज्वलकान्तिना बर्हेण पिच्छेन [पिच्छबर्हे नपुंसके इत्यमरः]। गोपवेशस्य विष्णोः गोपालस्य कृष्णस्य श्यामं वपुरिव अतितरां कान्तिं शोभाम् आपत्स्यते ॥१५॥

त्वय्यीति। कृषेः हलकर्मणः फलं सस्यं त्वयि [अधिकरणविवक्षायां सप्तमी] आयत्तम् अधीनम् [अधीनो निघ्न आयत्त इत्यमरः] इति हेतोः प्रीत्या स्निग्धैः प्रस-

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः॥१७

स्निग्धप्रेमार्द्रैः इत्यर्थः। भ्रूविलासानां भ्रूविकाराणाम् अनभिज्ञैः पामरत्वादिति शेषः। जनपदवधूनां पल्लीयोषितां लोचनैः पीयमानः सादरं वीक्ष्यमाणः सन् मालं मालाख्यं क्षेत्रं शैलप्रायम् उन्नतं स्थलम् [मालमुन्नतभूतलमित्युत्पलः]। सद्यः तत्कालमेव सीरैः हलैः उत्कषणेन कर्षणेन सुरभि घ्राणतर्पणं यथा तथा आरुह्य तत्र अभिवृष्य इत्यर्थः। [सुरभिर्घ्राणतर्पण इत्यमरः]। किञ्चित् पश्चात् लघुगतिः तत्र निर्वृष्टत्वात् क्षिप्रगमनः सन् [लघु क्षिप्रमरं द्रुतमित्यमरः]। भूयः पुनरपि उत्तरेणैव उत्तरमार्गेणैव व्रज गच्छ। [प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया]। यथा कश्चित् बहुवल्लभः पतिः कुत्रचित् क्षेत्रे कलत्रे गूढं विहृत्य [क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोरिति विश्वः]। दाक्षिण्यभङ्गभयात् नीचमार्गेण निर्गत्य पुनः सर्वाध्यक्षं सञ्चरति तद्वदिति ध्वनिः॥१६॥

त्वामिति। आम्राः चूताः कूटेषु शिखरेषु यस्य सः आम्रकूटो नाम सानुमान् पर्वतः [आम्रश्चूतो रसालोऽसाविति, कूटोऽस्त्री शिखरं शृङ्गमिति च अमरः]। आसारो धारावृष्टिः [धारासम्पात आसार इत्यमरः]। तेन प्रशमितो वनोपप्लवो दावाग्निर्येन तं कृतोपकारम्

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥१८॥

इत्यर्थः। प्रश्रयेण परिगतं व्याप्तं त्वां साधु सम्यक् मूर्ध्ना वक्ष्यति वोढा [वहेर्लृट्]। तथाहि क्षुद्रः कृपणोऽपि [क्षुद्रो दरिद्रे कृपणे नृशंसे इति यादवः]। संश्रयाय संश्रयणाय मित्रे सुहृदि [अथ मित्रं सखा सुहृदित्यमरः]। प्राप्ते आगते सति प्रथमसुकृतापेक्षया पूर्वोपकारपर्यालोचनया विमुखो न भवति यः तथा तेन प्रकारेण उच्चैः उन्नतः सः आम्रकूटः किं पुनः विमुखो न भवतीति किमु वक्तव्यम् इत्यर्थः। एतेन प्रथमावसथे सौख्यलाभात् ते कार्यसिद्धिरस्तीति सूचितम्। तदुक्तं निमित्तनिदाने, प्रथमावसथे यस्य सौख्यं तस्याखिलेऽध्वनि। शिवं भवति यात्रायामन्यथा त्वशुभं ध्रुवमिति ॥१७॥

छन्नेति। हे मेघ! परिणतैः परिपक्वैः फलैः द्योतन्ते इति तथोक्तैः [आषाढे वनचूताः फलन्ति पच्यन्ते च मेघवातेन इत्याशयः]। काननाम्रैः वनचूतैः छन्नोपान्तः आवृतपार्श्वः अचलः आम्रकूटाद्रिः स्निग्धवेणीसवर्णे मसृणकेशबन्धच्छाये श्यामवर्णे इत्यर्थः [वेणी तु केशबन्धे जलस्रुताविति यादवः]। त्वयि शिखरं शृङ्गम् आरूढे सति [यस्य च भावेन भावलक्षणमिति सप्तमी]। मध्ये श्यामः शेषे संख्यात् अन्यत्र विस्तारे परितः पाण्डुः हरिणः [हरिणः

स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्त्तं
तोयोत्सर्गद्रुततरगतिः तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥१६॥

पाण्डुरः पाण्डुरित्यमरः]। भुवः स्तनः इव अमरमिथुनानां खेचराणाम् इति भावः प्रेक्षणीयां दर्शनीयाम् अवस्थां नूनं यास्यति। मिथुनग्रहणं कामिनामेव स्तनत्वेन उत्प्रेक्षा सम्भवतीति कृतम्। यथा परिश्रान्तः कश्चित् कामी कामिन्याः कुचकलशे विश्रान्तः सन् स्वपिति तद्वत् भवानपि भुवो नायिकायाः स्तने इति ध्वनिः ॥१८॥

स्थित्वेति। हे मेघ! वने चरन्ति इति वनचराः [तत्पुरुषे कृति बहुलमिति दहुलग्रहणाल्लुग् भवति]। तेषां वधूभिः भुक्ताः कुञ्जाः लतागृहाः यत्र तस्मिन् [निकुञ्जकुञ्जौ वा क्लीवे लतादिपिहितोदरे इत्यमरः] तत्र ते नयनविनोदोऽस्ति इत्यर्थः तस्मिन् आम्रकूटे मुहूर्त्तम् अल्पकालं न तु चिरं स्वकार्य्यविरोधात् इति भावः [मुहूर्त्तमल्पकाले स्यात् घटिकाद्वितयेऽपि चेति शब्दार्णवे]। स्थित्वा विश्रम्य तोयोत्सर्गेण त्वामाभारेत्युत्तरवर्षणेन द्रुततरगतिः लाघवात् हेतोः अतिक्षिप्रगमनः सन् तस्मात् आम्रकूटात् परम् अनन्तरं तत्परं वर्त्म मार्गं तीर्णः अतिक्रान्तः उपलैः पाषाणैः विषमे विन्ध्यस्य पर्व्वतः पादे प्रत्यन्तपर्वते [पादाः प्रत्यन्तपर्वताः इत्यमरः]। विशीर्णां

स्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः।
अन्तःसारं घन ! तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥२०

समन्ततो विस्तराम् एतेन कस्याश्चित् कामुक्याः प्रियतमचरणपातोऽपि सूच्यते रेवां नर्मदां [रेवा तु नर्मदा सोमोद्भवा मेखलकन्यकेत्यमरः]। गजस्य अङ्गे शरीरे भक्तयो रचनाः रेखा इति यावत् [भक्तिर्निषेवणे भागे रचनायाःमितिशब्दार्णवे]। तासां छेदैः भक्तिभिर्विरचितां भूतिं शृङ्गारमिव भस्मितमिव वा [भूतिर्मातङ्गशृङ्गारे जातौ भस्मनि सम्पदीति विश्वः]। द्रक्ष्यसि अयमपि महांस्ते नयनकौतुकलाभ इति भावः॥१९॥

तस्या इति। हे मेघ! वान्तवृष्टिः उद्गीर्णवर्षः सन् कृतवमनश्च सूच्यते। तिक्तैः सुगन्धिभिः तिक्तरसवद्भिश्च [तिक्तो रसे सुगन्धौ चेति विश्वः] वनगजमदैः वासितं सुरभितं भावितञ्च, हिमवद्विन्ध्यमलया गजानां प्रभवाः इति विन्ध्यस्य गजप्रभवत्वादिति भावः। जम्बूकुञ्जैः प्रतिहतरयं प्रतिबद्धवेगं सुखपेयम् इत्यर्थः एतेन लघुत्वं कषायभावना च सूच्यते। तस्याः रेवायाः तोयम् आदाय गच्छेः व्रज। हे घन! मेघ! अन्तः सारो बलं यस्य तं त्वाम् अनिलः आकाशवायुः शरीरस्थश्च गम्यते तुलयितुं न शक्ष्यति शक्तो न भविष्यति। तथाहि रिक्तः अन्तःसारशून्यः सर्वोऽपि लघुः भवति प्रकम्प्यो भवति इत्यर्थः, पूर्णता सारवत्ता गौरवाय

नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥२१

अप्रकम्प्यत्वाय भवति इत्यर्थः। अयमत्र ध्वनिः, आदौ वमनशोधितस्य पुंसः पश्चात् श्लेष्मशोषणाय लघुतिक्तकषाया-म्बुपानात् लब्धबलस्य वातप्रकोपो न स्यादिति यथाह वाग्भटः, कषायाश्चाहिमास्तस्य विशुद्धौ श्लेष्मणो हिताः। किमु तिक्ताः कषाया वा ये निसर्गात्कफापहाः। कृतशुद्धेः क्रमात्पीतपेयादेः पथ्यभोजिनः। वातादिभिर्न बाधा स्यादिन्द्रियैरिव योगिन इति ॥२०॥

नीपमिति। सारङ्गाः मतङ्गजाः कुरङ्गाः वा [सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे इति विश्वः]। अर्द्धरूढैः एकदेशोद्गतैः केशरैः किञ्जल्कैः हरितं पालाश-वर्णं [पालाशो हरितो हरिदित्यमरः]। कपिशं श्याव-वर्णं [श्यावः स्यात्कपिश इत्यमरः] हरितञ्च तत् कपिशं च हरितकपिशं [वर्णो वर्णेनेति समासः]। नीपं स्थलकदम्बकुसुमम् [अथ स्थलकदम्बके नीपः स्यादिति शब्दार्णवे] दृष्ट्वा संप्रेक्ष्य विदित्वा इति यावत् तथा कच्छेषु अनूपेषु अनुकच्छम् [अव्ययं विभक्तीत्यादिना विभक्त्यर्थेऽव्ययीभावः। जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविधः इत्यमरः]। आविर्भूताः प्रथमोत्पन्नाः मुकुलाः यासां ताः कन्दलीः भूमिकदलीः [द्रोणपर्णी स्निग्धकन्दा कन्दली

अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि॥२२

भूकदम्बपीति शब्दार्णवे]। जग्ध्वा भक्षयित्वा [अदो जग्धिरिति जग्धादेशः]। अरण्येषु अधिकसुरभिम् अति-घ्राणतर्पणं [दग्धारण्येष्विति पाठे दग्धमित्यधिकविशेषणम् अर्थवशात् कन्दलीष्व दृष्टेत्यन्वयो द्रष्टव्यः] उर्व्याः भूमेः गन्धं आघ्राय जललवमुचो मेघस्य ते तव मार्गं सूचयिष्यन्ति अनुमापयिष्यन्ति यत्र यत्र दृष्टिकार्य्यं नीपकुसुमादिकं दृश्यते तत्र तत्र त्वया वृष्टमित्यनुमीयते इत्यर्थः॥२१॥

अम्भ इति। प्रक्षिप्तमपि व्याख्यायते। अम्भोबिन्दूनां वर्षोदविन्दूनां ग्रहणे सर्वसहापतितमम्बु न चातकस्य हितमिति शास्त्रात् भूस्पृष्टोदकस्य तेषां रोगहेतुत्वादन्तराले एव स्वीकारे चतुरांश्चातकान् वीक्षमाणाः कौतुकात् पश्यन्तः श्रेणीभूताः बकपङ्क्तीः। [अभूततद्भावे च्विः] बलाकाः बकपङ्क्तीः परिगणनया एका द्वे तिस्र इति संख्यानेन निर्दिशन्तः हस्तेन दर्शयन्तः सिद्धाः स्तनितसमये त्वद्गर्जितकाले सोत्कम्पानि उत्कम्पपूर्वकाणि प्रियसहचरीणां सम्भ्रमेणालिङ्गितानि आसाद्य स्वयंग्रहणाश्लेषसुखमनुभूयेत्यर्थः। त्वां मानयिष्यन्ति त्वन्निमित्तत्वात् सुखलाभस्येति भावः॥२२॥

उत्पश्यामि द्रुतमपि सखे ! मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ॥२२॥

उत्पश्यामीति । हे सखे ! मेघ ! मत्प्रियार्थं यथा तथा द्रुतं क्षिप्रं [लघु क्षिप्रमरं द्रुतमित्यमरः] । यियासोः यातुमिच्छोरपि [यातेः सन्नन्तादुप्रत्ययः ।] ते तव ककुभैः कुटजकुसुमैः सुरभौ सुगन्धिनि [ककुभः कुटजेऽर्जुने इति शब्दार्णवे] पर्वते पर्वते प्रतिपर्वतम् [वीप्सायां द्विरुक्तिः] कालक्षेपं कालविलम्बम् [क्षेपो विलम्बे निन्दायामिति विश्वः] । उत्पश्यामि उत्प्रेक्षे । विलम्बहेतुं दर्शयन् आशुगमनं प्रार्थयते शुक्लेति । सजलानि सानन्दबाष्पाणि नयनानि येषां तैः शुक्लापाङ्गैः मयूरैः [मयूरो बर्हिणो बर्ही शुक्लापाङ्गः शिखावल इति यादवः ।] केकां स्ववाणीं [केका वाणी मयूरस्येत्यमरः] स्वागतीकृत्य स्वागतवचनीकृत्य प्रत्युद्यात प्रत्युद्गतः कृतातिथ्यः इत्यर्थः भवान् कथमपि यथाकथञ्चित् आशु गन्तुं व्यवस्येत् उद्युञ्जीत ।प्रार्थने लिङ् शेषे प्रथम इति प्रथमपुरुषः. शेषत्वं भवच्छब्दो युष्मदस्मद्व्यतिरेकात्] स्वागतीकृत्य केकाः इत्यत्र केकासु आरोप्यमाणस्य स्वागतवचनस्य प्रकृतप्रत्युद्गमनोपयोगात् परिणामालङ्कारः तदुक्तम् अलङ्कारसर्वस्वे, आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति ।२२।

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नैः
नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥२४
तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं

पाण्डुच्छायेति । हे मेघ ! त्वयि आसन्ने सन्निकृष्टे सति दशार्णाः नाम जनपदाः सूचिभिन्नैः सूचिषु मुकुलाग्रेषु भिन्नैः विकसितैः [मुकुलाग्रेषु सूचिः स्यादिति शब्दार्णवे ।] केतकैः केतकीकुसुमैः पाण्डुच्छायाः हरिणवर्णाः उपवनानां वृतयः कण्टकशाखावरणाः येषु ते तथोक्ताः [प्राकारो वरणः सालः प्राचीरं प्रान्ततो वृतिरित्यमरः ।] तथा गृहबलिभुजां काकादिग्रामपक्षिणां नीडारम्भैः कुलायनिर्माणैः [कुलायो नीडमस्त्रियामित्यमरः ।] चित्यायाः इमानि चैत्यानि रथ्यावृक्षाः [चैत्यमायतने बुद्धवन्द्ये चोद्देश्यपादपे इति विश्वः] आकुलानि सङ्कीर्णानि ग्रामेषु चैत्यानि येषु ते तथोक्ताः तथा परिणतैः पक्वैः फलैः श्यामानि यानि जम्बूवनानि तैः अन्ताः रम्याः [मृताववसिते रम्ये समाप्तावन्त इष्यते इति शब्दार्णवे ।] तथा कतिपयेषु एव दिनेषु स्थायिनो हंसाः येषु ते तथोक्ताः एवंविधाः सम्पत्स्यन्ते भविष्यन्ति । [पोटायुवतिस्तोककतिपयेत्यादिना कतिपयशब्दस्योत्तरपदत्वेऽपि न तच्छब्दस्योत्तरत्वमस्ति अस्य शास्त्रस्य प्रायिकत्वात्] ॥२४॥

तेषामिति । दिक्षु प्रथितं प्रसिद्धं विदिशा इति लक्षणं

गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥२५॥
नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्सम्पर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः।

नामधेयं यस्याः तां [लक्ष्म नाम्नि चिह्ने चेति विश्वः।] तेषां दशार्णानां सम्बन्धिनीं धीयन्तेऽस्यामिति धानी [कार्याधिकरणयोश्चेति ल्युट्] राज्ञां धानी राजधानी कृद्योगलक्षणा षष्ठी समस्यत इति वचनात् समासः। तां प्रधाननगरीं [प्रधाननगरी राज्ञां राजधानीति कथ्यते इति शब्दार्णवे।] गत्वा प्राप्य सद्यः कामुकत्वस्य विलासितायाः [विलासी कामुकः कामी स्त्रीपरो रतिलम्पट इति शब्दार्णवे।] अविकलं समग्रं फलं प्रयोजनं लब्धा लप्स्यते त्वया इति शेषः। [कर्मणि लुट्।] कुतः यस्मात् स्वादु मधुरं चलाः ऊर्मयो यस्य तत् चलोर्मि तरङ्गितं वेत्रवत्याः नाम नद्याः पयः सभ्रूभङ्गं भ्रूकुटियुक्तं दशनपीड़या इति भावः मुखम् इव अधरम् इव इत्यर्थः तीरोपान्ते तटप्रान्ते यत् स्तनितं गर्जितं तेन सुभगं [यथा स्तनितशब्देन मथितमपि ध्वन्यते कण्ठस्खलितकण्ठनासिकं हुङ्कृतं स्तनितमल्पघोषवदिति लक्षणात्।] पास्यसि [पिबतेर्लृट्।] कामिनामधरास्वादः सुरतादतिरिच्यते इति भावः ॥२५॥

नीचैरिति। हे मेघ! तत्र विदिशासमीपे

…रः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥२६॥

विश्रामः खेदापनयः [भावार्थे घञ्प्रत्ययः]। तस्य हेतोः विश्रामकारणात् विश्रामार्थम् इत्यर्थः [षष्ठी हेतुप्रयोगे इति षष्ठी। विश्रामेत्यत्र नोदात्तोपदेशस्य मान्तस्यानाचमेरिति पाणिनीये वृद्धिप्रतिषेधेऽपि विश्रामो वेति चन्द्रव्याकरणे विकल्पेन वृद्धिविधानाद्रूपसिद्धिः।] प्रौढपुष्पैः प्रवृद्धकुसुमैः कदम्बैः नीपवृक्षैः त्वत्सम्पर्कात् तव सङ्गात् पुलकाः अस्य जाताः पुलकितमिव सञ्जातपुलकमिव स्थितम् [तारकादित्वादितच्प्रत्ययः]। नीचैरिति आख्या यस्य तं नीचैराख्यं गिरिम् अधिवसेः गिरौ वसेः इत्यर्थः [उपान्वध्याङ्वस इति कर्मत्वम्।] यो नीचैर्गिरिः पण्याः क्रेयाः स्त्रियः पण्यस्त्रियः वेश्याः [वारस्त्री गणिका वेश्या पण्यस्त्री रूपजीविनीति शब्दार्णवे]। तासां रतिषु यः परिमलो गन्धविशेषः [विमर्दोत्थे परिमलो गन्धे जनमनोहरे इत्यमरः]। तम् उद्गिरन्ति आविर्भावयन्ति इति तथोक्तानि तैः शिलावेश्मभिः कन्दरैः नागराणां पौराणाम् उद्दामानि उत्कटानि यौवनानि प्रथयति प्रकटयति। उत्कटयौवनाः काश्चित् अनुरक्ताः वाराङ्गनाः विस्रम्भविहारकाङ्क्षिणो मात्रादिभयात् निशीथसमये कञ्चन विविक्तं देशम् आश्रित्य रमयन्ति, तच्चात्र बहुलमस्तीति प्रसिद्धिः। अत्र उद्गारशब्दो गौणार्थत्वात् न जुगुप्सावहः प्रत्युत काव्यस्य अतिशोभाकर एव। तदुक्तं

विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्चन्
उद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां
छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम् ॥२७॥

दण्डिनां, निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते इति ॥२६॥

विश्रान्त इति । विश्रान्तः सन् तत्र नीचैर्गिरौ विनीताध्वश्रमः सन् अथ विश्रान्तेरनन्तरं वने अरण्ये याः नद्यः तासां तीरेषु जातानि स्वयं रूढानि अकृत्रिमाणि इत्यर्थः [नदनदीति पाठे पुमान् स्त्रियेत्येकशेषो दुर्वारः]। उद्यानानाम् आरामाणां सम्बन्धीनि यूथिकाजालकानि मागधीकुसुममुकुलानि [अथ मागधी गणिका यूथिकेत्यमरः। कोरकजालककलिकाकुड्मलमुकुलानि तुल्यानीति हलायुधः]। नवजलकणैः सिञ्चन् आर्द्रीकुर्वन् [अत्र सिञ्चतेरार्द्रीकरणार्थत्वात् द्रवद्रव्यस्य करणत्वं, यत्र तु क्षरणम् अर्थः तत्र द्रवद्रव्यस्य कर्मत्वम्। यथा, रेतः सिक्त्वा कुमारीषु, सुखैर्निषिच्यन्तमिवामृतं त्वचीत्येवमादि। एवं किरतीत्यादीनामपि "रजः किरति मारुतः" "अवाकिरन् वयोवृद्धास्तं लाजैः पौरयोषितः" इत्यादिष्वर्थभेदाश्रयणेन रजोलाजादीनां कर्मत्वकरणत्वे गमयितव्ये]। तथा गण्डयोः कपोलयोः स्वेदस्य अपनयनेन प्रमार्जनेन या रुजा पीड़ा [भिदादित्वादङ्प्रत्ययः]। तया क्लान्तानि म्लानानि कर्णोत्पलानि येषां तेषां पुष्पाणि लुनन्तीति पुष्पलाव्यः पुष्पावचायिकाः

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥२८॥

स्त्रियः [कर्मणम्। टिड्ढाणञित्यादिना ङीप्]। तासां मुखानि तेषां छायायाः अनातपस्य दानात् कान्तिदानञ्च व्यञ्जते [छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातप इत्यमरः]। कामुकदर्शनात् कामिनीनां मुखविकाशो भवति इति भावः। क्षणपरिचितः क्षणं संश्लिष्टः सन् न तु चिरं व्रज गच्छ॥२७॥

वक्र इति। उत्तराशाम् उदीचीं दिशं प्रति प्रस्थितस्य भवतः पन्थाः उज्जयिनीमार्गः वक्रो यदपि दूरो यद्यपि इत्यर्थः [विन्ध्यात् उत्तरवाहिन्याः निर्विन्ध्यायाः प्राग्भागे कियत्यपि दूरे स्थिता उज्जयिनी, उत्तरपथस्तु निर्विन्ध्यायाः पश्चिमे इति वक्रत्वम्] तथापि उज्जयिन्याः विशालानगरस्य [विशालोज्जयिनी समेत्युत्पलः]। सौधानाम् उत्सङ्गेषु उपरिभागेषु प्रणयः परिचयः [प्रणयः स्यात् परिचये याञ्चा सौहृदेऽपि चेति यादवः] तस्य विमुखः पराङ्मुखो मास्म भूः न भव इत्यर्थः [स्मोत्तरे लङ् चेति चकारादाशीरर्थे लुङ्। न माङ्योगे इत्यडागमप्रतिषेधः]। तत्र उज्जयिन्यां विद्युद्दाम्नां विद्युल्लतानां स्फुरितेभ्यः स्फुरणेभ्यः चकितैः भीतैः लोलापाङ्गैः चञ्चलकटाक्षैः

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्त्तनाभेः ।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥२९

पौराङ्गनानां लोचनैः न रमसे यदि तर्हि त्वं वञ्चितः प्रतारितः असि जन्मवैफल्यं भवेत् इत्यर्थः ॥२८॥

अथोज्जयिनीं गच्छतस्तस्य मध्येमार्गं निर्विन्ध्यासङ्गमाह, वीचीति। हे सखे! पथि उज्जयिनीपथे वीचिक्षोभेण तरङ्गचलनेन स्तनितानां मुखरायाम् [कर्तरि क्तः] विहगानां हंसानां श्रेणिः पङ्क्तिरेव काञ्चीगुणो यस्याः तस्याः स्खलितेन उपलस्खलनेन मदस्खलितेन च सुभगं यथा तथा संसर्पन्त्याः प्रवहन्त्याः गच्छन्त्याश्च तथा दर्शिता प्रकटिता आवर्त्तः अम्भसां भ्रम एव नाभिर्यया [स्यादावर्त्तोऽम्भसां भ्रम इत्यमरः]। निष्क्रान्ता विन्ध्यात् निर्विन्ध्या नाम नदी [निरादयः क्रान्ताद्यर्थे पञ्चम्येति समासः। द्विगुप्राप्तापन्नेत्यादिना परवल्लिङ्गताप्रतिषेधः]। तस्याः नद्याः सन्निपत्य सङ्गत्य रसो जलम् अभ्यन्तरे यस्य सः अन्यत्र रसेन शृङ्गारेण अभ्यन्तरः अन्तरङ्गो भव सर्वथा तस्याः रसमनुभवेत्यर्थः [शृङ्गारादौ जले वीर्ये सुवर्णे विषशुक्रयोः। तिक्तादावमृते चैव निर्यासे पारदे ध्वनौ। आस्वादे च रसं प्राहुरिति शब्दार्णवे]। ननु तत्प्रार्थनामन्तरेण कथं तत्रानुभावो युज्यते इत्यत आह, स्त्रीणां प्रियेषु विभ्रमो विलास एवाद्यं प्रणयवचनं प्रार्थना-

वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।
सौभाग्यं ते सुभग ! विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥२९.

वाच्यं हि [स्त्रीणामेष स्वभावो यत् विलासैरेव रागप्रकाशनं न तु कण्ठेन इति । विप्रलम्भात् नाभिसन्दर्शनादिः उक्त एव] ॥२९॥

निर्विन्ध्याया विरहावस्थां वर्णयन् तन्निराकरणं प्रार्थयते, वेणीति । असौ वेणी वेणीभूतं वेण्याकारं प्रतनु स्तोकञ्च सलिलं यस्याः सा तथोक्ता वेणीभूतकेशपाशा इति च व्यज्यते। रोहन्ति इति रुहाः [इगुपधलक्षणः कः]। तटयोः रुहाः ये तरवः तेभ्यः भ्रश्यन्ति इति तथोक्तैः जीर्णपर्णैः शुष्कपत्रैः पाण्डुच्छाया पाण्डुवर्णा अत एव हे सुभग ! विरहावस्थया पूर्वोक्तप्रकारया करणेन अतीतस्य एतावन्तं कालम् अतीत्य गतस्य प्रोषितस्य इत्यर्थः ते तव सौभाग्यं सुभगत्वम्। [हृद्भगसिन्ध्वन्ते पूर्वपदस्य च इत्युभयपदवृद्धिः]। व्यञ्जयन्ती प्रकाशयन्ती, स खलु सुभगो यम् अङ्गनाः कामयन्ते इति भावः। असौ पूर्वोक्ता सिन्धुः नदी निर्विन्ध्या [स्त्री नद्यां ना नदे सिन्धुर्देशभेदेऽम्बुधौ गजे इति वैजयन्ती]। येन विधिना व्यापारेण कार्श्यं त्यजति सः विधिः त्वया एव उपपाद्यः कर्तव्यः इत्यर्थः। स च विधिः एकत्र वृष्टिः अन्यत्र सम्भोगः, तदभावनिबन्धनत्वात् कार्श्यस्य इति भावः। [इयं पञ्चमी मदनावस्था,

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकं ॥३१॥

तदुक्तं रतिरहस्ये, नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः । निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः । उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युरिति । तामतीतस्येति पाठमाश्रित्य सिन्धुनाम नद्यन्तरमिति व्याख्यानं तु सिन्धुर्नाम कश्चित् नदः काश्मीरदेशे स्थितः, नदी तु क्वापि नास्तीत्युपेक्ष्यमित्याचक्षते] ॥३०॥

प्राप्येति । विदन्तीति विदाः [इगुपधलक्षणः कः]। ओकसो वेश्मस्थानस्य विदाः कोविदाः [ओकारलोपः पृषोदरादित्वात् साधुः] उदयनस्य वत्सराजस्य कथानां वासवदत्ताहरणाद्यद्भुतोपाख्यानानां कोविदाः तत्त्वज्ञाः ग्रामेषु ये वृद्धाः ते सन्ति येषु तान् अवन्तीन् तन्नामजनपदान् प्राप्य तत्र पूर्वोद्दिष्टां पूर्वोक्तां प्रणयविमुखो मास्म भूरुज्जयिन्या इत्युक्तां श्रीविशालां सम्पत्तिमहतीम् [शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते इति शाश्वतः] विशालां पुरीम् उज्जयिनीमनुसर व्रज कथमिव स्थितां सुचरितफले पुण्यफले स्वर्गोपभोगलक्षणे स्वल्पीभूते अत्यल्पावशिष्टे सति इत्यर्थः गां भूमिं गतानाम् । [गौरिला कुम्भिनी क्षमेत्यमरः] । पुनरपि भूलोकगतानामित्यर्थः स्वर्गिणां स्वर्गवतां जनानां शेषैः भुक्तशिष्टैः पुण्यैः सुकृतैः कृतम्

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः॥३२॥

आनीतं स्वर्गार्थानुष्ठितकर्मशेषाणां स्वर्गदानावश्यम्भावात् इति भावः कान्तिरस्य अस्तीति कान्तिमत् उज्ज्वलं सारभूतमित्यर्थः एकं मुख्यात् अन्यत् [एके मुख्यान्यकेवला इत्यमरः]। दिवः स्वर्गस्य खण्डमिव स्थितामित्युत्प्रेक्षा। एतेन अतिक्रान्तसकलभूलोकनगरसौभाग्यसारत्वम् उज्जयिन्या व्यज्यते॥३१॥

दीर्घीकुर्वन्निति। यत्र विशालायां प्रत्यूषेषु अहर्मुखेषु [प्रत्यूषोऽहर्मुखं कल्यमित्यमरः]। पटु प्रस्फुटं मदकलं मदेन अव्यक्तमधुरम्। [ध्वनौ तु मधुरास्फुटे कल इत्यमरः]। सारसानां पक्षिविशेषाणाम्। [सारसो मैथुनी कामी गोनर्दः पुष्कराह्वय इति यादवः]। यद्वा सारसानां हंसानां [चक्राङ्गः सारसो हंस इति शब्दार्णवे]। कूजितं रुतं दीर्घीकुर्वन् सन्तानयन् इत्यर्थः यावद्वातं शब्दानुवृत्तेरिति भावः एतेन प्रियतमः स्वचाटुवाक्यानुसारि क्रीड़ापक्षिकूजितम् अविच्छिन्नीकुर्वन् इति च गम्यते। स्फुटितानां विकसितानां कमलानाम् आमोदेन परिमलेन सह या मैत्री संसर्गः तेन कषायः सुरभिः [रागद्रव्ये कषायोऽस्त्री निर्यासे सौरभे रसे इति यादवः] अन्यत्र विमर्दगन्धी इत्यर्थः [विमर्दोत्थे परिमलो गन्धे जनमनोहरे। आमोदः

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथा
लक्ष्मीं पश्यन् ललितवनितापादरागाङ्कितेषु ॥ ३३ ॥

सोऽतिनिर्हारीत्यमरः]। अङ्गानुकूलो मान्द्यात् सुखस्पर्शः अन्यत्र गाढ़ालिङ्गनदत्तगात्रसंवाहनः इत्यर्थः। भवभूतिना च उक्तम्, अशिथिलपरिरम्भैर्दत्तसंवाहनानीति। संवाहन्ते च सुरतश्रान्ताः प्रियैर्युवतयः। एतत् कविरेव वक्ष्यति, सम्भोगान्ते मम समुचितो हस्तसंवाहनानामिति। शिप्रा नाम काचित् तत्रत्या नदी तस्याः वातः शिप्रावातः शिप्राग्रहणं शैत्यद्योतनार्थं प्रार्थना सुरतस्य याच्ञा तत्र चाटूनि करोतीति तथोक्तः पुनः सुरतार्थं प्रियवचनप्रयोक्ता इत्यर्थः [कर्मण्यण्प्रत्ययः]। प्रियतमः वल्लभः इव स्त्रीणां सुरतग्लानिं सम्भोगखेदं हरति नुदति चाटूक्तिभिर्विस्मृतपूर्वखेदाः स्त्रियः प्रियतमप्रार्थनां सफलयन्ति इति भावः। प्रार्थनाचाटुकार इत्यत्र खण्डितनायिका अनुनीतेति व्याख्याने सुरतग्लानिहरणं न सम्भवति तस्याः पूर्वं सुरताभावात् पश्चात्तनसुरतग्लानिहरणं तु नेदानीन्तनकोपशमनीयचाटुवचनसाध्यमित्युपेक्षैवोचिता विवेकिनाम्। [ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायितेति दशरूपके] ॥ ३२ ॥

जालोद्गीर्णैरिति। जालोद्गीर्णैः गवाक्षमार्गनिर्गतैः। [जालं गवाक्षे आनाये जालके कपटे गणे इति यादवः]

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥३४॥

केशसंस्कारधूपैः वनिताकेशवासनार्थैः गन्धद्रव्यधूपैः इत्यर्थः [अत्र संस्कारधूपयोस्तादर्थ्येऽपि यूपदार्वादिवत् प्रकृतिविकारत्वाभावात् अश्वघासादिवत् षष्ठीसमासो न चतुर्थीसमासः]। उपचितवपुः परिपुष्टशरीरः बन्धौ बन्धुरिति वा प्रीत्या भवनशिखिभिः गृहमयूरैः दत्तः नृत्यम् एव उपहारः उपायनं यस्मै स तथोक्तः [उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः]। कुसुमैः सुरभिषु सुगन्धिषु ललितवनिताः सुन्दरस्त्रियः [ललितं त्रिषु सुन्दरमिति शब्दार्णवे]। तासां पादरागेण लाक्षारसेन अङ्कितेषु चिह्नितेषु हर्म्येषु धनिकभवनेषु अस्याः उज्जयिन्याः लक्ष्मीं पश्यन् अध्वगमनेन खेदं क्लेशं नयेथाः अपनय । ३३ ॥

भर्तुरिति। भर्तुः स्वामिनः नीलकण्ठस्य भगवतः कण्ठस्येव छविर्यस्य असौ कण्ठच्छविः इति हेतोः गणैः प्रमथैः [गणस्तु गणनायां स्यात् गणेशे प्रमथे चये इति शब्दार्णवे]। सादरं यथा तथा वीक्ष्यमाणः सन् प्रियवस्तुसादृश्यात् अतिप्रियत्वं भवेत् इति भावः। त्रयाणां भुवनानां समाहारः, त्रिभुवनम्। [तद्धितार्थेत्यादिना समासः]। तस्य गुरोः त्रैलोक्यनाथस्य चण्डीश्वरस्य कात्यायनीवल्लभस्य पुण्यं पावनं धाम महाकालाख्यं स्थानं

अप्यन्यस्मिन् जलधर ! महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।
कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ३५

यायाः गच्छ [विध्यर्थे लिङ्] श्रेयस्करत्वात् सर्वथा गन्तव्यम् इति भावः । उक्तञ्च स्कान्दे, आकाशे तारकं लिङ्गं पाताले हाटकेश्वरम् । मर्त्यलोके महाकालं दृष्ट्वा काम्यिमाप्नुयादिति । न केवलं मुक्तिस्थानमिदं किन्तु विलासस्थानमपीत्याह धूतेति । कुवलयरजोगन्धिभिः उत्पलपरागगन्धवद्भिः तोयक्रीड़ासु निरतानाम् आसक्तानां युवतीनां स्नानं स्नानीयं चन्दनादि [करणे ल्युट्]। [स्नानीयेऽभिषवे स्नानमिति यादवः]। तेन तिक्तैः सुरभिभिः [कटुतिक्तकषायास्तु सौरभे च प्रकीर्त्तिता इति हलायुधः]। सौगन्ध्यातिशयार्थं विशेषणद्वयम् । गन्धवत्याः नाम नद्याः तत्रत्यायाः मरुद्भिः मारुतैः धूतोद्यानं कम्पितोपवनम् इति धाम्नो विशेषणम् ॥ ३४ ॥

अपीति । हे जलधर ! महाकालं नाम पूर्वोक्तं चण्डीश्वरस्थानम् अन्यस्मिन् सन्ध्यातिरिक्तेऽपि काले आसाद्य प्राप्य ते तव स्थातव्यं त्वया स्थातव्यम् इत्यर्थः [कृत्यानां कर्त्तरि वेति षष्ठी]। यावत् यावता कालेन भानुः सूर्यः नयनविषयं दृष्टिपथम् अत्येति अतिक्रामति श्रा अस्तमयात् स्थातव्यम् इत्यर्थः [यावत् इत्येतत् अवधारणार्थे, यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे इत्यमरः]। किमर्थम्

पादन्यासैः क्वणितरशनास्तत्र लीलावधूतैः
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥३६॥

अतः आह कुर्वन्निति। श्लाघनीयां प्रशस्यां शूलिनः शिवस्य सन्ध्यायां बलिः पूजा तस्य पटहतां कुर्वन् सम्पादयन् आमन्द्राणाम् ईषद्गम्भीराणां गर्जितानाम् अविकलम् अखण्डं फलं लप्स्यसे प्राप्स्यसि [लभेः कर्त्तरि लृट्]। महाकालनाथबलिपटहत्वेन विनियोगात्ते गर्जितसाफल्यं स्यात् इत्यर्थः ॥ ३५ ॥

पादन्यासैरिति। तत्र सन्ध्याकाले पादन्यासैः चरणविक्षेपैः नृत्याङ्गैः क्वणिताः शब्दायमाना रशनाः यासां ताः तथोक्ताः [क्वणतेरकर्मकत्वात् गत्यर्थाकर्मकेत्यादिना कर्त्तरि क्तः]। लीलया विलासेन अवधूतैः कम्पितैः रत्नानां कङ्कणमणीनां छायया कान्त्या खचिताः रूषिताः वलयः चामरदण्डाः येषां तैः [वलिश्चामरदण्डे च जराविश्लथचर्मणीति विश्वः] चामरैः बालव्यजनैः क्लान्तहस्ताः [एतेन दैशिकं नृत्यं सूचितम्। तदुक्तं नृत्यसर्वस्वे, खड्गकन्दुकवस्त्रादिदण्डिकाचामरस्रजः। वीणाञ्च धृत्वा यत् कुर्य्युर्नृत्यं तत् दैशिकं भवेदिति]। वेश्याः महाकालनाथम् उपेत्य नृत्यन्त्यो गणिकाः त्वत्तो नखपदेषु नखक्षतेषु सुखान् सुखकरान् [सुखहेतौ सुखे सुखमिति शब्दार्णवे]। वर्षस्य अग्रबिन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान्

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजवापुष्परक्तं दधानः ।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥३७॥

अपाङ्गान् आभोक्ष्यन्ते परैः उपकृता सन्तः सद्यः प्रत्युपकुर्वन्ति इति भावः। कामिनीदर्शनीयत्वलक्षणं शिवोपासनाफलं सद्यो लप्स्यसे इति ध्वनिः ॥३६॥

पश्चादिति। पश्चात् सन्ध्यावल्यनन्तरं पशुपतेः शिवस्य नृत्यारम्भे ताण्डवप्रारम्भे प्रतिनवजवापुष्परक्तं प्रत्यग्रजवाकुसुमारुणं सन्ध्यायां भवं सान्ध्यं तेजो दधानः उच्चैः उन्नतं भुजा एव तरवः तेषां वनं मण्डलेन मण्डलाकारेण अभिलीनः अभिव्याप्तः सन् [कर्त्तरि क्तः]। भवान्या भवपत्न्या [इन्द्रवरुणभवसर्वेत्यादिना ङीप् आनुगागमश्च]। शान्तः उद्वेगः गजाजिनदर्शनभयं ययोः ते अतएव स्तिमिते निश्चले नयने यस्मिन् कर्मणि तत् तथोक्तम् [उद्वेगस्त्वरिते क्लेशे भये सम्भ्रमगामिनीति शब्दार्णवे]। भक्तिः पूज्येषु अनुरागः [भावार्थे क्तिन्प्रत्ययः]। दृष्टा भक्तिर्यस्य स दृष्टभक्तिः सन् पशुपतेः आर्द्रं शोणितार्द्रं तत् नागाजिनं गजचर्म [अजिनं चर्म कृत्तिः स्त्रीत्यमरः]। तत्र इच्छां हर निवर्त्तय त्वम् एव तत्स्थाने भव इत्यर्थः। गजासुरमर्दनानन्तरं भगवान् महादेवः तदीयम् आर्द्राजिनं भुजमण्डलेन बिभ्रत् ताण्डवं चकार इति प्रसिद्धिः। [दृष्टभक्तिरिति कथं रूपसिद्धिः दृष्टशब्दस्य स्त्रियाः पुंवत्

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मास्म भूर्विक्लवास्ताः॥३८

इत्यादिना पुंवद्भावस्य दुर्घटत्वात् अपूरणीप्रियादिष्विति निषेधात् भक्तिशब्दस्य प्रियादिषु पाठादिति तदेतच्चोद्यं दृढभक्तिरिति शब्दम् आश्रित्य प्रतिविहितं गणव्याख्याने दृढ़ भक्तिरस्येति नपुंसकं पूर्वपदम् अदाढ्यनिवृत्तिपरत्वे दृढशब्दात् लिङ्गविशेषस्य अनुपकारित्वात् स्त्रीत्वम् अविवक्षितमिति। भोजराजस्तु भक्ती च कर्मसाधनायाम् इत्यनेन सूत्रेण भज्यते इति कर्मार्थत्वे भवानीभक्तिरित्यादि भवति भावसाधनायां तु स्थिरभक्तिर्भवान्यामित्यादि भवतीत्याह। तदेतत् सर्वं सम्यक् विवेचितं रघुवंशसञ्जीवन्यां दृढभक्तिरिति ज्येष्ठे इत्यत्र। तस्मात् दृष्टभक्तिरित्यत्रापि मतभेदेन पूर्वपदस्य स्त्रीत्वेन नपुंसकत्वेन च रूपसिद्धिरस्तीति स्थितम्]।३७॥

इत्थं महाकालनाथस्य सेवाप्रकारमभिधाय पुनरपि नरसञ्चारप्रकारमाह गच्छन्तीनामिति। तत्र उज्जयिन्यां नक्तं रात्रौ रमणवसतिं प्रियभवनं प्रति गच्छन्तीनां योषितां अभिसारिकाणाम् इत्यर्थः सूचिभिः भेद्यैः प्रतिसान्द्रैरित्यर्थः तमोभिः रुद्धालोके निरुद्धदृष्टिप्रसरे नरपतिपथे राजमार्गे कनकस्य निकषः निकष्यते इति व्युत्पत्त्या निकषोपलगतरेखा तस्येव स्निग्धं तेजो यस्याः तया [स्निग्ध

तां कस्याञ्चिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्य्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ३९

तु मदघे सान्द्रे रम्ये क्लीवं तु तेजसीति शब्दार्णवे] । सुदाम्ना अद्रिणा एकदिक् सौदामनी विद्युत् [तेनैकदिगित्यण्प्रत्ययः] । तया उर्व्वीं मार्गं दर्शय, किञ्च तोयोत्सर्गस्तनिताभ्यां वृष्टिगर्जिताभ्यां मुखरः शब्दायमानो माऽस्म भूः, कुतः, ताः योषितः विक्लवाः भीरवः ततो वृष्टिगर्जितं न कार्य्यं इत्यर्थः । [तत्र तोयोत्सर्गसहितं स्तनितमिति विग्रहः विशिष्टस्येव केवलस्तनितस्यापि अनिष्टत्वात् न च द्वन्द्वपक्षे अल्पाच् तरमिति पूर्वनिपातशास्त्रविरोधः लक्षणहेत्वोः क्रियाया इति सूत्रे विपरीतनिर्द्देशेन पूर्वनिपातशास्त्रस्य अनित्यत्वज्ञापनादिति] ॥ ३८ ॥

तामिति । चिरं विलसनात् स्फुरणात् खिन्नं विद्युत् एव कलत्रं यस्य स भवान् सुप्ताः पारावताः कलरवाः यस्यां तस्यां विविक्तायाम् इत्यर्थः [पारावतः कलरवः कपोत इत्यमरः] जनसञ्चारः तत्र असम्भावित एव इति भावः । कस्याञ्चित् भवनस्य वलभौ आच्छादने उपरिभागे इत्यर्थः [आच्छादनं स्याद्वलभी गृहाणामिति हलायुधः] तां रात्रिं नीत्वा सूर्य्ये दृष्टे दिने सति इत्यर्थः पुनरपि अध्वशेषं वाहयेत् तथाहि सुहृदां मित्राणाम् अभ्युपेता अङ्गीकृता अर्थस्य प्रयोजनस्य कृत्या क्रिया यैः ते अभ्युपेतसुहृदर्था इत्यर्थः

तस्मिन् काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु।
प्रालेयास्रं कमलवदनात् सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः॥४०॥

[सापेक्षत्वेऽपि गमकत्वात् समासः। द्वत्या क्रियदेवतयोः कार्य्ये स्त्री कुपिते त्रिष्विति यादवः। वनः मन्देति चकारात् क्यप्]। न मन्दायन्ते खलु न मन्दाः भवन्ति हि न विलम्बन्ते इत्यर्थः। [लोहितादिडाज्भ्यः क्यष् वा क्यष इत्यात्मनेपदम्]॥३९॥

तस्मिन्निति। तस्मिन् काले पूर्वोक्ते सूर्योदयकाले प्रणयिभिः प्रियतमैः खण्डितानां योषितां नायिकाविशेषाणाम्। [ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायितेति दशरूपके]। नयनसलिलं शान्तिं नेयं नेतव्यम् [नयतिर्द्विकर्मकः]। अतो हेतोः भानोः वर्त्म आशु शीघ्रं त्यज तस्य आवरको मा भूः इत्यर्थः। विपक्षे अनिष्टमाचष्टे, सोऽपि भानुः नलानि अम्बुजानि अस्याः सन्तीति नलिनी पद्मिनी [लपेऽम्बुजे नलं ना तु राशि नाले तु न स्त्रियामिति शब्दार्णवे]। तस्याः स्वकान्तायाः कमलं स्वकुसुमम् एव वदनं तस्मात् प्रालेयं हिमम् एव अस्रम् अश्रु प्रहर्त्तुं अपनयितुं प्रत्यावृत्तः प्रत्यागतः, नलिन्याश्च भर्त्तुर्भानोः देशान्तरे नलिन्यन्तरगमनात् खण्डितात्वमित्याशयः। ततः त्वयि करान् अंशून् रुणद्धि इति कररुत् [क्विप्]। तस्मिन् कररुधि सति हस्तरोधिनि सति इति च गम्यते [कलि-

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम्।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्यात्
मोघीकर्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि ॥४१॥

इस्तांश्चत्रः वंरा इत्यमरः]। अनस्याभ्यसूयः अधिकविद्वेषः स्यात् प्रायेण इच्छाविशेषविघातात् हेतो रोगविशेषश्च कामिनामिति भावः। किञ्च, ब्राह्मणं चार्कमीशानं विष्णुं वा द्वेष्टि यो जनः। श्रेयांसि तस्य नश्यन्ति रौरवञ्च भवेत् ध्रुवमिति निषेधात् कार्य्यहानिश्च इति ध्वनिः ॥४०॥

गम्भीराया इति। गम्भीरायाः नाम सरितः उदात्तनायिका च व्यज्यते प्रसन्ने अनुरक्तत्वात् दोषरहिते चेतसि इव प्रसन्ने निर्मले पयसि प्रकृत्या स्वभावेन सुभगः सुन्दरः [सुन्दरेऽधिकभाग्ये च दुर्दिनेतरवासरे। तुरीयांशे श्रीमति च सुभगः इति शब्दार्णवे]। ते तव छाया चासौ आत्मा च सोऽपि प्रतिबिम्बशरीरं वा प्रवेशं लप्स्यते साक्षात् प्रवेशमनिच्छोरपि इति भावः, तस्मात् छायाद्वारापि प्रवेशावश्यम्भावित्वात् अस्याः गम्भीरायाः कुमुदवत् विशदानि धवलानि चटुलानि शीघ्राणि शफराणां मीनानाम् उद्वर्त्तनानि उल्लुण्ठितान्येव प्रेक्षितानि अवलोकनानि [त्रिषु स्यात् चटुलं शीघ्रमिति विश्वः]। एतावदेव गम्भीराया अनुरागचिह्नम् धैर्य्यात् धाष्ट्यात् वैमत्यात् मोघीकर्तुं विफलीकर्तुं न अर्हसि न अनुरक्ता विप्रलब्धव्या इत्यर्थः।

तस्याः किञ्चित् करधृतमिव प्राप्तवानीरशाखं
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम्।
प्रस्थानं ते कथमपि सखे! लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः॥४२॥

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः।

[धूर्त्तलक्षणं तु, क्षिप्नाति निरवं गमितां कामिनीमिति सुन्दरः। उपेत्यरक्तां यत्नेन रक्तां धूर्त्तो विमुञ्चतीति] ॥४१॥

तस्या इति। हे सखे! प्राप्ता वानीरशाखा वेतसशाखा येन तत् तथोक्तम्, अतएव किञ्चित् ईषत् करधृतं हस्तावलम्बितम् इव स्थितं, मुक्तः त्यक्तः रोधः तटम् एव नितम्बः कटिः येन तत् तथोक्तम् [नितम्बः पश्चिमे श्रोणिभागेऽद्रिकटके कटाविति यादवः] नीलं कृष्णवर्णं तस्याः गम्भीरायाः सलिलमेव वसनं हृत्वा अपनीय [प्रस्थानसमये प्रेयसीवसनहरणं विरहतापापनोदनार्थम् इति प्रसिद्धम्]। लम्बमानस्य पीतसलिलभरात् लम्बमानस्य अन्यत्र जघनारूढस्य ते तव प्रस्थानं प्रयाणं कथमपि कृच्छ्रेण भावि। कृच्छ्रत्वे हेतुमाह ज्ञातेति। ज्ञातास्वादः अनुभूतरसः कः पुमान् विवृतं प्रकटीकृतं जघनं कटिः तत्पूर्वभागो वा यस्याः ताम् [जघनं स्यात् कटौ पूर्वश्रोणिभागापरांशयोरिति यादवः] विहातुं त्यक्तुं समर्थः? न कोऽपि इत्यर्थः ॥४२॥

त्वदिति। त्वन्निष्यन्दे च तव वृष्ट्या उच्छ्वसितायाः

नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम्॥४३॥
तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः।

उपबृंहितायाः वसुधायाः भूमेः गन्धस्य सम्पर्केण रम्यः सुरभिः इत्यर्थः [स्रोतःशब्देन इन्द्रियवाचिना तद्विशेषो घ्राणं लक्ष्यते। स्रोत इन्द्रिये निम्नगारये इत्यमरः]। स्रोतोरन्ध्रेषु नासाग्रकुहरेषु यत् ध्वनितं शब्दः तेन सुभगं यथा तथा दन्तिभिः गजैः पीयमानः वसुधागन्धलोभात् आघ्रायमाण इत्यर्थः अनेन मान्द्यम् उच्यते। काननेषु वनेषु उदुम्बराणां जन्तुफलानाम् [उदुम्बरे जन्तुफलो यज्ञाङ्गो हेमदुग्धक इत्यमरः]। परिणमयिता परिपाचयिता [मितां ह्रस्व इति ह्रस्वः]। शीतो वायुः देवपूर्वं गिरिं देवगिरिम् इत्यर्थः उपजिगमिषोः उपगन्तुम् इच्छोः [गमेः सन्नन्तादुप्रत्ययः]। ते तव नीचैः शनैः वास्यति त्वां वीजयिष्यति इत्यर्थः। [सम्बन्धमात्रविवक्षायां षष्ठी। देवपूर्वं गिरिम् इत्यत्र देवपूर्वत्वं गिरिशब्दस्य नतु संज्ञिगतत्वाभावात् अवाच्यवचनं दोषमाहुरालङ्कारिकाः। तदुक्तम् एकावल्यां, यदवाच्यस्य वचनमवाच्यवचनं हि तदिति। समाधानं तु देवशब्दविशेषितेन गिरिशब्देन शब्दपरेण मेघोपगमयोग्यो देवगिरिर्लक्ष्यते इति कथञ्चित् सम्पाद्यम्]॥४३॥

तत्रेति। तत्र देवगिरौ नियता वसतिः यस्य तं नित्यः सन्निहितम् इत्यर्थः [पुरा किल तारकाख्यासुरविजयसन्तु-

रक्षाहेतोर्नवशशिभृता वासवीनां चमूनाम्
अत्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः ॥४३॥

इत्सुरप्रार्थनावशात् भगवान् भवानीनन्दनः स्कन्दो नित्यम् अहमिह सह शिवाभ्यां वसामि इत्युक्त्वा तत्र वसति इति प्रसिद्धिः।] स्कन्दं कुमारं स्वामिनं पुष्पाणां मेघः पुष्पमेघो-भूत्वा कामरूपत्वात् पुष्पवर्षुकमेघीकृतविग्रहः सन् व्योमगङ्गाजलार्द्रैः पुष्पासारैः पुष्पसम्पातैः [धारासम्पात आसार इत्यमरः।] भवान् स्वयम् एव स्नपयतु अभिषिञ्चतु स्वयपूजायाः उत्तमत्वात् इति भावः। [तथा च शम्भु-रहस्ये, स्वयं यजति चेत् देवमुत्तमा सोदरात्मजैः। मध्यमा याजयेद् भृत्यैरधमा याजनक्रियेति।] स्कन्दस्य पूज्यत्व-समर्थकम् अर्थान्तरं न्यस्यति रक्षेति। तत् भगवान् स्कन्द इत्यर्थः [विधेयप्राधान्यात् नपुंसकनिर्देशः।] वासवस्य इमाः वासव्यः [तस्येदमित्यण्] तासां वासवीनाम् ऐन्द्रीणां चमूनां सेनानां रक्षा एव हेतुः तस्य रक्षाहेतोः रक्षया कारणेन रक्षार्थम् इत्यर्थः [षष्ठी हेतुप्रयोगे इति षष्ठी।] नवशशिभृता भगवता चन्द्रशेखरेण वहति इति वहः [पचा-द्यच्] हुतस्य वहः हुतवहः वह्निः तस्य मुखे सम्भृतं सञ्चि-तम् आदित्यम् अतिक्रान्तम् अत्यादित्यम् [अत्यादयः क्रान्ताद्यर्थे द्वितीयेति समासः।] तेजो हि साक्षात् भग-वतो हरस्य एव मूर्त्यन्तरम् इत्यर्थः अतः पूज्यमिति भावः। [सुखग्रहणं तु शुचित्वसूचनार्थम्। तदुक्तं शम्भुरहस्ये, गवां

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्त्तयेथाः ॥४५॥

पश्चात् द्विजस्याङ्घ्रियोगिनां ह्यत् कवेर्वचः । पर ग्रथितमं विद्यान्मुखं स्त्रीवक्त्रिवाजिनामिति] ॥४४॥

ज्योतिरिति । ज्योतिषः तेजसः लेखाः राजयः तासां वलयं मण्डलम् अस्य अस्तीति तथोक्तं, गलितं भ्रष्टं न तु लौल्यात् स्वयं छिन्नमिति भावः यस्य मयूरस्य बर्हं पिच्छं [पिच्छबर्हे नपुंसके इत्यमरः ।] भवानी गौरी पुत्रप्रेम्णा पुत्रस्नेहेन कुवलयस्य दलं पत्रं तत्प्रापि तद्योगि यथा तथा कर्णे करोति दलेन सह धारयति इत्यर्थः, यद्वा दलप्रापि दलभाजि दलार्हे कर्णे करोति [क्विबन्तात् सप्तमी]। दलं परिहृत्य तत्स्थाने बर्हं धत्ते इत्यर्थः । [नाथस्तु कुवलयदलक्षेपीति पाठमनुसृत्य क्षेपो निन्दा अपसारणं वेति व्याख्यातवान्]; हरशशिरुचा हरशिरश्चन्द्रिकया धौतापाङ्गं स्वतोऽपि शौक्ल्यात् अतिधवलितनेत्रान्तम् [अपाङ्गौ नेत्रयोरन्तावित्यमरः]। पावकस्य अग्नेः अपत्यं पावकिः स्कन्दः [अत इञ् इति इञ्]। तस्य तं पूर्वोक्तं मयूरं पश्चात् पुष्पाभिषेचनानन्तरम् अद्रेः देवगिरेः ग्रहणेन गुहासंक्रमणेन गुरुभिः प्रतिध्वानमहद्भिः इत्यर्थः गर्जितैः नर्त्तयेथाः नृत्यं कारय मार्दङ्गिकभावेन भगवन्तं कुमारम् उपास्स्व इति भावः । [नर्त्तयेथा इत्यत्र अणाव-

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्त्या भुवि परिणतां रन्तिदेवस्य कीर्त्तिम्
॥४६॥

कर्म्मकाच्चित्तत्वात् कादित्यात्मनेपदापवादः निगरणचलना-र्थेभ्यश्चेति परस्मैपदं न भवति तस्य न पादम्याङ्यम्परि-मुहरुचिनृतिवदवस इति प्रतिषेधात्]॥ ४५॥

आराध्येति। एनं पूर्वोक्तं शराः बाणतृणानि [शरो बाणे बाणतृणे इति शब्दार्णवे]। तेषां वनं शरवणम्। [प्रनिरन्तःशरेत्यादिना णत्वम्]। तत्र भवः जन्म यस्य तं शरवणभवं देवं स्कन्दम्। [शरजन्मा षडानन इत्यमरः। अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद इति वामनः]। अवर्ज्यः अगतिकत्वात् आश्रयणीय इत्यर्थः आराध्य उपास्य वीणिभिः वीणावद्भिः [व्रीह्यादित्वादिनिः]। सिद्धद्वन्द्वैः सिद्धमिथुनैः भगवन्तं स्कन्दम् उपवीणयितुम् आगतैः इति भावः जलकणभयात् जलसेकस्य वीणाक्वणन-प्रतिबन्धकत्वात् इति भावः मुक्तमार्गः त्यक्तवर्त्मा सन् उल्ल-ङ्घिताध्वा कियन्तम् अध्वानं गत इत्यर्थः सुरभितनयानां गवाम् आलम्भेन संज्ञपनेन जायते इति तथोक्तां भुवि लोके स्रोतोमूर्त्त्या प्रवाहरूपेण परिणतां रूपविशेषम् आपन्नां रन्तिदेवस्य दशपुरपतेः महाराजस्य कीर्त्तिं चर्म-ण्वत्याख्यां नदीम् इत्यर्थः मानयिष्यन् सत्कारिष्यन् व्याल-

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात् प्रवाहम्।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टीः
एकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्॥४७॥
तामुत्तीर्य्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम्।

स्रोतः आलम्ब्य अवतरेः इत्यर्थः। [पुरा किल राज्ञो रन्तिदेवस्य गवालम्भेषु एकत्र सम्भृतात् रक्तनिष्यन्दात् चर्मराशेः काचित् नदी सस्यन्दे सा चर्मण्वतीति आख्यायते]॥४६॥

त्वयीति। शार्ङ्गिणः कृष्णस्य वर्णस्य कान्तेः चौरे वर्णचौरे तत्तुल्यवर्णे इत्यर्थः त्वयि जलम् आदातुम् अवनते सति पृथुम् अपि दूरभावात् दूरत्वात् तनुं सूक्ष्मतया प्रतीयमानं तस्याः सिन्धोः चर्मण्वत्याख्यायाः प्रवाहं गगने गतिर्येषां ते गगनगतयः खेचराः सिद्धगन्धर्वादयः [अत्र अपि बहुव्रीहिः पूर्ववत् जन्माद्युत्तरपदेषु द्रष्टव्यः]। नूनं दृष्टीः आवर्ज्य नियम्य एकम् एकयष्टिकं स्थूलः महान् मध्यः मध्यमणीभूतः इन्द्रनीलः यस्य तं भुवः भूमेः मुक्तागुणं मुक्ताहारम् इव प्रेक्षिष्यन्ते। [अत्र अत्यन्तनीलमेघसङ्गतस्य प्रवाहस्य भूकण्ठमुक्तागुणत्वेन उत्प्रेक्षैव इयमिति इवशब्देन व्यज्यते। निरुक्तकारस्तु तत्र लुप्तोपमा यत्र इवशब्दस्य दर्शनमिति इवशब्ददर्शनात् अत्राप्युपमैवेति बभाषे ॥ ४७ ॥

तामिति। तां चर्मण्वतीम् उत्तीर्य भ्रुवो लताः

कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥४८॥
ब्रह्मावर्त्तं जनपदमथ च्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः।

भ्रूलताः [उपमितसमासः]। तासां विभ्रमाः विलासाः परिचिताः क्षमाः येषु तेषां पक्ष्माणि नेत्रलोमानि [पक्ष्म सूत्रे च सूक्ष्मांशे किञ्जल्के नेत्रलोमनीति शाश्वतः]। तेषाम् उत्क्षेपात् उन्नमनात् हेतोः कृष्णाश्च ताः शाराश्च कृष्णशाराः नीलशाराः [वर्णो वर्णेनेति समासः। कृष्णरक्तसिताः शारा इति यादवः। ततश्च शारशब्दात् एव सिद्धे कार्ष्ण्ये पुनः कृष्णपदोपादानं कार्ष्ण्यप्राधान्यार्थं रक्तत्वं तु न विवक्षितम् उपेक्षानुसारात् तस्य स्वाभाविकस्य स्त्रीनेत्रेषु सामुद्रिकविरोधात् इतरस्य अप्रसङ्गात् क्वचित् भावकथनं तु उपपत्तिविषयम्]। उपरि विलसन्त्यः कृष्णशाराः प्रभाः येषां तेषां कुन्दानि माघ्यकुसुमानि तेषां क्षेपः इतस्ततः चलनं तस्य अनुगाः अनुसारिणः ये मधुकराः तेषां श्रियं मुष्णन्ति इति तथोक्तानां क्षिप्यमाणकुन्दानुधाविमधुकरकल्पानाम् इत्यर्थः दशपुरं रन्तिदेवस्य नगरं तत्र वध्वः स्त्रियः [वधूर्जाया स्नुषा स्त्री च इत्यमरः]। तासां नेत्रकौतूहलानां नेत्राभिलाषाणां साभिलाषदृष्टीनाम् इत्यर्थः आत्मबिम्बं स्वमूर्त्तिं पात्रीकुर्वन् विषयीकुर्वन् व्रज गच्छ। ४८॥

ब्रह्मावर्त्तमिति। [अत्र मनुः सरस्वतीदृषद्वत्योर्देवन-

राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥४९॥
हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ।

द्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते इति]। अथ अनन्तरं ब्रह्मावर्त्तं नाम जनपदं छायया अनातपमण्डलेन गाहमानः प्रविशन् न तु स्वरूपेण [पीठ-चैत्याश्रमादीनि परिहृत्यान्यतो व्रजेत् इति वचनात्]। क्षत्रप्रधनपिशुनम् अद्यापि शिरःकपालादिमत्तया कुरु-पाण्डवयुद्धसूचकम् इत्यर्थः [युद्धमायोधनं जन्यं प्रधनं प्रवि-दारणमित्यमरः]। तत् प्रसिद्धं कुरूणाम् इदं कौरवं क्षेत्रं भजेथाः कुरुक्षेत्रं व्रज इत्यर्थः यत्र कुरुक्षेत्रे गाण्डी अस्य अस्तीति गाण्डीवं धनुर्विशेषः [गाण्ड्यजगात् संज्ञायामिति मत्वर्थीयो वप्रत्ययः। कपिध्वजस्य गाण्डीवगाण्डिवौ पुंन-पुंसकौ इत्यमरः]। तत् धनुः यस्य सः गाण्डीवधन्वा अर्जुनः [वा संज्ञायामित्यनङादेशः]। शितशरशतैः निशि-तबाणसहस्रैः राजन्यानां राज्ञां मुखानि धाराणाम् उद-कधाराणां पातैः कमलानि त्वम् इव अभ्यवर्षत् अभिमुखं दृष्टवान् शरवर्षैः शिरांसि चिच्छेद इत्यर्थः ॥४९॥

हित्वेति। बन्धुप्रीत्या कुरुपाण्डवस्नेहेन न तु भयेन सम-रविमुखो युद्धनिःस्पृहः लाङ्गलम् अस्य अस्तीति लाङ्गली हलधरः अभिमतरसाम् अभीष्टस्वादां तथा रेवत्याः स्वप्रि-यायाः लोचने एव अङ्कः प्रतिबिम्बितत्वात् चिह्नं यस्याः

कृत्वा तासामभिगममपां सौम्य ! सारस्वतीनाम्
अन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥५०॥
तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम्।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥५१॥

तां हालां सुरां [सुरा हलिप्रिया हालेत्यमरः। अभियुक्तं देशभाषापदमित्यत्र सूत्रे हालेति देशभाषापदमप्यतीव कविप्रयोगात् साध्विति उदाजहार वामनः]। हित्वा त्यक्त्वा दुस्त्यजाम् अपि इति भावः याः सारस्वतीः अपः सिषेवे हे सौम्य ! सुभग ! त्वं तासां सरस्वत्याः नद्याः इमाः सारस्वत्यः तासाम् अभिगमं सेवां कृत्वा अन्तः अन्तरात्मनि शुद्धः निर्मलः निर्दोषः भविता [लुट्लृटचाविति तृच्]। अपि सद्य एव पूतो भविष्यसि इत्यर्थः [वर्त्तमानसामीप्ये वर्त्तमानवद्वेति वर्त्तमानप्रत्ययः]। वर्णमात्रेण वर्णेन एव कृष्णः श्यामः न तु पापेन इत्यर्थः अन्तःशुचिरेव सम्पाद्या न तु बाह्या बहिःशुद्धोऽपि सूतवधप्रायश्चित्तार्थं सारस्वतसलिलसेवी तत्र भगवान् बलभद्र एव निदर्शनम्। अतः भवताऽपि सरस्वती सर्वथा सेवितव्या इति भावः ॥५०॥

तस्मादिति। तस्मात् कुरुक्षेत्रात् कनखलस्य अद्रेः समीपे अनुकनखलम् [अनुर्यत्समयेत्यव्ययीभावः]। शैलराजात् हिमवतः अवतीर्णां सगरतनयानां स्वर्गसोपानपङ्क्तिं स्वर्गप्राप्तिसाधनभूताम् इत्यर्थः जह्नोः नाम राज्ञः

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः।
संसर्पन्त्या सपदि भवतः स्रोतसि छाययासौ
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥५२॥

कन्यां जाह्नवीं गच्छेः गच्छ [विध्यर्थे लिङ्]। या जाह्नवी गौर्याः वक्त्रे या भ्रुकुटिरचना सापत्न्यरोषात् भ्रूभङ्गकरणं तां फेनैः विहस्य हसित्वा इव धावल्यात् फेनानां हासत्वेन उत्प्रेक्षा]। इन्दौ शिरोमाणिक्यभूते लग्नाः ऊर्मयः एव हस्ताः यस्याः सा इन्दुलग्नोर्मिहस्ता सती शम्भोः केशग्रहणम् अकरोत्। यथा काचित् प्रौढ़ा नायिका सपत्नीम् असहमाना स्ववाल्लभ्यं प्रकटयन्ती स्वभर्त्तारं सह शिरोरत्नेन केशेषु आकर्षति तद्वत् इति भावः। [इदञ्च पुरा किल भगीरथप्रार्थनया भगवतीं गगनपथात् पतन्तीं गङ्गां गङ्गाधरो जटाजूटेन जग्राहेति कथाम् उपजीव्य उक्तम्] ॥५१॥

तस्या इति। सुरगज इव कश्चित् दिग्गज इव व्योम्नि पश्चात् अर्धं पश्चार्धं [पृषोदरादित्वात् साधुः]। तेन लम्बते इति पश्चार्धलम्बी सन् पश्चार्धभागेन व्योम्नि स्थित्वा पूर्वार्धेन जलोन्मुख इत्यर्थः [केचित् पूर्वार्धलम्बीति पठन्ति] अच्छस्फटिकविशदं निर्मलस्फटिकावदातं तस्याः गङ्गायाः अम्भः तिर्यक् तिरश्चीनं यथा तथा पातुं त्वं तर्कयेः विचारयेः चेत् सपदि स्रोतसि प्रवाहे संसर्पन्त्या संक्रामन्त्या भवतः छायया प्रतिबिम्बेन असौ गङ्गा अस्थाने

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ ५२

प्रयागात् अन्यत्र उपगतः प्राप्तः यमुनासङ्गमः यया सा तथाभूता इव अभिरामा स्यात् ॥ ५२ ॥

आसीनानामिति। आसीनानाम् उपविष्टानां मृगाणां कस्तूरिकामृगाणाम्। [अन्यथा नाभिगन्धानुपपत्तेः] नाभिगन्धैः कस्तूरीगन्धैः तेषां तदुद्भवत्वात् अत एव मृगनाभिसंज्ञा च] मृगनाभिर्मृगमदः कस्तूरी चेत्यमरः]। अथवा नाभयः कस्तूर्यः [नाभिः प्रधाने कस्तूर्यां मदे च क्वचिदीरित इति विश्वः]। तासां गन्धैः सुरभिताः सुरभीकृताः शिलाः यस्य तं तस्याः गङ्गायाः एव प्रभवति अस्मात् इति प्रभवः कारणं तुषारैः गौरं सितम् [अवदातः सितो गौर इत्यमरः] अचलं प्राप्य विनीयते अनेन विनयनम्। [करणे ल्युट्] अध्वश्रमस्य विनयने अपनोदके तस्य हिमाद्रेः शृङ्गे निषण्णः सन् शुभ्रः यः त्रिनयनस्य त्र्यम्बकस्य वृषः वृषभः [सुकृते वृषभे वृष इत्यमरः]। तेन उत्खातेन विदारितेन पङ्केन सह उपमेयाम् उपमातुम् अर्हां शोभां वक्ष्यसि वोढासि। वहतेर्लुट्। [त्रिनयनेत्यत्र पूर्वपदात् संज्ञायामग इति णत्वं न भवति क्षुभ्नादिषु चेति निषेधात्। तस्याः प्रभवम् इत्यादिना हिमाद्रौ मेघस्य वैवाहिको गङ्गाविहारो ध्वन्यते] ॥ ६२ ॥

तं चेद्वायौ सरति सरलस्कन्धसङ्घट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रैः
आपन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥५४॥
ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्
मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम् ।

तमिति । वायौ वनवाते सरति वाति सति सरलानां देवदारुद्रुमाणां स्कन्धाः प्रदेशविशेषाः [अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधेस्तरोरित्यमरः । तेषां सङ्घट्टेन सङ्घर्षणेन जन्म यस्य स तथोक्तः [जन्मोत्तरपदत्वात् व्यधिकरणोऽपि बहुव्रीहिः साधुरित्युक्तम्] । उल्काभिः स्फुलिङ्गैः क्षपिता निर्दग्धाः चमरीणां बालभाराः केशसमूहा येन स तथोक्तः, दव एव अग्निः दवाग्निः वनवह्निः [वने च वनवह्नौ च दवो दाव इवेष्यते इति यादवः] । तं हिमाद्रिं बाधेत चेत् पीडयेत् यदि एनं दवाग्निं वारिधारासहस्रैः शमयितुम् अर्हसि । युक्तञ्च एतत् इत्याह, उत्तमानां महतां सम्पदः समृद्धयः आपन्नानाम् आर्त्तानाम् आर्त्तिप्रशमनम् आपन्निवारणम् एव फलं प्रयोजनं यासां ताः तथोक्ताः हि, अतो हिमाचलस्य दावानलः त्वया शमयितव्यः इति भावः ॥ ५४ ॥

य इति । तस्मिन् हिमाद्रौ संरम्भः कोपः [संरम्भः संभ्रमे कोपे इति शब्दार्णवे] । तेन उत्पतने उत्प्लवने रभसः वेगः येषां ते तथोक्ताः [रभसो हर्षवेगयोरिति

तान् कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥५५॥

विश्वः]। ये शरभाः अष्टापदमृगविशेषाः [शरभः शलभे चाष्टापदे प्रोक्तो मृगान्तरे इति विश्वः] मुक्ताध्वा शरभोत्प्लवनमार्गः येन तं भवन्तं सपदि स्वाङ्गभङ्गाय लङ्घयेयुः [सम्भावनायां लिङ्]। भवतोऽतिदूरत्वात् स्वाङ्गभङ्गातिरिक्तं फलं नास्ति लङ्घनस्य इत्यर्थः. तान् शरभान् तुमुलाः सङ्कुलाः करकाः वर्षोपलाः [वर्षोपलस्तु करकेत्यमरः]। तासां वृष्टिः तस्याः पातेन अवकीर्णान् विक्षिप्तान् कुर्वीथाः कुरुष्व [विध्यर्थे लिङ्]। क्षुद्रोऽपि अधिक्षिपन् प्रतिपक्षः सद्यः प्रतिक्षेप्तव्यः इति भावः तथा हि आरभ्यन्ते इति आरम्भाः कर्माणि तेषु यत्नः उद्योगः स निष्फलः येषां ते तथोक्ताः निष्फलकर्मोपक्रमाः इत्यर्थः अतः के वा परिभवपदं तिरस्कारपदं न स्युः न भवन्ति सर्वे एव भवन्ति इत्यर्थः। [यदत्र घनोपलस्तु करक इति यादववचनात् करकशब्दस्य नियतपुंलिङ्गताभिप्रायेण करकाणाम् अवृष्टिरिति केषाञ्चित् व्याख्यानं तत् अन्ये न अनुमन्यन्ते वर्षोपलस्तु करकेत्यमरवचनव्याख्याने क्षीरस्वामिना कमण्डलौ च करकः सुगते च विनायकः इति नानार्थे पुंस्यपि वक्ष्यत इति वदता उभयलिङ्गताप्रकाशनात्। यादवस्य तु पुंलिङ्गताविधाने तात्पर्यं न तु स्त्रीलिङ्गतानिषेधे इति न तद्विरोधोऽपि। करकस्तु करङ्के स्याद्दाडिमे च कमण्डलौ। पक्षिभेदे करे चापि करका तु घनो-

तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः ।
यस्मिन् दृष्टे करणविगमादूर्द्ध्वमुद्धूतपापाः
सङ्कल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥५६॥

पत्रे इति विश्वप्रकाशवचने तु उभयलिङ्गता व्यक्तैवेति न कुत्रापि विरोधवार्त्ता अतएव, रुद्रः वर्षोपलस्तु करका करकोऽपि च दृश्यते] ॥ ५५ ॥

तत्रेति । तत्र हिमाद्रौ दृषदि कस्याञ्चित् शिलायां व्यक्तं प्रकटं शश्वत् सदा सिद्धैः योगिभिः [सिद्धिर्निष्पत्तियोगयोरिति विश्वः]। उपचितबलिं रचितपूजाविधिं [बलिः पूजोपहारयोरिति यादवः]। अर्द्धश्चासौ इन्दुश्चेति अर्द्धेन्दुः [अर्द्धः खण्डे समेऽशके इति विश्वः]। स मौलौ यस्य तस्य ईश्वरस्य चरणन्यासं पादविन्यासं भक्तिः पूज्येषु अनुरागः तया नम्रः सन् परीयाः प्रदक्षिणं कुरु [परिपूर्वादिणो लिङ्]। यस्मिन् पादन्यासे दृष्टे सति उद्धूतपापा निरस्तकल्मषाः सन्तः श्रद्दधानाः विश्वसन्तः पुरुषाः श्रद्धा विश्वासः आस्तिक्यबुद्धिरिति यावत् [श्रदन्तरोरुपसर्गवद्वृत्तिर्वक्तव्येति श्रत्पूर्वात् दधातेः शानच्]। करणस्य चेतस्य विगमात् ऊर्द्ध्वं देहत्यागानन्तरम् [करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपीत्यमरः]। स्थिरं शाश्वतं गणानां प्रमथानां पदं स्थानम् [गणाः प्रमथसंख्यौघा इति वैजयन्ती]। तस्य प्राप्तये सङ्कल्पन्ते समर्था भवन्ति। [कृपिः पर्याप्तिवचनस्य अलमर्थत्वात् तद्योगे नमःस्वस्तीत्यादिना

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्य्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।
निर्ह्रादस्ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥५७॥

चतुर्थी। अलमिति पर्य्याप्त्यर्थग्रहणमिति भाष्यकारः। अव्यक्तं व्यञ्जयामास शिवः श्रीचरणद्वयम्। हिमाद्रौ शास्त्रवादीनां सिद्धये सर्वकर्मणाम। दृष्ट्वा श्रीचरणं सम्यक् साधकः स्थिरयेत्तनुम्। इच्छाधीनशरीरो हि विचरेच्च जगत्त्रयमिति शम्भुरहस्ये]॥ ५६॥

शब्दायन्त इति। हे मेघ! अनिलैः पूर्य्यमाणाः कीचकाः वेणुविशेषाः [वेणवः कीचकास्ते स्युर्ये स्वनन्त्य-निलोद्धता इत्यमरः] मधुरं श्रुतिसुखं यथा तथा शब्दायन्ते शब्दं कुर्वन्ति [शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे इति क्यङ्। अनेन वंशवाद्यसम्पत्तिरुक्ता] संसक्ताभिः संयुक्ताभिः वंशवाद्यानुषक्ताभिर्वा संरक्ताभिरिति पाठे संरक्तकण्ठीभिः इत्यर्थः किन्नरीभिः किन्नरस्त्रीभिः त्रयाणां पुराणां समाहारः त्रिपुरम्। [तद्धितार्थोत्तरपदेति समासः। पात्रादित्वात् नपुंसकत्वम्]। तस्य विजयः गीयते कन्दरेषु दरीषु [दरी तु कन्दरो वा स्त्रीत्यमरः। ते तव निर्ह्रादः मुरजे वाद्यभेदे ध्वनिः इव मुरजध्वनिः इव इत्यर्थः स्यात् चेत् तर्हि तत्र चरणसमीपे पशुपतेः नित्यं सन्निहितस्य शिवस्य सङ्गीतं सम्यक् गीतं तत् एव अर्थः सङ्गीतार्थः सङ्गीतवस्तु [अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिष्विमरः]।

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्य्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः॥५८

समग्रः सम्पूर्णः भावी ननु भविष्यति खलु। भविष्यति गत्यादय इति भविष्यदर्थे णिनिः॥ ५७ ॥

प्रालेयाद्रेरिति । प्रालेयाद्रेः हिमाद्रेः उपतटं तटसमीपे [अव्ययं विभक्तीत्यादिना सामीप्यार्थेऽव्ययीभावः]। तान् तान् [वीप्सायां द्विरुक्तिः]। विशेषान् द्रष्टव्यार्थान् [विशेषोऽवयवे द्रव्ये द्रष्टव्योत्तमवस्तुनीति शब्दार्णवे]। अतिक्रम्य अनुसरेः गच्छेः इति अनागतेन सम्बन्धः हंसानां द्वारं हंसद्वारम् । [मानसप्रस्थायिनो हंसाः क्रौञ्चरन्ध्रेण सञ्चरन्ते इत्यागमः]। भृगुपतेः जामदग्न्यस्य यशोवर्त्म यशःप्रवृत्तिकारणमित्यर्थः यत् क्रौञ्चस्य अद्रेः रन्ध्रम् अस्ति तेन क्रौञ्चबिलेन बलेः दैत्यस्य नियमने बन्धने अभ्युद्यतस्य प्रवृत्तस्य विष्णोः व्यापकस्य त्रिविक्रमस्य श्यामः कृष्णवर्णः पादः इव तिर्य्यगायामेन चिप्रप्रवेशनार्थं तिरश्चीनदैर्घ्येण शोभते इति तथाविधः सन् उदीचीम् उत्तरां दिशम् अनुसरेः अनुगच्छ । [पुरा किल भगवतो देवाद् धूर्जटेः धनुरुपनिषदम् अधीयानेन भृगुनन्दनेन स्कन्दस्य स्पर्धया क्रौञ्चशिखरिणम् अतिनिशितविशिखमुखेन हेलया कृतपिच्छभेदं भित्वा ततः क्रौञ्चभेदादेव सद्यः समुज्ज्वलिते अमि-

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ॥५८॥
उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य ।

न्नपि यशःक्षीरनिधौ निखिलमपि जगज्जालम् मग्नावितमिति कथा श्रूयते] ॥५८॥

गत्वेति । क्रौञ्चबिलनिर्गमनानन्तरम् ऊर्ध्वं च गत्वा दशमुखस्य रावणस्य भुजैः बाहुभिः उच्छ्वासिताः विश्लेषिताः प्रस्थानां सानूनां सन्धयः यस्य तस्य एतेन तदनकौतुकसद्भावः उक्तः । त्रिदश परिमाणम् एषाम् अस्तीति त्रिदशाः [संख्ययाव्ययेत्यादिना बहुव्रीहिः । बहुव्रीहौ संख्येये डजित्यादिना समासान्तो डच्प्रत्ययः] । त्रिदशानां देवानां वनिताः तासां दर्पणस्य [कैलासस्य स्फटिकत्वात् रजतत्वाद्वा विम्बग्राहित्वेन इदमुक्तम्] । कैलासस्य अतिथिः स्याः यः कैलासः कुमुदविशदैः निर्मलैः शृङ्गाणाम् उच्छ्रायैः औन्नत्यैः खम् आकाशं वितत्य व्याप्य प्रतिदिनं दिने दिने राशीभूतः त्र्यम्बकस्य त्रिलोचनस्य अट्टहासः अतिहासः इव स्थितः । [अट्टावतिशयक्षौमाविति यादवः । धावल्यात् हासत्वेन उत्प्रेक्षा । हासादीनां धावल्यं कविसमयसिद्धम्] ॥५९॥

उत्पश्यामीति । [स्निग्धं मसृणं भिन्नं मर्दितञ्च यत्

शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्रीम्
अंसन्यस्ते सति हलभृतो मेचके वाससीव ॥६०॥
हित्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता
क्रीड़ाशैले यदि च विचरेत् पादचारेण गौरी।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ॥६१॥

अञ्जनं कज्जलं तस्य आभा इव आभा यस्य तस्मिन् त्वयि तटगते सानुगते सति सद्यः कृत्तस्य छिन्नस्य द्विरददशनस्य गजदन्तस्य छेदवत् गौरस्य धवलस्य तस्य अद्रेः कैलासस्य मेचके श्यामले [कृष्णनीलासितश्यामकालश्यामलमेचकाः इत्यमरः]। वाससि वस्त्रे अंसन्यस्ते सति हलभृतो बलभद्रस्य इव स्तिमिताभ्यां नयनाभ्यां प्रेक्षणीयां शोभां भवित्रीं भाविनीम् उत्पत्स्यामि शोभा भविष्यतीति तर्कयामि इत्यर्थः। श्रौती पूर्णोपमा अलङ्कारः ॥६०॥

हित्वेति । तस्मिन् क्रीड़ाशैले कैलासे [कैलासः कनकाद्रिश्च मन्दरो गन्धमादनः। क्रीड़ार्थं निर्मिताः शम्भोः देवैः क्रीड़ाद्रयोऽभवन्निति शम्भुरहस्ये]। शम्भुना शिवेन भुजगः एव वलयः कङ्कणं हित्वा गौर्य्याः भीरुत्वात् त्यक्त्वा दत्तहस्ता सती गौरी पादचारेण विचरेत् यदि तर्हि अग्रयायी पुरोगतः तथा स्तम्भितो घनीभावं प्रापितः अन्तर्जलस्यौघः प्रवाहो यस्य स तथाभूतः भङ्गीनां पर्वणां भक्त्या रचनया विरचितवपुः कल्पितशरीरः सन् मणीनां

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।
ताभ्यो मोक्षस्तव यदि सखे! घर्मलब्धस्य न स्यात्
क्रीड़ालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ॥६२॥
हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य

तटं मणितटं तस्य भारोहणाय सोपानत्वं कृत्‌ सोपान-भावं भजेत्यर्थः ॥ ६१ ॥

तत्रेति। तत्र कैलासेऽवश्यं सर्वथा सुरयुवतयः वलयकुलिशानि कङ्कणकोटयः [शतकोटिवाचिना कुलिशशब्देन कोटिमात्रं लक्ष्यते]। तैः उद्घट्टनानि प्रहाराः तैः उद्गीर्णमुत्सृष्टं तोयं येन तं त्वां यन्त्रेषु धाराः यन्त्रधाराः तासां गृहत्वं कृत्रिमधारागृहत्वं नेष्यन्ति प्रापयिष्यन्ति। हे सखे! मित्र! घर्मे निदाघे लब्धस्य [घर्मलब्धत्वञ्चास्य देवभूमिषु सर्वदा सर्वर्त्तुसमाहारात् प्राथमिकमेवलाद्वा यथोक्तमाषाढ़स्य प्रथमेति]। तव ताभ्यः सुरयुवतिभ्यः मोक्षो न स्यात् यदि तदा क्रीड़ालोलाः क्रीड़ासक्ताः प्रमत्ताः इत्यर्थः ताः सुरयुवतीः श्रवणपरुषैः कर्णकटुभिः गर्जितैः करणैः भाययेः त्रासयेः। [अत्र हेतुभयाभावात् आत्मनेपदं युगागमश्च न] ॥ ६२ ॥

हेमेति। हे जलद! हेमाम्भोजानां प्रसवि जनकम् [जिद्दक्षीत्यादिना इनिप्रत्ययः]। मानसस्य सरसः सलिलम् आददानः पिबन् इत्यर्थः, तथा ऐरावतस्य इन्द्र-

धुन्वन् कल्पद्रुमकिसलयान्यंशुकानीव वातै-
र्नानाचेष्टैर्जलद ! ललितैर्निर्विशेस्तं नगेन्द्रम् ॥ ६२ ॥
तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।

गजस्य कामचारित्वाद्वा शिवसेवार्थम् इन्द्रागमनाद्वा समागतस्य इति भावः, यथे जलदानकाले सुखे पटेन या प्रीतिः तां कुर्वन्, तथा कल्पद्रुमाणां किसलयानि पल्लवभूतानि अंशुकानि सूक्ष्मवस्त्राणि इव [अंशुकं वस्त्रमात्रे स्यात् परिधानोत्तरीययोः । सूक्ष्मवस्त्रे नातिदीप्ताविति शब्दार्णवे]। वातैः मेघवातैः धुन्वन्, नाना बहुविधाः चेष्टाः तोयपानादयः येषु तैः ललितैः क्रीडितैः [ना भावभेदो स्त्रीनृत्ये ललितं त्रिषु सुन्दरे। स्त्रियां प्रमदागारे क्रीडिते जातपल्लवे इति शब्दार्णवे]। तं नगेन्द्रं कैलासं कामं यथेष्टं निर्विशेः समुपभुङ्क्ष्व [निर्वेशो भृतिभोगयोरित्यमरः]। यथेच्छविहारो शिवस्येष्टेषु सेवयाः फल सहजमिवच ते कैलासः मेघपर्वतयोः अन-सूर्ययोः अब्धिचन्द्रयोः शिखिनीमूलयोः समीराग्न्योः मित्रता स्वयमिति भावः ॥ ६२ ॥

तस्येति । प्रणयिनः प्रियतमस्य इव तस्य कैलासस्य उत्सङ्गे जङ्घभागे [उत्सङ्गो सुन्नसंयोगे सक्थन्यूर्द्ध्वं तथोऽपि चेति मालतीमालायाम्]। गङ्गा दुकूलं शुभ्रवस्त्रम् इव उपमितसमासः। [दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरीये सितांशुके इति शब्दार्णवे]। अन्यत्र तु गङ्गा इव दुकूलं तत् स्रस्तं

या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥६४॥

यस्याः तां तथोक्ताम् अलकां कुबेरनगरीं दृष्ट्वा कामिनीम् इवेति शेषः हे कामचारिन्। त्वं पुनः त्वं तु न ज्ञास्यसे इति न किन्तु ज्ञास्यसे एव इत्यर्थः [कामचारिणस्ते पूर्वमपि बहुशस्त्वो दर्शनसम्भवादज्ञानमसम्भावितमेवेति निश्चयार्थं नञ्द्वयप्रयोगः। तदुक्तं, स्मृतिनिश्चयसिद्धार्थेषु नञ्द्वयप्रयोग इति]। उच्चैर्विमानानि, उन्नतानि सप्तभूमिकभवनानि [विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनीति यादवः]। तानि यस्यां सा [मेघसंवाहनस्थानसूचनार्थम् इदं विशेषणम्]। अन्यत्र विमाना निरुपमा या अलका वो युष्माकं काले मेघकाले इत्यर्थः [कालस्य सर्वमेघसाधारण्यात् वः इति बहुवचनम्]। सलिलम् उद्गिरतीति सलिलोद्गारं स्रवत्सलिलधारम् इत्यर्थः अभ्रवृन्दं मेघकदम्बकं कामिनी स्त्री मुक्ताजालैः मौक्तिकसरैः ग्रथितं प्रत्युप्तम्। [पुंस्त्र्यां मौक्तिके मुक्तेति यादवः]। अलकम् इव चूर्णकुन्तलानि इव [जातावेकवचनम्। अलकाश्चूर्णकुन्तला इत्यमरः]। वहति बिभर्त्ति। [अत्र कैलासस्य अनुकूलनायकत्वम् अलकायाश्च स्वाधीनपतिकाख्यनायिकात्वं ध्वन्यते। एकायत्तोऽनुकूलः स्यादिति, प्रियोपलालिता नित्यं स्वाधीनपतिका मतेति च लक्षयन्ति उदाहरन्ति च लालयन् अलकप्रान्तान् रचयन् पत्रमञ्जरीम्। एकां विनोदयन् कान्तां छायावदनुवर्त्तते इति] ॥६४॥

इति पूर्वमेघः।

उत्तरमेघः ।

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥१॥

विद्युत्वन्तमिति । यत्र अलकायां ललिताः रम्याः वनिताः स्त्रियो येषु ते, सह चित्रैः वर्त्तन्त इति सचित्राः [आलेख्याश्चर्य्ययोश्चित्रमित्यमरः । तेन सहेति तुल्ययोग इति बहुव्रीहिः । वोपसर्ज्जनस्येति सहशब्दस्य समासः]। सङ्गीताय तौर्य्यत्रिकाय प्रहतमुरजा ताड़ितमृदङ्गाः [मुरजा तु मृदङ्गे स्यात् ढक्कामुरजयोरपीति शब्दार्णवे]। मणिमय्यः मणिविकाराः भुवो येषु ते तथोक्ताः, अभ्रंलिहानि अभ्रङ्कषाणि [वहाभ्रे लिह इति खश्प्रत्ययः अरुर्द्विषेत्यादिना मुमागमः]। अग्राणि शिखराणि येषां ते तथोक्ताः अतितुङ्गाः इत्यर्थः, प्रासादाः देवगृहाणि [प्रासादो देवभूभुजामित्यमरः]। विद्युतः अस्य सन्तीति विद्युत्वन्तं सेन्द्रचापम् इन्द्रचापवन्तं, स्निग्धः श्राव्यः गम्भीरः घोषः गर्जितं यस्य तम्, अन्तः अन्तर्गतं तोयं यस्य तं तुङ्गम् उन्नतं त्वां तैः तैः विशेषैः ललितवनितत्वादिधर्मैः तुलयितुं समीकर्त्तुमलं पर्य्याप्ताः। [अलं भूषणपर्य्याप्तिशक्तिवारणवाचकमित्यमरः। अत्र उप-

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूडापाशे नवकुरवकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥२॥

मानोपमेयभूतमेघप्रासादधर्माणां विद्युद्वनितादीनां यथासंख्यमन्योन्यसादृश्यात् मेघप्रासादसादृश्यसिद्धिरिति बिम्बप्रतिबिम्बभावेनेयं पूर्णोपमा] ॥१॥

सम्प्रति सर्वदा सर्वर्तुसम्पत्तिमाह हस्ते इति । यत्र अलकायां वधूनां स्त्रीणां हस्ते लीलार्थं कमलं लीलाकमलं [शरल्लिङ्गमेतत् । तदुक्तं, शरत् पङ्कजलक्षणेति] । अलके कुन्तले [जातावेकवचनम्] अलकेषु इत्यर्थः बालकुन्दैः प्रत्यग्रमाघ्यकुसुमैः अनुविद्धम् अनुवेधः सञ्जनम् [नपुंसके भावे क्तः । यद्यपि कुन्दानां शैशिरत्वम् अस्ति माघ्यं कुन्दमित्यभिधानात् तथापि हेमन्ते प्रादुर्भावः शिशिरे प्रौढत्वमिति व्यवस्थाभेदेन हेमन्तकार्थत्वमित्याशयेन बालविशेषणम् । अलकमिति प्रथमान्तपाठे सप्तमीप्रक्रमभङ्गः स्यात् । नाथस्तु नियतपुंलिङ्गत्वादलकानिति दोषान्तरमाह तदसत् स्वभाववक्राण्यलकानि तासां, निर्धूतान्यलकानि पातितसुरः कतमोऽधरः खण्डित इत्यादिषु प्रयोगेषु नपुंसकलिङ्गतादर्शनादिति] । आनने मुखे लोध्रप्रसवानां, लोध्रपुष्पाणां शैशिराणां रजसा परागेण, [स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने इत्यमरः] । पाण्डुतां नीता श्रीः शोभा, चूडापाशे केशपाशे नवकुरवकं वासन्तः पुष्पविशेषः,

यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः ।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः
॥३॥

कर्णे चारु पेशलं शिरीषं ग्रैष्मः पुष्पविशेषः, सीमन्ते मस्तककेशवीथ्यां [सीमन्तमस्त्रियां मस्तकेशवीथ्यामुदाहृतमिति शब्दार्णवे] तव उपगमः मेघागम इत्यर्थः तत्र जातं त्वदुपगमजं वार्षिकम् इत्यर्थः नीपं कदम्बकुसुमं सर्वत्र अस्तीति शेषः । अस्तिर्भवतिपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति न्यायात् । इत्थं कमलकुन्दादितत्तत्कार्य्यसमाहाराभिधानादर्थात् सर्वर्त्तुसमारसिद्धिः कारणं विना कार्य्यस्यासिद्धेरिति भावः ॥२॥

यत्रेति । यत्र अलकायां पादपाः वृक्षाः नित्यानि पुष्पाणि येषां ते तथा नतु ऋतुनियमादिति भावः, अत एव उन्मत्तैर्भ्रमरैः मुखराः शब्दायमानाः । नलिन्यः पद्मिन्यो नित्यानि पद्मानि यासां ताः तथा नतु हेमन्तवर्जितमित्यर्थः, अतएव हंसश्रेणीभिः रचितरशना नित्यं हंसपरिवेष्टिता इत्यर्थः । भवनशिखिनः क्रीडामयूराः नित्यं भास्वन्तः कलापाः बर्हाणि येषां ते तथोक्ताः नतु वर्षास्वेव, अतएव केकाभिः उत्कण्ठाः उद्ग्रीवाः । प्रदोषाः रात्रयः नित्यं ज्योत्स्ना यासां ताः नतु शुक्लपक्ष एव,

आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् ।
नाप्यन्यस्मात् प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥४॥

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥५॥

अतएव प्रतिहता तमसां वृत्तिः व्याप्तिः येषां ते च ते रम्याश्चेति तथोक्ताः ॥३॥

आनन्दोत्थमिति । यत्र अलकायां वित्तेशानां यक्षाणाम् [वित्ताधिपः कुवेरः स्यात् प्रभौ धनिकयक्षयोरिति शब्दार्णवे] । आनन्दोत्थम् आनन्दजन्यमेव नयनसलिलम् अन्यैर्निमित्तैः शोकादिभिर्न । इष्टसंयोगेन प्रियजनसमागमेन साध्यात् निवर्त्तनीयात्तत्प्रतीकारार्थः कुसुमशरजात् मदनशरजादन्यस्तापो नास्ति । प्रणयकलहादन्यस्मात् कारणाद्विप्रयोगोपपत्तिः विरहप्राप्तिरपि नास्ति । किञ्च यौवनादन्यत् वयो वार्धकं नास्ति । श्लोकद्वयं प्रक्षिप्तम् ॥४॥

यस्यामिति । यस्याम् अलकायां यक्षाः देवयोनिविशेषाः उत्तमस्त्रीसहायाः वनिताङ्गनासहचराः सन्तः सितमणिमयानि स्फटिकमणिमयानि चन्द्रकान्तमयानि

मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥६॥

वा अत एव ज्योतिषां तारकाणां छायाः प्रतिबिम्बानि एव कुसुमानि तैः रचितानि परिष्कृतानि [ज्योतिस्ताराग्निभाद्योतादृक्पुत्रार्थाध्वराग्निष्विति वैजयन्ती। एतेन पानभूमेरनावरणत्वम् उक्तम्]। हर्म्यस्थलानि एत्य प्राप्य त्वद्गम्भीरध्वनिः इव ध्वनिः येषां तेषु पुष्करेषु वाद्यभाण्डमुखेषु [पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले इत्यमरः]। शनकैः मन्दम् आहतेषु सत्सु [एतच्च नृत्यगीतयोरप्युपलक्षणम्] कल्पवृक्षप्रसूतं कल्पवृक्षस्य काङ्क्षितार्थप्रदत्वात् मद्यमपि तत्र प्रसूतं रतिः फलं यस्य तत् रतिफलाख्यं मधु मद्यम् आसेवन्ते आहत्य पिबन्ति इत्यर्थः। [तालक्षीरसितासिता-मलगुडोन्मत्ताञ्जिकालाक्षयादर्विन्द्रद्रुमसारटङ्कुकदलीगुल्-प्रसूनैर्युतम्। इत्यन्ये मधुपुष्पभङ्गपचितं पुष्पद्रुमूलाहतं क्वाथेन सन्दीपनं रतिफलाख्यं स्वादु शीतं मधु इति मदिरार्णवे] ॥५॥

मन्दाकिन्या इति। यत्र अलकायाम् अमरप्रार्थिताः सुन्दर्यः इत्यर्थः कन्याः यक्षकुमार्यः [कन्या कुमारिकानार्योरिति विश्वः]। मन्दाकिन्याः गङ्गायाः सलिलेन शिशिरैः शीतलैः मरुद्भिः सेव्यमानाः सत्यः तथा अनुतटं तटेषु रोहन्तीति अनुतटरुहः [क्विप्] तेषां मन्दाराणां

नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥७॥

छायया अनातपेन वारितोष्णाः शमितातपाः सत्यः जन- कस्य सिकतासु मुष्टिभिः निक्षेपेण गूढैः संवृतैः अत एव अन्वेष्टव्यैः मृगैः मणिभिः रत्नैः संक्रीडन्ते गुप्तमणिसं- ज्ञया दैशिकक्रीड़या सस्यक् क्रीड़न्ति इत्यर्थः । [क्रीड़ो- ऽनुसम्परिभ्यश्चेत्यात्मनेपदम् । रत्नादिभिर्वालुकादौ गुप्ते- र्द्रष्टव्यकर्मभिः । कुमारीभिः कृता क्रीड़ा नाम्ना गुप्तमणिः स्मृता । रामक्रीड़ा गूढमणिर्गुप्तकेलिस्तुलायनम् । पिण्ड- कन्दुकदण्डाद्यैः स्मृता दैशिककेलय इति शब्दार्णवे] ।६।

नीवीति । यत्र अलकायाम् अनिभृतकरेषु चपल- हस्तेषु प्रियेषु नीवी वसनग्रन्थिः [नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवाससीति विश्वः] । नीवी एव बन्धः नीवीबन्धः [चूतहस्तवदपौनरुक्त्यम्] । तस्य उच्छ्वसितेन त्रुटितेन शिथिलं क्षौमं दुकूलं रागात् आक्षिपत्सु आहरत्सु सत्सु ह्रीमूढानां लज्जाविधुराणां बिम्बं बिम्बिकाफलम् । [बिम्बं फलं बिम्बिकायाः प्रतिबिम्बे च मण्डले इति विश्वः] । बिम्बम् इव अधरो यासां तासां बिम्बाधराणां स्त्रीविशे- षाणाम् [विशेषाः कामिनी कान्ता भीरुबिम्बाधराङ्गनेति शब्दार्णवे] । चूर्णस्य कुङ्कुमादेः मुष्टिः अर्चिभिः मयूखैः तुङ्गान् अर्चिर्मयूखशिखयोरिति विश्वः । रत्नानि एव

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी-
रालेख्यानां स्वजलकणिकादोषमुत्पाद्य सद्यः ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालै-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥८॥

प्रदीपान् अभिमुखं यथा तथा प्राप्य अपि विफलप्रेरणा दीपनिर्वाणाक्षमत्वात् निष्फला भवति । [अत्राङ्गनानां रत्नप्रदीपनिर्वाणप्रवृत्त्या मौग्ध्यं व्यज्यते] ॥ ७ ॥

नेत्रेति । हे मेघ ! नेत्रा प्रेरकेण सततगतिना सदागतिना वायुना [मातरिश्वा सदागतिरित्यमरः]। यद्विमानाग्रभूमीः यस्याः अलकायाः विमानानां सप्तभूमिकभवनानाम् अग्रभूमीः उपरिभूमिकाः नीताः प्रापिताः त्वाम् इव पश्यन्ति इति तादृशाः त्वत्सदृशाः इत्यर्थः [त्यदादिषु दृशोऽनालोचने कञ् चेति कञ्प्रत्ययः]। जलमुचः मेघाः आलेख्यानां सचित्राणाम् । [चित्रं लिखितरूपाद्यं स्यादालेख्यन्तु यत्नत इति शब्दार्णवे]। स्वस्य जलकणिकाभिः जलकणैः दोषं स्फोटनम् उत्पाद्य सद्यः शङ्कास्पृष्टाः इव सापराधत्वात् भयाविष्टाः इव [शङ्का वितर्कभययोरिति शब्दार्णवे]। धूमोद्गारस्य धूमनिर्गमस्य अनुकृतौ अनुकरणे निपुणाः कुशलाः जर्जराः विशीर्णाः सन्तः जालमार्गैः गवाक्षरन्ध्रैः निष्पतन्ति निष्क्रामन्ति । [यथा केनचित् अन्तःपुरसञ्चारवता दूतेन गूढवृत्त्या रहस्यभूमिं प्रापिताः तत्र स्त्रीणां व्यभिचारदोषमुत्पाद्य सद्यः

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गितानाम्
अङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः॥९॥
अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै-
रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्धम्।

साश्रङ्काः कृतवेशान्तराः नाराः क्षुद्रमार्गैर्निष्क्रामन्ति तद्दर्शित ध्वान्तः। प्रज्वलार्थं शङ्कासृष्टा इवेत्युत्प्रेक्षा)॥८॥

यत्रेति। यत्र अलकायां निशीथे अर्धरात्रे [अर्धः रात्रनिशीथौ द्वावित्यमरः]। त्वत्संरोधस्य मेघावरणस्य अपगमेन विशदैः निर्मलैः चन्द्रपादैः चन्द्रमरीचिभिः [पादा रश्म्यङ्घ्रितुर्यांशा इत्यमरः]। स्फुटजललवस्य-न्दिनः उल्वणाम्बुकणस्राविणः तन्तुजालावलम्बाः वितान-लम्बिसूत्रपुञ्जाधाराः तन्तुगुम्फिताः इत्यर्थः चन्द्रकान्ताः चन्द्रकान्तमणयः प्रियतमानां भुजैः उच्छ्वासितानि श्रान्त्या जलसेकाय वा शिथिलितानि आलिङ्गनानि यासां तासां स्त्रीणां सुरतजनिताम् अङ्गग्लानिम् अवयवानां क्लान्तिं व्यालुम्पन्ति अपनुदन्ति॥९॥

अक्षय्येति। यत्र अलकायां चेतुं शक्याः क्षय्याः [क्षय्यजय्यौ शक्यार्थे इति निपातः, ततो नञ्समासः]। भवनानाम् अन्तः अन्तर्भवनम् [अव्यय विभक्तीत्यादिना अव्ययीभावः]। अक्षय्याः अन्तर्भवने निधयो येषां ते

वैभ्राजाख्यं विबुधवनितावारमुख्यासहायाः
बद्धालापाः बहिरुपवनं कामिनो निर्विशन्ति ॥१०

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम्॥११

तथोक्ताः [यथेच्छभोगसम्भावनार्थमिदं विशेषणं] विबुधवनिताः अप्सरसः ता एव वारमुख्याः वेश्याः ता एव सहायाः येषां ते तथोक्ताः [वारस्त्री गणिका वेश्या रूपाजीवाथ सा जनैः । सत्कृता वारमुख्या स्यादित्यमरः] । बद्धालापाः सम्भावितसंलापाः कामिनः कामुकाः प्रत्यहम् अहनि अहनि [अव्ययं विभक्तीत्यादिना समासः] । रक्ताः मधुराः कण्ठाः कण्ठध्वनिः येषां ते तैः सुन्दरकण्ठध्वनिभिः धनपतियशः कुबेरकीर्त्तिम् उद्गायद्भिः उच्चैर्गायद्भिः देवगानस्य गान्धारग्रामत्वात् तारतरं गायद्भिः इत्यर्थः किन्नरैः सार्द्धं सह विभ्राजस्य इदं वैभ्राजं वैभ्राजम् इति आख्या यस्य तत् वैभ्राजाख्यम् [विभ्राजेन गणेन्द्रेण व्रातं वैभ्राजमाख्ययेति शम्भुरहस्ये] । चैत्ररथस्य नामान्तरमेतत् । बहिरुपवनं बाह्योद्यानं निर्विशन्ति अनुभवन्ति ॥१०॥

गत्युत्कम्पादिति । यत्र अलकायां कामिनीनाम् अभिसारिकाणां निशि भवः नैशः मार्गः सवितुः उदये सति गत्या गमनेन उत्कम्पः चलनं तस्मात् हेतोः अलकेभ्यः पतितैः मन्दारपुष्पैः सुरतरुकुसुमैः तथा पत्राणां पत्र-

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम्।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥१२॥

लतानां छेदैः खण्डैः पतितैः इति शेषः तथा कर्णेभ्यः विभ्रंश्यन्ति इति कर्णविभ्रंशीनि तैः कनकस्य कमलैः [षष्ठ्या विवक्षितार्थलाभे सति मयटा विग्रहे अध्याहारदोषः, एवमन्यत्राप्यनुसन्धेयम्]। तथा मुक्ताजालैः मौक्तिकसरैः शिरोनिहितैः इत्यर्थः तथा स्तनयोः परिसरः प्रदेशः तत्र छिन्नानि सूत्राणि येषां तैः हारैश्च सूच्यते ज्ञाप्यते मार्गपतितमन्दारकुसुमादिलिङ्गैः अयमभिसारिकाणां पन्थाः इत्यनुमीयते इत्यर्थः ॥११॥

मत्वेति। यत्र अलकायां मन्मथः कामः धनपतेः कुबेरस्य सखा धनपतिसखः [राजाहःसखिभ्यष्टच्]। तं देवं महादेवं साक्षात् वसन्तं सखिस्नेहात् निजरूपेण वसन्तं वर्त्तमानं मत्वा ज्ञात्वा भयात् भालेक्षणभयात् षट्पदाः एव ज्या मौर्वी यस्य तं चापं प्रायः प्राचुर्य्येण न वहति न बिभर्त्ति। कथं तर्हि तस्य कार्य्यसिद्धिः अत आह सभ्रूभङ्गेति तस्य मन्मथस्य आरम्भः कामिजनविषयव्यापारः सभ्रूभङ्गं प्रहितानि प्रयुक्तानि नयनानि दृष्टयो येषु तैः तथोक्तैः कामिनः एव लक्ष्याणि तेषु अमोघैः सफलप्रयोगैः इत्यर्थः [मन्मथचापोऽपि क्वचिदपि मोघः स्यादिति भावः] चतुराश्च ताः वनिताश्च तासां विभ्रमैः

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किशलयैर्भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यञ्च यस्याम्
एकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥१३॥
तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं

विलासैः एव सिद्धः निष्फलः । यत् अनर्थकरं पाक्षिकफलञ्च तत्प्रयोगाद् वरं निश्चितसाधनप्रयोगः इति भावः ॥ १२ ॥

[कचधार्य्यं देहधार्य्यं परिधेयं विलेपनम् । चतुर्धा भूषणं प्राहुः स्त्रीणामन्यच्च दैशिकमिति रत्नाकरे] तदेतदाह वास इति । यस्याम् अलकायां चित्रं नानावर्णं वासः वसनं परिधेयमण्डनमेतत् नयनयोः विभ्रमाणाम् आदेशे उपदेशे दक्षम् अनेन विभ्रमद्वारा मधुनो मण्डनत्वम् अनुसन्धेयं तच्च मण्डनादिवत् देहधार्य्येऽन्तर्भाव्यं मधु मद्यं किशलयैः पल्लवैः सह पुष्पोद्भेदम् उभयञ्चेत्यर्थः इदं तु कचधार्य्यं भूषणानां विकल्पान् विशेषान् देहधार्य्यमेतत् तथा चरणकमलयोः न्यासस्य समर्पणस्य योग्यं रज्यते अनेन इति रागः रञ्जकद्रव्यं लाक्षा एव रागः तं लाक्षारागम् इदञ्च अङ्गरागादिविलेपनमण्डनोपलक्षणं सकलं सर्वं चतुर्विधम् अपि इत्यर्थः अबलामण्डनं योषित्प्रसाधनजातम् एकः कल्पवृक्षः एव सूते जनयति नतु नानासाधनसम्पादनप्रयास इत्यर्थः ॥ १३ ॥

इत्थमलकां वर्णयित्वा तत्र स्वभवनस्य अभिज्ञानमाह

दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन।
यस्योपान्ते कृतकतनयः कान्तया वर्द्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥१४॥
वापी चास्मिन् मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः।

तत्रेति। तत्र अलकायां धनपतिगृहान् कुबेरगृहान् उत्तरेण उत्तरस्मिन् अदूरदेशे [एनवन्यतरस्यामदूरेऽपञ्चम्या इत्येनप्प्रत्ययः। एनपा द्वितीयेति द्वितीया] [गृहाः पुंसि च भूम्न्येव इत्यमरः]। अस्माकम् इदम् अस्मदीयम् [वृद्धाच्छ इति छप्रत्ययः]। आगारं गृहं सुरपतिधनुश्चारुणा मणिमयत्वात् अभङ्गुरत्वात् च इन्द्रचापसुन्दरेण तोरणेन बहिर्द्वारेण दूरात् लक्ष्यं दृश्यम् अनेन अभिज्ञानेन दूरत एव ज्ञातुं शक्यम् इत्यर्थः। अभिज्ञानान्तरमाह, यस्य आगारस्य उपान्ते प्राकारान्तःपार्श्वदेशे मे मम कान्तया कृतकतनयः कृत्रिमसुतः पुत्रत्वेन अभिवर्द्धितः पोषितः पुत्रत्वेन मन्यमान इत्यर्थः हस्तप्राप्यैः हस्तावचेयैः स्तवकैः गुच्छैः नमितः [स्याद्गुच्छकस्तु स्तवक इत्यमरः] बालो मन्दारवृक्षः कल्पवृक्षः अस्ति इति शेषः ॥१४॥

इतः पञ्चभिः श्लोकैरभिज्ञानान्तरमाह वापीति। अस्मिन् मदीयागारे मरकतशिलाभिः बद्धः सोपानमार्गः यस्याः सा तथोक्ता, विदूरे भवाः वैदूर्याः [विदूराञ्ञ्य इति ञ्यप्रत्ययः]। वैदूर्याणां विकाराः वैदूर्याणि

यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः
॥१५॥

तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः।
मद्गेहिन्याः प्रिय इति सखे! चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि १६

[विकारार्थे अण्प्रत्ययः]। स्निग्धानि वैदूर्य्याणि नालानि येषां तैः हैमैः सौवर्णैः विकचकमलैः छन्ना वापी च अस्ति इति शेषः, यस्याः वाप्याः तोये कृतवसतयः कृतनिवासाः हंसाः त्वां मेघं प्रेक्ष्य अपि व्यपगतशुचः वर्षाकालेऽपि व्यपगतकलुषजलत्वात् वीतदुःखाः सन्तः सन्निकृष्टं सन्निहितं सुगमम् अपि इत्यर्थः मानसं मानससरः नाध्यास्यन्ति नोत्कण्ठिष्यन्ति। आध्यानमुत्कण्ठास्मरणमिति काशिकायाम् ॥ १५ ॥

तस्या इति। तस्याः वाप्याः तीरे पेशलैः चारुभिः [चारौ दक्षे च पेशल इत्यमरः]। इन्द्रनीलैः रचितशिखरः इन्द्रनीलमणिमयशिखर इत्यर्थः कनककदलीनां वेष्टनेन परिधिना प्रेक्षणीयः दर्शनीयः क्रीड़ाशैलः अस्ति इति शेषः। हे सखे! उपान्तेषु प्रान्तेषु स्फुरिताः तड़ितः यस्य तं तथोक्तम् [इदं विशेषणं कदलीसाम्यार्थम् उक्तम् इन्द्रनीलसाम्यं तु मेघस्य स्वाभाविकम् इत्यनेन सूच्यते] त्वां

रक्ताशोकश्चलकिशलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरवकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥१७

प्रेक्ष्य सहेहिन्याः प्रियः इति हेतोः तस्य शैलस्य मदृगृहिणीप्रियत्वात् हेतोः इत्यर्थः कातरेण भीतेन चेतसा भयच्चात सानन्दमेव। [वस्तूनामनुभूतानां तुल्यश्रवणदर्शनात्। श्रवणात् कीर्त्तनाद्वापि सानन्दा भीर्यथा भवेदिति रसाकरे दर्शनात्]। तम् एव क्रीड़ाशैलम् एव स्मरामि एवकारो विषयान्तरव्यवच्छेदार्थः सदृशवस्त्वनुभावात् इष्टार्थस्मृतिर्जायते इत्यर्थः। [अतएवात्र स्मरणाख्यो अलङ्कारः तदुक्तं सदृशानुभवादन्यस्मृतिः स्मरणमुच्यते इति। निरुक्तकारस्तु त्वां तमेव स्मरामीति योजयित्वा मेघे शैलत्वारोपम् आचष्टे तद् असङ्गतम् अद्राकारारोपस्य पुरोवर्त्तिन्यनुभवात्मकत्वेन स्मरतिशब्दप्रयोगायोगात् शैलत्वभावना स्मृतिरित्यपि नोपपद्यते भावनायाः स्मृतित्वे प्रमाणाभावात् अनुभवायोगात् सादृश्योपन्यासवैयर्थ्याच्च विसदृशेऽपि शालग्रामे हरिभावनादर्शनादिति] ॥ १६ ॥

रक्तेति। अत्र क्रीड़ाशैले कुरवकाः एव वृतिः आवरणं यस्य तस्य मधौ वसन्ते भवाः माधव्यः तासां मण्डपः तस्य अतिमुक्तलतागृहस्य [अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवीलतेत्यमरः]। प्रत्यासन्नौ तन्निकटौ चलकिशलयः चञ्चलपल्लवः [अनेन अंशस्य पादताड़नेष प्राञ्जलित्वं व्यज्यते]

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः।

रक्ताशोकः रक्तविशेषणं तस्य स्मरोद्दीपकत्वात् उक्तम्। [प्रसूनैरशोकस्तु श्वेतो रक्त इति द्विधा। बहुसिद्धिकरः श्वेतो रक्तोऽत्र स्मरवर्द्धन इत्यशोककल्पे दर्शनात्]। कान्तः कमनीयः केसरः वकुलश्च [अथ केसरे वकुल इत्यमरः]। स्त इति शेषः। एकः तयोरन्यतरः प्राथमिकत्वाद् अशोक इत्यर्थः मया सह तव सख्याः स्वप्रियायाश्च इत्यर्थः। वामपादाभिलाषी दोहदच्छद्मनेति अत्रापि सम्बन्धनीयं स च अहं च अभिलषाव इत्यर्थः अन्यः केसरः दोहदं द्रुमादीनां प्रसवकारणं संस्कारद्रव्यम् [तरुगुल्मलतादीनामकाले कुशलैः कृतम्। पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात् तु तत्क्रियेति शब्दार्णवे]। छद्मना व्याजेन [कपटोऽस्त्री व्याजदम्भोपधयश्छद्म कैतवे इत्यमरः]। अस्याः तव सख्याः वदनमदिरां गण्डूषमद्यं काङ्क्षति मया सहेति अत्रापि सम्बन्धनीयम्। [अशोकवकुलयोः स्त्रीपादताडनगण्डूषमदिरे दोहदमिति प्रसिद्धिः। स्त्रीणां स्पर्शात् प्रियङ्गुर्विकसति बकुलः सीधुगण्डूषसेकात् पादाघातादशोकस्तिलककुरवकौ वीक्षणालिङ्गनाभ्याम्। मन्दारो नर्मवाक्यात् पटुमृदुहसनाच्चम्पको वक्त्रवातात् चूतो गीतान्नमेरुर्विकसति च पुरो नर्तनात् कर्णिकारः]॥१८॥

तन्मध्ये इति। किञ्चेति चार्थः तन्मध्ये तयोर्द्वयोर्मध्ये अनतिप्रौढानाम् अनतिकठोराणां वंशानां प्रकाशः

तालैः शिञ्जावलयसुभगैः नर्त्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः
॥१८॥

एभिः साधो! हृदयनिहितैर्लक्षणैर्लक्षयेथाः
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा।

इव प्रकाशो येषां तैः तरुणवेणुसच्छायैः मणिभिः मरकत शिलाभिः मूले बद्धा तलवेदिकेत्यर्थः स्फटिकं स्फटिकमयं फलकं पीठं यस्याः सा काञ्चनस्य विकारः काञ्चनी सौवर्णी वासयष्टिः निवासदण्डः अस्तीति शेषः शिञ्जा भूषणध्वनिः [भूषणानान्तु शिञ्जितमित्यमरः। भिदादित्वादङ्। शिञ्जिधातुरयं तङ्लभ्यादिः न तु दन्त्यादिः]। शिञ्जा-प्रधानानि वलयानि तैः सुभगाः रम्याः तैः तालैः करतल-वादनैः मम कान्तया नर्त्तितः वो युष्माकं सुहृत् सखा नीलकण्ठः मयूरः [मयूरो वर्हिणो वर्ही नीलकण्ठो भुज-ङ्गभुगित्यमरः]। दिवसविगमे सायंकाले यां यष्टिकाम् अध्यास्ते यस्याम् आस्ते इत्यर्थः [अधिशीङ्स्थासां कर्मेति कर्मत्वात् द्वितीया] तत्रागारमित्यारभ्य पञ्चसु श्लोकेषु समृद्धवस्तुवर्णनादुदात्तालङ्कारः। तदुक्तं, तदुदात्तं भवेद् यत समृद्धं वस्तु वर्ण्यते इति। न चैषा स्वभावोक्तिर्भाविकं वा तत्र यथास्थितवस्तुवर्णनात् अत्र तु कविप्रतिभोत्थापित-सम्भाव्यमानैश्वर्य्यशालिवस्तुवर्णनाद् आरोपितविषयत्वमिति ताभ्यामस्य भेद इत्यलङ्कारसर्वस्वकारः] ॥१८॥

एभिरिति। हे साधो! निपुण! [साधुः समर्थो निपुणो

क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्य्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्
॥१९॥

गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्त्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥२०॥

वेति काशिकायाम्] । हृदयनिहितैः अविस्मृतैरित्यर्थः एभिः पूर्वोक्तैः लक्षणैः तोरणादिभिरभिज्ञानैः द्वारोपान्ते एकवचनमविवक्षितं द्वारपार्श्वयोरित्यर्थः लिखिते वपुषी आकृती ययोः तौ तथोक्तौ शङ्खपद्मौ नाम निधिविशेषौ [निधिर्ना शेवधिर्भेदाः पद्मशङ्खादयो निधेरित्यमरः] । दृष्ट्वा च नूनं सत्यम् अधुना इदानीम् [अधुनेति निपातः] । मद्वियोगेन मम प्रवासेन क्षामच्छायम् उत्सवोपरमात् क्षीणकान्ति भवनं मद्गृहं लक्षयेथाः निश्चिनुयाः तथाहि सूर्य्यापाते सति कमलं पद्मं स्वाम् आत्मीयाम् अभिख्यां शोभाम् [अभिख्या नामशोभयोरित्यमरः] । न पुष्यति न उपचिनोति खलु सूर्य्यविरहितं पद्ममिव पतिविरहितं गृहं न शोभते इत्यर्थः ॥१९॥

निजगृहनिश्चयानन्तरकृत्यमाह, गत्वेति । हे मेघ! शीघ्रसम्पात एव हेतुः तस्य शीघ्रप्रवेशार्थमित्यर्थः [षष्ठी हेतुप्रयोगे इति षष्ठी । सम्पातः पतने वेगे प्रवेशे वेदसं-

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी ।
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः

विटे इति शब्दार्णवे]। सद्यः सपदि कलभस्य करिपोतस्य तनुरिव तनुर्यस्य तस्य भावः ताम् अल्पशरीरतां मत्वा प्राप्य प्रथमकथिते तस्यास्तीरे इत्यादिना पूर्वोद्दिष्टे रम्यसानौ निषदनयोग्ये इत्यर्थः क्रीड़ाशैले निषण्णः उपविष्टः सन् अल्पाल्पा अल्पप्रकारा भाः प्रकाशो यस्याः ताम् [प्रकारे गुणवचनस्येति द्विरुक्तिः]। खद्योतानाम् आली तस्या विलसितेन स्फुरितेन निभां समानां विद्युदुन्मेषः विद्युत्प्रकाशः स एव दृष्टिः तां भवनस्यान्तः अन्तर्भवनं तत्र पतितां प्रविष्टां कर्त्तुम् अर्हसि यथा कश्चित् किञ्चिदन्विष्यन् क्वचिदुन्नते स्थित्वा शनैः शनैरतितरां द्राघीयसीं दृष्टिम् इष्टदेशे पातयति तद्वदित्यर्थः ॥२०॥

सम्प्रति दृष्टिपातं कृतवतोऽस्याभिज्ञानं श्लोकद्वयेनाह, तन्वीति । तन्वी कृशाङ्गी न तु पीवरी [स्वच्छं दभ्रं कृशं तनु इत्यमरः। वोतो गुणवचनादिति ङीष्]। श्यामा युवतिः [श्यामा यौवनमध्यस्था इत्युत्पलमालायाम्]। शिखरं शिखराणि एषां सन्तीति शिखरिणः कोटिमन्तः [शिखरं शैलवृक्षाग्रकक्षापुलककोटिष्विति विश्वः]। शिखरिणः दशनाः दन्ताः यस्याः सा एतेनास्या भाग्यवत्त्वं प्रत्यग्रपुष्कलत्वञ्च सूच्यते [तदुक्तं सामुद्रिके स्निग्धाः समानरूपाः सुपङ्क्तयः शिखिनः श्लिष्टाः। दन्ता भवन्ति यासां तासां पादे जगत् सर्वम्। ताम्बूलरसरक्तोऽपि स्फुटभासः समोदयाः।

श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां।
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः २१

यस्याः शिखरिणो दन्ता दीर्घं जीवति तत्पतिरिति]। पक्वं परिणतं बिम्बं बिम्बिकाफलमिव अधरोष्ठो यस्याः सा पक्वबिम्बाधरोष्ठी [शाकपार्थिवादित्वान्मध्यपदलोपी समास इति वामनः। नासिकोदरोष्ठेत्यादिना ङीष्]। मध्ये क्षामा कृशोदरीत्यर्थः चकितहरिण्याः प्रेक्षणानीव प्रेक्षणानि दृष्टयो यस्याः सा तथोक्ता एतेनास्याः पद्मिनीत्वं व्यज्यते [तदुक्तं रतिरहस्ये पद्मिनीलक्षणप्रस्तावे चकितमृगदृगाभे प्रान्तरक्ते च नेत्रे इति]। निम्ननाभिः गम्भीरनाभिः अनेन नारीणां नाभिगाम्भीर्य्यान्मदनातिरेक इति कामसूत्रार्थः सूच्यते। श्रोणीभारात् अलसगमना मन्दगामिनी न तु जघनदोषात् स्तनाभ्यां स्तोकनम्रा ईषदवनता न तु वपुर्दोषात् युवतय एव विषयः तस्मिन् युवतिविषये युवतीरधिकृत्येत्यर्थः धातुः ब्रह्मणः आद्या सृष्टिः प्रथमशिल्पमिव स्थिता इत्युत्प्रेक्षा प्रथमनिर्मिता युवतिरियमेवेत्यर्थः प्रायेण शिल्पिनां प्रथमनिर्माणे प्रयत्नातिशयवशात् शिल्पनिर्माणसौष्ठवं दृश्यते इत्याद्यविशेषणं तथाच अस्मिन् प्रपञ्चे न कुत्रापि एवंविधरामणीयकं रमणीरत्नमस्तीति भावः तदेवम्भूता या स्त्री तत्रान्तर्भवने स्यात् तत्र निवसेदित्यर्थः ताम् इत्युत्तरश्लोकेन सम्बन्धः॥२१॥

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।
गाढ़ोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम्॥२२॥

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियायाः

तामिति। सहचरे सहचारिणि अनेन वियोगासहिष्णुत्वं व्यज्यते मयि दूरीभूते दूरस्थिते सति सहचरे चक्रवाके दूरीभूते सति चक्रवाकीं चक्रवाकवधूमिव [जातेरस्त्रीविषयादयोपधादिति ङीष्]। परिमितकथां मितभाषिणीम् एकाम् एकाकिनीं स्थितां ताम् अन्तर्भवनगतां मे द्वितीयं जीवितं जानीथाः जीविततुल्यां मत्प्रेयसीमवगच्छेरित्यर्थः तन्वीत्यादि पूर्वलक्षणैरिति शेषः। लक्षणानामन्यथाभावप्रसमाशङ्क्याह गाढ़ोत्कण्ठामिति गाढ़ोत्कण्ठां प्रबलविरहवेदनाम् [रागे त्वलब्धविषये वेदना महती तु या। संशोषणी तु गात्राणां तामुत्कण्ठां विदुर्बुधा इत्यभिधानात्]। बालां गुरुषु विरहमहत्सु एषु वर्त्तमानेषु दिवसेषु गच्छत्सु सत्सु शिशिरेण शिशिरकालेन मथितां पद्मिनीं वा पद्मिनीमिव [इव वद्वा यथाशब्दाविति दण्डी]। अन्यरूपां पूर्वविपरीताकारां जातां मन्ये हिमहतपद्मिनीव विरहेण अन्यादृशी जातेति तर्कयामीत्यर्थः। एतावता नेयमन्येति भ्रमितव्यमिति भावः॥२२॥

नूनमिति। प्रबलरुदितेन उच्छूने स्फुटितपुटे नेत्रे

निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वाद्
इन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति ॥२३
आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।

यस्य तत् [उच्छूनेति श्वयतेः कर्त्तरि क्तः आदितश्चेति निष्ठानत्वं वचिस्वपीत्यादिना सम्प्रसारणं सम्प्रसारणाच्चेति पूर्वरूपत्वं हल इति दीर्घः । च्छ्वोः शूडनुनासिके चेति ऊडादेशे कृते रूपसिद्धिरिति वर्त्तमानसामीप्यप्रक्रिया ग्रामादिकीत्युत्प्रेक्षा तथा सति धातोरिकारस्य गत्वभावात् ऊडादेशे छ्वोरन्यत्वेन विशेषणाच्चेति]। एतेन विषादो व्यज्यते निःश्वासानाम् अशिशिरतया अन्तस्तापोष्णत्वेन भिन्नवर्णः विच्छायः अधरोष्ठो यस्य तत् हस्ते न्यस्तं हस्तन्यस्तम् एतेन चिन्ता व्यज्यते लम्बालकत्वात् संस्काराभावाल्लम्बमानकुन्तलत्वात् असकलव्यक्ति असम्पूर्णाभिव्यक्ति तस्याः प्रियायाः मुखं त्वदनुसरणेन त्वदुपरोधेन क्लिष्टकान्तेः क्षीणकान्तेः इन्दोः दैन्यं शोच्यतां बिभर्त्ति नूनमिति वितर्के [नूनं तर्केऽर्थनिश्चये इत्यमरः] । पूर्ववत् तथापि न भ्रमितव्यमिति भावः ॥ २३ ॥

सर्वविरहिणीसाधारणानि लक्षणानि सम्भावयता तत्र ध्यायतीत्याह आलोके इत्यादिभिस्त्रिभिः । हे मेघ ! सा मत्प्रिया बलिषु नित्येषु प्रोषितागमनार्थेषु च देव-

पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्त्तुः स्मरसि रसिके! त्वं हि तस्य प्रियेति
॥२४॥

ताराधनेषु व्याकुला व्यापृता वा विरहेण तनु कृशं भाव-गम्यं तत्कार्श्यस्य अदृष्टचरत्वात् सम्प्रति सम्भावनयोत्-प्रेक्ष्यमित्यर्थः मत्सादृश्यं मदाकारसाम्यं मत्प्रतिकृति-मित्यर्थः [यद्यपि सादृश्यं नाम प्रसिद्धवस्त्वन्तरगतमाका-रसाम्यं तथापि प्रतिकृतित्वेन विवक्षितम् इतरथा लेख्य-त्वासम्भवात् अन्यत्कोशे आलेख्ये च सादृश्यमित्यभिधा-नाच्च]। लिखन्ती क्वचित् फलकादौ विन्यस्यन्तीति वा चित्रदर्शनस्य विरहिणीविनोदोपायत्वादिति भावः एतच्च कामशास्त्रसंवादेन सम्यक् विवेचितमस्माभी रघुवंश-सञ्जीवन्यां सादृश्यप्रतिकृतिदर्शनैः प्रियाया इत्यत्र। मधु-रवचनां मञ्जुभाषिणीम् अतएव पञ्जरस्थां हिंस्रेभ्यः कृत-संरक्षणामित्यर्थः सारिकां स्त्रीपक्षिविशेषं हे रसिके! भर्त्तुः स्वामिनः स्मरसि किम् [कच्चित् कामप्रवेदने इत्य-मरः]। भर्त्तारं स्मरसि किमित्यर्थः [अधीगर्थदयेशां कर्मणीति कर्मणि षष्ठी]। स्मरणे कारणमाह हि यस्मात् कारणात् त्वं तस्य भर्त्तुः प्रीणातीति प्रिया० [इगुपधज्ञा-प्रीकिर इति कप्रत्ययः]। अतः प्रेमास्पदत्वात् स्मर्त्तुमर्ह-सीति भावः इत्येवं पृच्छन्ती वा वाशब्दो विकल्पे [उप-मायां विकल्पे वेत्यमरः], ते तव आलोके दृष्टिपथे पुरा निपतति सद्यो निपतिष्यतीत्यर्थः। [स्यात् प्रबन्धे पुरा-

उत्सङ्गे वा मलिनवसने सौम्य ! निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्
भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती॥२५॥

तीति निकटागामिके पुरेत्यमरः। यावत्पुरानिपातयोर्लडिति लट्]॥ २४॥

उत्सङ्गे इति। हे सौम्य ! साधो ! मलिनवसने [प्रोषिते मलिना कार्येति शास्त्रादित्यर्थः]। उत्सङ्गे क्रोडे वीणां निक्षिप्य मम गोत्रं नाम अङ्कः चिह्नं यस्मिन् तत् मद्गोत्राङ्कं मन्नामाङ्कं यथा तथा [गोत्रन्तु नाम्नि चेत्यमरः] विरचितानि पदानि यस्य तत् तथोक्तं गेयं गानार्हं प्रबन्धादि गीतमिति पाठे स एवार्थः उद्गातुम् उच्चैर्गातुं कामो यस्याः सा [तुम् काममनसोरिति मकारलोपः]। देवयोनित्वात् गान्धारग्रामं गातुकामेत्यर्थः [तदुक्तं षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः। न तु गान्धारनामानं स लभ्यो देवयोनिभिरिति]। तथा नयनसलिलैः प्रियतमस्मृतिजन्मितैः अश्रुभिः आर्द्रां तन्त्रीं कथञ्चित् कृच्छ्रेण सारयित्वा आर्द्रत्वापहरणाय करेण प्रमृज्य अन्यथा क्वणनासम्भवादिति भावः भूयोभूयः पुनः पुनः स्वयम् आत्मना कृतामपि विस्मरणानर्हामपीत्यर्थः मूर्च्छनां स्वरारोहावरोहक्रमम् [स्वराणां स्थापनाः स्थाप्ताः मूर्च्छनाः सप्त सप्त हीति सङ्गीतरत्नाकरे]। विस्मरन्ती वा आलोके ते निपततीति पूर्वेणान्वयः।

शेषान्मासान् विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।
मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः॥२६॥

विस्मरणं चात्र दयितगुणस्मृतिजनितमूर्च्छावशादेव [तथाच रसरत्नाकरे वियोगायोगयोरिष्टगुणानां कीर्त्तनात् स्मृतिः। साक्षात्कारोऽथवा मूर्च्छा दशधा जायते तथा]। मत्-सादृश्यमित्यादिना मनःसङ्गानुवृत्तिः सूचिता ॥ २५ ॥

शेषानिति। अथवा विरहस्य दिवसः तस्मात् स्थापि-तस्य तत आरभ्य निश्चितस्य अवधेः अन्तस्य शेषान् गता-वशिष्टान् मासान् देहलीदत्तपुष्पैः देहली द्वारस्याधारदारु [गृहावग्रहणी देहलीत्यमरः]। तत्र दत्तानि राशित्वेन निहितानि यानि पुष्पाणि तैर्गणनया एको द्वावित्यादि-संख्यानेन भुवि भूतले विन्यस्यन्ती वा पुष्पविन्यासैर्मासान् गणयन्ती वा इत्यर्थः। यद्वा हृदये निहितः मनसि सङ्क-ल्पितः आरम्भः उपक्रमो यस्य तम् अथवा हृदयनिहिताः आरम्भाः चुम्बनादयो व्यापारा यस्मिन् तं मत्सङ्गं मत्-सम्भोगरतिम् आस्वादयन्ती वा आलोके ते निपतति इति पूर्वेण सम्बन्धः। ननु कथमयं निश्चयम् इत्याशङ्कामर्थान्तर-न्यासेन परिहरति, प्रायेण बाहुल्येन अङ्गनानां रमण-विरहेषु एते पूर्वोक्ता विनोदाः कालयापनोपायाः। एतेन सङ्कल्पावस्था उक्ता। तदुक्तं सङ्कल्पो नाथविषयो मनोरथ उदाहृत इति ॥ २६ ॥

सव्यापारामहनि न तथा पीड़येन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते।
मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः ॥२७

आधिक्षामां विरहशयने सन्निषस्सैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः।

सव्यापारामिति। हे सखे! अहनि दिवसे सव्यापारां पूर्वोक्तबलिचित्रलेखनादिव्यापारवतीं ते सखीं स्वप्रियां मद्वियोगः मद्विरहः तथा तेन प्रकारेण [प्रकारवचने थाल् इति थाल्प्रत्ययः]। न पीड़येत् यथा रात्राविति शेषः किन्तु रात्रौ निर्विनोदां निर्व्यापारां तां सखीं गुरुतरा शुक् यस्याः तां गुरुतरशुचम् अतिदुर्भरदुःखां शङ्के तर्कयामि [शङ्का वितर्कभययोरिति शब्दार्णवे]। अतो निशीथे अर्द्धरात्रे उन्निद्राम् उत्सृष्टनिद्राम् अवनिरेव शयनं शय्या यस्याः तां नियमार्थं स्थण्डिलशायिनीं साध्वीं पतिव्रताम्। [साध्वी पतिव्रतेत्यमरः] अतो नान्यथा शङ्कितव्यमिति भावः त्वत्सखीं तां मत्सन्देशैः मद्वार्त्ताभिः अलं पर्य्याप्तं सुखयितुमानन्दयितुं सौधवातायनस्थः सन् पश्य। [सखा धात्री च पितरौ मित्रदूतशुकादयः। सुखयन्तीष्टकथनसुखोपायैर्वियोगिनीमिति रत्नाकरे]। दूतयायं मेव इति भावः। अनेन जागरावस्था उक्ता ॥ २७ ॥

पुनस्तामेव विशिनष्टि आधिक्षामामित्यादिभिश्चतुर्भिः। आधिना मनोव्यथया क्षामां कृशाम्। [पुंस्याधिर्मानसी

नीता रात्रिः क्षण इव मया सार्द्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥ २८ ॥
पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान्
पूर्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव ।
चक्षुः खेदात् सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥ २९ ॥

व्यथेत्यमरः। क्षायतेः कर्त्तरि क्तः। क्षायो म इति निष्ठा-तकारस्य मकारः]। विरहे शयनं तस्मिन् विरहशयने पल्लवादिरचिते इत्यर्थः सन्निषसम् एकं पार्श्वं यस्याः ताम् अत एव प्राच्याः पूर्वस्याः दिशो मूले उदयगिरिप्रान्ते इत्यर्थः प्राचीग्रहणं क्षीणावस्थाद्योतनार्थं मूलग्रहणं दृश्यतार्थम् कलामात्रं कला एव शेषो यस्याः तां हिमांशोः तनुं मूर्त्तिमिव स्थितां तथा या रात्रिः मया सार्द्धम् इच्छया कृतानि रतानि तैः [शाकपार्थिवादित्वान्मध्य-पदलोपी समासः]। क्षण इव नीता यापिता तां तज्जा-तीयाम् एव रात्रिं विरहेण महतीं महत्त्वेन प्रतीय-तीयाम् एव रात्रिं ... उष्णैः अश्रुभिः यापयन्तीम्। [यातेर्ण्यन्ता-नाम्। ... अर्त्तिह्रीत्यादिना पुगागमः]। स एव क्षणप्रत्ययः। ... कालः सुखिनामल्पः प्रतीयते दुःखिनान्तु विपरीत इति भावः। एतेन कार्श्यावस्था उक्ता ॥ २८ ॥

पादानिति। जालमार्गप्रविष्टान् गवाक्षविवरंगतान् अमृतशिशिरान् इन्दोः पादान् रश्मीन् पूर्वप्रीत्या पूर्व-स्नेहेन पूर्ववद् आनन्दकरा भविष्यन्तीति बुद्ध्येति भावः

निःश्वासेनाधरकिशलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम्।
मत्सम्भोगः कथमुपनयेत् स्वप्नजोऽपीति निद्राम्
आकाङ्क्षन्तीं नयनसलिलोत्पीड़रुद्धावकाशाम्॥३०

अभिमुखं यथा तथा गतं तथैव संनिवृत्तं यथा गतं तथैव प्रतिनिवृत्तं तदा तेषामतीव दुःसहत्वादिति भावः चक्षुः दृष्टिं खेदात् सलिलगुरुभिः अश्रुदुर्भरैः पक्ष्मभिः छादयन्तीम् अतएव साभ्रे दुर्दिने अह्नि दिवसे न प्रबुद्धां मेघावरणादविकसितां न सुप्ताम् [उभयत्रापि नञर्थस्य सुप्सुपेति समासः]; स्थलकमलिनीमिव स्थिताम्। एतेन विषयद्वेषाख्या षष्ठी दशा सूचिता॥२९॥

निःश्वासेनेति। शुद्धस्नानात् तैलादिरहितस्नानात् परुषं कठिनस्पर्शं नूनम् आगण्डलम्बम् [सुप्सुपेति समासः]। अलकं चूर्णकुन्तलान् [जातावेकवचनम्]। अधरकिशलयं क्लेशयति क्लिश्नातीति वा तेन तथोक्तेन उष्णेनेत्यर्थः; [क्लिश्यतेर्ण्यन्तात् क्लिश्नातेरण्यन्ताद्वा ताच्छील्ये णिनिः]। निःश्वासेन विक्षिपन्तीं चालयन्तीं तथा स्वप्नजोऽपि स्वप्नावस्थाजन्योऽपि साक्षात्सम्भोगासम्भवादिति भावः मत्सम्भोगः कथं केनापि प्रकारेण उपनयेत् आगच्छेत् इति आशयेतेति शेषः [इति नैवोक्तार्थत्वादप्रयोगः प्रयोगे चार्पौनरुक्त्यमित्यालङ्कारिकाः। प्रार्थनायां लिङ्]। नयनसलिलोत्पीड़ेन अश्रुप्रवृत्त्या रुद्धावकाशाम् आक्रान्त-

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम्।
स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं
गण्डाभोगात् कठिनविषमामेकवेणीं करेण॥३१

सा सन्न्यस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम्।

स्वानां दुर्लभामित्यर्थः निद्राम् आकाङ्क्षन्तीं स्वप्नहेतुत्वादिति भावः। अत्राश्रुविसर्जनेन लज्जात्यागो व्यज्यते॥३०॥

आद्य इति। आद्ये विरहदिवसे दाम मालां हित्वा त्यक्त्वा या शिखा बद्धा ग्रथितां शापस्यान्ते विगलितशुचा वीतशोकेन मया उद्वेष्टनीयां मोचनीयां स्पर्शक्लिष्टां स्पर्शे सति शूलवेशेषु सव्यथामित्यर्थः कठिना च सा विषमा निम्नोन्नता च ताम् [खञ्जकुब्जादिवदन्यतरस्य प्राधान्यविवक्षया विशेषणं विशेष्येण बहुलमिति समासः]। एकवेणीम् एकीभूतवेणीम् [पूर्वकालेत्यादिना तत्पुरुषः]। तां शिखाम् अयमिता अकर्त्तितोपान्ता नखा यस्य तेन करेण गण्डाभोगात् कपोलविस्तारात् असकृत् मुहुर्मुहुः सारयन्तीम् अपसारयन्तीं तां पश्येति पूर्वेण सम्बन्धः। असकृत् सारणात् चित्तविभ्रमदशा सूचिता॥३१॥

सेति। अबला दुर्बला सन्न्यस्ताभरणं न्यस्तत्वान् परित्यक्ताभरणम् असकृत् अनेकशः दुःखदुःखेन दुःखप्रकारेण [प्रकारे गुणवचनस्येति द्विर्भावः]। शय्योत्सङ्गे निहितं पेशलं मृदुलं गात्रं शरीरं धारयन्ती वहन्ती मनेनात्मना-

त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥३२

अनया मूर्च्छावस्था सूच्यते। सा त्वत्सखी त्वामपि नवजल-मयं नवाम्बुरूपम् अस्रं बाष्पम् अवश्यं सर्वथा मोचयिष्यति [द्विकर्मकत्वम्]। तथाहि प्रायः प्रायेण आर्द्रान्तरात्मा मृदुहृदयः मेघस्तु द्रवान्तःशरीरः सर्वः करुणा करुणामयी वृत्तिः अन्तःकरणवृत्तिर्यस्य सः करुणावृत्तिर्भवति। अस्मिन्नवसरे सर्वथा शीघ्रं त्वया गन्तव्यम् अनन्तरदशापरिहारायेति सन्दर्भाभिप्रायः।

ननु किमिदमादिमां चक्षुःप्रीतिमुपेक्ष्य अवस्थान्तराण्येव तत्रभवान् कविराहृतवान्? उच्यते, सम्भोगो विप्रलम्भश्च द्विधा शृङ्गार उच्यते। संयुक्तयोस्तु सम्भोगो विप्रलम्भो वियुक्तयोः। पूर्वानुरागमानाख्यप्रवासकरुणात्मना। विप्रलम्भश्चतुर्धात्र प्रवासस्तत्र च त्रिधा। कार्यतः सम्भ्रमाच्छापादस्मिन् काव्ये तु शापजः। प्रागसङ्गतयोर्यूनोः सति पूर्वानुरञ्जने। चक्षुःप्रीत्यादयोऽवस्था दश स्युस्तत्क्रमो यथा। दृङ्मनःसङ्गसङ्कल्पा जागरः कृशतारतिः। ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश। पूर्वसङ्गतयोरेव प्रवास इति कीरणात्। न तत्रापूर्ववत् चक्षुःप्रीतिरुत्पत्तिमर्हति। दृक्सङ्गस्य तु सिद्धस्याप्यविच्छेदोऽत्र वर्ण्यते। अनन्यापूर्ववद्वाच्या इति तावद्व्यवस्थितेः। वैयर्थ्यादादिमां हित्वा वैरस्यादन्तिमां तथा। दृक्सङ्गादिरिहाचष्ट कविरष्टाविति स्थितिः। मल्लाहस्तं लिखन्तीति पद्येऽस्मिन्

जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा-
दित्थम्भूतां प्रथमविरहे तामहं तर्कयामि।
वाचालं मां न खलु सुभगम्मन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत्॥३२॥

प्रतिपादिता। चक्षुःप्रीतिरिति प्रोक्तं निवृत्तरक्तताननम्। चक्षुःप्रीतिर्भवेच्चित्रेष्वदृष्टचरदर्शनात्। यथा मालविकारूपमग्निमित्रस्य पश्यतः। प्रोषितानान्तु भर्तॄणां वा दृष्टादृष्टपूर्वता। अथ तत्रापि सन्देहे स्वकलत्राणि पृच्छतु। किं मत्प्रत्यभिज्ञा स्यात् किं वैदेशिकभावना। प्रवासादागते स्वस्मिन्नित्यलं कलहैर्वृथा॥ ३२॥

ननु ईदृशीं दशामापन्नेति कथं त्वया निश्चितम् अत आह जाने इति। हे मेघ! तव सख्याः मनः मयि सम्भृतस्नेहं सञ्चितानुरागं जाने अस्मात् स्नेहज्ञानकारणात् प्रथमविरहे प्रथमग्रहणं दुःखातिशयद्योतनार्थम् त्वत्सखीम् इत्थम्भूतां पूर्वोक्तावस्थाम् आपन्नां तर्कयामि ननु सुभगमानिनामेष स्वभावो यदात्मनि स्त्रीणामनुरागप्रकटनं तत्राह वाचालमिति। सुभगम् आत्मानं मन्यते इति सुभगम्मन्यः [आत्ममाने खश् चेति खश्प्रत्ययः। अरुर्द्विषदित्यादिना मुमागमः]। तस्य भावः सुभगम्मन्यभावः सुभगमानित्वं मां वाचालं बहुभाषिणं न करोति खलु सौन्दर्याभिमानात् न प्रलपामीत्यर्थः। [स्याज्जल्पकस्तु वाचालो वाचाटो बहुगर्ह्यवागित्यमरः। आलजाटचं बहुभाषिणीत्यालच्प्रत्ययः]। किन्तु हे भ्रातः! मयोक्तं यदाविद्यामामित्यादि तत्

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥३४॥
वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-

निखिलं सर्वम् अचिरात् शीघ्रमेव ते तव प्रत्यक्षं भविष्यतीति शेषः ॥ ३३ ॥

रुद्धेति । अलकैः रुद्धाः अपाङ्गयोः प्रसराः यस्य तत् तथोक्तम्, अञ्जनेन स्नेहः स्नैग्ध्यं ते शून्यम् अपि च किञ्च मधुनः मद्यस्य प्रत्यादेशात् निराकरणात् परित्यागादित्यर्थः [प्रत्यादेशो निराकृतिरित्यमरः] । विस्मृतः भ्रूविलासः भ्रूभङ्गी येन तत् तथोक्तं नयनस्य रुद्धापाङ्गप्रसरत्वादिकं विरहसमुत्पन्नमिति भावः । त्वयि आसन्ने सति स्वकुशलवार्त्ताशंसिनीति शेषः । उपरि ऊर्द्ध्वभागे स्पन्दते स्फुरति इति उपरिस्पन्दि [तथाच निमित्तनिदाने, स्पन्दात् मूर्ध्नि क्षवलाभं भाले पट्टं शुभं भुवि । इष्टप्राप्तिं दृशोरूर्द्ध्वमपाङ्गे हानिमादिशेदिति] । मृगाक्ष्याः त्वत्सख्याः नयनं वाममिति शेषः [वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिणः । दाने देवादिपूजायां स्पन्देऽलङ्करणेऽपि चेति स्त्रीणां वामभागप्राशस्त्यात्] । मीनक्षोभात् मीनचलनात् चलस्य कुवलयस्य श्रियां शोभया तुलां सादृश्यम् एष्यतीति तर्कयामि ॥ २४ ॥

वाम इति । मदीयैः कररुहपदैः नखपदैः [पुनर्भवः

मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
सम्भोगान्ते मम समुचितो हस्तसंवाहनानाम्
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥ ३५ ॥
तस्मिन् काले जलद ! यदि सा लब्धनिद्रासुखा स्याद्
अन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।

करुहो नखोऽस्त्री नखरोऽस्त्रियामित्यमरः]। मुच्यमानः परिक्रियमाणः नखाङ्करहित इत्यर्थः [ऊर्वोर्नखपदासम्भवस्तु रतिरहस्ये, कण्ठकुचकक्षपार्श्वभुजोरःश्रोणिसक्थिषु नखास्पदमाहुरिति]। चिरपरिचितं चिराभ्यस्तं मुक्ताजालं मौक्तिकसरमयं कटिभूषणं दैवगत्या दैववशेन त्याजितः सम्प्रति नखपदोषाभावेन शीतोपचारस्य तस्य वैयर्थ्यादिति भावः [त्यजतेर्ण्यन्तात् कर्मणि क्तः । द्विकर्मसु पचादीनां चोपसंख्यानमिष्यते इति पचादित्वात् द्विकर्मकत्वम्]। सम्भोगान्ते मम हस्तसंवाहनानां हस्तेन मर्दनानाम् । [संवाहनं मर्दनं स्यादित्यमरः]। समुचितः योग्यः सरसः यः परिपक्वो न शुष्कश्च स एव विवर्तितः तत्रैव पाण्डिमसम्भवात् स चासौ कदलीस्तम्भश्च स इव गौरः पाण्डुरः [गौरः शरीरे सिद्धार्थे शुक्ले पीतेऽरुणेऽपि चेति मालतीमालायाम्]। अस्याः प्रियायाः वामः ऊरुः चलत्वं स्पन्दनं यास्यति प्राप्स्यति [ऊरोः स्पन्दाद्रतिं विद्यादूर्वोः प्राप्तिं सुवाससः इति निमित्तनिदाने] ॥ ३५ ॥

तस्मिन्निति । हे जलद ! तस्मिन् काले त्वदुपसर्पणकाले सा मत्प्रिया लब्धं निद्रासुखं यया तादृशी स्यात्

मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्
सद्यः कण्ठच्युतभुजलताग्रन्थि गाढ़ोपगूढ़म्॥ ३६॥
तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।

यदि स्यात् चेत् एनां निद्राणाम् अन्वास्य पश्चादासित्वे-त्यर्थः [उपसर्गवशात् सकर्मकत्वम्]। स्तनितविमुखः गर्जितपराङ्मुखः निःशब्दः सन् अन्यथा निद्राभङ्गः स्यादिति भावः याममात्रं प्रहरमात्रम् [द्वौ यामप्रहरौ समावित्यमरः]। सहस्व प्रतीक्षस्व [प्रार्थनायां लोट्]। शक्तयोरेकवारसुरतस्य यामावधिकत्वात् स्वप्नेऽपि भवितव्यम् इत्यभिप्रायः [तथा च रतिसर्वस्वे, एकवारावधिर्यामो रतस्य परमो मतः। चक्षुःशक्तिमतोर्यूनोरुत्कटक्रमवर्त्तिनो-रिति]। यामसहनस्य प्रयोजनमाह मा भूदिति। अस्याः प्रियायाः प्रणयिनि प्रेयसि मयि कथञ्चित् कष्टेण स्वप्न-लब्धे सति गाढ़ोपगूढ़ं गाढ़ालिङ्गनम् [नपुंसके भावे क्तः]। सद्यः तत्क्षणं कण्ठात् च्युतः स्रस्तः भुजलतयोः ग्रन्थिः बन्धो यस्य तत् मा भूत् मास्तु कथञ्चिल्लब्धस्य विघातो मा भूदित्यर्थः। न चात्र निद्रोक्तिस्तास्तुन्निद्रामिति पूर्वो-क्तेन निद्राच्छेदेन विरुध्यते पुनः सप्तम्याद्यवस्थासु पाक्षि-कनिद्रासम्भवात्। तथा च रसरत्नाकरे, अशक्ती रोदनं निद्रा निर्लज्जानष्टवाग् भ्रमः। सप्तमादिषु जायन्ते दशाभेदेषु वासुके इति ॥ ३६ ॥

तामिति। तां प्रियां स्वस्य जलकणिकाभिः जलबिन्दुभिः

विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥३७॥
भर्त्तुर्मित्रं प्रियमविधवे ! विद्धि मामम्बुवाहं

शीतलेन शनिलेन उत्थाप्य प्रबोध्य [एतेन तस्याः प्रभुत्वात् व्यजनानिलसमाधिर्व्यज्यते। यथाह भोजराजः, मृदुभिर्मर्द्दनैः पादे शीतलैर्व्यजनैस्तनौ। श्रुतौ च मधुरैर्गीतैर्निद्रातो बोधयेत् प्रभुम् इति]। अभिनवैः नूतनैः मालतीनां जालकैः समं जातीकुड्मलैः सह [सुमना मालती जातिरिति, साकं सत्रा समं सहेति, चारकौ जालकं क्लीवे कलिका कोरकः पुमानिति च अमरः]। प्रत्याश्वस्तां शिशिरानिलसम्पर्कात् पुनरुज्जीवितामित्यर्थः [श्वसेः कर्त्तरि क्तः। आदितश्चेति चकारादिट्प्रतिषेधः। एतेनास्याः सौकुमार्य्यं गम्यते]। त्वत्सनाथे त्वत्सहिते [सनाथं प्रभुमित्याहुः सहिते चित्ततापिनीति शब्दार्णवे]। गवाक्षे स्तिमितनयनां कासौ इति विस्मयनिश्चलनेत्रां मानिनीं मनस्विनीम् अनौचित्यासहिष्णुमित्यर्थः विद्युत् गर्भः अन्तःस्था यस्य स विद्युद्गर्भः अन्तर्लीनविद्युत्क इत्यर्थः [गर्भोऽपवरकेऽन्तःस्थे कुक्षिस्थे चार्भके मत इति शब्दार्णवे]। [न द्योति- दृष्टिप्रतिघातेन वक्तृमुखावलोकनप्रतिबन्धकत्वात् न द्योतितव्यमिति भावः, धीरः दृढः सन् अन्यथा स्खलनचादिक्लेनानाश्वासनप्रसङ्गादिति भावः, स्तनितान्येव वचनानि तैः वक्तुं प्रक्रमेथाः उपक्रमस्व [विध्यर्थे लिङ्। शोपाभ्यां समर्थाभ्यामित्यात्मनेपदम्] ॥ ३७ ॥

तत्सन्देशैर्हृदयनिहितैरागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि
॥३८॥

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैव ।

सम्प्रति दूतस्य श्रोतृजनाभिमुखीकरणचातुरीमुपदिशति भर्तुरिति । विधवा गतभर्तृका न भवतीति अविधवे! सभर्तृके! [अनेन भर्तृजीवनसूचनात् अनिष्टागमशङ्कां वारयति] मां भर्तुः तव पत्युः प्रियं मित्रं प्रियसुहृदं तत्रापि हृदयनिहितैः मनसि स्थापितैः तत्सन्देशैः तस्य भर्तुः सन्देशैः त्वत्समीपम् आगतं भर्तृसन्देशकथनार्थमागतमित्यर्थः अम्बुवाहं मेघं विद्धि जानीहि । न केवलमहं वार्त्ताहरः किन्तु घटकोऽपीत्याशयेनाह, यः अम्बुवाहः अबलानां स्त्रीणां वेणयः तासां मोक्षे मोचने उत्सुकानि पथि श्राम्यतां श्रान्तिमापन्नानां प्रोषितानां प्रवासिनां पान्थानाम् इत्यर्थः वृन्दानि सङ्घान् मन्द्रस्निग्धैः गम्भीरमधुरैः ध्वनिभिः गर्जितैः करणैः त्वरयति । पान्थोपकारिणो मे भिषु वैक्ल्यं सुहृदुपकारित्वमिति भावः ॥३८॥

भर्तृसन्देशश्रवणोत्कण्ठायाः फलमाह इतीति । इति एवम् आख्याते सति पवनतनयं हनुमन्तं मैथिली सीतेव सा त्वां उन्मुखी उत्कण्ठा पौत्सुक्येन उच्छ्वसितहृदया विकसितहृदया सती त्वां वीक्ष्य सम्भाव्य सत्कृत्य च

श्रोष्यत्यस्मात् परमवहिता सौम्य ! सीमन्तिनीनां
कान्तोदन्तः सुहृदुपगतः सङ्गमात् किञ्चिदूनः ॥३९॥
तामायुष्मन् ! मम च वचनादात्मनश्चोपकर्त्तुं
ब्रूया एवं तव सहचरो रामगिर्य्याश्रमस्थः ।
अव्यापन्नः कुशलमबले ! पृच्छति त्वां वियुक्तः
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥४०॥

अस्मात् भर्तृमैत्रीज्ञापनात् परं सर्वं श्रोतव्यम् अवहिता अप्रमत्ता सती श्रोष्यत्येव। [अत्र सीताहनुमदुपगानात् तद्-अस्याः पातिव्रत्यं मेघस्य दूतगुणसम्पत्तिश्च व्यज्यते। तदु-क्तम् रत्नाकरे, ब्रह्मचारी बली धीरो मायावी मानवर्ज्जितः। धीमानुदारो निःशङ्को वक्ता दूतः स्त्रियां भवेदिति]। ननु वार्त्तामात्रश्रवणात् अस्याः को लाभ इत्याशङ्क्य अर्थान्तरं न्यस्यति, हे सौम्य ! साधो ! सीमन्तिनीनां वधूनाम् [नारी सीमन्तिनी वधूरित्यमरः]। सुहृदा सुहृन्मुखेन उपगतः प्राप्तः [सुहृत्पदं विप्रलम्भशङ्कानिवारणार्थम्] कान्तस्य वार्त्ता कान्तोदन्तः [वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादित्यमरः]। सङ्गमात् कान्तसम्पर्कात् किञ्चिदूनः ईषदूनः तद्वद् एव आनन्दकारीत्यर्थः ॥३९॥

सम्प्रति सन्दिशति तामिति। हे आयुष्मन् ! [प्रशं-सायां मतुप्]। परोपकारश्लाघ्यजीवित ! इत्यर्थः मम वचनं प्रार्थनावचनं तस्मात्‌ च आत्मनः स्वस्य उपकर्त्तुं च परोपकारेण आत्मानं कृतार्थयितुमित्यर्थः [उपकारक्रियां प्रति कर्मत्वेऽपि तस्यानुपकरोत्यादिवत् सम्बन्धमात्रविव-

अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं
सास्रेणास्रद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती
सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥ ४१

आयामात्मन इति षष्ठी न विरुध्यते । यथाह, भारविः सा लक्ष्मीरुपकुरुते यया परेषामिति । तथा श्रीहर्षश्च, साधूनामुपकर्त्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम् । न कुतूहलिकस्य मनश्चरितं च महात्मनां श्रोतुमिति । तथा च क्वचित् द्वितीयादर्शनात् सर्वत्र तथेति नाथवचनमनाथवचनमेव] । तां प्रियाम् एवं ब्रूयाः । किमिति, हे अबले ! तव सहचरः भर्त्ता रामगिरेः चित्रकूटस्य आश्रमेषु तिष्ठतीति रामगिर्य्याश्रमस्थः सन् अव्यापन्नः न मृतः वियुक्तः वियोगं प्राप्तः दुःखी एवंविधः सन् त्वां कुशलं पृच्छति [दुह्यादित्वात् पृच्छतेर्द्विकर्मकत्वम्] । तथाहि सुलभविपदाम् अयत्नसिद्धविपत्तीनां प्राणिनाम् एतदेव कुशलमेव पूर्व्वाभाष्यं प्रथममवश्यं वक्तव्यम् । [कृत्याश्चेत्यावश्यकार्थे ण्यत्प्रत्ययः] ॥ ४० ॥

अङ्गेनेति । किञ्च दूरवर्त्ती दूरस्थः न च आगन्तुं शक्यते इत्याह, वैरिणा विरोधिना विधिना दैवेन रुद्धमार्गः प्रतिबद्धवर्त्मा स ते सहचरः तनुना कृशेन गाढतप्तेन सास्रेण साश्रुणा उत्कण्ठा वेदना अस्य जाता उत्कण्ठितः तेन उत्कण्ठितेन [तदस्य सञ्जातम् इत्यादिना इतच्प्रत्ययः । उत्कण्ठतेर्वा कर्त्तरि क्तः] । समधिकतरम् अतिप्रबलम् उच्छ्वसितीति समधिकतरोच्छ्वासि तेन दीर्घनिःश्वासिनि-

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्टस्
त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥४२॥

व्यर्थः [ताम्रोष्ठे पिनिः] अङ्गेन शरीरेण प्रतनु क्षामं तप्तं वियोगदुःखेन सुप्तम् अस्रद्रुतम् अश्रुप्लावितम् [अस्रु नेत्राम्बु रोदनञ्चास्रमस्रु चेत्यमरः]। अविरतोत्कण्ठम् अविच्छिन्नवेदनम् उष्णोच्छ्वासं तीव्रनिःश्वासम् [तीव्रं तीक्ष्णं खरं तीव्रं चण्डमुग्रं पटु स्यात्तीक्ष्णमिति हलायुधः]। अङ्गं त्वदीयं शरीरं तैः स्वसंवेद्यैः सङ्कल्पैः मनोरथैः विशति एकीभवतीत्यर्थः। [अत्र समानुरागित्वद्योतनाय नायकेन नायिकावा[illegible] स्वसमानावस्थत्वमुक्तम् ॥ ४१ ॥

सम्प्रति स्वावस्थानिवेदनाय सखीति शब्दाख्येयमिति। हे अबले! यः ते प्रियः सखीनां पुरस्तात् अपि आननस्पर्शलोभात् त्वन्मुखस्पर्श[illegible] लोभात् आग्रहात् अधरपानलोभादित्यर्थः शब्दाख्येयम् [illegible] उच्चैः वाच्यम् अपि [illegible] यत् तत् [illegible] कर्णे कथयितुं लोलः चपलः अभूत् [illegible] लोलुपे लोलुभो लोलो लालसो लम्पटोऽपि चेति [illegible]]। श्रवणविषयं कर्णपथम् अतिक्रान्तः [illegible] तथा लोचनाभ्याम् अदृष्टः अतिदूरत्वात् द्रष्टुं श्रोतुं च [illegible] स ते प्रियः त्वाम् उत्कण्ठया विरचितानि पदानि [illegible] शब्दाः [illegible] यस्य तत् तथोक्तम् [पदं [illegible] च [illegible] चेति [illegible]]। इदं वक्ष्यमाणं

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन् क्वचिदपि न ते चण्डि ! सादृश्यमस्ति
॥४३॥

श्यामास्वङ्गमित्यादिकं मन्मुखेन आह मदवधानेन स एव ब्रूते इत्यर्थः ॥ ४२ ॥

[सदृशप्रतिकृतिस्वप्नदर्शनतदङ्गस्पृष्टस्पर्शाश्चत्वारो विरहिणां विनोदोपायाः। तथाचोक्तं पताकायां, वियोगी प्रियजनसदृशानुभवनं ततश्चित्रं कर्म स्वप्नसमये दर्शनमपि। तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमपि प्रतीकारो-ऽनङ्गव्यथितमनसां कोऽपि गदित इति]। तत्र सदृशवस्तुदर्शनमाह श्यामास्विति। श्यामासु प्रियङ्गुलतासु [श्यामा तु महिलाह्वया। लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फलीत्यमरः]। अङ्गं शरीरम् उत्पश्यामि सौकुमार्यादिसाम्यात् अङ्गमिति तर्कयामीत्यर्थः तथा चकितहरिणीनां प्रेक्षणे दृष्टिपातं शशिनि चन्द्रे वक्त्रच्छायां मुखकान्ति तथा शिखिनां बर्हिणां बर्हभारेषु बर्हसमूहेषु केशान् प्रतनुषु स्वल्पासु नदीनां वीचिषु [अत्र वीचीनां विशेषणोपादाने न अनुक्तगुणग्रहदोषः भ्रूसाम्यनिर्वाहाय अस्वत्वदोषनिराकरणार्थत्वात् तस्य। तदुक्तं रसरत्नाकरे, स्वन्युत्यादि गुणोत्कर्षं भावोक्ती दोषवारणे। विशेषणाद् विशेषस्य नास्त्यनुक्तगुणग्रह इति। गुणो विशेषणम्]

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्
आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥४४॥

भ्रूविलासान् [भ्रूपताका इति पाठे भ्रुवः पताका इवेत्युपमितिसमासः । उत्पश्यामीति सर्वत्र सम्बध्यते] तथापि नास्ति मनोनिर्वृतिरित्याशयेनाह हन्तेति । हन्त विषादे [हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोरित्यमरः] । हे चण्डि ! कोपने ! [चण्डस्त्वत्यन्तकोपन इत्यमरः । गौरादित्वात् ङीष्] । उपमानकथनमात्रेण न कोपितव्यमिति भावः, क्वचिदपि एकस्मिन्नपि वस्तुनि ते तव सादृश्यं नास्ति अतो न निर्वृणोमीत्यर्थः । [अनेन अस्य सौन्दर्यमनुपमम् इति व्यज्यते] ॥ ४३ ॥

सम्प्रति प्रतिकृतिदर्शनमाह त्वामिति । हे प्रिये ! प्रणयेन प्रेमातिशयेन कुपितां कुपितावस्थायुक्तां त्वां त्वत्प्रतिकृतिमित्यर्थः धातवः गैरिकादयः [धातुर्वातादिशब्दादिगैरिकादिष्वजादिष्विति यादवः] । त एव रागाः रञ्जकद्रव्याणि [चित्रादिरञ्जकद्रव्ये लाक्षादौ प्रणयेच्छयोः । सारङ्गादौ च रागः स्यादारक्ते रञ्जने पुमानिति शब्दार्णवे] । तैः धातुरागैः शिलायां शिलापट्टे आलिख्य निर्माय आत्मानं मां मत्प्रतिकृतिमित्यर्थः ते तव चित्रगतायाः इत्यर्थः चरणपतितं कर्तुं तथा लिखितुं यावत् इच्छामि तावत् इच्छासमकालं मुहुः उपचितैः प्रवृद्धैः

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥४५॥

अस्रैः अश्रुभिः कर्तृभिः [अस्रमश्रुणि शोणिते इति विश्वः]। मे दृष्टिः आलुप्यते आव्रियते इत्यर्थः। ततः दृष्टिप्रतिबन्धात् लेख्यं प्रतिबध्यते इति भावः, क्रूरः घातुकः [नृशंसो घातुकः क्रूर इत्यमरः]। कृतान्तः दैवम्। [कृतान्तो यमसिद्धान्तदैवाकुशलकर्मस्वित्यमरः]। तस्मिन् अपि चित्रेऽपि नौ आवयोः [युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावाविति नावादेशः] सङ्गमं सहवासं न सहते। सङ्गमलेखनमप्यावयोरसहमानं दैवमावयोः साक्षात् सङ्गमं न सहते इति किमु वक्तव्यम् अपिशब्दार्थः ॥ ४४ ॥

अधुना स्वप्नदर्शनमाह मामिति। सुप्तस्य विज्ञानं स्वप्नः [स्वप्नः सुप्तस्य विज्ञानमिति विश्वः]। सन्दर्शनं संवित् [दर्शनं समये शास्त्रे दृष्टौ स्वप्नेऽक्षि संविदीति शब्दार्णवे]। स्वप्ना इति सन्दर्शनानि स्वप्नदर्शनानि [भूतहत्यादिवत् सामान्यविशेषभावेन सम्बन्धः] तेषु मया कथमपि महता प्रयत्नेन लब्धायाः उपलब्धायाः दृष्टायाः इति यावत् ते तव निर्दयाश्लेषः गाढालिङ्गनं स एव हेतुः तस्य निर्दयाश्लेषहेतोः निर्दयाश्लेषार्थमित्यर्थः [षष्ठी हेतुप्रयोगे इति षष्ठी]। आकाशे निरालम्बे प्रणिहितभुजं प्रसारितबाहुं

भित्त्वा सद्यः किशलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः।
आलिङ्ग्यन्ते गुणवति! मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥४६॥

मां पश्यन्तीनां स्थलीदेवतानां मुक्ताः मौक्तिकानि इव स्थूलाः अश्रुलेशाः वाष्पविन्दवः तरुकिशलयेषु अनेन वेलास्थलेन अश्रुधारणसमाधिर्ध्वंस्यते बहुशो न पतन्तीति न किन्तु पतन्त्येव इत्यर्थः। [निश्चये नञ्द्वयप्रयोगः। तथाचालङ्कारिकसूत्रं स्मृतिनिश्चयसिद्धार्थेषु नञ्द्वयप्रयोग इति। महामहाजगुरुदेवानामश्रुपातः क्षितौ यदि। देशभ्रंशो महादुःखं मरणञ्च ध्रुवमिति क्षितौ देवताश्रुपातनिषेधदर्शनात् यक्षस्य मरणाभावसूचनार्थं तरुकिशलयेषु पतन्तीत्युक्तम्] ॥ ४५ ॥

इदानीं तदङ्गस्पृष्टवस्तुस्पर्शनमाह भित्त्वेति। देवदारुद्रुमाणां किशलयपुटान् पल्लवपुटान् सद्यः भित्त्वा ये तत्क्षीरस्रुतिसुरभयः तेषां देवदारुद्रुमाणां क्षीरस्रुतिभिः क्षीरनिष्यन्दैः सुरभयः सुगन्धयः तुषाराद्रिवातत्वे लिङ्गमिदं ये वाताः दक्षिणेन दक्षिणमार्गेण [तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानात् तृतीया समेन यातीतिवत् तत्रापि करणत्वस्य प्रतीयमानत्वात् कर्तृकरणयोरेव तृतीयेति सौमीत्यभाष्यकारः]। प्रवृत्ताः चलिताः, हे गुणवति। सौशील्यसौकुमार्यादिगुणसम्पन्ने! ते तुषाराद्रिवाताः पूर्वं प्राक् एभिः वातैः तव अङ्गं स्पृष्टं भवेत् यदि किलेति सम्भावित-

संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने ! दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥४७

नन्वात्मानं बहु विगणयन् आत्मनैवावलम्बे
तत्कल्याणि ! त्वमपि सुतरां मा गमः कातरत्वम् ।

मेतदिति बुद्धेरित्यर्थः [वार्त्तासम्भाव्ययोः किलेत्यमरः]। मया आलिङ्ग्यन्ते आश्लिष्यन्ते । [अत्र वायूनां सूक्ष्मत्वेऽपि अमूर्त्तत्वेन आलिङ्गनायोगात् आलिङ्ग्यन्ते इत्यभिधानं यक्षस्य -उन्मत्तत्वात् गलपितमित्यदोषः इति वदन् नितान्तकारः स्वयमेव उन्मत्तप्रलापीत्युपेक्षणीयः] ॥ ४६ ॥

संक्षिप्येतेति । दीर्घाः यामाः प्रहराः यस्यां सा दीर्घयामा विरहवेदनया तथा प्रतीयमानेत्यर्थः त्रियामा रात्रिः [आद्यन्तयोरर्धयामयोर्दिनव्यवहारात् त्रियामेति क्षीरस्वामी]। क्षण इव कथं केन प्रकारेण संक्षिप्येत लघूक्रियेत अहः अपि सर्वावस्थासु सर्वकालेषु इत्यर्थः मन्दमन्दो मन्दप्रकारः [प्रकारे गुणवचनस्येति द्विरुक्तिः । कर्मधारयवदुत्तरेष्विति कर्मधारयवद्भावात् सुपो लुक्]। मन्दमन्दातपम् अल्पाल्पसन्तापं कथं स्यात् न स्यादेव, हे चटुलनयने ! चञ्चलाक्षि ! इत्थम् अनेन प्रकारेण दुर्लभप्रार्थनम् अप्राप्यमनोरथं मे मम चेतः गाढोष्माभिः अतितीव्राभिः तद्वियोगव्यथाभिः अशरणम् अनाथं कृतम् ॥ ४७ ॥

न च मदीयदुरवस्थाश्रवणेन भेतव्यमित्याह नन्विति ।

कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥४८॥
शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान् मासान् गमय चतुरो लोचने मीलयित्वा ।

ननु इति आमन्त्रणे [प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननित्यमरः]। ननु प्रिये! बहु विगणयन् शापान्ते सति एवमेवं करिष्यामीति आवर्त्तयन् आत्मानम् आत्मनैव स्वेनैव [प्रकृत्यादिभ्य उपसंख्यानम् इति तृतीया]। अवलम्बे धारयामि यथाकथञ्चित् जीवामि इत्यर्थः, तत् तस्मात् कारणात्, हे कल्याणि! सुभगे! त्वद्योगाशये-नैव जीवामीति भावः [बह्वादिभ्यश्चेति ङीष्]। त्वमपि सुतरामत्यन्तं कातरत्वं भीरुत्वं मा गमः मा गच्छ [गमेर्लि-लुङ्। न माङ्योगे इत्यडागमाभावः]। तादृक्दुःखिनो-रावयोः ईदृशि दुःखे कथं न बिभेमीत्याशङ्क्याह कस्येति। कस्य जनस्य अत्यन्तं नियतं सुखम् उपनतं प्राप्तम् एका-न्ततः नियमेन दुःखं वा उपनतं, किन्तु दशा अवस्था चक्रस्य रथाङ्गस्य नेमिः अन्तः [चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमानित्यमरः]। तस्याः क्रमेण परि-पाट्या [क्रमः शक्तौ परीपाट्यामिति विश्वः]। नीचैः अधः उपरि च गच्छति प्रवर्त्तते लक्ष्मीः सुखदुःखे पर्याय-वर्त्तेते इत्यर्थः ॥४८॥

न च चिरविलसितं दुःखमित्याह शापान्त इति। शार्ङ्गपाणौ शार्ङ्गं नामकं धनुः पाणौ स्थितं यस्य तस्मिन्

पश्चादावां विरहगणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥४९॥

विष्णौ [सप्तम्युपमानेत्यादिना बहुव्रीहिः। प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति वक्तव्यात् पाणिशब्दस्योत्तरनिपातः]। भुजगः शेष एव शयनं तस्मात् उत्थिते सति मे शापान्तः शापावसानं भविष्यतीति शेषः, शेषान् अवशिष्टान् चतुरो मेघदर्शनप्रभृति हरिबोधनदिनान्तमित्यर्थः दशदिवसाधिक्यन्तु न विवक्षितमित्युक्तमेव लोचने मीलयित्वा निमील्य गमय धैर्य्येण अतिवाहय इत्यर्थः, पश्चात् अनन्तरं त्वञ्च अहञ्च आवाम् [त्यदादीनि सर्वैर्नित्यमित्येकशेषः। त्यदादीनां मिथोद्वन्द्वे यत् परं तच्छिष्यते इति अस्मदः शेषः]। विरहे गणितम् एवमेवं करिष्यामीति मनसि आवर्त्तितं तं तम् [वीप्सायां द्विरुक्तिः]। आत्मनोः आवयोः अभिलाषं मनोरथं परिणताः शरच्चन्द्रिकाः यासां तासु क्षपासु रात्रिषु निर्वेक्ष्यावः भोक्ष्यावहे। [विशतेर्लृट्। निर्वेशो भृतिभोगयोरित्यमरः। अत्र केचित् नभोनभस्ययोरेव वार्षिकत्वात् कथमाषाढ़ादिचतुष्टयस्य वार्षिकत्वमुक्तमिति चोदयित्वा ऋतुत्रयपञ्चाध्ययणाद अविरोध इति पर्य्यहारि वल्लवैससङ्गतम्। अत्र गतशेषाश्चत्वारो मासा इत्युक्तं कविना, न तु ते वार्षिका इति तस्मादनुक्तोपालम्भ एव। यच्च नाथेनोक्तं कथमाषाढ़ादिचतुष्टयात् परं शरत्काल इति तत्रापि आकार्त्तिकसमाप्तिः शरत्कालानुवृत्तेः परिणतशरच्चन्द्रिकासु इत्युक्तं न तु तदेव शरत्प्रादुर्भाव इत्यविरोध एव ॥ ४९ ॥

भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव! रमयन् कामपि त्वं मयेति ॥५०
एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनादसितनयने! मय्यविश्वासिनी भूः ।

सम्प्रति तस्या मेघवञ्चकत्वशङ्कानिरासाय अतिगूढमभिज्ञानम् उपदिशति भूय इति। हे अबले! भूयः पुनरपि आह त्वद्भर्ता मन्मुखेनेति शेषः मेघवचनमेतत् किमित्यत आह पुराशब्दश्चिरातीते [स्यात् प्रबन्धे चिरातीते निकटागामिके पुरेत्यमरः]। पुरा पूर्वं शयने मे कण्ठलग्नापि त्वं गले बद्धस्य कथमपि गमनं न सम्भवेदिति भावः निद्रां गत्वा किमपि केन वा निमित्तेन इत्यर्थः सस्वरं सशब्दम् उच्चैरित्यर्थः रुदती सती विप्रबुद्धा आसीरिति शेषः। असकृत् बहुशः पृच्छतः रोदनहेतुमिति शेषः मे मम हे कितव! त्वं कामपि रमयन् मया स्वप्ने दृष्ट इति त्वया सान्तर्हासं समन्दहासं यथा तथा कथितञ्च इति त्वद्भर्ता भूयश्चाहेति योजना॥ ५०॥

एतस्मादिति। एतस्मात् पूर्वोक्तात् अभिज्ञायतेऽनेनेति अभिज्ञानं लक्षणं तस्य दानात् प्रापणात् मां कुशलिनं क्षेमवन्तं विदित्वा ज्ञात्वा हे असितनयने! कुले जनसमूहे भवात् कौलीनात् लोकप्रवादात् एतावता कालेन परासुर्नोचेत् नागच्छतीति जनप्रवादादित्यर्थः

स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगाद्
इष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥५१॥
आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।

[स्यात् कीलोनं लोकवादे युद्धे पक्षिहिर्पाचियामित्यमरः]। मयि विषये अविश्वासिनी मरणशङ्किनी मा भूः न भव [भवतेर्लुङ् न माङ्योगे इत्यडागमप्रतिषेधः]। न च दीर्घकालविप्रकर्षात् पूर्वस्नेहनिवृत्तिः शङ्क्या इत्याह स्नेहानिति। किमपि किंवा निमित्तं न विद्यते इति शेषः स्नेहान् प्रीतीः विरहे सति अन्यो यविप्रकर्षे सति ध्वंसिनः विनश्वरान् आहुः तत् तथा न भवतीति अभिप्रायः किन्तु ते स्नेहा अभोगात् विरहे भोगाभावात् हेतोः [प्रसज्यप्रतिषेधेऽपि नञ्समास इष्यते]। इष्टे वस्तुनि विषये उपचितः रसः स्वादः येषु ते उपचितरसाः सन्तः प्रवृद्धतृष्णा इत्यर्थः [रसो गन्धे रसं स्वादे तिक्तादौ विषरागयोरिति विश्वः]। प्रेमराशीभवन्ति वियोगासहिष्णुत्वमापद्यन्ते इत्यर्थः] स्नेहप्रेमणोरवस्थाभेदाद्भेदः। तदुक्तम्, आलोकनाभिलाषौ रागस्नेहौ ततः प्रेमा। रतिशृङ्गारौ चेति वियोगतो विप्रलम्भश्चेति। तदेव स्फुटीकृतं रसाकरे, प्रेमा दिदृक्षा रम्येषु तच्चिन्ता त्वभिलाषकः। रागस्तत्सङ्गबुद्धिः स्यात् स्नेहस्तत्प्रवणक्रिया। तद्वियोगासहं प्रेम रतिस्तत्सहवर्त्तनम्। शृङ्गारस्तत्समः क्रीडा संयोगः सप्तधा क्रमादिति] ॥ ५१ ॥

इत्थं स्वकुशलं सन्दिश्य तत्कुशलसन्देशमानयनमिदानीं याचते आश्वास्येति। प्रथमविरहेण उदग्रशोकां तीव्र-

साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥५२॥

कच्चित्सौम्य! व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां तर्कयामि।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥५३॥

दुःखितां ते सखीम् एवं पूर्वोक्तरीत्या आश्वास्य उपजीव्य त्रिनयनस्य त्र्यम्बकस्य वृषेण वृषभेण उत्खाताः अवदारिताः कूटाः शिखराणि यस्य तस्मात् [कूटोऽस्त्री शिखरं शृङ्गमित्यमरः]। शैलात् कैलासात् आशु निवृत्तः प्रत्यावृत्तः सन् साभिज्ञानं सलक्षणं यथा तथा प्रहितं प्रेषितं कुशलं येषु तैः तस्याः त्वत्सख्याः वचोभिः ममापि प्रातःकुन्दप्रसवमिव शिथिलं दुर्बलं मम जीवितमपि धारयेथाः स्थापय। [प्रार्थनायां लिङ्] ॥ ५२ ॥

सम्प्रति मेघस्य प्रार्थनाङ्गीकारं प्रश्नपूर्वकं कल्पयति कच्चिदिति। हे सौम्य! साधो! इदं मे बन्धुकृत्यं बन्धुकार्य्यम् [देवदत्तस्य गुरुकुलमितिवत् प्रयोगः]। व्यवसितं कच्चित् करिष्यामीति निश्चितं किम [कच्चित् कामप्रवेदने इत्यमरः। अभिप्रायज्ञापनं कामप्रवेदनम्]। न च ते तूष्णीभावादनङ्गीकारं शङ्के यतस्ते स एव उचित इत्याह प्रत्यादेशात् करिष्यामीति प्रतिवचनात् [उक्तिराभाषणं वाक्यमादेशो वचनं वच इति शब्दार्णवे]। भवतः तव धीरतां गम्भीरत्वं न तर्कयामि न समर्थये खलु। तर्हि कथमङ्गीकारज्ञानं तत्राह, याचितः सन् निःशब्दोऽपि निर्गर्जितोऽपि अप्रतिजानानोऽपीत्यर्थः चातकेभ्यः जलं प्रदिशसि ददासि। युक्तञ्चैतदित्याह, हि यस्मात् सतां सत्पुरुषाणां प्रणयिषु याचकेषु विषये ईप्सितार्थक्रियैव अपेक्षितार्थसम्पा-

एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्तिनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान् देशान् जलद ! विचर प्रावृषा सम्भृतश्री-
र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥५४॥

इति श्रीकालिदासकृतौ मेघदूते काव्ये उत्तरमेघः ।

दनमेव प्रत्युक्तं प्रतिवचनं क्रिया केवलमुत्तरमित्यर्थः, गर्जति शरदि न वर्षति वर्षति वर्षासु निःस्वनो मेघः । नीचो वदति न कुरुते न वदति सुजनः करोत्येव इति भावः ॥ ५३ ॥

सम्प्रति स्वापराधसमाधानपूर्वकं स्वकार्य्यस्य अवश्यकरणं प्रार्थयमानो मेघं विसृजति एतदिति । हे जलद ! सौहार्दात् सुहृद्भावात् वा [हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्युभयपदवृद्धिः] । विधुरः वियुक्तः इति हेतोः मयि विषये अनुक्रोशबुद्ध्या करुणाबुद्ध्या वा अनुचिता तव अननुरूपा या प्रार्थना प्रियां प्रति सन्देशं मे हरेत्येवंरूपा तत्र वर्त्तिनः निर्बन्धपरस्य मे मम एतत् सन्देशहरणरूपं प्रियं कृत्वा सम्पाद्य प्रावृषा वर्षाभिः [स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः इत्यमरः] । सम्भृतश्रीः उपचितशोभः सन् इष्टान् अभिलषितान् देशान् विचर यथेष्टदेशेषु विहर इत्यर्थः [देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणामिति वचनात् कर्मत्वम्] । एवं मद्वत् क्षणमपि स्वल्पकालमपि ते तव विद्युता कलत्रेण इति शेषः विप्रयोगः विरहः मा भूत् मास्तु । [माङिल्याशिषि लुङ् । अन्ते काव्यस्य नित्यत्वात् कुर्यादाशिषमुत्तमाम् । सर्वत्र व्याप्यते विद्वान् नायकेच्छानुरूपिणीमिति सारस्वतालङ्कारे दर्शनात् काव्यान्ते नायकेच्छानुरूपोऽयमाशीर्वादः प्रयुक्त इत्यनुसन्धेयम्] ॥५४॥

इति श्रीमल्लिनाथसूरिविरचितायां मेघसन्देशव्याख्यायां सञ्जीवन्यामुत्तरमेघः ।

५९ पृथ्वीराजरासा सटीक सभाष्य १०
६० सुश्रुत (वैद्यक) ४
६१ शार्ङ्गधर (वैद्यक) १
६२ वेतालपञ्चविंशतिः ॥।
६३ पातञ्जलदर्शन (सभाष्यसटीक) २
६४ आत्मतत्त्वविवेक (बौद्धाधिकार) २॥
६५ मुक्तिकोपनिषत् ।
६६ उपमानचिन्तामणि ।
६७ नागानन्द नाटक ।०
६८ पूर्णप्रज्ञ दर्शनम् सभाष्य ॥।
६९ चन्द्रशेखरचम्पूकाव्य ३
७० साहित्यदर्पणम् (मूलमात्र) ॥।
७१ सामवेदस्य आरण्यसंहिता सायणाचार्य्यकृत भाष्यसहिता १
७२ विद्धशालभञ्जिकानाटिका सटीक १
७३ कारण्डव्यूह (बौद्धशास्त्र) २
७४ कुवलयानन्द अलङ्कार सटीक २
७५ प्रियदर्शिका नाटिका सटीक ॥
७६ सारस्वत व्याकरण सटीक पूर्वार्द्धम् १
७७ वासवदत्ता सटीक १
७८ पुष्पबाणविलास काव्य सटीक ॥
७९ भक्तिशतकम्, पदारविन्दशतकम्, स्तुतिशतकम्, मन्दस्मितशतकम्, कटाक्षशतकम् १
८० मनुसंहिता टीका सहित २
८१ नैषधचरितम् टीका सहित ५
८२ चन्द्रालोक प्राचीन अलङ्कार ।
८३ वीरमित्रोदय (स्मृतिशास्त्र) ५
८४ भावप्रकाश (वैद्यक) ५
८५ प्रबोधचन्द्रोदय नाटक सटीक १
८६ अनर्घराघवनाटक सटीक
८७ दैवतब्राह्मण सभाष्य १
८८ षड्विंशब्राह्मणम् सभाष्य १
८९ मीमांसापरिभाषा ।०
९० अर्थसंग्रह (लौगाक्षिमीमांसा) ।
९१ रघुवंश सटीक १
९२ मेघदूत सटीक ।/
९३ कथासरित्सागर (सम्पूर्ण) ६
९४ ईश्वरानुमानचिन्तामणि ॥
९५ न्यायदर्शन सभाष्य सवृत्ति २॥
९६ सटीक वाल्मीकिरामायण बालकाण्डम् १
९७ साहित्यदर्पण सटीक १॥
९८ मदनपालनिघण्टुः (वैद्यक) ॥
९९ संस्कृतशिक्षामञ्जरीप्रथमभागः /
१०० संस्कृतशिक्षामञ्जरीद्वितीयभागः ।०
१०१ संस्कृतशिक्षामञ्जरीतृतीयभागः ॥
१०२ श्रीहर्षचरित बाणभट्टकृत १
१०३ अमरकोष ॥
१०४ वेदान्तसूत्रं सभाष्य सटीक १०
१०५ वेदान्तपरिभाषा ॥
१०६ वेदान्तसारसटीक ॥
१०७ सटीक निदान (वैद्यक) १॥
१०८ कामन्दकी नीतिसार ॥
१०९ मल्लिकामारुतप्रकरणसटीक २
११० अत्रि, विष्णु, हारीत, याज्ञवल्क्य, उशना, अङ्गिरा, यम, आपस्तम्ब, संवर्त्त, कात्यायन, बृहस्पति, पराशर, व्यास, शङ्ख, लिखित, दक्ष, गौतम, शातातप, वशिष्ठ प्रणीत संहिता (धर्मशास्त्र) १०

...पुराण ६

११२ चरकसंहिता (वैद्यक) सम्पूर्ण ६

११३ रसेन्द्रचिन्तामणि तथा रसरत्नाकर (वैद्यक) ६

११४ भगवद्गीता शाङ्करभाष्य आनन्दगिरिकृतटीका तथा सुबोधिनीसहित ४

११५ मन्त्रमहिमप्रकाशिका ॥।

११६ मालतीमाधव नाटक सटीक ॥०

११७ सटीक भट्टिकाव्य २

११८ सटीक काव्यप्रकाश ४

११९ सभाष्य शाण्डिल्यसूत्रम् ॥०

१२० लघुकौमुदीव्याकरणम् ॥०

१२१ महानाटकम् (हनुमन्नाटकम्) ॥

१२२ दशरूपकम् (अलङ्कार) १

१२३ चम्पूरामायण सटीक १

१२४ (चम्पूरामायणम्) भोजचम्पू ॥

१२५ मार्कण्डेयपुराणम् २

१२६ गोलाध्यायः ॥

१२७ गणिताध्यायः १

१२८ पञ्चदशी (सटीक) १॥

१२९ पातञ्जलदर्शनस्य भोजवृत्तिः १

१३० मल्लिकानाटक सटीक १

१३१ सप्तपदार्थी ॥०

१३२ बृहत्संहिता वा वाराही संहिता २

१३३ तर्कामृत (जगदीशसहित) ।०

१३४ हालि मनुपुस्तिका १

१३५ उत्तररामचरित सटीक १

१३६ मन्त्रविजय ॥०

१३७ लघुस्फटिकप्रकरण सटीक १

१३८ काव्यादर्श सटीक (अलङ्कार) १

१३९ अष्टाङ्गहृदय संहिता

१४० शुक्रनीति सटीक

१४१ गीतगोविन्द सटीक ॥

१४२ अग्निपुराणम्

१४३ विष्णुपुराणम् सटीक

१४४ मीमांसादर्शन सभाष्य

१४५ अध्यात्मरामायणम् सटीक

१४६ महानिर्वाणतन्त्रम् सटीक ४

१४७ मीमांसादर्शनस्य अधिकरणमाला ६

१४८ श्रुतबोधः (छन्दोग्रन्थ) सटीक

१४९ बालरामायणनाटक सटीक २

१५० लिङ्गपुराणम् ५

१५१ चण्डकौशिकनाटक सटीक ॥०

१५२ चैतन्यचन्द्रोदयनाटक सटीक २

१५३ कलापव्याकरणम् २

१५४ कुसुमाञ्जलि सटीक ।०

१५५ संगीतपारिजात १॥०

१५६ सांख्यसार ।०

१५७ नागानन्द नाटक सटीक ॥०

१५८ सटीककाव्यदीपिका अलङ्कार ॥

१५९ ब्रह्मवैवर्त पुराण सम्पूर्ण १०

१६० वैशेषिकदर्शनम् सभाष्य २

१६१ कल्किपुराणम् १

१६२ चाणक्यशतकम् सटीक

कलिकाता संस्कृतविद्यामन्दिरे बि. ए. उपाधिधारिणा । जीवानन्दविद्यासागर भट्टाचार्येण प्रकाशितानि ।

SHRUTA-BODHA

BY

KALIDASA.

With a full Commentary

BY

PANDIT-KULAPATI

JIBANANDA VIDYASAGARA. B. A.

Edited and Published with Additions & Alterations

BY

PANDIT ASHU BODHA VIDYABHUSHANA

AND

PADIT NITYA BODHA VIDYARATNA.

Fifth Edition.

CALCUTTA.

VACHASPATYA PRESS.

1913.

[*Price 1 Anna.*

To be had of :—Pandit-Kulapati Jibānanda Vidyāsāgara B. A

Superintendent, free Sanskrit College Calcutta.

প্রকাশক— { পণ্ডিত শ্রীআশুবোধ বিদ্যাভূষণ
ও
পণ্ডিত শ্রীনিত্যবোধ বিদ্যারত্ন।

প্রাপ্তিস্থান— ২নং রমানাথ মজুমদার ষ্ট্রীট্,
হারিসন রোড পোষ্ট অফিস, কলিকাতা।

श्रुतबोधः ।

महाकवि श्रीकालिदास विरचितः ।

पण्डित-कुलपतिना,

बि, ए, उपाधिधारिणा

श्रीमज्जीवानन्द-विद्यासागर-भट्टाचार्य्येण

विरचितया व्याख्यया समलङ्कृतः ।

तदात्मजाभ्यां

पण्डित-श्रीआशु-बोध-विद्याभूषण-

पण्डित-श्रीनित्य-बोध-विद्यारत्नाभ्यां

परिवर्द्धितटीकया संस्कृत्य प्रकाशितः ।

पञ्चमसंस्करणम् ।

कलिकातानगर्य्याम्

वाचस्पत्ययन्त्रे

मुद्रितः ।

ई १९१२ ।

প্রিন্টর—বি, বি, মুখার্জি।
২ নং রমানাথ মজুমদারের ষ্ট্রীট, কলিকাতা।

श्रुतबोधः ।

—०✽०—

मुखबन्धः ।

छन्दसां लक्षणं येन श्रुतमात्रेण बुध्यते ।
तमहं सम्प्रवक्ष्यामि श्रुतबोधमविस्तरम् ॥ १ ॥
संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसम्मिश्रम् ।
विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन ॥ २ ॥
एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम् ॥ ३ ॥

इह खलु तत्रभवान् महाकविः कालिदासः—“सा विद्या नौस्तितीर्षूणां गम्भीरं काव्यसागरम्” इत्यादिप्राचीनवचनप्रामाण्येन छन्दोज्ञानस्य काव्यशास्त्रमधीयानानाम् एकं मुख्योपायत्वम् अवलोक्य पिङ्गलादिकृतच्छन्दःशास्त्राणां सद्भावेऽपि सुकुमारमतीनां बालानां सहजतः प्रतिपादनाय अनुजिघृक्षुः संक्षेपतः श्रुतबोधं नाम सार्थकनामधेयं छन्दःशास्त्रं विरचयितुं प्रतिजानीते, छन्दसामिति।—येन श्रुतमात्रेण छन्दसां, छन्दांसि नाम नियताक्षरवर्णमात्रादिसन्निवेशवशात् चतुश्चरणबद्धानि पद्यानि, तेषां, लक्षणं बुध्यते ज्ञायते, अहं कालिदासः तम् अविस्तरं संक्षिप्तं श्रुतबोधं नाम छन्दोग्रन्थं सम्प्रवक्ष्यामि ॥ १ ॥

तत्र छन्दः लघुगुरुवर्णानां परिज्ञानमन्तरेण न सम्यक् अवगन्तुं सुकरम् इत्युपोद्घातसङ्गत्या तावेव आदौ निर्वक्ति, संयुक्ताद्यमिति।—संयुक्तस्य वर्णस्य आद्यं पूर्वं ह्रस्वमपीति शेषः, दीर्घं दीर्घत्वेन परिगणनीयं, सानुस्वारम् अनुस्वारान्वितं तथा विसर्गसम्मिश्रं सविसर्गम् अक्षरं लघ्वपीति शेषः, गुरु विज्ञेयं बोध्यम्। पादान्तस्थं श्लोकस्य चतुर्थो भागः पादः, तस्य अन्तस्थं शेषाक्षरं लघु सदपि विकल्पेन गुरु ज्ञेयम्। यत्र गुरुत्वमावश्यकं तत्र तत् गुरु गण्यम्, अन्यथा लघ्वेव स्थितमिति भावः। अत्र “संयुक्ताद्यं दीर्घम्” इति यदुक्तं तत्तु “प्रह्रे वा” इति पिङ्गलमुनेः विकल्पविधायकसूत्रसद्भावात् प्रह्रह्रयोः पूर्वस्य विकल्पेन लघुता बोद्धव्या। तथा च,—“गृहीतप्रत्युद्गमनीयवस्त्रा” इति कुमारः; “झटिति प्रविश गेहम्” इति उद्भटः; “प्राप्य नाभिह्रदमज्जनमाशु” इति माघः। एतेषु लघुता द्रष्टव्या, अन्यथा छन्दोहानिरिति दिक् ॥ २ ॥

जातिवृत्तभेदेन छन्दसः द्वैविध्येऽपि सूचीकटाहन्यायेन पूर्वं जातिं लक्षयितुं तदङ्गभूतां मात्रां प्रदर्शयति, एकमात्र इति।—ह्रस्वः ह्रस्वो वर्णः पूर्वोक्तलक्षणान्वितः एकमात्रः एका मात्रा—“मात्रा तु यावता पाणिः पर्येति जानुमण्डलम्। ताव-

रसज्ञाविरतिस्थानं कविभिर्यतिरुच्यते।
सा विच्छेद-विरामादि-संज्ञाभिरुपदिश्यते ॥ ४ ॥

आर्या (जातिः)।

यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥ ५ ॥

गीत्युपगीती।

आर्यापूर्वार्द्धसमं द्वितीयमपि भवति यत्र हंसगते !।
छन्दोविदस्तदानीं गीतिंताममृतवाणि ! भाषन्ते ॥ ६ ॥

त्कालो भवेन्मात्रा" इत्युक्तलक्षणः कालः मात्रा। तादृशोच्चारणकालः यस्य सः तादृशः भवेत्; ह्रस्वे एका मात्रा तिष्ठति इत्यर्थः। तथा दीर्घो वर्णः द्विमात्रः उच्यते, दीर्घे वर्णे मात्राद्वयं वर्त्तते इत्यर्थः। प्लुतस्तु त्रिमात्रो ज्ञेयः, प्लुते वर्णे तादृशमात्रात्रयम्, इति विभावनीयम्। "दूराह्वाने च गाने च रोदने च प्लुतो मतः" इत्यस्य व्यवहारस्थानम्। व्यञ्जनञ्च स्वरहीनमिति शेषः, अर्द्धमात्रकं तादृशार्द्धमात्राविशिष्टं भवेदिति पूर्वेणान्वयः; तथा च व्यञ्जने ह्रस्वोच्चारणकालस्य अर्द्धसमयमुच्चारयितुमपेक्षते। मात्रापरिगणनेऽपि तत्र अर्द्धमात्रा धर्त्तव्या इति संक्षेपः ॥ ३ ॥

सम्यक्छन्दोलक्षणलक्षितेऽपि काव्ये सति यतिभङ्गे न सहृदयानां श्रुतिसुखम् आवहति, इत्यतः यतिमपि लक्षयति, रसज्ञेति।—रसं जानाति वेत्ति इति रसज्ञा जिह्वा, तस्याः विरतिः विश्रामः तस्य यत् स्थानं तत् कविभिः यतिः इति उच्यते। यत्र हि समागत्य जिह्वा विरमति, तदेव यतिस्थानम् इति। सा यतिः विच्छेदविरामादिसंज्ञाभिरपीति शेषः, उपदिश्यते निरूप्यते इति यावत् ॥ ४ ॥

जातिनामकच्छन्दसाम् अवान्तरभेदभूयस्त्वेऽपि आर्यालक्षणपरिज्ञानेन सकलपरिज्ञानसम्भवात् तामेवादौ लक्षयति, यस्या इति।—यस्याः प्रथमे आद्ये पादे चरणे तथा तृतीयेऽपि पादे द्वादश मात्राः सम्भवन्ति, द्वितीये पादे अष्टादश मात्रा इति शेषः, तथा चतुर्थके पादे पञ्चदश मात्रा इति शेषः, सा आर्या नाम छन्दः। उदाहरणन्तु लक्षणमेव बोध्यम्। एवं सर्वत्र। एतेन आर्यायां सप्तपञ्चाशन्मात्राः सम्भवन्ति इति सूच्यते। वृत्तरत्नाकरादौ प्रथमतः जातेः आर्यागीतिभेदेन द्वैविध्यमुक्तम्; आर्यायाश्च—पथ्या-विपुला-चपला-मुखचपला-जघनचपलाभेदेन पञ्चधा; गीतेश्च,—गीत्युपगीत्युद्गीत्यार्यागीतिभेदेन च चातुर्विध्यम्। अस्याः खलु जातेः प्रथमभेदभिन्नायाः आर्यायाः प्रथमभेदान्तर्गतपथ्यायामन्तर्भाव इत्यवगन्तव्यम्। विपुलादिभेदस्तु प्रायशः प्रयोगविरहादुपेक्षितः ॥ ५ ॥

तत्र जातेः द्वितीयभेदेषु गीतिं लक्षयति, आर्येति।—हे हंसगते !. राजहंसगामिनि ! [कान्तासम्बोधनमिदम्]। यत्र आर्यायाः पूर्वार्द्धेन समं तुल्यं पूर्वार्द्धं यथा

आर्य्योत्तरार्द्धतुल्यं प्रथमार्द्धमपि प्रयुक्तं चेत् ।
कामिनि! तामुपगीतिं प्रतिभाषन्ते महाकवयः ॥७॥

पञ्चाक्षरा वृत्तिः ।

आद्यचतुर्थं पञ्चमकं चेत् ।
यत्र गुरु स्यात् साक्षरपङ्क्तिः ॥ ८ ॥

षडक्षरा वृत्तिः ।

अगुरु चतुष्कं भवति गुरू द्वौ ।
घनकुचयुग्मे ! शशिवदनाऽसौ ॥ ९ ॥

सप्ताक्षरा वृत्तिः ।

तुर्य्यं पञ्चमकं चेद् यत्र स्याल्लघु बाले ! ।
विद्वद्भिर्मृगनेत्रे ! प्रोक्ता सा मदलेखा ॥ १० ॥

अष्टाक्षरा वृत्तिः ।

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुःपादयोः ह्रस्वं सप्तमं दीर्घमन्ययोः ॥ ११ ॥

द्वादश मात्रा अष्टादश मात्राश्च तत्तुल्यम् इत्यर्थः, द्वितीयं परार्द्धमपि भवति, हे अम्बतवाषि ! तदानीं छन्दोविदः छन्दःशास्त्रज्ञाः तां गीतिं भाषन्ते कथयन्ति ॥ ६ ॥

तत्रापि उपगीतिमाह, आर्य्येति ।—हे कामिनि ! प्रथमार्द्धमपि आर्य्याया उत्तरार्द्धेन द्वादशपञ्चदशमात्राघटितेन इति भावः, तुल्यं प्रयुक्तं रचितं चेत्, महाकवयः ताम् उपगीतिं प्रतिभाषन्ते। तथा आर्य्यायाः पूर्वार्द्धपरार्द्धयोः वैपरित्येन वर्णने उद्गीतिः ; गीतेः तृतीयचतुर्थपादयोः प्रत्येकं मात्राद्वयम् अधिकं चेदार्य्यागीतिः बोध्यव्या, इत्यस्या एव प्रपञ्च इत्युपेक्षितः ॥ ७ ॥

छन्दःसु वृत्तानि लक्षयितुं वैचित्र्याभावात् चतुरक्षरपादपर्य्यन्तं विहाय पञ्चाक्षरपादमाह, आद्येति ।—आद्यं, चतुर्थं पञ्चमकञ्च यत्र गुरु स्यात्, द्वितीयतृतीयौ च लघू इति शेषः,सा अक्षरपङ्क्तिर्नाम छन्दः ।—“भ्गौ गिति पङ्क्तिः” इति वृत्त०रत्ना०॥८॥

षडक्षरपादवृत्तमाह, अगुर्विति ।—हे घनकुचयुग्मे ! निविडस्तनयुगले ! यत्र अगुरु लघु- चतुष्कं चत्वारो वर्णा लघव इत्यर्थः भवति, द्वौ वर्णौ गुरू च भवतः, असौ शशिवदना नाम छन्दः ।—“शशिवदना न्यौ” इति वृ० र० ॥ ९ ॥

सप्ताक्षरपादमाह, तुर्य्यमिति ।—हे मृगनेत्रे ! बाले ! यत्र तुर्य्यं चतुर्थं पञ्चमकञ्च लघु स्यात्, अपरे पञ्च वर्णा गुरव इति शेषः, विद्वद्भिः पण्डितैः सा मदलेखा प्रोक्ता कथिता ।—“म्भौ गः स्यान्मदलेखा” इति वृ० र० ॥ १० ॥

अष्टाक्षरपादं [illegible] श्लोकः । श्लोके इति ।—श्लोके श्लोकाख्यवृत्तार-

आदिगतं तुर्य्यगतं पञ्चमकं चान्त्यगतम् ।
स्याद् गुरु चेत् संकथितं माणवकाक्रीड़मिदम् ॥ १२ ॥
द्वितुर्य्यषष्ठमष्टमं गुरु प्रयोजितं यदा ।
तदा निवेदयन्ति तां बुधा नगस्वरूपिणीम् ॥ १३ ॥
सर्वे वर्णा दीर्घा यस्यां विश्रामः स्याद्वेदैर्वेदैः ।
विद्वद्वृन्दैर्वीणावाणि ! व्याख्याता सा विद्युन्माला ॥ १४ ॥

नवाक्षरा वृत्तिः ।

चम्पकमाला यत्र भवेदन्त्यविहीना प्रेमनिधे ! ।
छन्दसि दक्षा ये कवयस्तन्मणिमध्यं ते ब्रुवते ॥ १५ ॥

स्विन्नया अनुष्टुभा रचिते पद्ये इति भावः । यद्यपि अनुष्टुभः भेदान्तर्गतानि अष्टाक्षर-पादानि षट्पञ्चाशदधिकशतद्वयं छन्दांसि, तथापि वक्त्रापरनामादौ अनुष्टुभि तथात्वं बोध्यम् । सर्वत्र षष्ठं गुरु, पञ्चमं लघु ज्ञेयम् । अथवा सर्वत्रेति षष्ठमित्यनेनान्वयि, पञ्चमस्य तु सर्वत्र लघुत्वे व्यभिचारात् । तथा च—"यियक्षमाणे-नाहूतः" इति माघः । "पुनश्च गौरीदिह्ना सा" इति चण्डी । तथा द्विचतुःपादयोः द्वितीयचतुर्थयोः पादयोः सप्तमं ह्रस्वम्, अन्ययोः प्रथमतृतीययोः पादयोः सप्तमं दीर्घं ज्ञेयम् ।—"पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । षष्ठं गुरु विजानीयात् एतत् पद्यस्य लक्षणम् ॥" इति पाठान्तरं क्वचित् । अस्य तु वक्त्रं नाम । लोके च अनुष्टुभ् इति प्रसिद्धम् । यदाह छन्दोमञ्जर्याम्,—"श्लोकेऽनुष्टुभ् इति ख्यातं तस्याष्टाक्षरता मता" इति । अन्यत्र वर्णेषु ह्रस्वदीर्घयोः नियमो नास्ति इति महाकवि-स्वरसोऽत्र परिलक्ष्यते । "शेषेष्वनियमो मतः" इति छन्दोमञ्जर्युक्त्या सह एक-वाक्यत्वात् इति विभावनीयम् ॥ ११ ॥

आदिगतमिति ।—आदिगतं तुर्य्यगतं चतुर्थम् इत्यर्थः, पञ्चमकं तथा अन्त्यगतम् अष्टममित्यर्थः गुरु स्यात् चेत् अपरे चत्वारो वर्णाः लघव इति भावः, इदं माणवकाक्रीड़ं नाम छन्दः संकथितम् ।—"भात् तलगा माणवकम्" इति वृ० र० ॥ १२ ॥

द्वितुर्य्येति ।—यदा द्वितुर्य्यं षष्ठं द्वितीयचतुर्थषष्ठं तथा अष्टमं गुरु प्रयोजितम्, अपरे चत्वारो वर्णा लघव इति भावः, तदा बुधाः तां नगस्वरूपिणीं निवेदयन्ति ।—"प्रमाणिका जरौ लगौ" इति वृ० र० ॥ १३ ॥

सर्वे इति ।—यस्यां सर्वे अष्टावित्यर्थः वर्णाः दीर्घाः, वेदैर्वेदैः चतुर्भिश्चतुर्भिः विश्रामः यतिश्च स्यात्, हे वीणावाणि ! वीणावत् मधुरस्वरे इत्यर्थः, विद्वद्वृन्दैः सा विद्युन्माला व्याख्याता ।—"मो मो गो गो विद्युन्माला" इति वृ० र० ॥ १४ ॥

नवाक्षरपादमाह, चम्पकमालेति ।—यत्र चाम्पकमाला युक्तमाला अन्त्यविहीना

दशाक्षरे वृत्ती।

तन्वि ! गुरु स्यादाद्यचतुर्थं पञ्चमषष्ठं चान्त्यसुपान्त्यम्।
इन्द्रियवाणैर्यत्र विरामः सा कथनीया चम्पकमाला॥ १६॥

मन्दाक्रान्तान्त्ययतिरहिता सालङ्कारे ! यदि भवति या।
सा विद्वद्भिर्ध्रुवमभिहिता ज्ञेया हंसी कमलवदने !॥ १७॥

एकादशाक्षरा वृत्तयः।

ह्रस्वो वर्णो जायते यत्र षष्ठः
कम्बुग्रीवे ! तद्वदेवाष्टमान्त्यः।
विश्रान्तः स्यात्तन्वि ! वेदैस्तुरङ्गैः
तां भाषन्ते शालिनीं छान्दसीयाः॥ १८॥

आद्यचतुर्थमहीननितम्बे ! सप्तमकं दशमञ्च तथान्त्यम्।
यत्र गुरु प्रकटस्मरसारे ! तत् कथितं ननु दोधकवृत्तम्॥ १९॥

दशमहीना भवेत्, हे प्रेमनिधे ! छन्दसि दक्षाः ये कवयः, ते तत् छन्दः मणिमध्यं ब्रुवते कथयन्ति।—"स्यान्मणिमध्यं चेद्भमसाः" इति मञ्जरी॥ १५॥

दशाक्षरपादवृत्तद्वयं लक्षयति, तन्वीति द्वाभ्याम्।—हे तन्वि ! कृशाङ्गि ! आद्यं चतुर्थं पञ्चमं षष्ठम् अन्त्यसुपान्त्यं नवमं दशममिति भावः, यत्र गुरु स्यात्, अपरे चत्वारी वर्णाः लघव इति शेषः, यत्र च इन्द्रियवाणैः पञ्चभिः पञ्चभिः विरामः यतिः स्यात्, सा चम्पकमाला कथनीया।—"रुक्मवती सा यत्र भमस्गाः" इति छन्दोमञ्जरी॥१६॥

मन्दाक्रान्तेति।—हे सालङ्कारे ! अलङ्कारभूषिते ! या मन्दाक्रान्ता अन्त्ययतिरहिता शेषयतिस्थानभूतानि सप्ताक्षराणि गुरुलघुगुरुगुरुलघुगुरुगुरूणि तैः रहिता इत्यर्थः यदि भवति, तदा हे कमलवदने ! विद्वद्भिः सा ध्रुवं हंसी अभिहिता ज्ञेया।—"ज्ञेया हंसी ममनगयुता" इति मञ्जरी। मन्दाक्रान्तालक्षणञ्च चत्वारिंशश्लोके द्रष्टव्यम्॥ १७॥

एकादशाक्षरपादे वृत्तं लक्षयितुमारभते, ह्रस्व इत्यादिना।—हे तन्वि ! यत्र षष्ठो वर्णः ह्रस्वः जायते, हे कम्बुग्रीवे ! शङ्खग्रीवे ! "शङ्खः स्यात् कम्बुरस्त्रियाम्" इत्यमरः। अष्टमान्त्यः अष्टमस्य अन्त्यः नवम इत्यर्थः, तद्वत् ह्रस्व इत्यर्थः, अन्ये नव वर्णा दीर्घा इति भावः, तथा वेदैः चतुर्भिस्तुरङ्गैः सप्तभिश्च विश्रान्तः यतिः, छान्दसीयाः छन्दोविदः तां शालिनीं भाषन्ते कथयन्ति।—"मात् तौ गौ चेच्छालिनी वेदलोकैः" इति मञ्जरी॥ १८॥

आद्येति।—ननु भीः प्रकटः उत्कटः स्मरस्य कामस्य सारः भावः यस्याः तत्सम्बुद्धौ ; हे प्रबलकामे इत्यर्थः। हे अहीननितम्बे ! गुरुनितम्बे ! यत्र आद्यं

यस्यास्त्रिषट्सप्तममक्षरं स्याद्ध्रस्वं सुजङ्घे ! नवमञ्च तद्वत् ।
गत्या विलज्जीकृतहंसकान्ते ! तामिन्द्रवज्रां ब्रुवते कवीन्द्राः ॥२०॥
यदीन्द्रवज्राचरणेषु पूर्वे भवन्ति वर्णा लघवः सुवर्णे ! ।
अमन्दमाद्यन्मदने ! तदानीमुपेन्द्रवज्रा कथिता कवीन्द्रैः ॥२१॥

उपजाती ।

यत्र द्वयोरप्यनयोस्तु पादा भवन्ति सीमन्तिनि ! चन्द्रकान्ते ! ।
विद्वद्भिराद्यैः परिकीर्त्तिता सा प्रयुज्यतामित्युपजातिरेषा ॥२२॥
आख्यानिकी सा प्रकटीकृतार्थे ! यदीन्द्रवज्राचरणः पुरस्तात् ।
उपेन्द्रवज्राचरणास्त्रयोऽन्ये मनीषिणोक्ता विपरीतपूर्वा ॥ २३ ॥

चतुर्थं सप्तमकं दशमं तथा अन्त्यम् एकादशम् इत्यर्थः गुरु, अन्ये षट् वर्णाः लघव इति शेषः, तत् दोधकवृत्तं कथितम् ।—"दोधकवृत्तमिदं भभभाद्गौ" इति वृ० र० ॥१९॥

यस्या इति ।—गत्या गमनेन विलज्जीकृता हंसानां कान्तिः शोभा कान्ता वा यया सा हे तादृशि ! सुजङ्घे सुष्ठुजङ्घाशालिनि ! यस्याः त्रिषट्सप्तमं तृतीयं षष्ठं सप्तमम् इत्यर्थः, तद्वत् नवमञ्च अक्षरं ह्रस्वं स्यात्, अन्ये सप्त वर्णाः लघव इति शेषः, कवीन्द्राः ताम् इन्द्रवज्रां ब्रुवते ।—"स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति वृ० र० ॥ २० ॥

यदीदि ।—यदि इन्द्रवज्रायाः चरणेषु पादेषु पूर्वे आद्या वर्णाः लघवः भवन्ति, तदानीं हे सुवर्णे ! सुरूपे ! अमन्दमाद्यन्मदने ! अत्युन्मदमदने ! कवीन्द्रैः उपेन्द्रवज्रा कथिता ।—"उपेन्द्रवज्रा जतजास्ततो गौ" इति वृ० र० ॥ २१ ॥

प्रसङ्गतः उपजातिं लक्षयति, यत्रेति ।—हे चन्द्रकान्ते ! चन्द्रवन्मनोहरे ! सीमन्तिनि ! यत्र यस्यां वृत्तौ द्वयोरनयोरपि (अपिरत्र भिन्नक्रमे) इन्द्रवज्रोपेन्द्रयोः अपि [अत्र अपि शब्देन अन्यत्र यत्र जात्यादिषु पादाः लक्षणद्वयलक्षिता भवन्ति तत्रापि उपजातिर्नाम सम्भवति इति महाकवेरभिप्रायः सूच्यते। छन्दोमञ्जर्यादावपि तथैवोक्तम्। तथा च—"इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम" इति] पादा भवन्ति, आद्यैर्विद्वद्भिः सा उपजातिरिति परिकीर्त्तिता, एषा वृत्तिरिति शेषः, प्रयुज्यताम् । अनेन उपजातेः सामान्यलक्षणमुक्तम् ॥ २२ ॥

उपजातिसामान्यलक्षणमभिधाय तदवान्तरभेदे वक्तव्ये पिङ्गलाचार्य्यादिभिः आख्यानिकी-विपरीताख्यानिकयोः यादृशं लक्षणं कृतं तद्वैपरीत्येनापि विपरीताख्यानिकाः बहुषु दृष्टचरत्वात् स्वाभिप्रेतं विपरीताख्यानिकीलक्षणमाह, आख्यानिकीति ।—हे प्रकटीकृतार्थे ! प्रकटिताभिप्राये ! यदि पुरस्तात् प्रथमः इन्द्रवज्रायाश्चरणः अन्ये द्वितीयतृतीयचतुर्थाः पादाः उपेन्द्रवज्राचरणाः तदा सा विपरीत इति शब्दः पूर्वो यस्याः तादृशी आख्यानिकी, विपरीताख्यानिकी इत्यर्थः, मनीषिभिः उक्ता । क्वचित् तु

आद्यमक्षरमतस्तृतीयकं सप्तमञ्च नवमं तथाऽन्तिमम्।
दीर्घमिन्दुमुखि! यत्र जायते तां वदन्ति कवयो रथोद्धताम्॥२४॥
अक्षरञ्च नवमं दशमञ्च व्यत्ययाद् भवति यत्र विनीते!।
प्राक्तनैः सुनयने! यदि सैव स्वागतेति कविभिः कथिताऽसौ॥२५॥

द्वादशाक्षरा वृत्तयः।

सतृतीयकषष्ठमनङ्गरते! नवमं विरतिप्रभवं गुरु चेत्।
घनपीनपयोधरभारनते! ननु तोटकवृत्तमिदं कथितम्॥ २६ ॥
यदि तोटकस्य गुरु पञ्चमकं विहितं विलासिनि! तदक्षरकम्।

"आख्यान-लीलाप्रकटीकृतार्थे!......विपरीतपूर्वा" इति पाठान्तरं दृश्यते। तत्र आख्यान-लीलया वाक्चातुरीभङ्ग्या प्रकटीकृतः अर्थोऽभिलाषो यया, तत्सम्बुद्धौ। अन्यत् समानम्। विपरीतपूर्वा नाम छन्दः इति शेषः। वस्तुतस्तु आख्यानिकी, विपरीताख्यानिकी चेति नाम्ना छन्दोद्वयं पैङ्गलादावुक्तत्वात्। तथा च पैङ्गले—"आख्यानिकी तौ ज्गौ ग्, जतौ ज्गौ ग्"३७। "विपरीताख्यानिकी ज्तौ ज्गौ ग्, तौ ज्गौ ग्" ३८। इति। तत्र—"आख्यानिकी वार्त्ताहारिका उच्यते" इति। "एतयोश्च वक्ष्यमाणोपजात्यन्तर्गतत्वेऽपि विशेषसंज्ञार्थम् अर्द्धसमाधिकारे पाठः" इति हलायुधः। प्राचीनास्तु प्रथम-तृतीययोः पादयोः इन्द्रवज्रायां द्वितीयचतुर्थयोः उपेन्द्रवज्रायां सत्याम् आख्यानिकी च्छन्दः। प्रथम-तृतीययोः उपेन्द्रवज्रायां, द्वितीयचतुर्थयोः इन्द्रवज्रायां, सत्यां विपरीताख्यानिकी इति कथयन्ति। इति दिक्॥ २३ ॥

आद्यमिति।—हे इन्दुमुखि! यत्र आद्यम् अतः अस्मात् परं तृतीयकं सप्तमं नवमं तथा अन्तिमञ्च एकादशम् इत्यर्थः, अक्षरं दीर्घं जायते, अन्ये षट् वर्णाः लघव इति शेषः, कवयः तां रथोद्धतां वदन्ति।—"रान्नराविह रथोद्धता लगौ" इति वृ० र०॥२४॥

अक्षरमिति।—हे विनीते! विनयवति! सुनयने! यत्र रथोद्धतायां नवमं दशमञ्च अक्षरं व्यत्ययात् विपर्य्ययात् नवमं लघु दशमञ्च गुर्वित्यर्थः भवति, प्राक्तनैः पूर्वैः कविभिः सैव रथोद्धतैव स्वागता इत्यसौ कथिता।—"स्वागता रनभगैर्गुरुणा च" इति मञ्जरी॥ २५ ॥

द्वादशाक्षरपादवृत्तं लक्षयितुमारभमाणः प्रथमं तोटकमाह, सतृतीयकेति।—ननु हे अनङ्गरते! कामाविष्टे! घनपीनपयोधरभारनते! उतृतीयकं तृतीयसहितं षष्ठं नवमं विरतिप्रभवं विश्रामस्थानं द्वादशम् इत्यर्थः, चेत् गुरु, अन्ये अष्टौ वर्णाः लघव इति शेषः, तदा इदं तोटकवृत्तं कथितम्।—"वद तोटकमब्धिसकारयुतम्" इति मञ्जरी॥ २६॥

रससङ्ख्यकं गुरु न चेदबले ! प्रमिताक्षरेति कविभिः कथिता ॥२७॥
यदाऽऽद्यं चतुर्थं तथा सप्तमं स्यात्तथैवाक्षरं ह्रस्वमेकादशाद्यम् ।
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे ! तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥२८॥
अयि कृशोदरि ! यत्र चतुर्थकं गुरु च सप्तमकं दशमं तथा ।
विरतिगश्च तथैव सुमध्यमे ! द्रुतविलम्बितमित्युपदिश्यते ॥२९॥
प्रथमाक्षरमाद्यतृतीययोर्द्रुतविलम्बितकस्य हि पादयोः ।
यदि नास्ति तदा कमलेक्षणे ! भवति सुन्दरि ! सा हरिणप्लुता ॥३०॥
उपेन्द्रवज्राचरणेषु सन्ति चेदुपान्त्यवर्णा लघवः परे कृताः ।
मदोल्लसद्भ्रूजितकामकार्मुके ! वदन्ति वंशस्थविलं बुधास्तदा ॥३१॥
यस्यामशोकाङ्कुरपाणिपल्लवे ! वंशस्थपादा गुरुपूर्ववर्णकाः ।
तारुण्यहेलारतिरङ्गलालसे ! तामिन्द्रवंशां कवयः प्रचक्षते ॥३२॥

यदीति ।—हे विलासिनि ! अबले ! यदि तोटकस्य पञ्चमकं (स्वार्थे कः) तत् अक्षरकं गुरु विहितं रससङ्ख्यकं षष्ठं चेत् गुरु न भवति, तदा कविभिः प्रमिताक्षरेति कथिता ।—"प्रमिताक्षरा सजससैः कथिता" इति वृ० र० ॥ २७ ॥

यदाद्यमिति ।—हे शरच्चन्द्रविद्वेषिवक्त्रारविन्दे ! मुखकमलजितशरच्चन्द्रे इत्यर्थः, यदा आद्यं चतुर्थं सप्तमं तथा एकादशस्य आद्यं दशममित्यर्थः, अक्षरं ह्रस्वं स्यात्, अन्ये अष्टौ वर्णाः गुरव इति शेषः, तदा तत् कवीन्द्रैः भुजङ्गप्रयातम् उक्तम् ।—"भुजङ्गप्रयातं चतुर्भिर्यकारैः" इति मञ्जरी ॥ २८ ॥

अयीति ।—अयि कृशोदरि ! सुमध्यमे ! तथैव तद्वदेव यत्र चतुर्थकं सप्तमकं तथा दशमं विरतिगश्च द्वादशम् इत्यर्थः गुरु, अन्यानि अष्टौ लघूनि इति शेषः, तत् द्रुतविलम्बितमिति उपदिश्यते ।—"द्रुतविलम्बितमाह नभौ भरौ" इति वृ० र० ॥ २९ ॥

प्रथमेति ।—हे कमलेक्षणे ! सुन्दरि ! यदि द्रुतविलम्बितकस्य आद्यतृतीययोः पादयोः प्रथमाक्षरं नास्ति, तदा सा हरिणप्लुता भवति । अस्यास्तु वृत्तेः प्रथमतृतीयपादयोः एकादशाक्षरतेति बोद्धव्या ।—"सयुगात् सलघू विषमे गुरू युजि नभौ भरकौ हरिणप्लुता" इति वृ० र० ॥ ३० ॥

उपेन्द्रेति ।—उपेन्द्रवज्रायाः चरणेषु सर्वेषु पादेषु चेत् यदि उपान्त्यवर्णाः एकादशवर्णा इत्यर्थः लघवः, परे द्वादश वर्णाः कृताः गुरव इति शेषः, तदा हे मदोल्लसद्भ्रूजितकामकार्मुके ! बुधाः विद्वांसः तत् वंशस्थविलं वदन्ति ।—"जतौ तु वंशस्थमुदीरितं जरौ" इति वृ० र० ॥ ३१ ॥

यस्यामिति ।—अशोक[illegible] [illegible] यस्याः हे तादृशि ! लावण्येन या

त्रयोदशाक्षरं वृत्तम्।

यस्यां प्रिये! प्रथमकमक्षरद्वयं
तुर्यं तथा गुरु नवमं दशान्तिमम्।
सान्त्यं भवेद्यतिरपि चेद् युगग्रहैः
साऽऽलक्ष्यतामसृतरुते! प्रभावती॥ ३३॥

आद्यं चेत् त्रितयमथाष्टमं नवान्त्यं
द्वावन्त्यौ गुरुविरतौ सुभाषिते! स्यात्।
विश्रामो भवति महेशनेत्रदिग्भि-
र्विज्ञेया ननु सुदति! प्रहर्षिणी सा॥ ३४॥

चतुर्दशाक्षरा वृत्तिः।

आद्यं द्वितीयमपि चेद् गुरु तच्चतुर्थं
तत्राष्टमञ्च दशमान्त्यमुपान्त्यमन्त्यम्।
अष्टाभिरिन्दुवदने! विरतिश्च षड्भिः
कान्ते! वसन्ततिलकं किल तं वदन्ति॥ ३५॥

हेला विलासविशेषः तया यो रतिरङ्गः तस्मिन् लालसा यस्याः तत्सम्बुद्धौ। यस्यां वृत्तौ वंशस्थस्य पादाः गुरुपूर्ववर्णकाः तेषां प्रथमे वर्णाः गुरवः इत्यर्थः, कवयः ताम् इन्द्रवंशां प्रचक्षते कथयन्ति।—"तच्चेन्द्रवंशा प्रथमाक्षरे गुरौ" इति मञ्जरी॥ ३२॥

इतः त्रयोदशाक्षरपादमाह, यस्यामिति।—हे प्रिये! अमृतरुते! सुधामधुर-भाषिणि! यस्यां प्रथमकमक्षरद्वयं प्रथमं द्वितीयम् इत्यर्थः, तुर्यं चतुर्थं, नवमं, दशान्तिमम् एकादशं, तथा सान्त्यम् अन्त्येन शेषेण सहितं त्रयोदशसहितम् इत्यर्थः गुरु, अन्यानि सप्त लघूनि इति शेषः, युगग्रहैः चतुर्भिर्नवभिश्च यतिरपि चेत् भवेत् सा प्रभावती आलक्ष्यताम्।—"जभौ सजौ गतिरुचिरा चतुर्ग्रहैः" इति मञ्जर्यादौ अस्याः अतिरुचिरेति नामान्तरं परिलक्ष्यते॥ ३३॥

आद्यमिति।—हे सुभाषिते! सुभाषिणि! हे सुदति! चेत् यदि आद्यं प्रथमं त्रितयं प्रथमं द्वितीयं तृतीयञ्च इत्यर्थः, अथ अनन्तरम् अष्टमं नवान्त्यं दशमम् इत्यर्थः, अन्त्यौ द्वौ द्वादशं त्रयोदशञ्च इत्यर्थः, गुरुविरतौ गुरवः विशेषेण रतौ गुरुयुतौ इत्यर्थः स्यात्, अन्ये षट् वर्णाः लघव इति शेषः, तथा महेशनेत्रैः त्रिभिरित्यर्थः, दिग्भिर्दशभिश्च वर्णैरिति शेषः, विश्रामः भवति, ननु तदा सा प्रहर्षिणी विज्ञेया।—"त्र्याशाभिर्मन-जरगाः प्रहर्षिणीयम्" इति मञ्जरी॥ ३४॥

चतुर्दशाक्षरपादं लक्षयति, आद्यमिति।—हे इन्दुवदने! कान्ते! यत्र आद्यं

पञ्चदशाक्षरा वृत्तिः ।

प्रथममगुरु षट्कं विद्यते यत्र कान्ते !
तदनु च दशमं चेदक्षरं द्वादशान्त्यम् ।
गिरिभिरथ तुरङ्गैर्यत्र कान्ते ! विरामः
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ॥ ३६ ॥

सप्तदशाक्षरा वृत्तयः ।

सुमुखि ! लघवः पञ्च प्राच्यास्ततो दशमान्तिमः
तदनु ललितालापे ! वर्णौ तृतीयचतुर्थकौ ।
प्रभवति पुनर्यत्रोपान्त्यः स्फुरत्कनकप्रभे !
यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा ॥ ३७ ॥
यदि प्राच्यो ह्रस्वः कलितकमले ! पञ्च गुरवः
ततो वर्णाः पञ्च प्रकृतिसुकुमाराङ्गि ! लघवः ।

प्रथमं, द्वितीयं, चतुर्थम्, अष्टमं, दशमान्त्यम् एकादशमित्यर्थः, उपान्त्यं त्रयोदशम्, अन्त्यं चतुर्दशञ्च चेत् गुरु, अन्ये सप्त वर्णाः लघव इति शेषः, अष्टाभिः षड्भिश्च विरतिर्विश्रामश्च भवति, तदा तं वसन्ततिलकं वदन्ति। किल निश्चये।—"ज्ञेयं वसन्ततिलकं तभजा जगौ गः" इति मञ्जरी ॥ ३५ ॥

पञ्चदशाक्षरपादं लक्षयति, प्रथममिति ।—हे कान्ते ! यत्र प्रथमं षट्कं प्रथमावधि षष्ठवर्णपर्यन्तमित्यर्थः, तदनु तदनन्तरञ्च दशमं, द्वादशान्त्यं त्रयोदशमित्यर्थः, च अक्षरम् अगुरु लघ्वित्यर्थः विद्यते, यत्र च गिरिभिः पर्वतैः अष्टाभिरित्यर्थः, अथानन्तरं तुरङ्गैः अश्वैः सप्तभिरित्यर्थः, विरामः यतिः भवतीति शेषः, हे कान्ते ! सा सुकविजनानां मनोज्ञा मनोहारिणी मालिनी प्रसिद्धा ।—"ननमयययुतेयं मालिनी भोगिलोकैः" इति वृ०र० ॥ ३६ ॥

अनतिप्रचलिततया षोडशाक्षरपादं विहाय सप्तदशाक्षरपादमाह, सुमुखीति ।—हे सुमुखि ! ललितालापे ! मधुरभाषिणि ! स्फुरन्ती कनकप्रभा काञ्चनप्रभा यस्याः तत्सम्बुद्धौ । यत्र छन्दसि प्राच्याः पूर्वे, पञ्च लघवः, ततः अनन्तरं दशमान्तिमः एकादशः, तदनु तदनन्तरं तृतीयचतुर्थकौ वर्णौ त्रयोदशः चतुर्दशश्चेत्यर्थः, पुनः उपान्त्यः षोडशश्च लघुः प्रभवति, अन्ये अष्टौ गुरव इति शेषः, रसैः षड्भिः, वेदैश्चतुर्भिः, अश्वैः सप्तभिश्च यतिर्विश्रामोऽपि भवतीति शेषः, सा हरिणीति स्मृता कथिता ।—"नसमरसला गः षड्वेदैर्हयैर्हरिणी मता" इति मञ्जरी ॥ ३७ ॥

त्रयोऽन्ये चोपान्त्याः सुतनुजघने ! भोगसुभगे !
रसैरीशैर्यस्यां भवति विरतिः सा शिखरिणी ॥ ३८ ॥
द्वितीयमलिकुन्तले ! गुरु षडष्टमद्वादशं
चतुर्दशमथ प्रिये ! गुरु गभीरनाभिह्रदे ! ।
सपञ्चदशमान्तिमं तदनु यत्र कान्ते ! यतिः
गिरीन्द्रफणभृत्कुलैर्भवति सुभ्रु ! पृथ्वीति सा ॥ ३९ ॥
चत्वारः प्राक् सुतनु ! गुरवो द्वौ दशैकादशौ चेत्
मुग्धे ! वर्णौ तदनु कुमुदामोदिनि ! द्वादशान्त्यौ ।
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते ! विरामो
मन्दाक्रान्तां प्रवर-कवयस्तन्वि ! तां सङ्गिरन्ते ॥ ४० ॥

यदीति ।—हे कलितकमले ! गृहीतपद्मे ! पद्मविलासिनि इत्यर्थः, प्रकृत्या स्वभावेन सुकुमारं सुकोमलम् अङ्गं यस्याः तत्सम्बुद्धौ । हे सुतनुजघने ! शोभनाङ्गजघने ! भोगसुभगे ! सम्भोगसुखदायिनीत्यर्थः, यस्यां प्राक् प्रथमः, ह्रस्वः लघुरित्यर्थः, ततः पञ्च गुरवः, ततः अनन्तरं पञ्च वर्णाः लघवः, अन्ये उपान्त्याश्च त्रयः चतुर्दशपञ्चदशषोडशा इत्यर्थः लघवः, अन्ये त्रयो गुरव इति शेषः, तथा रसैः षड्भिः, ईशैः एकादशभिः विरतिः, सा शिखरिणी भवति ।—"रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी" इति मञ्जरी ॥ ३८ ॥

द्वितीयमिति ।—हे अलिकुन्तले ! भ्रमरनीलकेशि ! गभीरनाभिह्रदे ! सुभ्रु ! प्रिये ! कान्ते ! यत्र द्वितीयं षडष्टम-द्वादशं षष्ठम् अष्टमं द्वादशञ्चेत्यर्थः गुरु, अथ अनन्तरं चतुर्दशं तदनु सपञ्चदशमम् अन्तिमञ्च पञ्चदशं सप्तदशञ्चेत्यर्थः गुरु, अन्ये दश वर्णाः लघव इति शेषः, गिरीन्द्रफणभृत्कुलैः अष्टाभिः नवभिश्चेत्यर्थः यतिः, सा पृथ्वीति भवति ।—"जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः" इति मञ्जरी ॥ ३९ ॥

चत्वार इति ।—हे सुतनु ! मुग्धे ! कान्ते ! यत्र प्राक् प्रथमं चत्वारः वर्णाः गुरवः, तदनु तदनन्तरं चेत् यदि दशैकादशौ द्वौ दशमः एकादशश्चेत्यर्थः वर्णौ, द्वादशान्त्यौ त्रयोदशचतुर्दशश्चेत्यर्थः, तद्वत् तथा अन्त्यौ षोडशः सप्तदशश्चेत्यर्थः, गुरू भवत इति शेषः, अन्ये सप्त लघव इति शेषः, तथा युगरसहयैः चतुर्भिः षड्भिः सप्तभिश्चेत्यर्थः विरामः, हे कुमुदामोदिनि ! तन्वि ! प्रवरकवयः कविश्रेष्ठाः तां मन्दाक्रान्तां सङ्गिरन्ते प्रतिजानते । "समः प्रतिज्ञाने" (१।३।५२ पा०) इत्यात्मनेपदम् ।—"मन्दाक्रान्ता जलधिषडगैः म्भौ नतौ ताद् गुरू चेत्" इति

एकोनविंशत्यक्षरा वृत्तिः ।

आद्यं यत्र गुरु त्रयं प्रियतमे ! षष्ठं ततश्चाष्टमं
सन्त्येकादशतस्त्रयस्तदनु चेदष्टादशाद्यान्तिमाः ।
मार्त्तण्डैर्मुनिभिश्च यत्र विरतिः पूर्णेन्दुबिम्बानने !
तद्वृत्तं प्रवदन्ति काव्यरसिकाः शार्दूलविक्रीड़ितम् ॥ ४१ ॥

एकविंशत्यक्षरा वृत्तिः ।

चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोऽपि
द्वौ तद्वत् षोड़शाद्यौ मृगमदतिलके ! षोड़शान्त्यौ तथान्त्यौ ।
रम्भास्तम्भोरुकान्ते ! मुनिमुनिमुनिभिर्दृश्यते चेद्विरामो
बाले ! वन्द्यैः कवीन्द्रैः सुतनु ! निगदिता स्रग्धरा सा प्रसिद्धा ॥ ४२ ॥

इति श्रीकालिदासविरचितः श्रुतबोधः ।

अत्रापि सर्वत्र गणाक्षररूपतया सप्तदशाक्षर-चरणानन्तरमेव एकोनविंशत्यक्षर-पादमाह, आद्यमिति ।—हे पूर्णेन्दुबिम्बानने ! पूर्णचन्द्रमुखि ! प्रियतमे ! यत्र आद्यं त्रयं षष्ठं ततश्च अष्टमं गुरु, तदनु एकादशतः एकादशात् परं चेत् त्रयः द्वादश-त्रयोदशचतुर्दशा इत्यर्थः, तथा अष्टादशाद्यान्तिमाः अष्टादशस्य आद्यौ अन्तिमश्च षोड़शः सप्तदशः एकोनविंशश्चेत्यर्थः, गुरवः भवन्तीति शेषः, अन्ये अष्टौ वर्णाः लघव इति शेषः, यत्र च मार्त्तण्डैः सूर्य्यैः द्वादशभिरित्यर्थः, मुनिभिः सप्तभिश्च विरतिर्विरामः ; काव्यरसिकाः तत् वृत्तं शार्दूलविक्रीड़ितं प्रवदन्ति ।—"सूर्य्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीड़ितम्" इति मञ्जरी ॥ ४१ ॥

एकविंशत्यक्षरपादमाह, चत्वार इति ।—हे मृगमदतिलके ! रम्भास्तम्भौ इव यौ ऊरू ताभ्यां कान्ता मनोहरा तत्सम्बुद्धौ । बाले ! सुतनु ! शोभनाङ्गि ! यत्र प्रथमं चत्वारो वर्णाः षष्ठकः सप्तमः तद्वत् षोड़शाद्यौ द्वौ चतुर्दशः पञ्चदशश्चेत्यर्थः, षोड़शान्त्यौ सप्तदशः अष्टादशश्चेत्यर्थः, तथा अन्त्यौ विंशः एकविंशश्चेत्यर्थः, अलघवः गुरव इत्यर्थः, अन्ये नैव लघव इति शेषः, तथा सप्तभिः सप्तभिः सप्तभिः चेत् यदि विरामः दृश्यते, तदा वन्द्यैः कवीन्द्रैः स्रग्धरा प्रसिद्धा सा निगदिता उक्ता ।—"म्रभ्नै-र्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्" इति मञ्जरी ॥ ४२ ॥

इति पण्डितकुलपतिना श्रीमज्जीवानन्द-विद्यासागर-भट्टाचार्य्येण विरचिता श्रुतबोधव्याख्या ।

समाप्तोऽयं ग्रन्थः ।

প্রিণ্টর—বি, বি, মুখার্জি,
২ নং রমানাথ মজুমদার্স ষ্ট্রীট, কলিকাতা।